112603

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

112603

वर्षम् ४९

❀

अङ्कः १

❀

सम्पादकः
गो० न० वैजापुरकरः

❀

जनवरी
१९७३

❀

वार्षिक-मूल्यम्
५) रूप्यकाणि

❀

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

❀

तुषार !

तुषार ! तावत तृणविग्रहेषु पराक्रमं दर्शय जाड्यभूमे।
तीक्ष्णस्य यावन्न रवेस्त्वदास्ये पादप्रहारः प्रथिमानमेति ॥ १ ॥
तव क्षणस्तावदयं तुषार ! कियान् ? निशाशूर ! विभातमेति।
देवस्य तस्य स्मर तीव्रचारं यद्दर्शनात्त्वं भवितासि लुप्तः ॥ २ ॥

वसन्तागमोपालम्भः

पुष्यत्सु सिद्धार्थमुखेषु हेम्नां,
वर्षत्सु लक्ष्मीं वशयत्सु नेत्रम्।
तुषारपातं रचयन् स एव,
किंस्विद्वसन्तागम ! वर्तसे त्वम् ॥
कण्ठध्वनेः सौभगमादधाने,
रसालपुष्पे किल कोकिलानाम्।
अकाण्डवर्षाऽशकुनं न कुर्वन्,
भूया वसन्तागम ! लोकवन्द्यः ॥
आशालतासूत्कलिकासु तावन्
मधुव्रतानामपि मा विमुञ्चन्।
वर्णोपलान् वर्धय भूमिभाग्यं,
वसन्त-शोभागम ! सद्विलासैः ॥
"सूर्योदयः" संनिहितः स सौम्यां
दिशां प्रसन्नां विदधत् तदीयम् ॥
मुखं लसत्कुङ्कुमरश्मि चूर्णै-
र्लिम्पन् वसन्तागम ! सज्जितः स्याः ॥

—कविवराः श्री लक्ष्मीनारायण द्विवेदाः

ग्राहका विनिवेद्यन्ते--

अनेनाङ्केन 'सूर्योदय'स्य ४९तमं वर्षं प्रारभ्यते । अद्यापि नैकैः कृपालुभिः प्रत्नग्राहकैः वार्षिकमूल्यं ५) रुप्यकाणि न प्रेषितानि । अतोऽङ्कप्राप्तेः समकालमेव तन्मूल्यं धनादेशेन (मनिआर्डर) प्रेषणीयम् । नव्यश्चैको ग्राहको विधेय इति ।

—व्यवस्थापकेन

अनुक्रमः

●

प्रपानकः	**पत्रपुटम्**	**परिवेषकः**
अयि वाणि !	१	श्री वंशीधर पाण्डेयः
श्रीमहर्षि-ज्ञानानन्द-चरितम्	२	श्री स्व० विन्ध्येश्वरीप्रसाद शास्त्रिणः
अस्माकम् एकोनपञ्चाशत्तमं वर्षम्	३	सम्पादकीयम् (अग्रलेखः)
साकेते प्रादेशिक-संस्कृतविद्यालयाध्यापकानां सम्मेलनम्	४	,, ,,
देवेन्द्रपदं गताश्चक्रवर्तिनः	५	सम्पादकीया टिप्पणी
पूर्णचन्द्रो विलुप्तः	६	,, ,,
(१) कल्याणोत्कर्ष-सत्पथम्	७	श्री मुकुटबिहारी लाल
उदात्तादि-स्वराणां निष्पत्तिस्थानानि	९	श्री सुरजनदास स्वामिनः
हा पूर्णचन्द्रोऽस्तमनं जगाम	१३	श्री शिवजी उपाध्यायः
किरातार्जुनीये शृङ्गार-रसः	१४	श्री डॉ० सुषमा कुलश्रेष्ठ
कालिय-विजयं महाकाव्यम्	१६	श्री वायुनन्दन पाण्डेयः
(४) प्राचीन-भारतीयाः क्रीडाः	२०	श्री डॉ० नरेश झा शास्त्री
(८) ध्वनि-वैभवम्	२२	श्री रवीन्द्रकुमार सिद्धान्तशास्त्री

●

112603

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४९ वर्षे] वाराणसी, मार्गशीर्षः २०२९ वै० : जनवरी १९७३ ई० [१ अङ्कः

H.L.
SURIOYODAYA
1973
G.K.V
Lib
HARDWAR

अ
मम
अयि देवि

त्वयि सर्वभावतोऽहं विहर विषाधिकान्तु।
विषयान् विहाय मान्ये परिपाहि पाहि दान्तः॥ २॥

नवसूर्यकोटिकान्ते करुणाकरि प्रसीद।
तव नास्ति भक्तलोके करुणाभयस्य चान्तः॥ ३॥

कलहंसगामिनीं त्वां वरमुद्रिकां दधानाम्।
वरभूषणाञ्चिताङ्गीं प्रणमामि भक्ततान्तः॥ ४॥

अयि सर्वशास्त्रमन्त्रे निगमागमस्वतन्त्रे।
कुरु सार्थशास्त्रवाहं जडतां धुनीहि चान्तः॥ ५॥

इति प्रार्थनां मदीयां सुफलां विधेहि मातः।
दययस्व मे यथा स्यां सरसो निरस्तमान्तः॥ ६॥

— श्री वंशीधरशास्त्री पाण्डेयः —

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

—स्वर्गीयाः श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः—

(एकोनविंशे सर्गे)

११. मृत्योर्लोकोऽयं तथा प्रेतलोको नारक्यो वै पैत्रिकोऽसौ तथैव ।
चत्वारस्ते सन्ति भूलोकभागाः सद्भिः सर्वैः शास्त्रकारै - र्निदिष्टाः ॥
१२. भूभृद्ग्रामा - ऽऽराम - चैत्याब्ध्यरण्यै - र्नीप - क्षौमग्रन्थि - किञ्जल्कतुल्यैः ।
गोलाकारः सर्वतो वेष्टितोऽयं भूस्थः संसारो मतो मृत्युलोकः ॥
१३. भूमेर्मध्याकर्षणाभ्यन्तरेऽस्मिन् प्रेतावासः प्रेतलोकश्चकास्ते ।
अस्या भूमेर्दक्षिणे नारकाख्यः पैत्रो लोको नैर्ऋते लालसीति ॥
१४. आत्महन्ताऽग्निदाहादिभिः कारणै - र्देह - दारा - ऽऽत्मजाद्येषु चासक्तितः ।
स्वं जहीते शरीरं च यो मानवो मानवोऽशान्तिद - प्रेतलोकं स याति ध्रुवम् ॥
१५. नरकलोकमतीव भयङ्करं व्रजति पापपरायण - मानवः ।
बहुविधा निजदुष्कृतियातना अनुभवन् परिरोदिति दुःखितः ॥
१६. महारौरवो रौरवश्चाम्बरीषो महाकालकः कालकः कुम्भपाकः ।
असीपत्रकाद्या अनेके विभागा श्रुतौ विश्रुता आसते नारकीयाः ॥
१७. यमाधिष्ठितश्चान्वितः सर्वसौख्यैः पितुर्लोक उक्तः स वै स्वर्गतुल्यः ।
वियुक्तानसुभ्यः पितॄन् हिन्दवः स्वान् नयन्ते नराः श्राद्धदानादिभिर्यम् ॥
१८. भूलोकेऽस्मिन् राजमानाः समन्तान् सप्तद्वीपाः सन्ति येष्वादिमेऽस्मिन् ।
वर्षाणां साध्वस्तितताऽऽस्ते नवानां विज्ञातव्या आर्यमिश्रैरधस्ते ॥
१९. जम्बु-प्लक्षौ शाल्मलि-वैंकुशश्च क्रौञ्चः शाकः पुष्करश्चेति सप्त ।
द्वीपाश्चैते सप्तभिस्तैः समुद्रैर्मध्ये मध्ये चादृताः सन्ति सर्वे ॥
२०. लवणेक्षु सुराघृतैस्तथा ह्यपि दध्ना पयसोदकेन च ।
सततं परिवेष्टिताश्च तद् गुणवातावरणैश्च ते क्रमात् ॥

(क्रमशः)

सम्पादकीयम्

अस्माकम् एकोनपञ्चाशत्तमं वर्षम्

मूलतः सच्चिदानन्दस्वरूपिणो विश्वनाटक-सूत्रधारस्य सर्वशक्तिमतः सर्वज्ञब्रह्मणः परमयाऽनुकम्पया 'सूर्योदयो'ऽयम् अष्टचत्वारिंशद्-वार्षिकान् सूर्योदयान् विस्तार्य अङ्केनानेन एकोनपञ्चाशद्वर्षीयं 'सूर्योदयं' जगति प्रसार्य मोहनिशाप्रभवं दुःख-दैन्या-ऽज्ञाना-ऽऽधि-व्याधि-विविधाऽभावात्मकं तमोऽपनोद्य ज्ञानालोकं प्रसारयितुं तत्रभवतां हृत्पुण्डरीकं विकासयत् विद्योतते। सुदुर्लभं सौभाग्यमेतावज्जीवनधारणात्मकं पत्रेणानेन समनुभूयते, तत्र परोक्षो हेतुर्भगवतोऽहैतुकी कृपा चेत् प्रत्यक्षो हेतुः किल पत्रस्यास्य लेखन-वाचन-प्रकाशनादिमुखेन साहाय्यं विदधतां सुगृहीतनामधेयानां विदुषां पाठकानां भारतधर्ममहामण्डलस्य केन्द्रीय-शासकानाञ्च निरतिशयः स्नेह एव। अस्या उपकृते उऋणीभवनस्य सामर्थ्यं स्वस्मिन्नपश्यन्नयं तान् सर्वान् प्रत्यक्ष-परोक्षहेतुभूतान् यथायथं प्रणम्य अभिनन्द्य च स्वान्तस्तोषं समनुभवति। प्रार्थयते च एवमेव तैः स्व-स्वविषयकं साहाय्यमक्षुण्णं विदधद्भिः पुरुषायुषाऽयमं सम्भावनीय इति। अयमपि वचनबद्धो भवति यद् यथैतावत्कालं सुलभसौविध्यानुरूपं तत्र भवतां सेवायै सन्नद्धोऽभवत्, ततोऽन्यूनं सति सौविध्येऽधिकमपि भवत्सेवासु बद्धपरिकरः समुपतिष्ठेत।

अग्रिमं वर्षं किल पत्रस्यास्य स्वर्णजयन्ती-वर्षम्। तदाऽस्य जीवनस्य पूर्वार्धः परिपूर्णतां याति। शुभावसरस्यास्य किमपि स्मारकभूतं वस्तु भाव्यमित्यत्र न जातु विप्रतिपत्त्यवसरः। तदपि विशेषाङ्करूपमेवेत्येतावत्येव अस्माकं मर्यादा। स्थायिरूपत्वमपि तस्यैव सम्भवि। तत्रापि यदि विशेषाङ्कोऽयं तादृशः स्थायिविषयसंवलितः सुपरिष्कृतश्च स्यात्तदैव। विषयेऽत्र विशेषतोऽग्रिमेऽङ्के दार्ढ्येन वक्तुं प्रभविष्यामः। तथापि अस्माकं मनोदयोऽयं यदयं विशेषाङ्को 'भारतीय-कला'-विशेषाङ्को भाव्यः। अत्र 'भारतीय-कला' - पदेन कलाविभागान्तर्गताः चतुष्षष्ठिकला एव नाभिमताः। प्रत्युत नव्यभाषया 'आर्ट'संकाये ये विषयाः परिगण्यन्ते, ते सर्वेऽत्र समुपादेयाः। अर्थात् साम्प्रतम् 'आर्ट-संकाये' विश्वविद्यालयेषु ये किल नव्याः प्रत्नाश्च ज्ञानविभागा गृह्यन्ते, प्रातिस्विकरूपेण तत्तद्विभागस्य पृष्ठभूमिः, ऐतिह्यम्, तत्र विवेचितानां तत्त्वानां संक्षिप्तोऽपि मूलग्राही परिचयः, साम्प्रतञ्च तेषु यावद् गवेषणं विकासश्च दृश्यमानः, सर्वमिदं सङ्कलय्य पाठकानां करसरोरुहेषु उपायनीकरणीयं स्वर्णजयन्ती - विशेषाङ्करूपेण इत्यस्माभिः काम्यते। तत्रापि आग्रहोऽयं यदेतादृशम् 'आर्ट'-परपर्यायस्य कलाविभागीय - तत्तद्विषयस्य विवेचनं विभिन्न - विश्वविद्यालयेषु तत्तद्विषयं पाठयतां प्राध्यापकानामेव लेखन्या प्रसृतं स्यात्। तेन तस्य प्रामाण्यविषये कीदृशोऽपि विषयो न समुपतिष्ठेत।

संस्कृत - मासिकपत्रस्य विशेषाङ्के नव्यस्यास्य विषयस्य समुपन्यसनेऽयमेवाभिप्रायो यत्संस्कृतज्ञास्तैस्तैर्नव्यैर्विषयैः परिचिता भवेयुः। सहजतः कोऽपि विद्वान् तान् विषयानादातुं नाभिलषति। सति सम्भवे विषयविशेषमेव उपाददीत। सर्वेषां विषयाणां 'सर्वदर्शनसङ्ग्रह'वत् एकत्र सङ्कलने तेषां सर्वेषां सामासिकः परिचयः सुकरो भवेत्। इत्थमेभिर्विषयैः प्रत्नानां परिचयाभावरूप आक्षेपः सहजत एव

परिमार्जितः स्यात्। नव्यज्ञानधारायाश्च सङ्गमोऽयं स्वास्थ्याय तोषाय च प्रभवेत्। अत एव चतुर्दश-विद्यास्थानानां परिचयात्मकस्य विशेषाङ्कस्य कल्पनमितः परमेव बुद्ध्याऽस्माभिर्निर्ध्यातम्।

किन्तु मनोनीतस्यास्य विशेषाङ्क-विषयस्य यथावत्परिपूरणं प्राच्य-प्रतीच्यविद्याविभूषितानां विदुषामैकान्तिके साहाय्ये एव निर्भरम्। तदर्थं वयं तानद्यैव उपनिमन्त्रयामः। तैरपि कल्पनाया अस्या यथा व्यवहारानुरूपः स्थायिज्ञानलाभप्रदश्च परिष्कारो विचारेण निर्णीयेत, तेन वयमवश्यं कृपया सूचनीयाः, येन अपेक्षितपरिष्कारेण वस्त्विदं सर्वसुन्दरं भवेत्। विषयेऽस्मिन् केन्द्रीयशिक्षाधिकारिणाम्, विशेषतः राष्ट्रिय-संस्कृतशिक्षासंस्थानाधिकारिणां चेतांस्यावर्जयामो यदस्माकमियं योजना कियती समुपयोगिनी स्यादिति सूचनीयम्। यदीयं तेषां चेतस्सु पदमादधीत तदा तदर्थमपेक्षितं सविशेषम् आर्थिकादिकं सर्वविधं सौविध्यं शासनतः सुलभीकर्तुमपि तैः प्रयतनीयम्। अद्यास्मिन् विषये इत्येवालं मन्यामहे।

अन्ते सर्वेभ्यः पाठकेभ्यः सप्रश्रयं निवेदयामो यद् भवद्भिः पत्रस्यास्य एकैको नव्यो ग्राहकः प्रापणीयो येन पत्रमिदं यथार्थतो जनताजनार्दनस्य लोकतन्त्र-प्राणपदस्य बले एव प्रतिष्ठितं भवेत्, यच्च कस्यापि पत्रस्य कृते परं भूषणं मन्यते। मान्याः व्यावसायिनश्चापि निवेद्यन्ते यत्सर्वेभ्यः पत्रेभ्यो विपुलं विज्ञापनसाहाय्यं वितरद्भिर्भवद्भिः प्रतिवर्षमेकवारमपि पूर्णपृष्ठात्मकं विज्ञापनं संस्कृतप्रचारात्मकपुण्यकार्यकारिणेऽस्मै वितीर्येत तदापि पत्रमिदम् अर्थाभावेन लघुतमरूपेणैव जीवनधारणाय विवशं न भवेत्, निर्ध्याताश्च विशालकाया योजनाः सफलयितुं प्रभवेत्। केन्द्रीय-शासनं प्रादेशिक-शासनानि चापि समनुरुद्ध्यन्ते यत्तैः एकोनपञ्चाशद्वर्षेभ्यः संस्कृतसेवामातन्वतेऽस्मै पत्राय अन्यपत्रेभ्यः सविशेषम् आर्थिकादि सर्वविधं साहाय्यं विधाय विपुलाविषय-परिबृंहित-कलेवरेण सेवाक्षममेतद्विधीयताम्। शासनानुदानित-पुस्तकालयेषु पत्रस्यास्य एकैकां प्रतिं मूल्येन क्रीत्वा प्रचारयितुं च शासनैः प्रयतितव्यम्। भारतधर्ममहामण्डलं पुनः स्वीयया सीमितशक्त्या पत्रमेतदद्यावधि परिचालयत्येव। तत्रापि महामण्डल-सञ्चालिकानां पूज्यश्री विद्यादेवी महाभागानां संस्कृतविषयकं निरतिशयं प्रेमैव निदानम्। अन्ते विज्ञा विद्वांसोऽपि सुदीर्घमनन - तपःप्रसूतानि फलान्यस्मै लेखादिद्वारेण उपायनीकर्तुं सप्रश्रयं प्रार्थ्यन्ते ; यतो हि तदन्तरेण सर्वेषां सर्वविधमपि साहाय्यं वन्ध्यं स्यात्। अन्ते भगवन्तमुमारमणं प्रार्थयामो यत्स सर्वेषामेतेषां शुभेऽस्मिन् कार्ये मतिं संयोजयत्विति।

साकेते प्रादेशिक-संस्कृतविद्यालयाध्यापकानां सम्मेलनम्

जनवरीमासस्यैव २६-२७-२८ दिनाङ्केषु साकेते प्रादेशिक-संस्कृतविद्यालयाध्यापक-समितेश्चतुर्थमहाधिवेशन-प्रसङ्गे प्रदेशस्य ५४ जनपदेभ्यः संस्कृतविद्यालयाध्यापकाः विद्वांसश्च सम्मिलिता भविष्यन्ति। अवसरेऽस्मिन् विराट् संस्कृत-सम्मेलनमपि समायोजितमस्ति यत्र भारतस्य विभिन्नप्रदेशेभ्योऽपि नैके लब्धप्रतिष्ठा विचारका विद्वांसश्च समागमिष्यन्ति। सामान्यतः सकृद्दर्शनेन महाधिवेशनमिदं प्रदेशीय-समस्त-संस्कृतविद्यालय-महाविद्यालयेषु अध्यापयतां विदुषामपि कृते समाजवाद-जीवातुभूतस्य 'समान-कार्याय (समानशिक्षायै) समानवेतनादि-सुविधाजात'रूपस्य नियमस्य प्रादेशिक-शासनद्वारा कार्यान्वयनायैव सर्वं भरं निक्षिपति, यच्चाद्यावधि निर्ममं समुपेक्ष्य राज्यशासनेन न केवलमेते एव समुत्पीडिताः,

प्रत्युत मानवतायाः कृतेऽपि त्रपाकरं कृत्यं कृतम्, भारतीयसंस्कृतेश्च मूलोच्छेदकः प्रयासः प्रारब्धः। महाधिवेशने एतद्विषये यत्किमपि भविष्यति तत्र महाधिवेशनोत्तरमेव विवेचयिष्यामः।

अद्य पुन एतादृशां लब्धकीर्तीनां विदुषां सहजतः सुलभे समवाये महाधिवेशन-कर्णधारैः शिक्षापद्धति-परिष्करणविषये संस्कृतशिक्षापद्धतेः को दायः संभवेदित्यत्र गभीरां विद्वद्गोष्ठीं संयोज्य निर्णयमित्यस्माकं साग्रहं निवेदनम्। साम्प्रतमस्माकं देशे शिक्षाक्षेत्रे महानुपप्लवः प्रस्तुतो वर्तते। निशितशस्त्रभृत् कश्चित् सैनिकवरो यथा राष्ट्राय, समाजाय वा भयङ्करो न भवेत्तथाऽद्य एकश्छात्रः सम्भूतः। विश्वविद्यालयाः, शिक्षासंस्थानानि रणाङ्गणानि संनिवृत्तानि येन सामान्यजनजीवनमपि निरापदं न वक्तुं शक्यम्। नूनं सर्वस्यास्य विपज्जातस्य मूलं शासनस्य शिक्षादिविषयान् समुपेक्ष्य केवल राजनीतौ, दलगतराजनीतौ आपादचूलं बुडनमेव। स्वातन्त्र्यस्य पञ्चविंशतिवर्षेषु तेन स्तोकमपि न विचारितं यत् प्रचलिता शिक्षापद्धतिः वैदेशिकशासकैः केवलं स्वशासनस्थैर्यंलक्ष्यं पुरस्कृत्यैव निर्धारिता। स्वतन्त्रे भारते तस्या एव पोषणाय प्रयतनमहेः पयःपानायितमेव सम्भूत्। वैदेशिकानामाङ्ग्लशासकानां महत्या कृपया (?) भारतीयैरिदं सर्वथा विस्मृतं यद् राष्ट्रिया शिक्षा न्यायपालिकावत् सर्वतः शासनानियन्त्रितैव भाव्या। सा केवलं राष्ट्रस्य तपस्विनां तटस्थानामेव हस्ते भाव्या। सा हि विकेन्द्रितैव श्रमाधारिता स्वावलम्बिनी चेत् तदैव स्वकीयं शोभनं प्रभावं समुत्पादयितुं प्रभवेत्। किन्तु स्वातन्त्र्यलाभानन्तरमपि राष्ट्रनेतृभिर्विषयेऽत्र ध्यानं न दत्तम्। प्रत्युत पूर्वप्रभुभिः समनुसृतः पन्था एव समवलम्बितः। तामेव शिक्षापद्धतिं समवलम्ब्य शिक्षाप्रसारकार्यं प्रारब्धम्। फलतो दोषपूर्णा सा शिक्षापद्धतिर्बहुमुखीना भूत्वाऽद्य राष्ट्रस्य कृते महतो अभिशापभूता संवृत्तेति सौरालोकायितम्।

सौभाग्यं देशस्य यद्बहोः कालानन्तरं सुबहु धनजनादिक्षयोत्तरमस्माकं नेतॄणां दृष्टिः पूर्वतनीयाया अस्याः शिक्षापद्धते-र्दोषपूर्णत्वे दृढमावर्जिताऽद्य दृश्यते। अत एव केन्द्रीयनेतॄणां प्रधानमन्त्रि-शिक्षामन्त्रिप्रभृतीनां राज्यीयाधिकारिणां च स्वर आमूलचूलं शिक्षापद्धतेः परिष्कारविषयकः श्रूयते। तथापि कीदृशी शिक्षापद्धतिर्नव्या निर्मीयेत, कीदृशी च सा निर्दुष्टा, राष्ट्रमानबिन्दुरक्षणे क्षमा भवेदिति भविष्यगर्भमेव। संस्कृतशिक्षा तदीया प्राचीनतमा पद्धतिश्चात्र विषये नूनं विशिष्टं साहाय्यं विधास्यतीत्याशास्यते। अतोऽस्मिन् महाधिवेशने समवेतैर्विद्वद्भिरत्र विषये प्रामुख्येन विचारः प्रवर्तनीयः। यदि आवश्यकं चेत् तदनन्तरमपि यत्र कुत्रचन उपवेशनं विधाय विषयेऽत्र निर्णायकं मतं प्रचारणीयम्। यदि महाधिवेशनमस्य राष्ट्रियमहत्त्वपूर्णप्रश्नस्य उपक्रममपि कुर्यात्तदा तन्महाधिवेशनस्य साफल्यस्य प्रमुखं पदं भवेत्। स्वल्पेनानेन सङ्केतेन सह वयमस्य महाधिवेशनस्य हार्दिकं शुभाशंसनं विदधामः। अग्रिमेऽङ्के सम्मेलनोपलब्धिविषये विचारयिष्याम इति।

देवेन्द्रपदं गताश्चक्रवर्तिनः

दिसम्बरमासस्य विगतः पञ्चविंशतितमो (२५) दिनाङ्कोऽस्माकं भारतीयानां कृते महत्या क्षतेर्दिवसो वक्तुं शक्यते। अशुभेऽस्मिन् दिने चक्रवर्तित्वमुपसंहृत्य देवेन्द्रपदेऽपि चक्रवर्तित्वमासादयितुं निर्ममितोनिर्गता राजगोपालाचार्याः। १८७८ मितेशवीये दिसम्बरमासीयेऽष्टमे दिने जनिं भजतोऽस्य महापुरुषस्य पित्रा साध्वेवोक्तं यत् 'अयं बालस्तस्मिन् मुहूर्ते समुत्पन्नो यस्मिन् रामकृष्णः, शङ्कराचार्यः, रामानुजश्च समभूत्। अस्य जन्माङ्गे तेषां महाविभूतीनां सर्वे गुणाः सन्निहिताः' इति। भारतराष्ट्रस्य अन्तिमं 'गवर्नर ज़ेनरल' पदं विभूषयताऽनेन व्यवहारत आत्मनश्चक्रवर्तित्वं प्रदर्शितम्। गुणतः स्वभावत-

श्चापि ते नूनं चक्रवर्तिन एवासन्। कीदृश्यपि विपरीता विरुद्धा वा परिस्थितिर्भवतु, स्वीयमतिप्रसूतस्य भावस्य निर्भीकमुपस्थापनं कस्यापि चक्रवर्तिन एव अनितरसाधारणो गुणः। 'क्रिप्स-मिशन' समये एव पाकिस्तानस्वीकृतिविषयकं स्वात्मनोऽभिमतं तथा प्रकाशयद्भिः एभिरञ्जसा चक्रवर्तित्वं निर्व्यूढम्। पर्यायतो भारतीयराजनीतौ भीष्म-कौटिल्यसदृश्याः सत्याधृताः सूक्ष्मतमा उद्भावनाः विवेचकदृशा दर्शकाः केवलं राजगोपालाचार्या एव अद्यतनीये युगे भारतीयनेतृषु वक्तुं शक्यन्ते। सहैवानेन ते भारतीय-चिन्तनपरम्परायाः सर्वथा प्रतीकभूताः। कामं तैः साम्प्रतिकविचारधाराभिभूतैः तथाकथितं 'हरिजन-सुधारा'परपर्यायम् अन्त्यजसमुन्नयन-भावनामात्राभिभूतममर्यादितं महाभियानं सञ्चालितम्, यत्रास्माकं तेभ्यो नितरां मतभेदः सर्वदा जागरिष्यत्येव। तथापि तेषां तटस्था लेखनी स्वतन्त्रं च भाषणसौष्ठवं सदैव भारतीयसंस्कृतिमेव अनुरुणद्धि। स्वयमेव तैरुक्तमास्ते— 'स्वीयदेशवासिनां कृते मदीया सर्वोत्तमा सेवा स्वदृष्ट्या रामायण-महाभारतयोः पुनःकथनमेव। जीवनस्य सान्ध्ये काले एतदेव मे आनन्दस्य परमं स्रोतः। राजनैतिक-राष्ट्रिय - कार्यकर्तृत्वं पदग्रहणं कठोरश्रमश्च कामं प्रशस्तानि वस्तूनि स्युः। परं मामकीनोऽयमनुभवो यदेतान् विहाय स्वीयभूमिभूतीनां सतां सत्सङ्गः, तेषां साहाय्यकरणं (येन ते देशवासिभ्यः सदुपदेशव्रतमक्षुण्णं परिचालयेयुः) ततोऽप्यधिकं महत्त्वपूर्णं कर्म।' अन्यत्र तैरुक्तम्— 'मानवताप्रगत्यै सत्यपालनमावश्यकम्। मानवीयेषु पञ्चसु इन्द्रियेषु सत्यवादिता किल षष्ठमिन्द्रियम्। तत्रैव मानवमात्रस्य एकत्र संग्रथनस्य महाशक्तिः।' चक्रवर्ति राजगोपालाचार्याणां गुणवर्णनं कदाप्यशेषितं भवितुं न क्षमम्। समासतः समस्तस्य भारतस्य निष्पक्षविचारक-चिन्तक-साहित्यिक-दूरदर्शि-राजनयिकाद्या विविधा भूमिकाः साफल्येनाभिनेतुं तेषां सदृशः कोऽप्यद्य भारतीयो सुदीर्घमन्वेषणेनापि नोपलब्धुं शक्यः। केवलमेकस्य तस्य सत्त्वेनैव सर्वमेतत् निरुह्यते स्म। सोऽद्यास्माकं पुरतो निर्ममं गतोऽस्मान् विहायैत्यतोऽधिका क्षती राष्ट्रस्य का स्यात्? किन्तु प्रायो मानुषमायुरशेषतो भुक्त्वा सर्वविधञ्च कीर्तिसन्दोहमर्जयित्वा यशश्शरीरेण अमरास्तेऽस्मान् भारतीयान् स्वीयकार्येण साहित्येन च नूनं समये समये प्रेरणाः प्रदास्यन्तीत्याशास्महे। एभिरेव शब्दैस्तेषां व्यक्तित्वायास्माकं सप्रश्रयमयं श्रद्धाप्रसूनाञ्जलिः।

पूर्णचन्द्रो विलुप्तः

वाराणसेय - संस्कृतविश्वविद्यालयस्य सम्मानितैः प्राध्यापकैः पूर्णचन्द्राचार्यैरपि जनवरीमासस्य १६ दिनाङ्के काशीलाभः कृतः। चक्रवर्ति राजगोपालाचार्यैः मानवपूर्णायुषः केवलं षड्वर्षाण्येव अन्तरितानि। अर्थात् ९४ तमे वर्षे ते स्वर्गताश्चेत् पूर्णचन्द्राचार्यैः पञ्चैव वर्षाणि मानवायुषोऽन्तरितानि। ९५ तमे वर्षे तैः काशीलाभः समासादितः। यथा राष्ट्रिये स्तरे राजगोपालाचार्याश्चक्रवर्तिनस्तथैव पाण्डित्यस्तरे तत्रापि शास्त्रार्थ-प्रणालिस्तरे एतेऽपि कस्मादपि चक्रवर्तिनो न जातु न्यूना आसन्। निर्भीकतया सर्वशास्त्रविषयेषु शास्त्रार्थेषु ते सिंहवदुत्प्लुत्य आक्रामन्ति स्म। व्याकरणशास्त्रं पुनस्तेषां स्वकीयविषय एवासीत्। तदतिरिक्तेषु साहित्य-वेदान्त-न्याय-मीमांसाशास्त्रेष्वपि तेषां तलस्पर्शि पाण्डित्यमासीत्। ते किल श्री दामोदरशास्त्रि-तात्याशास्त्रिमहाभागानां प्रियशिष्या आसन्। प्राचीनविदुषां परम्परायाः स्पष्टं भव्यञ्च दर्शनं तेषु जायते स्म। इतः परं पण्डितसभा, शास्त्रार्थसभा तेषां विना रिक्तकल्पेव लक्षिता स्यात्। संस्कृतविद्यायाः पाण्डित्यं शास्त्रार्थप्रणाल्येव। साऽस्मिन् काले प्रतिपच्चन्द्रायिता दृश्यते। स्मर्यते यदेते आचार्यपादाः प्रतिवर्षं नागपञ्चम्यां नागकूपे, श्रावणमासीय-भौमचतुष्टये दुर्गाकुण्डे सिंहवद् गर्जन्त। शास्त्रार्थशैल्या जनसाधारणानपि परिचाययन्ति स्म। एतेषां कैवल्यलाभेन पण्डितसमाजस्य अपूरणीया क्षतिः समभूत्। वयं तेषां चरणयोः श्रद्धाञ्जलिं समर्पयन्तः पारिवारिकैः सह समवेदनां प्रकाशयामः।

कल्याणोत्कर्ष-सत्पथम्

— प्राध्यापकः श्री मुकुट बिहारीलालः —

[काशी-हिन्दूविश्वविद्यालये राजनातिविभागाध्यक्षचरः]

[भारतीय-समाजवादीय-विधारधारायाः प्रथमाचार्येष्वन्यतमाः अन्ताराष्ट्रियवैदुष्यविभूषिताः श्रीमन्तो मुकुटबिहारीलाल महाभागा नूनं भारताभिजनेषु अजातशत्रुकल्पाः। प्राच्य-प्रतीच्यसमाजवादतत्त्वान्वेषण-व्रतमक्षुण्णं समाचरद्भिरेतैः प्राचीनभारतीय-ज्ञानार्णवमथनेन समासादितानां समत्व-कर्मयोग-विश्वभावना-निष्काम-सेवा-शील-संयमादि-तत्त्वरत्नानां पृष्ठभूमौ अर्वाचीनविद्वदभ्यूहितानां राष्ट्रियता-ऽन्ताराष्ट्रियता-लोकतन्त्र-समाज-राष्ट्रियवादानां तुलनात्मकं विश्लेषणं विधाय चिरस्थायितालब्धये देववाण्या पद्यबन्धे ते संग्रथिताः। साम्प्रतिके सार्वत्रिके त्वरीणे समाजवाद-कोलाहले एते खलु मानदण्डायिताः। सुदृढ-दार्शनिकाधारविहीनस्य तथाकथित-'समाजवाद'स्य आकाशभाषित्वं व्यपोह्य तस्मै भौमिक-सत्यत्वदानाय सर्वप्रथमावतारायिताश्चैते वक्तुं शक्याः। 'सूर्योदय'-स्नेहवशंवदैरेतैर्महानुभावैः प्रकाशनायोपायनीकृतास्तेऽस्माभिः क्रमशोऽत्र प्रकाश्यन्ते। प्रकाशन-परिपूर्तौ अन्येषां विचारकाणामपि मतान्येतद्विषयकाणि साग्रहमामन्त्र्यन्ते। श्री लाल महोदयानामेतदर्थं वयं कृतज्ञा इति।]

—सम्पादकः

१. व्रतम् :

सामाजिकत्वमादाय समत्वं विश्वनिष्ठताम्।
नयं नागरिकत्वस्य नैतिकत्वविभूषितम् ॥ १ ॥
देशबन्धुत्वसंसृष्टं राष्ट्रियत्वं शिवान्वितम्।
सिद्धान्येतानि कुर्वीय समाजे स्वीयजीवने ॥ २ ॥
लोकन्यायं सदादर्शं समष्टेर्हितमण्डितम्।
सामाजिकमनुष्यत्वं कर्तव्ये परिनिष्ठताम् ॥ ३ ॥
देशसेवां सदाचारं लोकतान्त्रिकभद्रताम्।
सिद्धान्येतानि कुर्वीय समाजे स्वीयजीवने ॥ ४ ॥
कुर्यां प्रतिष्ठितं राष्ट्रे समाजं समतास्थितम्।
समष्टिव्यष्टिसंयोगं व्यवस्थां लोकतान्त्रिकीम् ॥ ५ ॥
सर्वमानवकल्याणं संस्कृतिं प्रगतिप्रदाम्।
न्यासिताभावसम्पन्नं सार्वलौकिकजीवनम् ॥ ६ ॥
मानवत्वं परं श्रेष्ठं नराणां जीवनामृतम्।
ज्ञानचारित्र्यसेवाभिः सिद्धं कुर्यामिति व्रतम् ॥ ७ ॥
मानवानां हितार्थाय समत्वसहितो ह्यदम्।
सततं भूतिकर्माणि कुर्यामित्येव मे व्रतम् ॥ ८ ॥
क्रोधं मोहं भयं त्यक्त्वा सङ्कटेनापराजितः।
नित्यं कर्तव्यभावेन करिष्ये लोकमङ्गलम् ॥ ९ ॥
माध्यस्थ इव तिष्ठेयं प्रशंसा-निन्दयो समः।
नात्मप्रशंसां कुर्वीय सदा कुर्यां जगद्धितम् ॥१०॥

२. मानवः

बुद्धिभावक्रियायुक्तं प्रगतेः क्षमतायुतम्।
मानवं जीवनं श्रेष्ठं मानुष्यं परमं शिवम् ॥११॥
नरः कर्ता च भोक्ता च साधनं साध्यसाधकौ।
लोकात्मोत्कर्षकल्याणं नृणां जीवनगौरवम् ॥१२॥
आत्मजीवननिर्माता नानाशक्तियुतो नरः।
शक्त्युत्कर्षप्रयोगाभ्यां साफल्यं लभते भवे ॥१३॥
प्रीत्यानन्दहितोत्कर्षं साधनं नरजीवनम्।
प्रज्ञासंयमसत्कृत्यैः स्वलक्ष्यं पद्यते नरः ॥१४॥
मानवः स्थितियोगेन जीवनादर्शसंस्कृती।
व्यवस्थां ज्ञानमाचारं लोके सृजति निश्चयम् ॥१५॥
मानवः सर्वकार्याणां परिणाममुदाहृतम्।
नृणामुत्कर्षकल्याणं स्मृतं तेषां परीक्षणम् ॥१६॥

३. सामाजिकत्वम् :

समाजे हि समारब्धं समाजेन प्रभावितम् ।
मानवं जीवनं नूनं सामाजिकमुदाहृतम् ॥१७॥
सङ्गासक्तिर्मनुष्याणां गुणो नैसर्गिकः स्मृतः ।
सौहार्दसङ्गतिप्राणो नरः सामाजिकः स्मृतः ॥१८॥
भावः सामाजिकत्वस्य समाजस्य परं हितम् ।
नूनं तस्य समुत्कर्षः समाजोन्नतिहेतुकः ॥१९॥
सर्वेषामुन्नतेर्मूलं समष्टेर्हितभावना ।
सा विधत्ते जनोकर्षं लोककल्याणसंस्कृती ॥२०॥
समाजो मानवो नित्यं स्थितावन्योन्यसंश्रयात् ।
ततस्तयोः समायोगाद्राष्ट्रोत्कर्षः समृद्ध्यति ॥२१॥
समाजे मानवः शान्तिं ज्ञानोत्कर्षौ च विन्दति ।
नराणां पौरुषेणैव समाजः सम्प्रवर्धते ॥२२॥
समाजस्य हि संवृद्धौ निहितं व्यक्तिमङ्गलम् ।
निःस्वार्थलोकसेवा वै व्यक्तित्वोत्कर्षसाधनम् ॥२३॥
स्वातन्त्र्यं सामुदायित्वमुभे कल्याणहेतुके ।
ततः स्वातन्त्र्यमारक्षेत् समष्टिं परिपोषयेत् ॥२४॥

४. कुटुम्बकम् :

कुटुम्बं तु समाजस्य मूलभित्तिः प्रकीर्तिता ।
विधत्ते प्रीति-सौहार्दं सद्वृत्तिं सहकारिताम् ॥२५॥
भावं सामाजिकत्वस्य सुसांस्कृतिकजीवनम् ।
सम्बन्धिषु च सौभ्रात्रं व्यवहारं हितान्वितम् ॥२६॥
जीवनस्य च सौविध्यमानन्दः सौख्यमार्जवम् ।
स्नेहश्चातिथ्यसत्कारः सौहार्दं सहकारिता ॥२७॥
कल्याणस्य सुसंवृद्धिर्लोकसेवा च भद्रता ।
सर्वोत्थानं समोत्कर्षः कुटुम्बस्य सुलक्षणम् ॥२८॥
कुटुम्बं जीवितं वित्तं यद्यसत्येन वर्धते ।
तथापि सत्यमारक्षेत् सर्वदा न्यायमाचरेत् ॥२९॥

५. मानवत्वम् :

सामाजिकत्वं मानुष्यं समलक्ष्यगुणान्विते ।
सौहार्दं जीवनोत्कर्षौ लोकार्थौ लक्ष्यमुच्यते ॥३०॥
सामाजिकमनुष्यत्वं मानवोत्कर्षहेतुकम् ।
सौहार्दं समता सेवा शान्तिकल्याणवर्धनम् ॥३१॥
सामाजिकत्वसम्पन्नं मानवत्वं परं स्मृतम् ।
समाजव्यक्तिसंयोगजननं जीवनामृतम् ॥३२॥
न भेदोऽस्ति मनुष्येषु सर्वे मानुष्यमूलकाः ।
सुधीः सर्वमनुष्येषु मानुष्यं भावमीक्षते ॥३३॥
आत्मनीव समस्तेषु मानुष्यं खलु संस्थितम् ।
एवं ज्ञात्वा समो भूत्वा समाचरति पण्डितः ॥३४॥
कारुण्यं विश्वबन्धुत्वं समत्वं न्यायनिष्ठता ।
मानवानां हिते प्रीतिर्मानवत्वमुदाहृतम् ॥३५॥

६. विश्वबन्धुत्वम् :

भावना विश्वबन्धुत्वसमा नास्ति महीतले ।
विश्वसौहार्दयुक्ता सा विश्वशान्तिप्रसाधनम् ॥३६॥
यो नरः परिपुष्णाति सर्वमानवसङ्गतिम् ।
विधत्ते विश्वकल्याणं विश्वबन्धुः स उच्यते ॥३७॥
विश्वनिष्ठा हि मन्यन्ते "वसुधैव कुटुम्बकम्" ।
विश्वशान्तिहिते न्यायं बन्धुत्वं वर्धयन्ति ते ॥३८॥
तप्यन्ते विश्वतापेन विश्वाराधनतत्पराः ।
विश्वं विमोचयन्त्येव ह्याधिपत्याच्च सर्वथा ॥३९॥
विश्वसेवासमायुक्तो विश्वबन्धुत्वभूषितः ।
व्यवहारः समुत्कृष्टो विद्वद्भिः परिकीर्त्यते ॥४०॥
सहयोगेन सर्वेषां विश्वनिष्ठः प्रयत्नतः ।
विश्वशान्तिं विश्वसङ्घं विश्वोत्कर्षं प्रसाधयेत् ॥४१॥

७. समत्वम् :

मानवत्वं समत्वं च ह्यन्योन्यस्य गुणोत्तमम् ।
तयोः सह विकासो वै जीवनोत्कर्षलक्षणम् ॥४२॥
समत्वे दृढविश्वास आस्तिक्यं परिकीर्तितम् ।
समत्वाचरणं श्रेयो मानवत्वप्रसाधनम् ॥४३॥
समभावसमायुक्तः सर्वेषां हितचिन्तकः ।
निर्द्वन्द्वो यश्च निर्वैरः स समः परिकीर्तितः ॥४४॥

उदात्तादिस्वराणां निष्पत्तिस्थानानि

—श्री सुरजनदास स्वामिनः—

[संस्कृतविभागाध्यक्षाः—जोधपुर-विश्वविद्यालयस्य]

'भारतश्री'-समाख्यायां परिषत्-पत्रिकायामधीतो मया निबन्धः 'बाह्यप्रयत्नस्त्वेकादशधा' इति शीर्षकालङ्कृतः श्रीहिन्दकेशरी शास्त्रिणा वाराणसेय-संस्कृत-विश्वविद्यालये अनुसन्धानकार्यं विदधता निबद्धः। स च निबन्धो गवेषणापूर्णः। तत्र च विहितं समीचीनं समालोचनं कैयट-नागेश-भट्टोजिदीक्षितादीनाम्। श्री शास्त्रिणा समीचीनमेव प्रतिपादितं यद् 'बाह्याः प्रयत्ना न वर्णोत्पत्त्यनन्तरं निवृत्ते प्राणाख्ये वायौ जायन्ते, प्रयत्नानां वर्णोत्पत्तेः पूर्वभावित्वात्। वर्णोत्पत्त्यनन्तरं तु वायुरास्याद् बहिर्याति। न स पुनः प्रत्यावर्तते, न च स तदानीं गलविवरसङ्कोच-विकासौ विधातुं प्रभवति' इति। परं तत्र निबन्धे केषुचिद् बिन्दुषु मदीयो मतभेदो वर्तते। स मतभेदः एतत्पत्रिका-माध्यमेन लेखकस्य विदुषां च पुरतः उपस्थाप्यते।

१. तथा हि—शास्त्रिवर्येण 'कैयटादयः उदात्तादिस्वराणामुत्पत्तिं ताल्वादिषु सभागेषु स्थानेषु ऊर्ध्वभागे अधोभागे, उदात्तानुदात्तयोः समाहारे च स्वीकुर्वन्ति। तच्च न समीचीनम्; यतो हि 'ऊर्ध्वाधो-भेदेनोत्पत्ति-स्वीकारे स्थानभेदेन उदात्तानुदात्ताकारादीनां परस्परं सावर्ण्यानापत्तिः' इत्युक्तम्। एवं कैयटादिमतं निराकृत्य 'समानेषु कण्ठादिषु-स्थानेषु यद् उच्चैरुपलभ्यते स उदात्तः', 'समानेषु कण्ठादिषु उदात्तापेक्षया यन्नीचैः श्रूयते, सोऽनुदात्तः' इति काशिकाकृद्-व्याख्यानमाश्रित्य कण्ठादिषु स्थानेषु उच्चैरुपलभ्यमानस्य स्वरस्य उदात्तत्वं नीचैः श्रूयमाणस्य चानुदात्तत्वमङ्गीकृतम्। तत्र चोच्चनीचव्याख्याप्रतिपादकं सिद्धं तु समानप्रक्रमवचने, कथं समाने प्रक्रम इति वक्तव्यम्। कः पुनः प्रक्रमः, उरः, कण्ठः शिरः' इति भाष्यं च

आत्मतुल्यो मनुष्यत्व-सत्य-सौहार्दसम्भृतः।
निष्पक्षो व्यवहारो वै समत्वं परिलक्ष्यते ॥४५॥
क्रौर्य-शोषण-निर्मुक्त - राष्ट्रनिर्माणतत्परः।
संलग्नो दीनसेवायां मैत्रीभावेन निष्ठया ॥४६॥
रतः सिद्धौ समत्वस्य समाजे व्यक्तिजीवने।
विश्वकल्याणसन्निष्ठः समत्वार्थी प्रकीर्तितः ॥४८॥

८. कर्मयोगः

समत्वं वै परा निष्ठा तस्य सिद्धिः सुदुष्करा।
कर्मयोगेन संसिद्धिं सत्यनिष्ठोऽधिगच्छति ॥४९॥
अभ्यासेनैव लोकार्थी संयमी दृढनिश्चयः।
न्यायनिष्ठोऽनहंवादी कर्मयोगाय कल्पते ॥४७॥
निष्ठया परमा तप्तं निष्कामत्वसमन्वितम्।
कर्तव्येन कृतं कर्म योगयुक्तं प्रकीर्तितम् ॥५०॥
क्रियासु युक्तचेष्टो वै साम्ययोगपरायणः।
निःस्पृहः सर्वकामेभ्यो योगयुक्तः प्रकीर्तितः ॥५१॥
समता-सत्य-निष्कामनिष्ठा - मानुष्यमण्डितः।
रतो लोकहिते नित्यं कर्मयोगी प्रकीर्तितः ॥५२॥
कार्यशीलं लोकहितं समत्वं न्यायनिष्ठता।
निष्कामकर्माभिरतिः कर्मयोगः प्रशस्यते ॥५३॥
कार्यकर्माभिरमणं व्यवहारान्वितं व्रतम्।
ज्ञानं कर्मसु कौशल्यं कार्यशीलं प्रशस्यते ॥५४॥
सदुद्देश्यसमायुक्तं स्वार्थाहङ्कारनिर्गतम्।
लोकार्थाय कृतं कर्म निष्कामं कर्म वै स्मृतम् ॥५५॥

(क्रमशः)

प्रमाणत्वेन उपन्यस्तम्। अत्र भाष्ये प्रक्रमशब्दं 'प्रक्रम्यन्ते वर्णा अस्मिन्निति प्रक्रमः। स्थानम्' इति कैयटव्याख्यानुसारं स्थानपरं स्वीकृत्य समाने स्थाने एव उदात्तादीनामुत्पत्तिरिति च साधितम्। कैयटस्य कण्ठादिषु स्थानेषु ऊर्ध्वाधरभागकल्पनं तु निर्मूलमेवेति व्याहृतम्।'

तत्र सर्वतः प्रथमं कैयटादिमते काशिकाकृन्मते च न कोऽपि भेदः प्रतीयते। यतो हि काशिकावृत्तावपि **उच्चैरुदात्तः, नीचैरनुदात्तः** इति सूत्रयोर्व्याख्यायां 'ताल्वादिषु हि भागवत्सु स्थानेषु वर्णा निष्पद्यन्ते। तत्र यः समाने स्थाने ऊर्ध्वभागे निष्पन्नोऽच् स उदात्तसंज्ञो भवति। समाने स्थानेऽधोभागे निष्पन्नश्च अनुदात्तसंज्ञो भवति' इत्युक्त्या स्पष्टं प्रतीयते यत् काशिकाकारोऽपि कैयट-भट्टोजिदीक्षितादिवत् कण्ठादिषु सभागेषु स्थानेषु, ऊर्ध्वभागे निष्पन्नस्याच उदात्तसंज्ञाम्, अधोभागे निष्पन्नस्य चाचोऽनुदात्तसंज्ञां मनुते। अतः काशिकाव्याख्यायाः कैयटादिव्याख्यायाश्च समानत्वात् 'अत्र काशिकाकारस्यैव व्याख्या साधु प्रतिभाति' इत्युक्तिर्न समीचीना। अतः उपर्युक्तकाशिकाग्रन्थस्वारस्यानुरोधेन 'समानेषु कण्ठादिषु स्थानेषु यद् उच्चैरुपलभ्यते स उदात्तः, 'समानेषु कण्ठादिषु उदात्तापेक्षया यन्नीचैः श्रूयते सोऽनुदात्तः' इति काशिकोद्धरणे 'उच्चैः इत्यस्य ऊर्ध्वभागे 'नीचैः इत्यस्य च अधोभागे इत्यभिप्राय एव कल्पनीयः। तथा च कैयटादिव्याख्यायां काशिकाव्याख्यायां च न कोऽपि मतभेदः।

२. अपि च काशिकारीत्या कैयटादिरीत्या वा कण्ठादिषु स्थानेषु उदात्तादीनां निष्पत्तिरपि न समीचीना वर्तते। तथा हि—यदि उदात्तादीनां स्वराणामुत्पत्तिः ताल्वादिष्वेव स्थानेषु जायेत, तर्हि वैयाकरणानां 'उदात्तानुदात्त-स्वरितानां बाह्यप्रयत्नत्वप्रतिपादनं व्याहन्येत। यतो हि 'ओष्ठात् प्रभृति प्राक् काकलकादास्यम्' इति उक्तेः ओष्ठात् प्रभृति काकलकात् प्राग्भागस्यैवाऽऽस्यत्वेन आस्येभवानां प्रयत्नानामाभ्यन्तरत्वं ततो बहिर्भूतानां च बाह्यत्वमिति हि व्यवस्था वर्तते। यदि उदात्तादीनामपि कण्ठादिष्वेव स्थानेषु निष्पत्तिः स्यात्तर्हि तेषामपि आभ्यन्तरत्वमेव प्रसज्येत, न बाह्यत्वम्। अतः 'उच्चैरुदात्तः', 'नीचैरनुदात्तः' इत्यादिसूत्राणां कैयट - नागेश - भट्टोजिदीक्षित-काशिकाकृद्रीत्या ताल्वादिषु स्थानेषु उदात्तादीनां निष्पत्तिर्न युक्तिसहा।

अत उदात्तादीनां बाह्यप्रयत्नत्वसिद्ध्यर्थं तेषां निष्पत्तौ काकलकाद् बहिरेव किञ्चिदुपादानं स्वीकार्यम्। स्वीकृतं च प्राचीनैर्वैयाकरणैः पाणिनिप्रभृतिभिस्तथैव।

तथा हि—संयोगविभागशब्देभ्यः शब्दः इति भगवता कणादेन संयोगात्, विभागात्, शब्दाच्च शब्दोत्पत्तिः प्रतिपादिता। तत्र संयोगात् शब्दोत्पत्तिः स्थानकरणसंयोगाद् भवति। तस्मिन् संयोगे यः स्थायीभावः स प्रतियोगी, तत् स्थानम्। यः सञ्चारी भावः सोऽनुयोगी, तत् करणम्। ते च स्थाने द्विविधे—बाह्ये आभ्यन्तरे च। वायोः प्रक्रमे मुखागमनात् प्राग्भाविनी बाह्ये। मुखप्रदेशान्तर्गते त्वाभ्यन्तरे। तत्र बाह्यं स्थानमुरः कण्ठः शिर इति। वर्णोपादानभूतो नाभेः समुत्थितः प्राणाख्यो वायुः वर्णभावात् प्रागवस्थोऽनुप्रदानं नाम। मुखायतनाद् बहिर्भूतेषु उरःकण्ठशिरःस्थानेषु संयोगाय अनुप्रदानस्य यः प्रयत्नः, स बाह्यप्रयत्नः।

तत्र उदात्तानुदात्तस्वरितानां मुखायतनाद्बहिर्भूतेषु उरःकण्ठशिरःस्थानेषु वर्णभावात् प्रागवस्थस्य वायोः संयोगान्निष्पत्तिर्भवति। यथोक्तं पाणिनिशिक्षायाम्—

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥
मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्।
प्रातः सवनयोगं तं छान्दोगायत्रमाश्रितम्॥

कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् ।
तारं तार्तीय-सवनं शीर्षण्यं जागतानुगम् ॥
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः ॥
स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः ।
इति वर्णविदः प्राहुर्निपुणं तं निबोधत ॥

अयमत्राभिसन्धिः—उच्चिचारयिषया प्रयुक्तो नाभेः समुत्थितः प्राणवायुः कनीयसा बलेन प्रक्रममाणः सन्नुरसि, मध्यमबलेन कण्ठे, भूयसा तु बलेन शिरसि पतन् प्रक्रमं समाप्नोति । तथा च नाभेरभ्युत्थितः स वायुः करणभूतो यद्युरःस्थाने प्रथमः प्रक्रमः, ततः क्रमेण मुखमागत्य वर्णभावे परिणमति, तर्हि तस्यैष प्रक्रमः प्रातःसवनम् । तत्रैव मन्दः स्वरः सम्पद्यते, स औरस्योऽनुदात्तः । यदि तु कण्ठे प्रथमः प्रक्रमः, ततो मुखमागतः स्यात्तर्हि माध्यन्दिन-सवनम् । स मध्यमः स्वरः । स कर्णमूलीयः स्वरितः । यदि वा शिरोऽन्त एवास्य प्रथमः प्रक्रमः स्यात्, तर्हि तृतीयसवनम् । स तारस्वरः शीर्षण्य उदात्तः । आस्याद् बाह्यानामुरः - कण्ठ - शिरांस्येव प्रक्रमस्थानानि त्रीणि सवनानीति नारदेनोक्तम् । यथा–

उरः कण्ठः शिरश्चैव स्थानानि त्रीणि वाङ्मये ।
सवनान्याहुरेतानि साम्नि चाप्यधरोत्तरे ॥

पाणिनिनाऽपि उपर्युक्तशिक्षाश्लोकेषु उदात्तादीनां प्रातःसवनादिसम्बन्धित्वं स्पष्टमुपपादितम् । नारदीयवचनेन एतानि त्रीणि सवनानि क्रमशः उरःकण्ठशिरोरूपाणि त्रीणि बाह्यानि स्थानान्येवेत्यवधेयम् ।

अतः अनुदात्तादीनां स्वराणां क्रमशः उरःकण्ठशिरःस्थानेषु वर्णभावात् प्रागवस्थस्य प्राणवायोः करणभूतस्य संयोगात् निष्पत्तिर्भवति । करणभूतस्य वायोः स्थानेषु संयोगाय यः प्रयत्नः स एव बाह्य-प्रयत्नः । अतस्तस्मात् निष्पद्यमानानामनुदात्तादीनां बाह्यप्रयत्नत्वं सुस्पष्टं सिद्ध्यति ।

अनुदात्तो हृदि ज्ञेयो मूर्धन्युदात्त उदाहृतः ।
स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥

इति 'पाणिनीय-शिक्षा'पद्येन तु स्पष्टमेव अनुदात्तादीनां स्वराणां निष्पत्तिः क्रमशः उरःकण्ठशिरःस्थानेषु कनीयसा बलेन, मध्यमबलेन, भूयसा च बलेन प्रक्रममाणस्य वायोः संयोगाद् भवतीति सिद्ध्यति ।

भगवान् पतञ्जलिरपि 'उच्चैरुदात्तः, नीचैरनुदात्तः' इति सूत्रयोर्भाष्ये "उच्चनीचस्यानवस्थितत्वात् संज्ञाऽप्रसिद्धिः ।' अर्थात् इदमुच्चनीचमनवस्थितपदार्थकम् । तदेव हि कञ्चित् प्रत्युच्चैर्भवति, कञ्चित् प्रति नीचैः । एवं हि कश्चित् कञ्चिदधीयानमाह—किमुच्चै रोरुद्यसे, शनैर्वर्ततामिति । तमेव तथाऽधीयानमपर आह—किमन्तर्दन्तकेनाधीषे, उच्चैर्वर्ततामिति । एवमुच्चनीचमनवस्थितपदार्थकम् । तस्यानवस्थितत्वात् संज्ञायाः (उदात्तादिसंज्ञायाः) अप्रसिद्धिः" इत्याशङ्क्य "एवं तर्हि लक्षणं करिष्यते—आयामो दारुण्यमणुता स्वरस्य चेति उच्चैःकराणि शब्दस्य । अन्ववसर्गो मार्दवमुरुता स्वरस्य चेति नीचैःकराणि शब्दस्य' इति । अर्थात् यत्रोच्चारणे गात्राणां निग्रहः (प्रसारः), स्वरस्य रूक्षता, कण्ठस्य च संवृतता, तत्र शब्दस्योच्चैस्त्वम्, यत्र च गात्राणां शिथिलता, स्वरस्य स्निग्धता कण्ठस्य च महत्ता (स्थूलता), तत्र शब्दस्य नीचैस्त्वम्" इति समाधाय पुनराशङ्कितवान् यद् "एतदपि लक्षणमनैकान्तिकम् । यतो हि अल्पप्राणस्य सर्वोच्चैरपि महाप्राणस्य सर्वनीचैर्भवति इति पुनरपि उच्चनीचमनवस्थितपदार्थकम्" इति । ततश्च 'सिद्धं तु समानप्रक्रमवचनात्' इति वचनेन प्रक्रमभेदेन उदात्तानुदात्त-संज्ञाप्रसिद्धिरुपपादिता । 'कः पुनः प्रक्रमः—'उरः कण्ठः शिरः' इत्युक्त्या च उरःकण्ठशिरसामुदात्तादिस्वरेषु प्रक्रमत्वमुपपादितवान् । अर्थात् महाप्राणो वा वक्ता स्यादल्पप्राणो वा, यदि नाभेरभ्युत्थितो वायुः उरसि निपतति प्रथमं प्रक्रमं

च तत्रैव समाप्नोति तदा अनुदात्तः, यदि कण्ठे निपत्य प्रथमं प्रक्रमं समाप्नोति तदा स्वरितः, यदि मूर्ध्नि प्रथमं प्रक्रमं समाप्नोति तदा उदात्तः। एवञ्च उदात्तादि-व्यवस्थायां उरःकण्ठशिरसां प्रक्रमत्वमुपपादितं स्पष्टम्। एतेष्वेव प्रक्रमेषु वायोः संयोगात् उदात्तादि-स्वराणां निष्पत्तिरिति स्पष्टं प्रतिपादितम्।

तैत्तिरीय-प्रातिशाख्येऽपि **मन्द्रमध्यमताराणि स्थानानि भवन्ति**[1] इति सूत्रेण त्रीणि स्थानान्युक्त्वा **उरसि मन्द्रम्**[2] **कण्ठे मध्यमम्**[3] **शिरसि तारम्**[4] इति सूत्रैः उरसो मन्द्रस्थानत्वं, कण्ठस्य मध्यमस्थानत्वं, शिरश्च तारस्थानत्वं प्रोक्तम्। अग्रे च **मन्द्रादिषु त्रिषु स्थानेषु सप्त सप्त यमाः क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्रातिस्वार्याः**[5] इति सूत्रेण मन्द्रादिषु त्रिषु स्थानेषु क्रुष्टादीनां सप्तानां स्वराणामुत्पत्तिं कथयित्वा आद्यानां त्रयाणां 'आयामो दारुण्यमि'ति लक्षणवशात् उत्क्षेपित्वेन उदात्तत्वम्, अन्येषां त्रयाणां चतुर्थमन्द्रातिस्वार्याणां च 'अन्ववसर्गो मार्दवमि'ति लक्षणवशाद् अवक्षेपित्वेनानुदात्तत्वमुक्तम्, मध्यमस्य च तृतीयस्य धृतप्रचयत्वमुक्तम्। एष्वपि सप्तसु द्वितीय-स्योदात्तत्वम्, मन्द्रस्यानुदात्तत्वम्, चतुर्थस्य स्वरितत्वं तृतीयस्य च प्रचयत्वमुक्तम्। अत एव तैत्तिरीय-प्रातिशाख्यभाष्यकृता माहिषेयेण **मन्द्रचतुर्थतृतीय-द्वितीयाः अनुदात्तस्वरितप्रचयोदात्ता इत्यर्थः** इत्युक्तम्।

उपर्युक्तसन्दर्भेण एतत्स्पष्टं सिद्ध्यति यत् मन्द्रस्य अनुदात्तस्य मन्द्रमुरःस्थानम्, स्वरितस्य प्रचयस्य च चतुर्थस्य तृतीयस्य च मध्यमं कण्ठस्थानम्, द्वितीयस्य चोदात्तस्य तारं शिरःस्थानम्।

'उच्चैरुदात्तः' इत्यादिसूत्रयतः सूत्रकारस्याप्ययमेवाशयो यः उपर्युद्धृतैः पाणिनीयशिक्षावचनैः स्पष्टं सिद्ध्यति। किन्तु कैयटेन एतद्भाष्यव्याख्यावसरे 'एकस्मिन् तात्वादिके ऊर्ध्वाधरभागयुक्ते ऊर्ध्वभागेन उच्चार्यमाण उदात्तः, अधरभागनिष्पन्नोऽनुदात्तः' इत्युक्तम्। तदेव च सर्वैः नागेश-भट्टोजिदीक्षित-हरदत्त-काशिकाकृद्भिरनुसृतम्। किन्तु नैष आशयः पाणिनेर्नं वा महाभाष्यकृतः पतञ्जलेर्वाऽऽसीत् इति निश्चप्रचम्।

श्वासनादघोषादिबाह्यप्रयत्नानां स्वरूपनिरूपणमपि न मनस्तोषकरम्। 'नादरहितः श्वासः श्वास-प्रयत्नः, यदा घोषः परश्रवणयोग्यो न भवति तदा स नादः, नादश्च यदा परश्रवणयोग्यो भवति तदा स घोषः, घोषाभावः अघोषः' इति हि श्री शास्त्रिवर्येण उक्तम्। तत्र अघोषस्य घोषाभावरूपत्वेन न तद् व्याख्यानं अघोषप्रयत्नस्य स्वरूपनिरूपकम्, अभावस्य कस्यचिद् वस्तुनः स्वरूपत्वाभावात्। अघोषस्य घोषाभावरूपत्वे तस्य प्रयत्नत्वकथनं न सङ्गच्छते इति श्री शास्त्रिणाप्युक्तम्। नादघोषयोश्च लक्षणमन्योन्याश्रयदोषग्रस्तम्। घोषलक्षणे नादस्य नादलक्षणे च घोषस्यानुप्रवेशात्। परश्रवणयोग्यत्वाभावे घोषस्वरूपानिष्पत्त्या परश्रवणायोग्यो घोषो नादो भवति इत्युक्तेः, 'परश्रवणयोग्यत्वे च नादस्वरूपानिष्पत्त्या परश्रवणयोग्यो नादो घोषो भवति' इत्युक्तेश्च परस्परव्याहतत्वात्।

अतो बाह्यप्रयत्नानां तादृशं स्वरूपं नि[illegible]यं यदुपर्युक्तदोषग्रस्तं न स्यात्। तादृशं च स्वरूपं स्वर्गीयैः विद्यावाचस्पतिभिः श्री मधुसूदन ओझा महोदयैः स्वीये 'पथ्यास्वस्ति' ग्रन्थे प्रतिपादितम्।

तथा हि—वर्णोपादानभूतो वायुर्वर्णभावात् प्रागवस्थोऽनुप्रदानं नाम। आस्यबहिर्भूतेषु उरःकण्ठशिरःस्थानेषु संयोगाय अनुप्रदानस्य यः प्रयत्नः, सोऽनुप्रदानाख्यो बाह्यप्रयत्नः। स द्विविधः संवारो नादो घोष इत्येवं त्रिधाकृतः प्रथमः। विवारः श्वासोऽघोष इत्येवं त्रिधाकृतो द्वितीयः। यत्रोच्चारणेऽनुप्रदानं मृदुविग्रह-

---

[1]–[5]. द्वितीय प्रश्न अ० २२. सू० ११; २३. १०, ११, १२, १३।

हा पूर्णचन्द्रोऽस्तमनं जगाम ! ★

श्री शिवजी उपाध्यायः

हा ! धिग् विधिं सकलसंस्कृतवाङ्मयस्य
ज्ञाता गुरुः स्थविरवृन्दवरो मनस्वी।
श्रीपूर्णचन्द्र इव पूर्णकलाभिरामः
श्रीपूर्णचन्द्रविबुधोऽद्य दिवं जगाम ॥ १ ॥
यस्याऽखिलं जीवनमेव लोके
सरस्वती - सेवन लग्नमासीत्।
सोऽयं प्रतापानल-दीप्यमानः
विहाय संसारमहो ! तिरोऽभूत् ॥ २ ॥
यावत् स्वर्णावनमधारि जगत्तलेऽस्मिन्
तावद्धि तेन विदुषा सुरवाग्-विलासः।
विस्तारितः सपदि संस्कृतसेवकानां
शब्दानुशासन - विचक्षण - पूर्णहासः ॥ ३ ॥

त्वात् कण्ठनलीं न विवृणुते, स संवारः। खरविग्रहत्वात्तां विवृणुते चेत् स विवारः।

अथ यत्र वर्णस्वरूपारम्भाय अनुप्रदाने वायोर्भूयसी मात्रा, कनीयसी तु प्राणस्य तेजसः, स श्वासः। प्राणस्यैव तेजसो भूयसी मात्रा, कनीयसी चेद् वायोः स नादः।

अत्रेदमवधेयं यत्—'आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया' इत्यादि 'मन्द्रं जनयते स्वरम्' इत्यन्तायाः 'सोदीर्णो मूर्ध्न्यभिहतो' इत्यादि 'वक्त्रमापद्य मारुतः वर्णान् जनयते' इत्यन्तायाश्च पाणिनीयशिक्षातः कायाग्निप्रेरितो मारुत एवोर्ध्वं चरन् वक्त्रमापद्य तत्तत्स्थानेष्वभिहतो वर्णान् जनयति, इति प्रतीयते। परं न केवलं मारुत एव, अपि तु कायाग्निसहितो मारुतो वर्णोत्पत्तौ कारणम्। अत एव **अग्निर्वाग् भूत्वा मुखं प्राविशत्** इत्येतरेयश्रुतिर्वाच आग्नेयत्वं स्पष्टं प्रतिपादयति।

'सङ्गीत-रत्नाकरे'ऽपि स्वराध्याये नादस्य नाभिहृत्-कण्ठमूर्धा-ऽऽस्येषु पञ्चस्थानेषु क्रमशः अतिसूक्ष्म-सूक्ष्म-पुष्टा-ऽपुष्ट-कृत्रिमरूपावस्थापन्नस्य सर्वध्वनिकारणत्वं प्रतिपाद्य तस्य प्राणाग्निसंयोगजत्वमेव प्रतिपादितम्, न केवलं प्राणवायुजन्यत्वम्। यथा—

आत्मा विवक्षमाणोऽयं मनः प्रेरयते, मनः।
देहस्थं वह्निमाहन्ति स प्रेरयति मारुतम् ॥
ब्रह्मग्रन्थिस्थितः सोऽथ क्रमादूर्ध्वपथे चरन्।
नाभिहृत्कण्ठमूर्धास्येष्वाविर्भावयते ध्वनिम् ॥
नादोऽतिसूक्ष्मःसूक्ष्मश्च पुष्टोऽपुष्टश्च कृत्रिमः।
इति पञ्चाभिधां धत्ते पञ्चस्थानस्थितः क्रमात् ॥
नकारं प्राणनामानं दकारमनलं विदुः।
जातः प्राणाग्निसंयोगात् तेन नादोऽभिधीयते ॥
व्यवहारे त्वसौ त्रेधा हृदि मन्द्रोऽभिधीयते।
कण्ठे मध्यो मूर्ध्नि तारो द्विगुणश्चोत्तरोत्तरः ॥

तथा च श्वास-नादप्रयत्नयोः स्वरूपे उभयोर्वायुतेजसोर्मात्रातारतम्येन कारणत्वप्रतिपादनं समुचितमेव। नात्र लेशतोऽपि शिक्षाविरोधः।

यस्मिन् प्रयत्ने दृढाङ्गबन्धादुच्चारितस्य वर्णस्य प्रतिध्वनियोग्यता कनीयसी सम्पद्यते, सोऽघोषः। श्लथाङ्गबन्धात् प्रतिध्वनियोग्यताभूयस्त्वे घोषः प्रयत्नः। अत्र च संवार-नाद-घोषाणामन्योन्यानुग्राहित्वादविनाभूतत्वं विवार-श्वासा-ऽघोषाणां च परस्परानुग्राहित्वादविनाभूतत्वम्। अत एव सिद्धान्तकौमुद्यामपि 'खरो विवाराः श्वासा अघोषाश्च, हशः संवारा नादा घोषाश्च' इत्युक्त्या विवारादीनां त्रयाणां संवारादीनां त्रयाणां चाविनाभूतत्वमेव प्रतिपादितम्।

किरातार्जुनीये शृङ्गार-रसः

— डा० सुषमा कुलश्रेष्ठ महोदया —

[संस्कृतविभागे उच्च०प्राध्यात्री—दिल्ली-विश्वविद्यालयीये दौलतराम-महाविद्यालये]

भारविप्रणीते किरातार्जुनीयाख्ये महाकाव्येऽङ्गरसेषु शृङ्गारस्य अतिशोभना योजना समुपलभ्यते। शृङ्गारेऽपि संभोगशृङ्गारस्य प्राधान्यं दृश्यते। अत्र रतिभावस्यालम्बनानि सन्ति गन्धर्वा अप्सरसश्च। उद्दीपनरूपेण कविना षड्ऋतूनां सन्ध्या-ध्वान्त-रजनी-चन्द्रोदयादीनाञ्च वर्णनं कृतम्। यत्र तत्र केवलमनुभावानां केवलं सञ्चारिभावानाञ्चापि शोभना व्यञ्जना सञ्जाता। कविना सुरसुन्दरीणां विविधानां शृङ्गारचेष्टानां, तासामयत्नजानां स्वभावजानाञ्च अलङ्काराणां, तासां सुरतकेलीनां, सखिभिस्तासामनुनयादीनाञ्च अतिसुन्दरं वर्णनं कृतम्।

अष्टमे सर्गे भारविणा मानिनीनां नायिकानामनेकानि चित्राण्यङ्कितानि।[1] 'यदा कस्याश्चित् सुरसुन्दर्याः प्रियो गन्धर्वस्तां सपत्नीनाम्ना तारस्वरेण सम्बोधयन् तस्यै कुसुमानि प्रायच्छत्तदा सा न किञ्चिदूचे, केवलं बाष्पाकुललोचना सती भुवं लिलेख'[2]—इदं मानिनीनायिकाया ईर्ष्याकृतमानस्य सुन्दरमुदाहरणम्। चतुरया सख्या प्रणयकुपिताया नायिकाया अनुनयं वर्णयन् कविर्लिखति—'(सखी नायिकां कथयति) जहीहि मानम्। प्रियमनुसरतु। अन्यथास्थिरं तव मनोऽनुतप्स्यते।' एवं काचिन्निपुणा सखी प्रियं स्वयमेवानुसर्तुमिच्छतीं स्वसखीं पूर्वमेव प्रसादयामास।[1]

कस्याश्चित् सुराङ्गनायाः प्रियासक्तचित्तत्वात् स्वशरीरस्य वस्त्रस्य चापि ज्ञानं नासीत्। समालपति प्रिये सा निबद्धदृष्टिर्जाता। चलितस्तस्या नीवीबन्धः।[2] अप्सरसां वनविहारस्य पुष्पावचयस्य, तासां शरीरचेष्टानाञ्च वर्णनं महता विस्तरेण कृतं भारविणा। 'इन्द्रकीलपर्वते मन्थरं गच्छन्तीनां देवाङ्गनानां करिकरस्थूलैरुरुभिर्खिन्नाश्चरणास्तस्य पर्वतस्य समेऽपि स्थले गन्तुमसमर्था जाताः पदे पदे च मदादिव प्रास्खलन्'[3]—अत्र तासां मार्गजनितस्य श्रमस्य, तासां शरीरशोभायाश्च वर्णनं कृतम्। केनापि गन्धर्वेण कस्याश्चिदप्सरसः स्वागतमेवं क्रियते—'प्रियेण स्वयमेव संग्रथ्य माला प्रियायाः पीवरस्तने वक्षसि सपत्नीजनसमक्षमेव पिनद्धा। तयापि जलाविला (मृदिता) माला न त्यक्ता, यतः गुणाः प्रेम्णि वसन्ति, न तु वस्तुनि'।[4] कापि वधू प्रियसेचनार्थमञ्जलौ जलं गृहीतवती, परं तस्मिन्नेव क्षणे तस्या अञ्जलिः प्रियेण विहस्य विधृता। प्रियतमस्पर्शेण सा मदना-

---

१. किरातार्जुनीयम् ८.४६, ४८।

२. तत्रैव ८.१४।

प्रयच्छतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन लम्भिता।
न किञ्चिदूचे चरणेन केवलं लिलेख बाष्पाकुललोचना भुवम्॥

१. किरातार्जुनीयम्, ८.८।

२. तत्रैव ८.१५।

३. तत्रैव ८.२२—

वरोरुभिर्वारणहस्तपीवरैश्चिराय खिन्ना नवपल्लवश्रियः।
समेऽपि यातुं चरणाननीश्वरान्मदादिव प्रस्खलतः पदे पदे॥

४. तत्रैव ८.३७।

सक्ता जाता। मदनपरवशायास्तस्या वध्वा नीवीबन्धः स्रंसमानोऽभूत्; परं तस्या जलेन घनीकृता काञ्ची सखीव तं जग्राह। एवं काञ्चीभूतया सख्या स्वसख्या लज्जारक्षणं विहितम्।[१] तासामप्सरसां शोभाख्यस्य अयत्नजालङ्कारस्य सुषमा दर्शनीया—'गन्धर्वैः विपत्रलेखाः, क्षालितरागाधरा निरञ्जनाक्ष्यश्च युवतयो दृष्टाः। तासां दर्शनेन निर्णीतं यन्न भूषणानि ताः भूषयन्ति, प्रत्युत ता एव भूषणानि भूषयन्ति। देवाङ्गनाया वपुषि निर्धौतकज्जले दृशौ तस्या तिर्यगीक्षणं मण्डयति स्म, क्षालितलाक्षारागमोष्ठपल्लवं तस्या वेपथुर्मण्डयति स्म, अतिलकं ललाटञ्च तस्याः रेखाबन्धो मण्डयति स्म।[२]

अप्सरसः स्वप्रियगृहं गन्तुं मदस्यैवावलम्बं गृहीतवत्यः, विषयमिमं कविकल्पनयैवं प्रस्तौति—'मानवत्योऽप्सरसो मानमोचनानन्तरं प्रियसखीनां वचनानि खण्डयित्वा प्रियगृहं प्रति प्रस्थानं कृतवत्यः। ताभिः मदस्यैवावलम्बो गृहीतः, येन तासां धैर्यं निरस्तम्, शरीरं मानञ्च कृशीकृतम्। वार्ताळपन्तीभिस्ताभिः रमणीभिः कान्तगृहं प्राप्तमेव, यतः कामेन परिलुप्तमतीनां स्खलितमपि प्रायश उपकारि भवति।[३]

कस्याश्चिन्मानवत्या नायिकायास्तस्या सख्याश्च वार्तालापोऽपि कविनोपन्यस्तः।[४] शीधुपानेन रमणीषु मद-मदनौ दृष्टावुभौ।[५] कलहान्तरितानां वर्णनन्तु प्रायेण दृश्यते, परं कलहकुपितस्य नायकस्य कोपोऽपि न्यूनो नास्ति। नायिकाया सखी तमेवं वक्ति—'तवागमनमार्गं एव तस्याश्चक्षुः, जीवितञ्च त्वदधीनमतोऽस्या कलहः कुतः' ?[१] कस्याश्चिदीर्ष्यावत्या नायिकायाः सान्द्रपुलकोदयेन तस्या अनुरागः प्रकटीकृतः।[२]

भारविणाऽप्सरसां गन्धर्वाणाञ्च बाह्या आभ्यन्तरा च सुरतकेलिरपि विस्तरेण वर्णिता। बाह्यरते चुम्बनस्य[३], आलिङ्गनस्य[४], नखक्षतस्य[५], दन्तक्षतस्य[६] च वर्णनमुपलभ्यते। आभ्यन्तरं सुरतं वर्णयतः कवेरुक्तिरस्ति—सुरतकाले सुरयोषितां स्खलितवचांसि, करकिसलयानां सञ्चालनं, सीत्कारशब्दाः, अर्धनिमीलितानि नेत्राणि च कामदेवस्य अस्त्रतामुपययुः।[७] प्रियसङ्गमेन मद्यपानेन च मानिनीनां कोपः शान्तः।[८] मद्यपानजनितया मत्ततया रमणीनां नयनवाक्यविकासः रुद्धः, आलिङ्गनार्थमुभौ करौ स्तम्भितौ, अनेकगुणैश्च युवतीनां व्रीडाया विलासोऽनुकृतः।[९] अप्सरसां सपत्नीभयं वर्णयतः कवेः सरसोक्तिरियम्—'शङ्कितप्रियतमा युवतयो मदेन विमूढधियो वयमिदानीमतोऽस्माकं वल्लभा अस्मान् विसृज्यान्यत्र रन्तुं न गच्छन्त्विति मनीषया मदिरां नातिमात्रमिच्छन्ति

---

१. किरातार्जुनीयम् ८.५१—

विहस्य पाणौ विधृते धृताम्भसि प्रियेण वध्वा मदनार्द्रचेतसः।
सखीव काञ्ची पयसा घनीकृता बभार वीतोच्चयबन्धमंशुकम्॥

२. तत्रैव ८.५२।

३. तत्रैव ९.३६-३७।

४. तत्रैव ९.३९-४०।

५. तत्रैव ९.४२।

---

१. किरातार्जुनीयम् ९. ४३।

२. तत्रैव ९. ४६।

३. तत्रैव ९. ४७।

४. ,, ९. ४१; ४८।

५. ,, ८. ३४, ४१, ९. ४९।

६. ,, ९. ४९, ६२।

७. तत्रैव ९.५०—

पाणिपल्लवविधूननमन्तः सोत्कृतानि नयनार्धनिमेषाः।
योषितां रहसि गद्गदवाचामस्त्रतामुपययुर्मदनस्य॥

८. तत्रैव ९. ५१, ५२।

९. ,, ९, ६७।

कालिय-विजयं महाकाव्यम्

— श्री वायुनन्दन पाण्डेयः —

[साहित्यविभागाध्यक्षः—विश्वनाथ गुरुकुल महाविद्यालयस्य, वाराणसी]

॥ अथ द्वितीयः सर्गः ॥

अथोपनन्दो व्रजवासिनो जनात्,
सुसङ्गतान् गोकुलकार्यतत्परान् ।
परस्पर - प्रेम - परिप्लुतान्तरान्,
निबोधयामास समासतोऽपरान् ॥ १ ॥

तिरोहितं नेति हितानि नोऽर्दयन्
व्रजेऽन्तरायव्रज एष गर्जयन् ।[1]
पुनः पुनर्बृंहति भीतिमुद्वहन्,
कथाञ्च शान्तेरपि नो विलीनयन् ॥ २ ॥

यदत्र तापस्त्रिविधः प्रवर्तते,
प्रजानुरक्त्या नृपतिर्न वर्तते ।
शुभेच्छुभिः स्थानमतो विगीयते,
क आश्रयं बाधयितुं निषेवते ॥ ३ ॥

वने निवासो निचिकी[2]सुसेवनं,
द्विजोपमं गोपजनस्य जीवनम् ।
सहेत को धीरतमो विडम्बनं,
धराशयानो महिषोप्रपीडनम् ॥ ४ ॥

तदद्य वृन्दावनमेव मञ्जुलं,
बृहल्लतालम्बि-तमाल-वञ्जुलम् ।
यमानुजाभ्यास - पलाशिकाननं,
व्रजाम तत्साधयताशु साधनम् ॥ ५ ॥

सरन्तु गावः पुरतो निरर्गलाः,
सुरक्षिता वत्सयुताः सुमङ्गलाः ।
वृताः ककुद्मद्भिरुदग्रगामिभिः,
श्रिता बृहद्यष्टिधरानुगामिभिः ॥ ६ ॥

गणेश्वरस्याथ विधाय वन्दना-
मितः समादाय शिशूँन् व्रजाङ्गनाः ।
अनः समारुह्य सरन्त्वलङ्कृता,
रतिः श्रिया याभिरलं निराकृता ॥ ७ ॥

ततो गृहोपस्करमात्रसम्भृता,
समन्ततो बल्लववृन्दसंवृता ।
शुकं मदोदग्रमहोक्षकर्षिता,
स्त्रियाच्छकट्या[1] नवगोपरक्षिता ॥ ८ ॥

अनन्तरं सज्जशरासनाशुगा,
भवन्तु रक्षाव्रतिनो व्रजानुगाः ।

---

[1] चुरादिः ।

[2] निचिः = गवां सकर्णशिरोदेशः, निचिना कायति निचिकी = प्रशस्ता गौः ।

[3] शकटानां समूहः शकट्या ।

स्म, यतः स्नेहोऽपदेऽप्यनिष्टानि पश्यति ।[1] चित्तस्य सुखकरं रहो, मदनो, मद्यमदश्चन्द्रिका, दयितैः सह सङ्गमश्च प्रमदानां प्रेम कामप्यनिर्वचनीयां दशां (व्रीडामयी श्रृङ्गारावस्थां) नयन्ति स्म ।[1] मानवत्योः रमण्यः संभोगविधौ निर्मर्यादाः सञ्जाताः ।[2] गन्धर्वाप्सरसामस्याः सुरतकेल्याः वर्णने श्रृङ्गाररसस्य शोभनं सन्निबन्धनं कृतं कविना ।

---

[1] किरातार्जुनीयम् ९.७०—
मा गमन्मदविमूढधियो नः प्रोज्झ्य रन्तुमिति शङ्कितनाथाः ।
योषितो न मदिरां भृशमीषुः प्रेम पश्यति भयान्यपदेऽपि ॥

[1] किरातार्जुनीयम् ९.७१ ।

[2] तत्रैव ९.७२ ।

भवन्त इत्थं स्वपरिच्छदव्रजान्,
निभालयन्तोऽनुसरन्तु यात्रिकान् ।। ९ ।।
सुनन्द - नन्दप्रमुखा - ऽनुमोदितां,
शुभान्वितां ज्ञातिहितेऽवधारिताम् ।
निशम्य धीमत्समुदीरितां गिरं,
क्रियापरास्ते प्रययुः स्वमन्दिरम् ।।१०।।
प्रियां स्वपुत्राऽभ्युदयाभिलाषिणी-
मुपागतो नन्द उवाच गेहिनीम् ।
विधेहि शान्ति व्रजतोर्यथाऽनयो-
र्न जातु दोषाः प्रभवन्तु पुत्रयोः ।।११।।
शिरः प्रमृज्यामलकीरसादिभि-
र्महौषधावासित - तीर्थवारिभिः ।
ततो यशोदा बहुधा विलेपना-
च्छुशुन्ध जातस्य वपुः प्रमार्जनात् ।।१२।।
वपुर्बभौ वारितवारिकोमलां-
शुकाञ्चलैर्नीलशिलेव निर्मलम् ।
विलम्बि - मुक्ताफलदाम - गुम्फना-
दलञ्चकारा-ऽलकगुच्छमर्जनात् ।।१३।।
सुपेशलं सूक्ष्ममतीव निर्मलं,
पिशङ्गमङ्गावरकाम्बरं कलम् ।
मनोहरं क्षौममनल्पसुन्दरं,
निधाप्य कृष्णं मुमुदेऽथ सादरम् ।।१४।।
कटिप्रदेशे रसनावलम्बिनी,
झणद्रणत्युज्वल - हेमकिङ्किणी ।
करद्वये कङ्कणमङ्घ्रिनीरजे,
मृदुस्वनन्नूपुरहंसिका - ऽसजत् ।।१५।।
अथालिकं सा तिलकेन लालितं,
प्रकल्प्य कश्मीरज-रोचनान्वितम् ।
विलोचने अञ्जनलेखयाऽञ्चिते,
ममज्ज मोदाम्बुनि मानसस्थिते ।।१६।।
निरूप्य रूपं रमणीयमद्भुतं,
मनोहरं कोटिमनोजसंस्तुतम् ।
मुखेन्दुमाचुम्ब्य बभूव सालसा,
प्रसूः प्रसादाम्बुधि-मग्नमानसा ।।१७।।
स्वरूप - सन्दर्शन - जन्य - कौतुका-
म्बुधिं भरत्-पूर्णविधुस्तदाननम् ।
वशंवदीकृत्य चकोर - लोचनं,
क्षणं जनन्याः प्रययौ विजृम्भणम् ।।१८।।
मुखे सुतस्याखिललोकमम्बुधीन्,
नदीः नदानौषधिसंश्रितान् गिरीन् ।
पुराणि ग्रामान् विविधान् व्रजाकरान्,
जलाशयान् पुष्पितनीरजाकरान् ।।१९।।
निरीक्ष्य माता निमिमील लोचने
पुनः समाधाय मनो बृहद्वने ।
अहो अरिष्टानि पतन्ति बालके,
ग्रहप्रसक्तिः किमु मञ्जुलालके ।।२०।।
वितर्कयन्ती सभया विलोचनं,
प्रचिक्षिपे तातमुखे त्रिलोचनम् ।
विधिं सुरेशं सुखवृन्दवन्दितं,
हरिं त्रिलोकार्तिहरं श्रियान्वितम् ।।२१।।
विशालभूमिं भुवनं वनस्पतीन्,
नृ - देव - यक्षोरग-रक्षसां पतीन् ।
अदृष्टमत्यद्भुतमर्थमश्रुतं,
समालुलोके वदनेऽपि तं सुतम् ।।२२।।
उपास्यमानं चरणेषु सन्ततं,
विशेषलेखै - र्मुनिसिद्धसंस्तुतम् ।
सविस्मयाश्चर्य - रसोदसागरे,
निमज्जती व्याकुलतां गता परे ।।२३।।
विलोकयन्ती तमशेषसुन्दरं,
समस्तलावण्य - विलासमन्दिरम् ।
विकासयन्तं भुवनं चराचरं,
प्रकाशयन्तं तरणिं सुधाकरम् ।।२४।।
विनोदयन्तं सुरसिद्धमानसं,
विनाशयन्तं दितिजानहर्निशम् ।

निषूदयन्तं जगतीद्रुहोऽपरान्,
प्रसारयन्तं सुकृतान् सनातनान् ॥२५॥
परं क्षिपन्तं बहुमन्युतामसान्,
निरासयन्तं सततं तमीचरान् ।
अनारतं नारद - शारदास्तुतं,
सुनन्द - नन्दप्रमुखै - रुपासितम् ॥२६॥
क्वचिच्छ्रियः पाणिसरोजलालितं,
पदं पताकाङ्कुश - चक्रचिह्नितम् ।
त्रयी - पुराणाऽऽगमशास्त्र - वर्णितं,
समन्ततः सिद्धगणैरुपस्कृतम् ॥२७॥
सुरर्षि - ब्रह्मर्षि - दिगीशपूजितं,
विलोक्य जातस्य महत्त्वमद्भुतम् ।
अहो त्रिलोकीजनकः कृतागसा,
विडम्ब्यते पुत्रधिया कुमेधसा ॥२८॥
निरीक्षमाणा सुकुमारतल्लजं,
मुहुर्मुहु - र्लोकपतेः पदाम्बुजम् ।
प्रफुल्लरोमावलि - जातसाध्वसा,
प्रकम्पमानेन हृदा ननाम सा ॥२९॥
प्रभावमूढां जननीं भयस्मया-
वृतां शुचा सङ्कुलितां निरामयन् ।
जहास लुम्पन् भवभाविनः स्मृतिं,
तदैव मायाववृते यशोमतिम् ॥३०॥
हसन्तमालोक्य सुतं विमोहिता,
विलोकितञ्चैकपदे न विस्मृता ।
सवासना क्षीणकलाप्रतिष्ठितां,
विभावयन्ती मनसा विशिष्टताम् ॥३१॥
न जागरे स्वप्नमिमं विभावये,
मनोमयीं भ्रान्तिमिमां न कल्पये ।
प्रकल्पनातीतपथं विलोकितं,
किमत्र चित्रं वदने विकल्पितम् ॥३२॥
अरिष्टमेतद् किमुतैन्द्रजालिकं,
पतत्पिशाचप्रतिबिम्बकालिकम् ।
विचिन्तयन्ती जननी समाहिता,
मनो दधे शान्तिकृतौ सुनिश्चितम् ॥३३॥
द्विजान् समाहूय जगाद तान्त्रिकान्,
ग्रहाभिभूतोऽर्भक एष वैदिकान् ।
प्रमृज्य ते मन्त्रविदः कुशाम्बुभिः,
शिवानुषक्ति विदधुर्जपादिभिः ॥३४॥
विधाय शान्ति बहुधा द्विजेरितां,
दानं ददौ रूप्य - सुवर्ण - संयुताम् ।
पयस्विनीं वत्सयुतां तिलादिका-
ननेकव्रीहीन् नवनीतगोरसान् ॥३५॥
विभूषयामास तथैव रोहिणी,
सुतं स्वकीयं वसुदेवगेहिनी ।
शुभाम्बरै - र्नीलमणीव भास्वरैः,
सुवर्ण-काञ्च्यङ्गद - हार - नूपुरैः ॥३६॥
पुनश्च नन्दोऽनुगतो यशोदया,
प्रसादयामास गुरून् सपर्यया ।
अथादिदेशाऽनुचरान् समाहिता-
नलङ्कृता गाः कुरुत द्रुतं हिताः ॥३७॥
ततो निदेशे प्रयता हरिद्रया-
ऽनुलिप्य ता गास्तिलतैलसिक्तया ।
उशीर - कर्पूर - सुगन्धि - शीतला,
ऽमलैर्जलैस्ते सिषिचुः सुनिर्मलाः ॥३८॥
शिरो गवां कुङ्कुमरेणुरूषितं
विधाय दध्यक्षत - पुष्पपूजितम् ।
गले बबन्धुर्द्विगुणावलम्बितां,
वराटिकानिर्मित - शुभ्रमालिकाम् ॥३९॥
सुसज्जितास्ता बहुधा निरामया
गिरा जगुर्नन्दमुपेत्य नम्रया ।
ध्वनच्चलत् - कन्धरबद्धघण्टिकाः,
प्रयातुमुक्ता इव गोमतल्लिकाः ॥४०॥
परिष्कृतास्ताः सुरलोकवन्दिताः,
प्रदक्षिणीकृत्य मुदाऽभिनन्दिताः ।

यशोदया शान्तिसमिच्छया सुतो,
गवां परागैः शुभदैर्विलेपितः ॥४१॥
परे समाहूय पुरोहितान् प्रियान्,
समार्चिचन् - नर्पितभूरिदक्षिणान् ।
द्विजाः प्रसन्नागमनं निरापदं,
चिकीर्षवः स्वस्त्ययनं समाचरन् ॥४२॥
अभीष्टदातार - मनिष्टनाशकं,
क्षणाच्छुभोदर्क - फलप्रकाशकम् ।
गणाधिपं साम्बमहेश - संयुतं,
समर्च्य नन्दो गमनार्थमुद्यतः ॥४३॥
पुरोधसो वैदिकमन्त्रमाचकु-
र्वराङ्गना मङ्गलगीतमाजगुः ।
मृदङ्ग - भेरी-पणवा-ऽऽनकादिकान्,
प्रणादयन्तः सुरभीरकालयन् ॥४४॥
गवां समूहः शुशुभे पुरो व्रजन्,
स्वकीयपुच्छं परितो विलोलयन् ।
प्रयाणकाले पथि रामकृष्णयो-
रजन्निवाराद् व्यजनानि बालयोः ॥४५॥
परागपुञ्जः खुरजो दिशोऽम्बरं,
दिशोऽन्तरं संववृते, वृषा अरम् ।
मदोद्धताः शृङ्गविलेखनोद्धुरां,
मृदं किरन्तोऽनुययुर्व्रजं गवाम् ॥४६॥
समांसमीना नववत्ससंयुता-
द्विहायन्ता अपरे पलायिताः ।
क्वचित् समेत्य स्वशिरोभिरुत्सुका,
मृषा मृधं तेनुरनेकवत्सकाः ॥४७॥
अनः समारुह्य पुरोहिता पुरो,
ययुः सदाराः स परिच्छदास्त्वरा ।
अनन्तरं गोपवराङ्गनाकृत-
प्रसाधना जग्मुरकृत्रिमश्रियः ॥४८॥
ततः समाच्छादित - मुत्तमाम्बरैः,
समास्तृतं प्रावरकैर्मनोहरैः ।
सुतं समादाय यशोमतिर्युता,
सखी बलाभ्यां शकटं समास्थिता ॥४९॥
सुराङ्गनाः वीक्ष्य यदुत्तमच्छटां,
विमुक्तसौन्दर्यमदा मदोत्कटाः ।
वराङ्गनाः कृष्णविलासगायना
रथं समारुह्य ययुः सभावनाः ॥५०॥
पुरो घटे तोयभृतेऽयुराश्रवाः,
प्रदीप्तदीपं परिगृह्य सोत्सवाः ।
सुमङ्गले मङ्गलवाद्यसंस्तुते,
क्षणे रथारूढपरिच्छदाश्च ते ॥५१॥
सुवंशजा वंशजचापसंश्रिते,
गुणे समारोप्य शरान् करस्थितम् ।
विशालशृङ्गं श्वसितानिलैर्भृतं,
निनादयन्तोऽनुचरा ययुर्द्रुतम् ॥५२॥
विलोकयन्तः पथि रामणीयकं,
वनश्रियः पक्षिमृगालिकौतुकम् ।
कृषीबलारक्षितसस्यसम्पदो,
मनोविनोदं विदधुर्निरापदः ॥५३॥
ध्वजान् धुनन्तो बृहदूधसः शनैः,
प्रकालयन्तः सुरभीर्न तर्जनैः ।
गृहीतदण्डोन्नतवक्षसः स्वकान्,
निभालयन्तोऽनुययुः परे जनान् ॥५४॥
बलश्च कृष्णश्च विलोकनातुरौ,
स्वमातुरुत्सङ्गत एत्य सत्वरौ ।
पुरो रथप्रेरयितुः समीपगौ,
स्थितौ प्रमोदामृतपूर्णमानसौ ॥५५॥
कदाचनामोदभरेण विह्वलौ,
युगं वहन्तौ वृषभौ मदाकुलौ ।
समीरयन्तौ प्रचलेति भाषया,
हठाद् गृहीतौ विनिपातशङ्कया ॥५६॥
क्वचित् खगान् भूरिरवानितस्ततो,
मृगव्रजान् लोकभयात् प्रधावतः ।

प्राचीन-भारतीयाः क्रीडाः

—डॉ० नरेश झा शास्त्री—

(४)

१३. स्पन्दोलिका क्रीडा

इयम् आन्दोलिका, हिन्दोळादि - क्रीडा, प्रेङ्खा, दोलेत्यपि कथ्यते। इयं न केवलं बालोपयोगिनी, अपि तु स्त्री-पुरुषाणामपि मनोरञ्जनसाधिका। वैदिक-साहित्ये एतस्या नाधिकः उल्लेखः, किन्तु कात्यायनश्रौतसूत्रे गवामयन - यज्ञप्रसङ्गे ऋत्विजामुपवेशनप्रकरणे प्रेङ्खे होता[1] इति सूत्रे दोळायां होतुरुपवेशनस्य विधानं दृश्यते। अन्यत्रापि क्वचित् क्वचिदस्याः प्रसङ्गो दृश्यते।

यस्यां क्रीडायां तरुशाखयोः भूमिनिखातस्तम्भयोर्वा रज्जुबन्धनं कृत्वा तत्र रचितदोळायामारुह्य आन्दोळनं भवति सा 'स्पन्दोलिके'ति कथ्यते।[2] 'दोळारूढं भगवन्तं संवाह्य नैके नयन्ति सा 'स्पन्दोलिके'ति-श्रीमद्वल्लभाचार्यकृतायां सुबोधिनीटीकायाम्। विष्णुपुराणे त्वस्याः क्रीडायाः 'आन्दोलिके'ति पाठः—

ततस्त्वान्दोलिकाभिश्च नियुद्धैश्च महाबलौ।
व्यायामं चक्रतुस्तत्र क्षेपणीयैस्तथाश्मभिः ॥[1]

एतेनेदमपि सूच्यते यत् व्यायामहेतुनाऽप्यान्दोलिका क्रीडा विधीयते स्म। श्रीधरस्वामिकृतायां तट्टीकायामुपवर्णिताशयानुसारेणेयं क्रीडा यत्र बालकौ हस्तमण्डलेन आन्दोलिकां निर्माय तत्र कञ्चन तृतीयं बालकमुपविश्य क्रमशो वहतः। तथैव हरिवंशेऽपि—

तत्र त्वान्दोलिकाभिश्च युद्धमार्गविशारदौ।
अश्मभिः क्षेपणीयैश्च तौ व्यायाममकुर्वताम् ॥[2]

---

[1] कात्यायन-श्रौतसूत्रम् १३.३.२।

[2] श्रीमद्भागवतम्, तट्टीकायाम् १०.८.१५।

[1] विष्णुपुराणम् ५.९.८; ब्रह्म० १८७.७।

[2] हरिवंशः २.१४.१०।

निरीक्ष्य हर्षातिभरान्वितान्तरा-
ववापतुर्मोदमवेक्ष्य मातरौ ॥५७॥
हरिं बलं कोटिमनोजसुन्दरं,
पथि स्थिताः स्फारितनेत्रगोचराम्।
विधाय तृप्ताः प्रमदाः प्रतर्पितान्,
प्रशंसनाच्चक्रु - रनेकधा परान् ॥५८॥
एवं समुज्झ्य वसतीमसतां प्रसङ्गाद्,
गोपा व्रजन्त इह दृष्टिपथे समीयुः।
वृन्दावनं विटपिनां विकसत्प्रसूनैः,
स्मेराननं हरिसमागमने समुत्थम् ॥५९॥
कृष्णागतिं समभिलक्ष्य पुरः प्रचारैः
गोपा मृगस्य वयसां वचसां प्रसारैः।
कृत्वाग्रयानमिव मानयशःप्रदातुः,
सुस्वागतं मृदुरणद्वनमेतदापुः ॥६०॥
इत्थं प्राप्य मनोरमं सुबिमलं वृन्दावनं शान्तिदं
गोपास्ते विजहुः सुगन्धिपवनादध्वश्रमं क्लान्तिदम्।
तत्रावासभुवं विचित्य भवनं निर्माय नेमेन्दुवत्
श्रीकृष्णप्रभुताचितार्थविभुतान्युषुः सुराधीशवत् ॥६१॥
श्रीसाङ्कृत्यकुले मनीषिमुकुटालङ्कारभूते तपो-
विद्यावित्तविवेकशालिनिवहोत्पत्तिस्थले यज्जनुः।
सोऽयं श्रीभूतवायुनन्दनकृती प्रीत्यै भवानीपतेः
शुभ्रं कालियमर्दने हरिकृते सर्गं द्वितीयं व्यधात् ॥६२॥

॥ इति द्वितीयः सर्गः ॥

112603

इत्यनेनापि आन्दोलिकायाः व्यायामत्वं सूचितम्। भविष्यपुराणे[1] च दोलान्दोलस्य संज्ञा 'हिन्दोलादि-क्रीडेति' कथिता। पद्मपुराणे तु 'दोले'त्येव पाठः। उक्तञ्च—

दोलायां च समारूढौ सखिभिर्दोलितौ क्वचित्।[2]

वात्स्यायनस्य च कामशास्त्रे चर्चित-प्रेङ्खादोलया नागरिकाणामान्दोलनक्रीडा सूचिता। उक्तञ्च तत्र—

स्वास्तीर्णा प्रेङ्खा दोला वृक्षवाटिकायां सप्रच्छाया।
स्थण्डिलपीठिका च सुकुसुमेति भवनविन्यासः॥[3]

अयं भावः—सघनछायायुक्तायां वृक्षवाटिकायां (न तु गृहाभ्यन्तरे) प्रेङ्खादोला स्वास्तीर्णाऽऽसीत्। तत्र निकटे एव पुष्पादिभिरलङ्कृतोपवेशनार्थं स्थण्डिल-पीठिकाऽसीदिति। आतप-परिहारार्थमुपरि घनशाखा-प्रतानत्वात् सुसंछन्नाप्रेङ्खादोला दोल्यते। पद्मपुराणेऽपि सन्तानकवृक्षेषु हिन्दोलस्थापनस्योल्लेखो यथा—

सन्तानकेषु वृक्षेषु बद्ध्वा हिन्दोलमञ्चकान्।[4]

सन्तानकोऽयं वृक्षः स्वर्गीयेषु पञ्चवृक्षेष्वेकः। तेषु बद्धहिन्दोलमञ्चकेषु श्रमापनोदं कुर्वन्ति स्म।

एवमेव जल्हणकृतायां सूक्तिमुक्तावलौ पुरुषायिताः कान्ताः दोलाविलासेन श्रमापनोदात् प्रकर्षमापुः। तत्रोक्तं यथा—

उन्नम्य दूरं मुहुरानमन्त्यः
कान्ताः स्थलीभूतनितम्बबिम्बाः।
दोलाविलासेन जितश्रमत्वात्
प्रकर्षमापुः पुरुषायितेषु॥[5]

तथैवान्दोलनक्रीडां वर्णयन् बिल्हणोऽप्याह—

प्रसार्य पादौ विहितस्थितीनां
दोलासु लोलांशुकपल्लवानाम्।
मनोरथानामपि यन्न गम्यं
तद् द्रष्टुमापुः सुदृशां युवानः॥[1]

अत्र 'पादौ प्रसार्य' इत्यनेन दोलाक्रीडायाः विहित-स्थितेः संसूचनम्। क्रीडावसरे च वेगं प्राप्य वस्त्राणि वायौ उड्डीयन्ते। इत्थं बहुविधं दोलाक्रीडाविलासवर्णन-मुपलभ्यते।

पुरा दोलाक्रीडायाः कालः विशेषतो वसन्तर्तु-रासीत्। यथा मानसोल्लासे—

ऋतुराजे परिप्राप्ते वसन्तेति मनोहरे।
आन्दोलने प्रकुर्वीत पृथु सम्बद्धयान्विताम्॥[2]

अत एव रामादि-दोलोत्सवः वसन्तर्तावेव भवति। वर्तमानकाले च 'झूलनोत्सवो' वर्षर्तावेव विशेषतो भवति। वर्षर्तौ कृतस्स्वल्पो व्यायामः शारीरिक-क्लेदस्य शोषणं करोति, पित्तञ्चोद्दीपयति। अतो-ऽस्यर्तोः विशेषो व्यायामः दोलायामान्दोलनम्। दोहद-वतीनां स्त्रीणां दुर्बलानां रोगिणामन्येषां समेषामियं क्रीडाऽतिशयोपयोगिनी। अनया अग्निः प्रदीप्तो भवति, बल-वीर्ययोर्वृद्धिः, फुफ्फुसाश्च बलवन्तो जायन्ते। नेत्र-ज्योतिर्वर्धते। क्षुधावृद्धिश्च भवति, शरीरे च निरल-सत्वमायाति।[3]

१४. नृपक्रीडा

सङ्घबद्धाः बालकाः कमपि बालकं नृपं विधाय तं च कल्पिते राजसिंहासने उपावेश्य नृप इव तदाज्ञया

---

[1] भविष्य० १.१३.५८।

[2] पद्म०, पाताल० ८३.४८।

[3] कामसूत्रम् १.४.१५।

[4] पद्म० उत्तर० ६.११।

[5] सूक्तिमुक्तावली ६५.२९।

[1] शार्ङ्गधरपद्धतिः ३८७८०।

[2] मानसोल्लासः (सोमेश्वरकृतः)।

[3] वेङ्कटेश्वर-समाचार (हिन्दी) ३० जून १९६७ (वर्षा-ऋतु)।

ध्वनि-वैभवम्

—श्री रवीन्द्रकुमार सिद्धान्तशास्त्री—

(८)

वस्तुतस्तु श्लोकेऽस्मिन् रसगतमनौचित्यं विद्यते इति स्वीकार्यम्, रतेः परपुरुषविषयत्वात्। उक्तञ्च तत्रभवद्भिर्दर्पणकारैः—

> उपनायकसंस्थायां मुनि-गुरुपत्नीगतायाञ्च।
> बहुनायकविषयायां रतौ तथाऽनुभयनिष्ठायाम् ॥
> प्रतिनायकनिष्ठत्वे तद्वदधमपात्र-तिर्यगादिगते।
> शृङ्गारेऽनौचित्यम्……………………॥[1]

इति

'निःशेष' इत्यादिश्लोके नायिकान्तर-रतिसंयुक्तः सख्या

---

[1] साहित्यदर्पणम्; ३.२६३-२६४।

आदेशपालनं व्यवहरणञ्च यत्र कुर्वते सा नृपक्रीडा प्रोच्यते। इयं क्रीडा गोपबालकैः सह श्रीकृष्णेनापि क्रीडिता।[1] 'अवदानकल्पलतायाम्' 'कथासरित्सागरे' चास्याः क्रीडाया उल्लेखः समुपलभ्यते।

१५. हरिणाक्रीडनम्

इयं क्रीडा वाह्य-वाहक-क्रीडायाः पूर्वरूपमादि कारणं वा। यत्रैकं निश्चितं लक्ष्यमभिलक्ष्य द्वौ द्वौ बालकौ युगपद् हरिणवदुत्प्लुत्य उत्प्लुत्य गच्छतः। गच्छतोर्द्वयोर्मध्ये यस्य पूर्वं लक्ष्यस्थाने स्थितिः स विजयी भवति। यस्त्वरया याति स मन्दगामिनं जयतीत्यर्थः। आशयोऽयं यद् हरिणवदाक्रीडते इति हरिणाक्रीडनमिति।

श्रीमद्भागवतेऽस्याः क्रीडायाः चर्चा वाह्य-वाहक-क्रीडाधीनाऽक्रियते। यथा—

> आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः।[2]

वाह्य-वाहक-क्रीडा यया क्रीडया लक्ष्यते, सा तु हरिणाक्रीडननाम्नी क्रीडैव। यद्यप्यस्याः क्रीडायाः सङ्केतः वायुपुराणेऽपि बालक्रीडनरूपाणि कृतानि सह गोपकैः[1] इत्यादिना समुपलभ्यते, तथापि विस्तृतं विवेचनं तु ब्रह्म-विष्णुपुराणयोरेव वर्तते। तत्र ब्रह्मपुराणे यथा—

> हरिणाक्रीडनं नाम बालक्रीडनकं ततः।
> प्रक्रीडितास्तु ते सर्वे द्वौ द्वौ युगपदुत्पतन् ॥
> श्रीदाम्ना सह गोविन्दः प्रलम्बेन यथाबलः।
> गोपालैरपरैश्चान्ये गोपालाः सह पुप्लुवुः ॥[2]

'द्वौ द्वौ युगपदुत्पतन्' इत्यादिभिः युग-युग्मक्रीडेयं सूच्यते। उत्पतनमुच्छलनं कूर्दनं वेत्यर्थः। 'श्रीदाम्ने'-त्यादिना कयोः कयोर्युग्मत्वमिति सूचितम्। 'पुप्लुवुः' इत्यास्यार्थोऽत्र कूर्दनम्।[3]

विष्णुपुराणेऽपि किञ्चित्पाठभेदेन यथा—

> हरिणाक्रीडनं नाम बालक्रीडनकं ततः।
> प्रकुर्वन्तो हि ते सर्वे द्वौ द्वौ युगवदुत्थितौ ॥[4]

इत्थं हरिणाक्रीडनं बालानां सर्वाङ्गपीडनपूर्विका क्रीडा। सम्प्रति चेयं सादृश्येन प्रकारान्तरेण वा क्रीड्यते।

(क्रमशः)

---

[1] 'कर्हिचिन्नृपलीलया' भाग० १०.१८.१५।

[2] श्रीमद्भागवतम् १०.१८.२१।

[1] वायु० १६०.१९।

[2] ब्रह्म० १८७.११-१२।

[3] प्लु गतौ (तरणं, उड्डयनं, कूर्दनमिति)।

[4] विष्णु० ५.९.१२।

नायकः उपनायकमध्य एव गणनीय इति नास्त्यस्माकं सन्देहः।

यद्यपि केचन पण्डितवर्याः 'निःशेषच्युतचन्दन'-मित्यादिश्लोके गुणीभूत - व्यङ्ग्यमङ्गीकर्तुमिच्छन्ति, तथापि तेषां मतमिदं न युक्ततामावहतीत्यस्माभिर्मन्यते; व्यङ्ग्यार्थलभ्यस्य सम्भोगशृङ्गारादेरेवात्र प्राधान्यात्। महामहोपाध्यायपदलाञ्छनैः तत्रभवद्भिः दुर्गाप्रसादद्विवेदैरपि साहित्यदर्पणस्य छायाख्यविवृतौ 'निःशेष···' इत्यादिश्लोके ध्वनित्वमेवाङ्गीकृतम्। उक्तञ्च तैः—

> "अत्र च त्वय्यकृतज्ञायां यद् बान्धवबुद्ध्या विश्वसिमि, यच्च तत्रैवंविधे दृढमनुरक्ताऽस्मि, तद् युक्तमेव ममैवंविधविविधवञ्चनाजनित-परितापपात्रत्वमिति ईर्ष्याहेतुक-विप्रलम्भसञ्चारि-निर्वेदध्वनिः"[1] इति।

रसगतमनौचित्यमुदाहृतं क्षेमेन्द्रेण यथा—

मानं मा कुरु तन्वङ्गि ज्ञात्वा यौवनमस्थिरम्।

उक्तञ्च तेन—अत्र यौवनास्थैर्यनिर्वेदनं शृङ्गाररसस्य परिपन्थिनः शान्तस्याङ्गम्, शृङ्गारे तत्प्रयोगादनौचित्यम्[2] इति।

वस्तुतस्तु—वाक्येऽस्मिन् परिपन्थिरसाङ्गस्य विभावस्य ग्रहणाद् रसदोषस्यैवेदमुदाहरणमिति विज्ञेयम्। विश्वनाथेनापि दर्पण-सप्तम-परिच्छेदे इदमेवोदाहरणं प्रदर्श्य रसदोषत्वमस्य स्वीकृतम्।

ननु तत्रभवद्भिर्ध्वनिकारै ध्वन्यालोकग्रन्थस्य तृतीयोद्द्योते,

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा॥

इति श्लोकमुद्धृत्य रसभङ्गहेतुरूपमनौचित्यं सम्यग् दूषितम्। अतः कथं खलु तादृशानुचितरसस्थले ध्वनिमुत्तमकाव्यत्वञ्च स्वीकरिष्यामो वयमिति चेत्? उच्यते—रतेरुपनायकादिगतत्वे तिर्यग्विषयत्वे वा न खलु तत्प्रधानस्य काव्यस्य चमत्कारिता व्याहन्यते। यत्र तु रतिर्गुरुपत्न्यादिगता भवेत्, यत्र वा पित्रोः सम्भोगशृङ्गारादिर्वर्ण्यते, तत्र सहृदयानां चित्तोद्वेगो जायत इति तादृशस्थले एव रसभङ्गो ध्वनेरनुत्पत्तिः काव्यत्वहानिश्च जायते। अत एव नित्यदोषानित्यदोषभेदेन दोषद्वैविध्यमङ्गीकृतं सुधीभिः। अतः 'अनौचित्यादृते' इत्यादि-श्लोके यदनौचित्यं निन्दितं तस्य गुरुतरानौचित्यविषयत्वं विज्ञेयम्।

यत्र तु दोषः श्रुतिमात्रमेव श्रोतुश्चित्तोद्वेगमुत्पादयितुं नार्हति, तत्र ध्वनिग्रहणे कापि बाधा न स्यादिति ध्वनिकाव्ये तादृशस्य दोषस्य हेयत्वं विज्ञेयम्। यथा खलु महार्हाणि रत्नादि कीटदष्टान्यपि रत्नत्वं न विजहति, तथैव कैश्चिद्दोषैः कथञ्चिदाक्रान्ता अपि ध्वन्यर्था नहि तेषां ध्वनित्वमुत्कर्षं वा त्यजन्ति। तदुक्तमाचार्यैः—

कीटानुविद्धरत्नादि-साधारण्येन काव्यता।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः॥[1]

'न्यक्कारो ह्ययमेव···' इत्यादिश्लोकेऽपि ध्वनिवशात् चित्तचमत्कारिता झटिति समागच्छतीति सम्यगनुभूय तत्र पदगतं वाक्यगतञ्च विधेयाविमर्शरूपं दोषद्वयं नैव गण्यते सुधीभिः। न चैताभ्यां दोषाभ्यां काव्यस्योपादेयता व्याहन्यते। दर्पण-प्रथमपरिच्छेदे सम्यग् विचार्य प्रदर्शितमेतदाचार्यवर्यैः विश्वनाथपादैः। व्याख्यातञ्चैतत् तत्रभवद्भी रामचरणतर्कवागीशमहोदयैर्यथा—

> 'अत्र विधेयस्य न्यक्कारस्य रचनावैपरीत्येन गुणीभूतत्वमिति। 'स्वर्गग्रामटिका-

---

[1] छायाटीका (साहित्यदर्पणस्य); द्वितीयपरिच्छेदव्याख्या।

[2] औचित्यविचारचर्चा।

[1] साहित्यदर्पणम्, प्रथमपरिच्छेदः।

> विलुण्ठन-वृथोच्छूनैः' इत्यत्र वृथात्वं विधेयम्, तच्च समासे गुणीभावादनुवाद्यताप्रतीतिकृदिति द्विरूपो विधेयाविमर्शः ।'[१]

दोषस्यास्य कुत्र पदगतत्वं कुत्र च वाक्यगतत्वमित्यपि स्फुटं व्याख्यातं तत्रभवद्भिर्दुर्गाप्रसादपादैः—

> 'एवञ्च 'न्यक्कारः' 'अयम्' इत्येतयोः पदयोर्विपर्ययो वाक्यदोषः । 'वृथोच्छूनैरि'त्यत्र समासगतत्वेन पददोषो न तु वाक्यदोषः ।[२]

विधेयोद्देश्यपदयोः पौर्वापर्यविपर्ययेण कथञ्चित् अर्थप्रतीतेर्व्याहतत्वात्तत्र दोष एवोत्पद्यत इति व्यक्तिविवेकारैरपि निगदितम् । उक्तञ्च तैः—

अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत् ।
न ह्यलब्धास्पदं किञ्चित् कुत्रचित् प्रतितिष्ठति ॥
विधेयोद्देश्यभावोऽयं रूप्यरूपकतात्मकः ।
न च तत्र विधेयोक्तिरुद्देश्यात् पूर्वमिष्यते ॥

अस्माभिरपि मन्यते पद-वाक्यगतं दोषद्वयं श्लोकेऽस्मिन् वर्तमानमपि प्रबलप्रभावस्य ध्वनेर्वैभवं व्याहन्तुं न क्षमत इति । एवमन्यत्रापि ध्वनिकाव्ये विज्ञेया दोषाणामसारता । यथा खलु महासागरं प्रविश्य सर्वे जलप्रवाहाश्चञ्चलतां विहाय गाम्भीर्यं गच्छन्ति, तथैव ध्वनिकाव्यमाश्रित्य सर्वे दोषा हतप्रभा भवन्तीति वेदितव्यं विद्वद्भिः ।

कुन्तल-मतम्

ननु तत्रभवद्भिः कुन्तलपादैः 'वक्रोक्तिजीविता'ऽभिधे ग्रन्थे वक्रोक्तेरेव काव्यप्राणत्वमङ्गीकृतम् । यत्र वक्रोक्तौ ध्वनिर्नास्ति, तत्र तादृशकाव्यस्य उत्तमत्वमङ्गीकर्तव्यं न वा ? अत्र वदामः—यत्र नाम वक्रोक्तिर्ध्वनिमुत्पादयितुमर्हति, तत्रैव काव्यस्योत्तमता अङ्गीकर्तव्या; नान्यत्र । एवमुत्तमकाव्यस्थलेऽपि काव्यप्राणत्वं तु ध्वनेरेव; न तु वक्रोक्तेः, ध्वन्युत्पादने तस्याः कारणमात्रस्वरूपत्वात् ।

ननु यत्रैव वक्रोक्तिर्विद्यते तत्रैव तस्या ध्वन्युत्पादकता भवतु, इत्येतदपि न वाच्यम् ; वक्रोक्तेर्विभागवर्णनायां तत्रभवद्भिः कुन्तलपादैः षोढा भेदः प्रदर्शितः । तत्र वर्ण-पद-तत्पूर्वार्धादिवैचित्र्यवशादङ्गीक्रियन्ते खलु वक्रोक्तेर्विभागाः । तत्र च वर्णविन्यासवक्रताया 'अनुप्रास'नामशब्दालङ्कारमध्य एव निपातनं भवेत् । पदपूर्वार्धवक्रतायाः प्रथमप्रकारस्य उदाहरणमुक्तं तत्रभवद्भिः कुन्तलपादैर्यथा—'रामोऽस्मि सर्वं सहे' इत्यत्र ।

वस्तुतस्तु—अत्र रामशब्देन अत्यन्तदुःखसहिष्णुरूपो योऽर्थो बुद्ध्यते, स ध्वनेरेव प्रकारः । पदपूर्वार्धवक्रताया द्वितीयप्रकारं प्रकाशयितुं प्रवृत्ताः कुन्तलपादाः-

रामोऽसौ भुवनेषु विक्रमगुणैः
प्राप्तः प्रसिद्धिं पराम् ।

इत्यादिश्लोकमुदाहृत्य । अत्र रामशब्दे लोकोत्तरशौर्यादिधर्मातिशयाध्यारोपाद् वक्रता जातेति निगदितवन्तः । वस्तुत एषोऽपि ध्वनेरेवापरः प्रकारः, व्यञ्जनावृत्तिलभ्यस्य तादृशार्थस्य नितरां चमत्कारातिशयविधायित्वात् । एवमन्येऽपि कुन्तल-सम्मत-वक्रोक्तेः प्रकाराः केचिद् ध्वनिमध्ये केचिद्वाऽलङ्कारनिवहे निपतिष्यन्ति ।

(क्रमशः)

---

[१] साहित्यदर्पणविवृतिः; प्रथमः परिच्छेदः ।

[२] छायाटीका; प्रथमः परिच्छेदः ।

विक्रेयाणि बहुमूल्यानि पुस्तकरत्नानि

गृहं स्वर्गीकर्तुं मानवजीवनञ्च सफलयितुं वाणीपुस्तकमालातः महापरिषदः महामण्डलसंस्थानतश्च प्रकाशितानि निम्नलिखितपुस्तकानि विक्रयार्थं प्रस्तुतानि। विशेषविवरणाय सूचीपत्रं नियमाश्च पत्रप्रेषणेन समासादनीयाः।

१. भारतधर्म-समन्वय ...	१–५०
२. परलोक-तत्त्व ...	२–५०
३. कठोपनिषद् ...	३–००
४. धर्मतत्त्व ...	२–५०
५. वेदान्तदर्शन ...	१–५०
६. हिन्दूधर्मका स्वरूप ...	०–३७
७. तत्त्वबोध, सजिल्द ...	१–००
बिना जिल्दका ...	०–७५
८. आदर्श देवियाँ प्रथम भाग ...	२–२५
,, ,, द्वितीय भाग ...	२–५०
९. सती सदाचार ...	१–५०
१०. कर्म-रहस्य ...	२–५०
११. केनोपनिषद् ...	१–५०
१२. ईशावास्योपनिषद् ...	१–००
१३. सप्तशती (दुर्गा) गीता, सजिल्द ...	३–००
,, दफ्ती जिल्द ...	२–२५
१४. सदाचार-प्रश्नोत्तरी ...	०–३७
१५. व्रतोत्सव-कौमुदी ...	१–३७
१६. हिन्दू-संस्कृति-समीक्षा ...	०–५०
१७. धर्म-प्रवेशिका ...	०–७५
१८. पूजा-प्रार्थना ...	०–६२
१९. गायत्रीमन्त्र-टीका ...	०–२५
२०. आचार-चन्द्रिका ...	१–००
२१. कन्या-शिक्षा-सोपान ...	०–२५
२२. गजेन्द्र-मोक्ष ...	०–३७
२३. महिला-प्रश्नोत्तरी ...	०–५०
२४. व्रतोत्सव-चन्द्रिका ...	५–००
२५. धर्माधर्म-प्रश्नोत्तरी ...	०–२५
२६. सुलोचना ...	०–६२
२७. तीर्थ और देवपूजन-प्रश्नोत्तरी ...	०–२५
२८. स्मरणी ...	०–६२
२९. स्त्री-पुरुष-विज्ञान ...	०–३७
३०. श्राद्ध और परलोक-विचार ...	०–३७
३१. धर्म-विज्ञान प्रथम, द्वितीय, तृतीय, ५) ४)	४–००
३२. श्रीमद्भागवत, एकादश स्कन्ध ...	३–५०
३३. सती धर्म और योगशक्ति ...	०–३७
३४. अन्तःकरण-विज्ञान ...	०–७५
३५. निर्मूल आक्षेपोंका उत्तर ...	०–३७
३६. परलोक-प्रश्नोत्तरी ...	०–२५
३७. श्रीमद्भगवद्गीता प्रथम भाग ...	४–००
,, ,, द्वितीय भाग ...	३–५०
३८. मनुष्य-धर्म ...	०–३७
३९. धर्मकल्पद्रुम प्रथम खण्ड ...	६–००
,, द्वितीय खण्ड ...	३–००
,, तृतीय ,, ...	३–५०
,, चतुर्थ ,, ...	५–००
,, पञ्चम ,, ...	३–५०
,, षष्ठ ,, ...	४–००
,, सप्तम ,, ...	३–५०
,, अष्टम ,, ...	४–००
४०. प्रवीण दृष्टिमें नवीन भारत (प्रथम खण्ड)	२–००
,, ,, (द्वितीय खण्ड)	२–००
४१. नवीन दृष्टिमें प्रवीण भारत ...	१–२५
४२. साधन-चन्द्रिका ...	१–७५
४३. शास्त्र-चन्द्रिका ...	१–७५
४४. धर्म-चन्द्रिका ...	१–६५
४५. पातञ्जल-योगदर्शन (हिन्दी भाष्य) ...	३–००
४६. कर्ममीमांसा-दर्शन (सम्पूर्ण) ...	१२–००

व्यवस्थापक : वाणी-पुस्तकमाला, आर्यमहिला हितकारिणी महापरिषद्, जगतगंज, वाराणसी

पञ्जीकृत-संख्या- -एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५ सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४९

⁂

अङ्कः २

⁂

सम्पादकः
गो० न० वैजापुरकरः

⁂

फरवरी
१९७३

⁂

वार्षिक-मूल्यम्
५) रूप्यकाणि

⁂

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

⁂

विहरति हरिरिह सरस-वसन्ते !

●

ललित-लवङ्गलता-परिशीलन-कोमल-मलय-समीरे ।
मधुकर-निकर-करम्बित-कोकिल-कूजित-कुञ्ज-कुटीरे ॥
विहरति हरिरिह सरस-वसन्ते !
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते ॥
उन्मद-मदन-मनोरथ-पथिक-वधूजनजनित-विलापे ।
अलिकुल-सङ्कुल-कुसुमसमूह-निराकुल-बकुलकलापे ॥
मृगमद-सौरभ-रभसवशंवद-नवदलमाल-तमाले ।
युवजन-हृदय-विदारण-मनसिज-नखरुचि-किंशुकजाले ॥

—महाकविः श्री जयदेवः

वैकुण्ठलीनाः श्री गजाधर सोमाणि श्रेष्ठिनः

भारतराष्ट्रस्य प्रसिद्धोद्योगपतयः चिराद् विभिन्न-धर्मप्रचारक-संस्थाजातानामाधारस्तम्भाः सदाचार-सम्पन्ना उदाराशयाः श्रेष्ठिवराः श्री गजाधर सोमाणी महाभागाः अकस्मात् विगते ८-१-७३ दिनाङ्के बम्बई-नगरीये स्वावासे पाञ्चभौति देहममुं विसृज्य दिव्यात्मना वैकुण्ठे वैकुण्ठाधिपतेश्चरणकमले लीना इति व्यावहारिकाणां तेषां सर्वविधसहयोग-स्नेहभाजामस्माकमास्तिकजनानां कृते महती क्षतिः किल । भारतधर्म-महामण्डलस्य तु ते जीवातुभूताः । आर्यमहिला-महापरिषद संयुक्तप्रधानसभापतयश्च आसन् । महामण्डलेन ते यथार्थतो 'धर्मरत्न'-पदव्या विभूषिता आसन् । वस्तुतः पदव्याऽनया न ते भूषिताः, प्रत्युत तेषु प्रतिष्ठिता सती पदवी एव भूषणतां गता । महापरिषदस्तैः चतुस्त्रिंशद्वर्षाणि यावदविरतं बहुमूल्या सेवा कृता । अतस्तस्याः किल एतेषां निधनेन महती अपूरणीया क्षतिः । तेषां समग्रमेव जीवनं सरलतमं धर्मप्रधानम् अविशेषं सकलसाहाय्यस्पर्धास्फुरितं दानवीरतोपबृंहितमासीत् । अतस्ते नाम कथमपि न शोच्याः । अतो वयं तेषां कृते सम श्रद्धाञ्जलिं समर्पयन्तस्तेषां पारिवारिकेभ्यो हार्दिकीं समवेदनां प्रकाशयामः ।—सम्पादकः

अनुक्रमः

●

प्रपानकः	पत्रपुटम्	परिवेषकः
भूयो निनादय, निनादय वाणि ! वीणाम्	२५	श्री स्व० ईशवदत्त शास्त्री
श्रीमहर्षि-ज्ञानानन्द-चरितम्	२६	श्री स्व० विन्ध्येश्वरीप्रसाद शास्त्री
संस्कृत-समुद्धरणं स्वात्मोद्धार एव	२७	सम्पादकीयम्
(१) संस्कृत-शिक्षाया व्यावहारिकी त्रिसूत्री-योजना	२८	श्री आचार्य सरस्वतीप्रसाद चतुर्वेदः
युगोऽयं सन्देष्टि—संस्कृतज्ञाः सङ्घटयेयुः ।	३१	श्री कप्पगन्तुल लक्ष्मणशास्त्री
संस्कृत-भाषया विश्वस्मै किं न प्रदत्तम् ?	३३	श्री पूज्य गङ्गेश्वरानन्द स्वामिनः
(२) कल्याणोत्कर्ष-सत्पथम्	३८	श्री प्रा० मुकुटबिहारी लाल
(५) प्राचीन-भारतीयाः क्रीडाः	४०	श्री डॉ० नरेश झा शास्त्री
प्रादेशिक-संस्कृतविद्यालयाध्यापक-समितेः चतुर्थ-महाधिवेशन-वृत्तान्तः	४१	श्री सङ्कलितः

●

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४९ वर्ष] वाराणसी, पौष-माघौ, २०२९ वै० : फरवरी १९७३ ई० [२ अङ्कः

भूयो निनादय, निनादय वाणि ! वीणाम्

*

पूर्णेन्दु-सुन्दरमुखि प्रतिभाऽभिरामे वामे विधेः सुवचसां वचसां विरामे।
गीर्वाणवाणि ! भुवनाऽऽभरणं भवत्या वन्दे दयार्द्रचरणं शरणं जगत्याः॥ १॥
मात-र्निसर्ग-शशिशीतल-शुक्ति-शुक्ले मन्मुग्ध-मानस-मनोहर-राजहंसि।
लावण्य-लालसित-लोचन-लोकलक्ष्मीं द्रक्ष्यामि भारति कदा तव मञ्जुमूर्तिम्॥ २॥
सञ्चार-चारु-चिकुराञ्चितमाननं ते विस्मारितेऽपि नहि विस्मृतिमेति मातः।
संवीक्ष्य यद्रुचिरतां गगनेऽपि चन्द्रो मन्दोऽभवत्सकलया कलयाऽन्वितोऽपि॥ ३॥
मन्ये न ते प्रभविताऽस्मि निबद्धवेणी-श्रेणीभरे, विकच-कोकनदः कदापि।
किं तेन मञ्जुतम-मञ्जिम-नूपुरेऽपि प्राप्स्यामि किं नहि पदं कलशिञ्जितानाम्॥ ४॥
पूर्णाऽसि वाणि रजनी त्वमहं शशाङ्को विद्युच्छटाऽसि तदहं सजलो घनाङ्कः।
कस्तूरिका त्वमसि चेत्तदहं मृगाङ्कस्त्वं यासि साऽसि परमेष शिशुस्तवाङ्कः॥ ५॥
चेच्चन्द्रिकाऽसि तदहं चटुलश्चकोरश्चेत् त्वं नवाम्बुद-घटा तदहं मयूरः।
कल्याणि ! कल्पलतिकाऽसि तदाऽस्मि रेणोरन्वेषणातुर-तरो रसरञ्जनोऽहम्॥ ६॥
भूयो निनादय, निनादय वाणि ! वीणां चञ्चच्चराचर-विमोहविधौ प्रवीणाम्।
यन्निस्सरत्-स्वरसुधा-रसपान-मत्तो भूयात्तवायमजरः शिशुरीशदत्तः॥ ७॥

— स्वर्गीयाः श्री ईशदत्त पाण्डेयाः 'श्रीश' —

पूर्वतोऽनुवृत्तम्

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— स्वर्गीयाः श्रीविन्ध्येश्वरी प्रसाद शास्त्रिणः —

(एकोनविंशे सर्गे)

२१. तद्भारताख्यं प्रथमं च वर्षं द्वितीयकं किम्पुरुषं प्रदिष्टम्
तृतीयमास्ते हरिवर्षमेतदिमानि मेरोर्दिशि दक्षिणस्याम् ।।
२२. तदुत्तरे रम्यकवर्ष - मास्ते हिरण्मयं वर्षमतः परस्तात् ।
ततो नु वर्षं कुरुनामकं च तदुत्तरस्थाः कुरवः प्रसिद्धाः ।।
२३. भद्राश्ववर्षं च सुमेरुतः प्राग् वर्षं प्रतीच्यामपि केतुमालम् ।
इलावृतं भाति तयोऽस्तु मध्ये समुच्छ्रितो यत्र गिरिः सुमेरुः ।।
२४. गिरीश्वरोऽयं महतो महीयान् सुसूक्ष्मरूपोऽद्भुतशक्तिपुञ्जः ।
यमाश्रिता ऊर्ध्वमधः - स्थिताश्च चतुर्दशैते विलसन्ति लोकाः ।।
२५. द्वीपाश्च सप्त गदिताः परिवेष्टिता ये तत्तद्गुणप्रसृत - सप्तसमुद्रकैस्तैः ।
वर्षाणि वै नव तु यानि सुकीर्तितानि यूयं निबोधत सुसूक्ष्मभुवोऽखिलास्ताः ।।
२६. गन्धर्व-किन्नरगणा अपि सिद्धसङ्घा विद्याधरा अथ च गुह्यक-यक्षकाद्याः ।
येऽन्ते च सूक्ष्मवपुषोऽमरयोजनस्ते द्वीपेषु सप्तसु वसन्ति च वर्षकेषु ।।
२७. जम्बूद्वीपे भारतं वर्षमाद्यं तद्वै प्रोक्तं मृत्युलोकादभिन्नम् ।
आम्नातास्ते तस्य भेदा नवाख्याः प्राचीनैस्तैः सर्वविद्भिर्मुनीन्द्रैः ।।
२८. इन्द्रद्वीप-स्ताम्रपर्णो गभस्ति-र्नागद्वीपः सौम्यको वारुणश्च ।
गान्धर्वः कासेरुकः सागराढ्यः प्राचीनास्ते मृत्युलोकस्य भागाः ।।
२९. सर्वश्रेष्ठो मृत्युलोकोऽयमास्ते यस्मात् सैषा प्रोच्यते कर्मभूमिः ।
कर्मस्वातन्त्र्यं वरीवर्ति चात्र नान्यत्रैतत् सम्मतं शास्त्रविद्भिः ।।
३०. अत्रेवैतेषां युगानां प्रभावः सत्य-त्रेता-द्वापराणां कलेश्च ।
एतद्भिन्ने नास्ति चान्यत्र लोके सिद्धान्तोऽयं सर्वशास्त्रेषु गीतः ।।

(क्रमशः)

सम्पादकीयम्

संस्कृत-समुद्धरणं स्वात्मोद्धार एव

अस्मिन्नेवाङ्के उदासीनसम्प्रदायाचार्य-शिरोरत्नायमानानां वेददर्शनाचार्याणां श्री गङ्गेश्वरानन्द स्वामिपादानां लेखे संस्कृतभाषायाः देववाण्याः सर्वभाषाजननीत्वं सकलभूमण्डलीय-धर्मप्रसूत्वं नैकैः प्रमाणैर्युक्तिभिश्च साधितमास्ते। नूनमियं संस्कृतवाणी संस्कृतभाषा वा विश्वस्य कृते प्रभोर्महत्तरमवदानम्। तत्रापि भारतभूमित एवास्य आविर्भावाद् भारतस्य कृते पुनरिदं वाङ्मयं श्रद्धा-मानबिन्दुरूपम्। अनयैव भाषया वाङ्मयेन च भारतं विश्वस्मै विश्वशान्तेर्विश्वबन्धुत्वस्य चारित्रिक्याश्च शिक्षाया उपदेशं दातुं प्राभवदतीते, साम्प्रतं प्रभवति, भविष्यति च प्रभविष्यति। यतो हि इयममरवाणी, अस्खलद्गतिश्चास्ति। तथापि तस्यां कार्यकृतं तरतमत्वं जायते एव। तैस्तैः कार्यैः कदाचन चमत्कारो जायते, कदाचन अचमत्कृतमेव तत्कार्यं प्रवर्तते। तत्र हेतुस्तदुपासकानां सक्रियता-निष्क्रियतैव वा। अनुष्ठातृणां क्रियाशीलतया देववाण्याः प्रभावोऽतितरां प्रसृतो भवति चेत्तदपेक्षया तदुपासकानां गौरवादिश्रीवृद्धिर्महत्तरं फलं तदुपासनस्य। तेन देशस्यापि गौरवो वृद्धिं याति। इत्थं देववाण्या अस्याः समुन्नयनेन अस्माकं देशस्य, समाजस्य व्यक्तेश्च सर्वस्यैव विशेषतो लाभः।

देशस्वातन्त्र्यानन्तरं पारतन्त्र्याभिशापशप्तानां नैकेषां नैसर्गिकगुणगणानां वस्तूनाञ्च समुद्धरणाय स्वदेशशासनद्वारा प्रयतनमर्थायातम्। भारत-शासनेन तेषु बहुषु विषयेषु प्रयतितम्, तल्लाभाश्च अस्माभिर्भुज्यन्त एव। परं शिक्षाक्षेत्रे शासनस्य तादृशी तत्परता सुनियोजितता च दृष्टिपथं नोपयाति, विशेषतः संस्कृत-शिक्षाक्षेत्रे। सामान्यशिक्षाक्षेत्रे पूर्वं अंग्लशासकैर्याऽभिसन्धिपूर्विका पद्धतिराश्रिता, सैवाद्यापि भारत-शासकैः परिचाल्यते। तस्यैव फलं सर्वत्र देशे शिक्षा-संस्थानेषु जायमाना उपप्लवा वक्तुं शक्यन्ते। आसीत्तेषां निरोधकं तत्त्वमपि अस्माकं संस्कृतौ यत्किल अनयैव देववाण्या तदीयवाङ्मयेनैव च समुद्घाट्यते। किन्तु स्वदेशशासनेन शिक्षाक्षेत्रस्य यावदुपेक्षणं कृतं तत्र सर्वाधिकमुपेक्षणमस्यैव संस्कृतवाङ्मयस्य वक्तुं शक्यते। आसीत्प्राचीना संस्कृतस्य निष्कामाध्ययनाध्यापनमयी गुरुकुलप्रणाली। परं प्रविलापिता सा बुद्ध्या वैदेशिकशासकैः स्वसाम्राज्यस्थैर्याय। स्वातन्त्र्यकाले च स्वदेशीयशासकैः प्रत्यक्षं तल्लोपायाऽप्रयतमानैरपि परमानपेक्षितया उपेक्षया अप्रत्यक्षं सा प्रविलाप्यत एव। कतिपयैरेवाहोभिः इत्थं विलुम्पमानमिदं देववाणी-वरदानं सर्वथा तिरोहितं चेत् भारतराष्ट्रस्य सविधे किमपि अनन्यसाधारणं श्रद्धा-मानकेन्द्रबिन्दुरूपमेव नावशिष्टं स्यात्।

संस्कृतस्यास्मिन् उपेक्षणे संस्कृतशिक्षासंस्थानानां तत्र पाठयतामध्यापकानाञ्च समुपेक्षा परं प्रयोजिका। पञ्चविंशतिवर्षैः त्रिंशद्वर्षैर्वा पाठयन्तोऽध्यापकाः वार्धक्ये सर्वथा वृत्तिहीनाः शिष्टं जीवनं कथंकथमपि यापयन्ति। कार्यकालेऽपि अन्यसामान्यशिक्षा-शिक्षकेभ्यो न्यूनतमं वेतनं लभन्ते। महार्घताभृत्यादिकं किमपि तेभ्यो न दीयते। इत्थं कार्यप्रवणताकाले कार्य-विरामकालेऽपि च दुर्दशामेवानुभवन्ति संस्कृतविद्वांसः। विद्यार्जनकाले पुनस्तेषां सौख्यं दूरतरमेव। अभियुक्तैरुच्यत एव—'सुखार्थी चेत्त्यजेद् विद्यां विद्यार्थी चेत् त्यजेत्सुखम्' इति। एतादृशा यावज्जीवं परिपीडिताः संस्कृताध्यापकाः कथं स्वविधेयात् संस्कृताध्ययनाय बलात्प्रेरयेयुः, कथं वा ते संस्कृते परिनिष्ठितस्य गुरोरेतादृशं दयनीयं चित्रं विलोक्य स्वात्मानमपि तत्र पातयितुं प्रभवेयुः। एवमद्य शासनसमुपेक्षया संस्कृत-शिक्षायाः स्रोत एव दिनेदिने सर्वथा शुष्कतां याति। अस्या एव महत्या विपत्तेस्त्राणाय दूरदर्शिभिः कैश्चिद्विद्वद्भिः प्रादेशिकसंस्कृतविद्यालयाध्यापक-समितिः परिचाल्यते, तन्माध्यमेन च सङ्घशक्त्या शासनस्य संस्कृतविषयिणीमात्मघातिकामुपेक्षां च्छेत्तुं प्रयत्यते। अस्या एव समितेः अचिरात्सम्पन्नस्य चतुर्थमहाधिवेशनस्य वृत्तमध्यक्षीयं भाषणञ्च अङ्केऽस्मिन्नस्माभिः प्रकाश्यते। एतेषां विषये स्वीयविचारा आगामेऽङ्के प्रस्तोष्यन्ते। ●

संस्कृतशिक्षाया व्यावहारिकी त्रिसूत्री-योजना

प्रचलिता क-ख-ग-वर्गीकरण-पद्धतिः सर्वथाऽवाञ्छनीया

— आचार्य श्री सरस्वतीप्रसाद चतुर्वेदः —

[प्रादेशिक-संस्कृत-विद्यालयाध्यापक-समितेश्चतुर्थमहाधिवेशनस्य अध्यक्षपदेन प्रदत्तं श्री चतुर्वेद महाशयानामिदं भाषणं संस्कृतशिक्षां वर्तमानयुगोपयोगिनीं विधातुकामानां कृते प्रमाणतर्कानुगृहीतं सर्वोत्कृष्ट-योजनासंवलितमस्ति । संस्कृतायोगप्रतिवेदनानुसारं संस्कृतशिक्षा-नवीनक्रमसञ्चालनाय सङ्घट्टितं केन्द्रीय-संस्कृत-शिक्षाविशेषाधिकारिपदं विभूषयद्भिरेभिर्यावानत्र विषये अनुभवः समासादितः, तत्पूर्वञ्च मध्यप्रदेश-शासनप्रदत्तस्य अस्यैव विषयस्य सम्पादने तैर्यावत्सक्रियं कार्यं कृतम्, सर्वस्यास्य फलद्रूपेयं योजना । संस्कृतविद्वद्भिरियं दृढं विचारणीया, मननीयाऽनुकरणीया च । भाषणस्यायमर्धोंऽशः । शिष्टश्च अग्रिमाङ्के प्रपूर्येत ।—**सम्पादक**]

मध्यप्रदेशे स्वर्गीय पण्डित रविशङ्कर शुक्ल महोदयानां मुख्यमन्त्रित्व-काले अपूर्वका योजना परिकल्पिता राज्यशासनेन यस्यां नैकास्ता वार्ता आसन्, यासां समुपलब्धये अद्यापि 'प्रादेशिक-संस्कृतविद्यालयाध्यापक-समितिरियं संचेष्टते । योजनायामस्यां छत्तीसगढीये रायपुरनगरे नवीन शासकीयो विद्यालयः स्थापितोऽभवत्, यः किल इतरशासकीय-महाविद्यालयानां समस्तरीय आसीत् । पाठ्यक्रमे प्राचीनविषयातिरिक्ताः आधुनिकविषया अपि समावेशितास्तत्र । सर्वेऽपि प्राध्यापका आङ्ग्लपद्धतीनाम् उपाधि-महाविद्यालयानां सममेव वेतनं लभन्ते स्म । सर्वेभ्यश्च छात्रेभ्यः पर्याप्ता छात्रवृत्तिः दीयते स्म । तदुपकरणानां नवीनभवन-क्रीडा प्राङ्गण - छात्रावास - पुस्तकालयानामपि साधीयसी व्यवस्थाऽऽसीत् । उद्दिष्टमेतदेव यत् संस्कृतच्छात्रा अपि तथैव शिक्षणीयाः येन तेऽपि संस्कृतेतरविषयाध्यायिनां छात्राणामिव प्रबुद्धाः नागारका भवेयुः, राष्ट्रसेवायै च समपेक्षितां योग्यतां भजेयुरिति ।

एतदर्थं मध्यमा, शास्त्री, आचार्य इत्याख्याः परीक्षाः सागर-विश्वविद्यालयान्तर्गताः परिचालिताः । आधुनिकयुगानुकूलायाः समकक्षतायाः लोकप्रसिद्धेश्च दृष्ट्या सागर-विश्वविद्यालयेन 'इण्टरमीडिएट (क्लॉसिक), बी० ए० (क्लॉसिक), एम० ए० (क्लॉसिक) इति नव्यानि नामानि प्रचारितानि ।

रायपुर-महाविद्यालयादर्शानुसारमेव रीवाँ-जबलपुर-ग्वालियर-इन्दौरनगरेषु अपि नव-संस्कृतमहाविद्यालयानां सञ्चालनस्य योजना सुनिश्चिताऽऽसीत् । किन्तु आधुनिकता-संस्पर्शतः पलायमानानां कतिपयेषां रूढिप्रिय - संस्कृतसेवकानामभियानेन मध्यप्रदेशस्य अन्येषु स्थानेषु न केवलं प्रस्ताविता महाविद्यालयाः एते स्थापिता एव नाभवन्, प्रत्युत रायपुर-संस्कृत-महाविद्यालयोऽपि सङ्कटग्रस्तः सन् स्वकीयां प्रत्नां प्रतिष्ठामपि गोपायितुं सन्दिहानोऽभूत् ।

उत्तरप्रदेशे डॉक्टर सम्पूर्णानन्द महाभागानां मार्गनिर्देशेन तस्मिन्नेव काले एकः सर्वविश्रुतो वाराणसेय-संस्कृत-विश्वविद्यालयः स्थापितोऽभवत् यदीयः स्तरः अन्यविश्वविद्यालयेभ्य उच्चकोटिको वर्तते । अत्र प्राध्यापकानां वेतनमानादिविषयाः संस्कृतानुरागिणां कृते गौरवावहं वस्तु । प्रत्नस्य 'काशिक-राजकीय-संस्कृत-महाविद्यालय'-संज्ञकस्य (गवर्नमेण्ट संस्कृत कालेज, बनारस) उत्तराधिकारिरूपेण स्थापितत्वाद् अस्या लोकप्रियतायां नापि किञ्चित् सन्देहास्पदं वस्तु । इतः समुत्तीर्णाश्छात्राः विशेषां ख्याति भजन्ते । एतदर्थं नूनम् उत्तरप्रदेशशासनम् अन्येभ्यो राज्यशासनेभ्यः अनुकरणीयम् ।

किन्तु स्वातन्त्र्योत्तरकाले विविधशैक्षणिकव्यवस्थासु नैका समस्याः समुद्भूताः । चतुर्दशवर्षाणि यावत् बालकेभ्यः प्रारम्भिकशिक्षाया अनिवार्यत्वाकरणात् प्राचीन-संस्कृत-पाठशालानां महत्त्वं प्रयोजनं च सन्देशस्पदं संवृत्तम् । छात्रा यदा स्कूलेषु पठित्वा, व्यवहारोपयोगिज्ञानञ्च समासाद्य जीविकोपार्जनहेतवे सविशेषं क्षमा भवन्ति चेत्, एतासु पाठशालासु पठनाय छात्राः कुतः सुलभाः स्युः ? अत एतास्वपि संस्कृत-पाठशालासु इतरविद्यालय इव संस्कृतेतरविषयाणां समावेशो गलेपतित इव संवृत्तः । अत एव वाराणसेय-संस्कृतविश्वविद्यालये संस्कृतेतर-विषयाणां सूची कामं सुदीर्घा व्यापिका च दृश्येत, तथापि गणित-

भूगोल-विज्ञानादिविषयाणामपि अन्येषां विषयाणां हिन्दीभाषया वैकल्पिकीकरणात् तेषामुपयोगिता ह्रसति। सर्वेऽपि हिन्दीविषयमालम्ब्य आधुनिक-विषयाणां ज्ञातृत्वस्यावलेपं बिभ्रति। फलतोऽन्यच्छात्राणां ज्ञानेन तौलनिकदृष्ट्या एतेषाम् आधुनिकविषयज्ञानं प्रायः शून्यमिव भवति।

मध्यप्रदेशीय - संस्कृतमहाविद्यालयानां मध्यमा-कक्षीय - पाठ्यक्रमेषु संस्कृतेतरविषयेभ्यः प्रतिशतं पञ्चाशदङ्काः, शास्त्रिपरीक्षासु च प्रतिशतं चत्वारिंशदङ्काः निर्धारिता आसन्। सहैव प्रत्येकविषयस्य कृते पृथक्-पृथक् अध्यापका नियुक्ता आसन्। योजनायामस्यां समालोचकानां संस्कृतविषयकप्रौढताया अभावस्य आक्षेप आसीत्। किन्तु समस्या तावती प्रौढिमासादनविषयिणी नासीत् यावती संस्कृतच्छात्राणां युगानुरूपमहत्त्वाधानस्यासीत्।

अपरं काठिन्यं संस्कृतसमस्यानां वर्गीकरणस्य। यदि प्रारम्भिक-माध्यमिकयोः उच्चस्तरीणस्य च संस्कृत-संस्थानानां वर्गीकरणसमितिः सङ्घट्ट्येत तदा प्रत्येकविद्यालयः स्वीयं कार्यं सुचारुतया सम्पादयितुं प्रभवेत्। किन्त्वत्र तु संस्कृतविद्यालयेषु स्पर्धैव प्रवृत्ता दृश्यते यद् विभिन्नविषयेषु तेषामपि छात्राः आचार्य-परीक्षासु प्रविष्टाः भवेयुरिति। फलतो नाममात्रं भूयसीनां पाठशालानामाचार्यपरीक्षावधिका मान्यता दृश्यते, परं समपेक्षितशिक्षोपकरणैः साधनसज्जाभिः समुपयोगिन्यः आधुनिकविषयसम्बद्धसम्यग्ज्ञानेन सह सुपुष्ट-संस्कृतशिक्षादृष्ट्या केवलं प्रथमा-मध्यमाध्यापिकाः संस्था अपि परिगणिता एव समुपलभ्येरन्। आवश्यकमेतद् यत् विश्वविद्यालयः प्रान्तीयशासनञ्च मिलित्वा एतादृशं वर्गीकरणसिद्धान्तं मार्गयेयुर्येन प्रथमा, मध्यमा, शास्त्री, आचार्यपरीक्षा-सञ्चालिकानां पाठशालानां संख्या सीमिता स्यात्।

अस्माभिः किल संस्कृताध्यापनस्य त्रिसूत्री-योजनाऽत्र प्रस्तूयते—

१. देशे अनिवार्यतया ईदृशी शिक्षा देया, येन सर्वेषां छात्राणां संस्कृतस्य प्रारम्भिकज्ञानं भवेत्। फलतस्ते देशस्य प्रत्नां गौरवमयीं संस्कृतिं जानीयुः। अद्यापि भारतीयसमाजे प्रचलितानां पूजापाठ-कर्मकाण्ड-कीर्तन-प्रवचनप्रभृतीनां मर्माण्यवगच्छेयुः। देशे च ते पूर्वमाध्यमिकस्तरीण सामान्यशिक्षा-शिक्षितेभ्यश्छात्रेभ्य इव जीविकोपयोगिक्षेत्रेष्ववतर्तुं क्षमा भवेयुः।

२. अपरा योजनेयं यत् यथा कला-विज्ञान-प्राविधिकप्राककरीयाऽधिशास्यधियन्तृत्वादिक्षेत्रेषु प्रविश्य भारतीयाश्छात्रा विशिष्टं ज्ञानमासादयन्ति तथैव सर्वसुलभ-सामान्यशिक्षया सहैव संस्कृतसाहित्यं भाषा-विशेषज्ञानं च वैकल्पिकं विधीयेत। तात्पर्यमेतद् यत् विज्ञान-इञ्जीनियरिंग-डाक्टरीविषयाणां छात्राणामिव संस्कृतश्छात्रा अपि स्वीयं विशिष्टं पदं स्थापयेयुः। उपर्युक्तासु शासकीयासु वैयक्तिकीषु वा सर्वविद्यासु सामान्यशिक्षासु अन्यव्यवसायेषु च तेऽपि इतरोपाधि-परीक्षोत्तीर्ण-समकक्षं स्थानमासादयेयुः। एतदर्थं प्रतियोगितात्मक-परीक्षासु संस्कृतभाषा-साहित्येन सह संस्कृतवाङ्मयस्य विशिष्टं शास्त्रं वैकल्पिकविषयत्वेन स्वीक्रियेत।

एतेन संस्कृतच्छात्रेभ्यो हीनभावनाया एकदेशितायाश्च कलङ्कः परिमृज्येत, राष्ट्रियसेवाक्षेत्रे च तेषामपि प्रवेशोऽक्षुण्णो भवेत्। विज्ञान-गणित-आंग्ल-भाषादिविषयाणां स्नातकानामिव संस्कृतभाषा-साहित्यस्य संस्कृतवाङ्मयीन-शास्त्रीयविषयाणां वा स्नातकोऽपि पी० सी० एस० डिप्टीकलेक्टर, डी० एम० कलेक्टर-प्रभृत्युच्चस्तरीणोऽधिकारी कर्मचारी किमिति न स्यात्, यदि शासनतस्तस्मै एतादृशावसरप्रदान-सुविधायाः प्राविधानं विधीयेत।

३. तृतीययोजनायां संस्कृतस्य सामान्यविज्ञान-वाङ्मयस्य च उच्चस्तरीय-विशिष्टरूपाणां प्रकाराणां वा संरक्षणं संवर्धनं समुन्नयनं च समभिप्रेतं स्यात्। एतदर्थमावश्यकमेतत् यत् शास्त्रिपरीक्षापर्यन्तम् इतिहास-भूगोल-गणितादिविषयाणामध्यापनस्य नूनं व्यवस्था भाव्या। अस्यां योजनायां सामान्यच्छात्राणां प्रवेशोऽसम्भवी। परिगणितेभ्यश्छात्रेभ्य एव शिक्षण-मेतत् प्रदीयेत ये किल न्याय-मीमांसा-वेद-दर्शनादीनाम् उच्चशिक्षाशास्त्राणाम् उच्चस्तरीणं ज्ञानं काङ्क्षन्ति, यैर्वा तदपेक्ष्येत।

जानन्त्येव भवन्तो यदद्य ज्ञान-विज्ञाने आशातीतं वृद्धिङ्गते स्तः। भूमित एव स्वचालितवायुयानानि भित्त्वा खगोलगतानामन्येषां ग्रहोपग्रहाणां परिचय

आसाद्यते। किन्त्वस्माकं देशे आधुनिकयुगे प्राचीनशास्त्राणाम् अध्ययनाध्यापन-शोधपरीक्षणादिकार्याणि उदास्यन्ते। व्याकरण-न्याय-मीमांसादिविविधशास्त्रेषु अस्माकं प्राच्यचिन्तकैः यावदद्भुतं कार्यं कृतं तेषां वर्धनं तु दूरे आस्ताम्, तदवगमोऽपि सम्प्रति कठिनतरः संवृत्तः। गणितज्यौतिषे आयुर्वेदे च पुरा कियत् महत्त्वपूर्णं कार्यमभवत्! तत्सर्वमद्य अवरुद्धप्रायमेव। शास्त्राणामेतेषां ज्ञानमद्य कतिपयग्रन्थानां पङ्क्तिष्वेव परिसीमितम्।

आवश्यकमेतत् यदस्मिन् विकासयुगे भारतीयप्राचीन शास्त्राणामपि विकासो भवेत्। प्राचीनभारतीयशास्त्रीय-चिन्तनधारायाः, विवेचनस्य, अनुसन्धानस्य च पद्धतिर्जात्वपि अवरुद्धा न स्यात्। सदैव सा प्रवहेत्। तस्या एव च सुगम्भीर-सुदृढाऽऽधारशिलायामेव अभिनवं भारतं निर्मीयेत। अनुमन्यत एव तत्रभवद्भिर्यत् 'संसारो' 'जगत्' वा शब्दोऽमुमेव यौगिकमर्थमभिदधाति यत् प्रगतिरेव जीवनम्, गतिहीनता च मृत्युरिति। दौर्भाग्यात् पण्डितसमाजे या किल एकाग्रचित्तता शास्त्रार्थप्रक्रियायामालक्ष्यते स्म, अद्य साऽपि अवरुद्धेव लक्ष्यते, अथवा पिष्टपेषणायितेव वा विलोक्यते।

संक्षेपत उपर्युक्त-त्रिसूत्री-योजनानुसारं संस्कृताध्ययनस्य सोपानत्रयं भवेत्। तेषु जूनियर हाईस्कूलस्तरं यावत् प्रथमं सोपानम्, यत्र वर्तमानशासकीययोजनानुसारं सर्वेषां कृतेऽनिवार्यं निःशुल्कं ज्ञानं वितीर्यते। तेनैव क्रमेण संस्कृतमाध्यमेन सञ्चालितानां संस्कृतप्राथमिकपाठशालानां विद्यालयानामपि सञ्चालनं भाव्यम्। एवं जूनियर-हाईस्कूल-स्तरपर्यन्तम् उपर्युक्तेषु द्विविधविद्यालयेषु संस्कृतस्य विस्तृतः पाठ्य-क्रमः समाविष्टः स्यात्, तस्मै च प्रधानता दीयेत, येन प्रत्येकभारतीयच्छात्रः प्राचीनभारतीयसंस्कृत्या परिचितः स्यात्। स हितोपदेशं शास्त्रं पुराणादिकं यावदवगच्छेत्। एतेन सः स्वीयमातृभाषाया अपि समुचितव्यावहारिकज्ञानवान् भवेत्। यतो हि संस्कृतशिक्षया वर्णोच्चारणस्य प्रारम्भिकव्याकरणस्य अत्यावश्यकविषयाणां च ज्ञानं तस्मि सहजतः एव संक्रामितं स्यात्।

द्वितीयसोपाने मध्यमा-शास्त्रिपरीक्षा-पाठ्यक्रमे संस्कृततेर-वैकल्पिकविषयेषु गणितस्य, भूगोलस्य इतिहासस्य, सामान्यविज्ञानस्य च पृथक्-पृथक्रूपेण समावेशो नितान्तमावश्यको भवेत्। एतादृशशास्त्रिपरीक्षोत्तीर्णाश्छात्रा इतरविषय-स्नातकानामिव राष्ट्रियसेवासु सार्वजनिकजीवने च समानाधिकारिणो व्यवहारकुशलाः सफलाश्च सिद्ध्येरन्।

तृतीयसोपाने तु कतिपयेष्वेव परिगणितेषु केन्द्रेषु परिगणितानामेव छात्राणां कृते स्नातकोत्तराध्ययनस्य शोध - शोधोत्तर - समीक्षात्मक - पद्धतेरेव च प्राधान्यं स्यात्। अर्थात् संस्कृतविदुषां भूयान् वर्गस्तु विद्यालयीय-शिक्षाकार्येष्वेव समुपयुज्येत। ततो न्यूनसंख्यको वर्गः उपाधिमहाविद्यालयीय - पाठ्यक्रमे वैकल्पिक - संस्कृताध्यापनाय नियोज्येत। शिष्टाः अङ्गुलिगण्याः परिगणिताः शास्त्रपारङ्गता विद्वांसः, तदनुरूपविशिष्टयोग्यतावन्तश्छात्राश्चैव अस्मिन् विभागे गृहीताः स्युः। इत्थं विद्यालयः, महाविद्यालयः, उच्चशिक्षासंस्थानम्, इति त्रिष्वेव सोपानेषु संस्कृताध्यापकानां योग्यतानुसारं समावेशो भवेत्।

नेदमत्र पृथग् वक्तव्यं यत् उपर्युक्तेषु तत्तत्सोपानेषु अन्यविषयाणामिव वेतनक्रमाद्या आर्थिक्यः सुविधाः दीयेरन्। संस्कृतेन सह कीदृशोऽपि भेदभावो नाद्रीयेत। एतदर्थमावश्यकमेतत् यत् सर्वेषां संस्कृताध्यापनसंस्थानानां नवीनं वर्गीकरणं स्यात्। वाराणसेय-संस्कृतविश्वविद्यालयेनापि वर्गीकरणस्य नवीनः सैद्धान्तिकः कार्यात्मकश्च मानदण्डः स्वीकरणीयो भवेत्। साम्प्रतं संस्कृतविद्यालयेषु प्रचलित क-ख-ग-वर्गीकरणपद्धतिः सर्वथा अवाञ्छनीया, यतो हि न सा तर्कसङ्गता। विषयेऽत्र विस्तृतविवेचनं नापेक्षितम्। (क्रमशः)

युगोऽयं सन्देष्टि—'संस्कृतज्ञाः सङ्घटयेयुः !'

—श्री के० लक्ष्मण शास्त्री—

[विराट् संस्कृत-सम्मेलनाध्यक्षीयं भाषणम्]

विदितमेवैतदत्र समुपस्थितानां सर्वेषामपि तत्रभवतां यत् सर्वेऽपि वयं संस्कृतशिक्षाविषयमेवाधिकृत्य किमपि चिन्तयितुं, किमपि निर्धारयितुं तथा कमपि सङ्कल्पं ग्रहीतुमत्र समुपस्थिताः स्मः। संस्कृतशिक्षापदेन च वयं त्रिविधान् अर्थात् गृह्णीम इत्यपि प्रायः सर्वसम्मतमेव। तद् यथा—सर्वेषामपि जनानां साधारणं संस्कृतभाषाज्ञानमिति प्रथमः, सकलशास्त्रेषु केषाञ्चित् विशिष्टं पाण्डित्यमिति द्वितीयः, तथा एतदुभयद्वारा भारतीयसभ्यता-सदाचारादीनां ज्ञानं पोषणं परिरक्षणञ्चेति तृतीयः। अयमेव त्रिवर्गः सम्प्रति सर्वेषामपि अस्माकं प्राधान्येन साधनीयो वर्तते। तदर्थमेव च सम्प्रति प्रायः सर्वेष्वपि प्रदेशेषु लघु बृहद्वा सभा-सम्मेलनादीनामायोजनं विधीयमानं वर्तते तथा वैयक्तिकरूपेणापि बहवो जनाः प्रयतमाना दृश्यन्ते। एतस्मिन् उत्तरप्रदेशेऽपि अयोध्या-हरिद्वार-मथुरा-कानपुर-लखनऊ-प्रभृतिस्थानानि संस्कृतविषये सुप्रसिद्धान्येव वर्तन्ते।

किन्तु महत्याश्चिन्ताया अयं विषयो वर्तते यद् अस्माकमभीप्सिता अर्थाः शनैः क्षीयमाणा एव दृष्टिपथमुपयान्ति। सर्वसाधारणसमाजे संस्कृतस्य प्रमुखं महत्त्वपूर्णं च स्थानमस्माभिः सम्पादनीयम्। मातृभाषाज्ञानानन्तरं सर्वेषु माध्यमिक-विद्यालयेषु संस्कृतभाषाया आवश्यकशिक्षणाय सुव्यवस्था करणीया। यदि भारतस्य सर्वेष्वपि प्रदेशेषु माध्यमिकशिक्षापर्यन्तं संस्कृतस्याध्ययनमावश्यकं विहितं स्यात्तदा नूनं सर्वेऽपि नागरिकाः संस्कृतभाषया परिचिता भवेयुः। तेषु च केचन प्रतिभावन्तो जना विशिष्टामपि योग्यतां लभेरन्। परन्तु संस्कृतशिक्षायाः प्रायेण ऐच्छिकत्वात् वैकल्पिकविषयरूपेण परिगृहीतत्वाच्च कस्मिन्नपि प्रदेशे आवश्यकसंस्कृताध्ययनस्य सुव्यवस्था नास्ति। अस्मिन् प्रदेशेऽपि बहुसंख्याकेषु विद्यालय-महाविद्यालयेषु संस्कृत-विषयस्य अध्येतॄणां संख्या बहुत्र अल्पीयसीति भवन्तो जानन्त्येव।

तत्र सर्वत्रापि संस्कृतस्य ऐच्छिकत्वमेव प्रधानं कारणम्। हिन्दीभाषिषु प्रदेशेषु तु त्रिभाषायोजनायां तृतीयभाषारूपेण संस्कृतस्य परिगृहीतत्वात् कतिपयकक्षापर्यन्तं संस्कृतशिक्षा आवश्यकतया प्रचलति स्म। परं 'कोठारी-आयोग'स्य निर्णयानुसारं यदि तृतीयभाषास्थाने संस्कृतं परित्यज्य अन्यैव काचित् प्रादेशिकी भाषा अध्याप्यते, तदा एतेष्वपि प्रदेशेषु संस्कृतस्य आवश्यकमध्ययनं शीघ्रमेव समाप्तं भविष्यति। यदि कोठारी-आयोगस्य निर्णये संशोधनं विधाय प्रादेशिकभाषाया हिन्द्या वा सह अर्द्धांशरूपेण वा संस्कृतस्यापि सन्निवेशो विधीयेत, तदा संस्कृताध्ययनमपि सर्वत्र प्रचलितं भवितुमर्हति। एतदर्थं डा० सम्पूर्णानन्द, श्री के० एम० मुंशी, श्री अनन्तशयनम् आयङ्गर प्रभृतिभिः बहुभिर्माननीयैर्मनीषिभिः, तथा संस्कृत–विश्वपरिषद्, अ० भा० संस्कृत-साहित्य-सम्मेलनम्, सार्वभौम-संस्कृतप्रचार-कार्यालश्चेति बह्वीभिः संस्थाभिः कोठरी-आयोगस्य विरोधः कृतः। तथैव संस्कृतसमर्थनाय अनेकशः प्रस्तावाः स्वीकृताः, प्रेषिताश्च केन्द्रशासन-समक्षम्।

तमेति सर्वसम्मतः पक्षः। भाषातत्त्वविदां दृशाऽपि भाषा द्वेधा अनुश्रूयते—१. संस्कृता २. प्राकृता चेति। संस्कृतभाषात एव प्राकृतभाषाः सेमेटिकभाषाश्च लब्धप्रसवाः। पौरस्त्य-पाश्चात्यप्रदेशेषु प्रचुरप्रचाराः ग्रीक-लेटिन-ट्यूटानिक-फ्रेञ्च-जर्मन-इंग्लिशादि-भाषापदवीमारुढाः लोकगिरः संस्कृतमहासरित्सकाशादेव निष्क्रान्ता इति भाषातत्त्वविदोऽप्यभिमन्यन्ते।

सर्वतः प्राक् 'संस्कृत'-शब्दस्य प्रयोगो वाल्मीकीयरामायणे सुन्दरकाण्डे दृश्यते। तत्र अशोकवाटिकायां भगवत्या सीतया साकं सम्भाषणे हनुमान् व्यवहारप्रयुक्तां संस्कृतभाषां व्याजहारेति आदिकविराह—

अहं ह्यतितनुश्चैव वानरश्च विशेषतः।
वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम् ॥
यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्।
रावणं मन्यमाना मां सीता भीता भविष्यति ॥

ध्वनितमनेन यत्तदानीं संस्कृतभाषा व्यवह्रियमाणा भाषाऽऽसीदिति। पुरा संस्कृतभाषाया व्यावहारिकत्वमिदं पाणिनिमहर्षेः दूराद्धूते च, प्रत्यभिवादे शूद्रे इति सूत्राभ्यां प्लुतत्वानुशासनवशात् सुतरां प्रमाण्यते। निरुक्तकारेण तत्र भवता यास्केनापि भाषिकेभ्यो धातुभ्यो नैगमाकृतो भाष्यन्ते, शवतिर्गतिकर्मा कम्बोजेषु भाष्यते, विकारमस्यार्येषु भाषन्ते शव इत्युक्तम्। तथैव महाभाष्येऽपि दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु इति। एवमादिवाग्युक्तिभिः संस्कृतभाषाया भाषणव्यवहारगतत्वं पुरा भाषाणादिव्यवहारेषु प्रयुज्यमानत्वञ्च सुतरां सिद्धयति।

इत्थं विश्वजनीनां सर्वासां भाषाणां धर्माणां ज्ञानानां विज्ञानानां वा प्रसवित्र्या अस्या संस्कृतवाचोऽन्यतरं प्रकारं वैदिकीं भाषामवलम्ब्यैवात्र कियान् विचारः प्रस्तूयते। विविधानां वैदिकमन्त्राणां भावमंशं वाऽनुसृत्य विविध-धर्मप्रवर्तकानामुपदेशादयः साम्प्रतमपि संगिरन्ते उच्चैः सर्वधर्माणां ज्ञानादिकानाञ्च प्रसष्टावित्रीत्वं सुरभारत्याः। प्रसङ्गेऽस्मिन् अधोनिर्दिष्टा मन्त्राः विमृश्याः—

अक्षैर्मा दीव्यः कृषिमित् कृषस्व
वित्ते रमस्व बहु मन्यमानः।
तत्र गावः कितव तत्र
जाया तन्मे विचष्टे सवितायमर्यः ॥
(ऋक्० १०.३४.१३)

मन्त्रेणानेन कवषस्य ऐलूषस्य ऋषेः भगवत्सन्देशहरत्वं सूचितम्। अतोऽत्र भगवद्दूतत्वं सङ्केतितं स्पष्टमेव। मन्त्रोऽयं विवृणोति मानवोत्कर्षधर्मरहस्यम्—द्यूतवर्जनम्, कृषिकर्षणम्, न्यायार्जितं स्वल्पमपि वित्तं पर्याप्तं मत्त्वा सन्तोषेण जीवननिर्वाहविधानम्, कर्षणादिकस्य सर्वोत्तमपरिश्रमरूपत्वं प्रसादहेतुकत्वञ्च, घासादिदानेन गवादिपोषणम्, एवमादि।

अयं भावः—सर्वस्वामी सविता = सर्वप्रेरकः सर्वनियन्ता परमेश्वरो मह्यं व्यावहरति भगवत्सन्दिष्टं धर्मतत्त्वम्, भगवताऽहं बोधयामीति। मुसलिमबान्धवाः कवषेण ऐलूषेण महर्षिणा प्रदर्शितम् आत्मनः परमेश्वरस्य सन्देशहरत्वम् अनुकुर्वाणा मुसलिममतप्रवर्तकं स्वनामधन्यं श्री 'मोहम्मदा'ख्यं-'खुदा'ख्यस्य परमेश्वरस्य 'पैगाम'परनामकस्य ईश्वरसन्देशस्य हारित्वात् 'पैगम्बर'नाम्ना सङ्गिरन्ते।

अन्यच्च—

यवं वृकेणाश्विना वपन्तेषं दुहन्ता मनुषाय दस्रा।
अभिदस्युं बकुरेणाधमन्तोरुज्योतिश्चक्रथुरार्याय ॥
(ऋक्० १.११७.२१)

अस्मिन्मन्त्रे 'मनुषाय' = 'मनुष्याय' इत्यस्य विशेष्यस्य विशेषणमस्ति 'आर्याय' इति। आर्यः 'ईश्वरपुत्रः' इति मानवस्य ईश्वरपुत्रत्वविशेषणं प्रस्फुटं निरुक्ते (५.६.२६)। अमुमेव शब्दार्थमनु-

गृह्णन्तः 'क्रिश्चियन' - बान्धवाः तद्धर्मप्रवर्तकम् 'ईसामसीहा'ख्यं महानुभावम् ईश्वरपुत्रं मन्यन्ते ।

जैनाः बौद्धाश्चापि मन्वादिस्मृतौ, वेदेषु, योगदर्शनादिशास्त्रेषु च प्रतिपादितान् सिद्धान्तशब्दान् सिद्धान्तांश्च सिद्धान्ततोऽङ्गीकुर्वन्तः स्वस्वधर्ममुन्नमयाञ्चक्रुः । अत्र मनुस्मृत्यादीनाम् उद्धरणानि प्रस्फुटयन्ति तथ्यमदः—

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥
(मनु० ६. ९२)

मनुप्रोक्तम्, सत्यं बृहद्दतमुग्रं दीक्षातपो ब्रह्मयज्ञः पृथिवीं धारयन्ति' (अथर्व० १२.१.१) इति अथर्ववेदप्रतिपादनम्, इमं मा हिंसीर्द्विपदम् (शुक्लयजुः० १३.४७) इति शुक्लयजुर्वेदघोषणम्, इमानि यानि पञ्चेन्द्रियाणि मनः षष्ठानि इत्यस्ति अथर्ववेदे (१९.९.५) प्रतिपादितं वचः । योगदर्शने (२.३०) अहिंसा-सत्यादयो वर्णिताः । तथा चोक्तम्—अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । अन्यच्च, एते जाति - देश - कालसमयानवच्छिन्नाः सार्वभौम महाव्रतम् ।

उपरिनिर्दिष्टानां धर्मादीनां मध्ये अहिंसादीन् शब्दान् तद्गतगुणांश्च , प्राधान्येन समाश्रितवन्तो जैना बौद्धाश्चेति नास्त्यत्र संशयावलेशोऽपि ।

हिब्रूमते यहो वा, यह्वेव, यह्वै' इत्यादीनि भगवत्वाचकानि विविधानि नामानि श्रूयन्ते, तानि संस्कृतस्य 'यह्व'शब्दस्य प्रतिरूपमात्राण्येव सन्ति । तथा च निघण्टुः (३.३) यः महन्नामसु पठितः । अन्यच्च विश्पतिं यह्वमतिथिं नरः ।

आंग्लभाषायां जर्मनभाषायाञ्च क्रमशः भगवद्वाचकौ गॉड (God) गात् (Gott) शब्दौ अतिप्राचीन-ट्यूटानिकभाषायाः घूतोम (Ghutom) शब्दस्य विकारौ । अयञ्च 'घूतोम'-शब्दः संस्कृत-हूत-शब्दान्निष्पन्नः । प्रमाणाञ्चात्र प्रामाणिक-आक्सफोर्ड-आंग्लभाषा-कोशः (The Great Oxford English Dictionary).

मतान्तराणि सिद्धान्तैर्नामभिश्च संस्कृतभाषयाऽनुगृहीतानि । सर्वस्य कार्यस्य आरम्भो भगवन्नाम्ना विधेय इत्यस्ति वर्णितं मन्त्रे—

नामानि ते शतक्रतो विश्वाभिर्गीर्भिरीमहे ।
इन्द्राभिमातिषाह्ये । (ऋक्० ३.३७.२)

शतक्रतो ! इन्द्र ! अभिमातीनाम् कार्यविघातकशत्रूणाम् । षाह्ये=अभिभवनिमित्तम् । विश्वाभिर्गीर्भिः=विविधाभिः स्तुतिभिः तव नामानि । ईमहे=वाचामहे । निर्विघ्नकार्यसिद्धयर्थं त्वन्नामोच्चारणं कार्यारम्भे कामयामहे इति मन्त्राकूतम् ।

कार्यविघातक-दुरितापनोदनार्थं कार्यारम्भेऽस्ति श्रौतनियमो भगवन्नामावश्योच्चारणतायाः । मुस्लिमबान्धवाः प्रत्यहं पञ्चवारं 'नमाजा'भिधानां भगवदभ्यर्थनां विदधति तारस्वरेण बिस्मिल्ला रहमान रहीम । अर्थात् 'आरभे भगवन्नाम्ना यो दयालुः क्षमी पुनः'—'I begin all the works with the name of God who is merciful and forgives all the faults of men.' वेदाभिमतमेव भगवन्नाम्ना समस्तकार्यारम्भस्य प्रतिपादके 'बिसमिल्ला रहमान रहीम' इति वाक्यम् प्रत्यहं मुसलिम-बान्धवाः ब्रुवते । अतः सिद्ध्यति यद् धर्मान्तरेष्वपि संस्कृतभाषायाः संस्कृत्यनुकृतिरिति ।

वैदिक-संस्कृतभाषायां प्रधानतमं ग्रन्थरत्नमस्ति ऋग्वेदादिचतुष्टयम् । तत्र मानवधर्म-प्रतिपादका भावा एव विशेषतः सर्वत्रैव चकासति । परमन्यासु भाषासु तत्तद्धर्म-प्रतिपादका एव ग्रन्थाः प्रायशः सन्ति । वसुधैव कुटुम्बकम् इति भावनां क्रोडीकुर्वन् भगवान् वेदः स्पष्टं विश्वमानुषतां प्रकटयति—

यस्य ते विश्वमानुषो भूरेर्दत्तस्य वेदति ।
वसु स्पार्हं तदा भर ॥ (ऋक्० ८.४५.४२)

सायणभाष्यम् : हे इन्द्र ! ते त्वया, विभक्तिव्यत्ययः । दत्तस्य=दत्तं भूरे=बहु यस्य तद्धनम् । कर्मणि षष्ठी । विश्वमानुषः सर्वो मनुष्यः वेदति जानाति, तत् स्पार्हं स्पृहणीयं वसु आभर ।

अस्मिन् मन्त्रे देशविशेषवास्तव्यः सम्प्रदायविशेषदीक्षितः जातिविशेषाभिमानी न निर्दिष्टः कश्चित्; अपितु अस्त्यत्र मनुष्यमात्रवचनो विश्वमानुषशब्दः ।

अपरञ्च **विश्वमनुषां मरुताभियक्षसि** (ऋ० ८.४६.१७) इति मन्त्रांशोऽयमुपदिशति विश्वमानवाय भगवदाराधनम् । तदित्थम्—इन्द्र ! मरुताम्=मरुतां स्वामी । त्वं विश्वमानुषां, सर्वैः मनुष्यैः, इयक्षसि, इज्यसे पूज्यसे त्वदाराधनं सर्वैः मानवैः कर्तव्यमिति भावः । भगवान् वेदपुरुषः उपदशति मानववर्गाय भगवदाराधनं हितावहमिति । अतो विश्वहितोपदेशकस्य वेदस्य विश्वपुस्तकत्वे नास्ति सन्देहगन्धोऽपीति ।

संस्कृतभाषा विश्वभाषाजननीपदमधिरूढा प्राचीनतमेति मन्यन्ते ऐकमत्येन भाषातत्त्वविदः । यद्यपि पूर्वं केचन पाश्चात्यगवेषकाः हिब्रूभाषां विश्वभाषाजननीं मन्यमानाः विप्रतिपद्यन्ते स्म ; तथापि साम्प्रतं त्यक्तनिर्बन्धैः सर्वैः पाश्चात्त्यविद्वद्भिः संस्कृतभाषायाः मूलभाषात्वं सहर्षमुररीकृतम् । प्राच्यविद्वांसो भाषाविज्ञानविशारदाः तुलनात्मक-भाषाशास्त्र-विचारकाः डाक्टर मङ्गलदेव शास्त्रि महाभागाः, पण्डित-रघुनन्दन शर्म महोदयाश्च भाषासम्बद्धेषु स्वस्वलेखेषु, अनुसन्धानधुरन्धराः पण्डित भगवद्दत्ताख्याः विज्ञवराश्च स्वरचितस्य 'वैदिक-वाङ्मया'ख्यस्य इतिहासस्य द्वितीयावृत्तौ एकोनसप्ततिपृष्ठे अन्ये च बहवो भाषाविज्ञानप्रवीणाः अकाट्य-तर्ककलापोपन्यासपुरस्सरं संस्कृतभाषाया विश्वभाषाजननीत्वं समर्थितवन्तः ।

श्रीरघुनन्दनशर्मणा स्वकृतौ 'वैदिकसम्पत्तौ' सोदाहरणं विविधभाषाणामपभ्रंशशब्दा मौलिक-संस्कृतशब्देभ्य एव निष्पन्ना इति विस्तरशः प्रतिपादितम् । श्रीशर्मकृता वैदिक-सम्पत्तिः' २४० पृष्ठतः २८५ पृष्ठपर्यन्तमवलोक्या भाषा-साम्य-प्रसङ्गे ।

विदुषां केवलं विनोदाय दिग्दर्शनाय च आङ्गलभाषायाः केषाञ्चित् शब्दानां परं संक्षेपतो गौणतो विविधान्यभाषाणाञ्च कतिपयानां शब्दानां निष्पत्तिः संस्कृत-शब्द राशितः प्रस्तूयते—

संस्कृतशब्दाः	आङ्गलभाषाशब्दाः	अर्थ (हिन्दी)
ते	दे They	वे
वयम्	वी We	हम
यूयम्	यू You	तुम
माम्	मी Me	मुझको
नक्तम्	नाइट Night	निशा (रात्रि)
ऋतम्	राइट Right	ठीक
महित्वम्	Might	बल, शक्ति
मातर्	मदर Mother	माता
पितर्	फादर Father	पिता
भ्रातर्	ब्रदर Brother	भाई
दुहितर्	डाटर Daughter	पुत्री
स्वसा	सिस्टर Sister	बहन
सूनु	सन् Son	पुत्र
द्वे, द्वि	टू Two	दो
त्रि	थ्री Three	तीन
षष्ठ	सिक्स्थ Sixth	छः
सप्त	सेवन्थ Seventh	सात
अष्ट	एट् Eight	आठ
नव	नाइन Nine	नौ
षष्टि	सिक्स्टी Sixty	साठ
लोक	लुक Look	देखना
मास	मन्थ Month	मास

संस्कृतशब्दाः	आङ्गलभाषाशब्दाः	अर्थ (हिन्दी)
उपरि	ओवर Over	ऊपर
मन	माइण्ड Mind	मन
मनु, मानव	मैन Man	मनुष्य
हस्त	हैण्ड Hand	हाथ
न	नो No	नहीं
नास्ति	नॉट Not	नहीं है
पथ	पाथ Path	मार्ग
नाम	नेम Name	नाम
द्वार	डोर Door	दरवाजा
समिति	कमेटी Commitee	समिति
अहम्	आइ एम् I am	मैं हूँ
मृद्	मड् Mud	कीचड़
मिश्र	मिक्स Mix	मिलाना
भ्रष्ट	वर्स्ट Worst	खराब
पशुचर	पास्चर Pasture	पशु-चरागाह

संस्कृतशब्दाः	जेन्दभाषा-शब्दाः
असुर	अहुर (परमेश्वर)
सोम	होम
सप्त	हप्त
हस्त	जस्त
बाहु	बाजु
विश्व	विस्प
पशु	पशु
वैद्य	वैद्य
गाथा	गाथा

संस्कृत	फ़ारसी
तनु	तन
जानु	ज़ानु
हस्त	दस्त
शिर	सर
मेष	मेश
उष्ट्र	उरतर, इत्यादयः,

संस्कृत	यूनानी	अर्थ (हि०)
शतम्	केटन	सौ
श्वान	क्वान	कुत्ता
दश	डेक	दस
अश्मन्	अक्मन	पहाड़

संस्कृत	मिस्र-भाषा	अर्थ (हि०)
आदि	आत	आरम्भ
अक्ष	अख	देखना
अन्त	अन्तू	सीमा
आप	आप	पानी
पुष्प	पुष	फूल
रसना	रस	जिह्वा

संस्कृत	अरबी	अर्थ हिन्दी
हर्म्यं	हरम	महल
सुर	हूर	देवता
अन्तकाल	इन्तकाल	मरना
लोहित	लहू	खून
मा	मा	नहीं
न	ना	हम लोग
ख	खला	आकाश
भ्रम	बहम	भ्रम
अम्बा	उम्म	माता
धनी	गनी	धनवान्

संस्कृत	अफ्रीका-देशस्य स्वाहिली भाषा	अर्थ हिन्दी
कर्त	काटा	काटना
मृत्यु	माती	मरना
जम्बु	जम्बरऊ	जामुन
सिंह	सिम्बा	शेर

इत्यादि । विस्तारभयाद् विरम्यतेऽत्रैव ।

इत्यमेव अमेरिकन-भाषायामपि बहवः शब्दाः स्पष्टं संस्कृताधारिताः प्रतीयन्ते । यथा **कपीनां** (वानराणां) बाहुल्यात् **कपीरा** नामकः प्रदेशः मत्स्य-व्यापारवशाच्च **मत्स्यायनद्वीपः** ।

चीनीभाषायां जापानी-भाषायाञ्च अनेके शब्दाः संस्कृतशब्दसाम्यं दधते । भारतीयभाषासु तु सर्वत्रैव संस्कृताधारित्वं स्फुटमेव ।

पौर्वापर्यविलोकनानन्तरं सिद्धमदो यत्संस्कृतभाषा एवास्ति प्राचीनतमा मूलभाषा यस्या अपभ्रष्टरूपतामन्या निखिला अपि भाषा बिभ्रति । देवैरुद्गीर्णा अनुकृता चास्याः गीर्वाणवाण्या एव संस्कृतिः प्रचलिता स्वप्रचलितासु निखिलास्वपि भाषासु रूपान्तरवैविध्यमेव धत्ते ।

कल्याणोत्कर्ष-सत्पथम्

— प्राध्यापकः श्री मुकुटबिहारी लालः —

[काशी-हिन्दूविश्वविद्यालये राजनीतिविभागाध्यक्षचरः]

(२)

९. समाजः

सुधीः समत्वसंसिद्ध्यै समाजोत्कर्षहेतवे ।
रहितं वर्गसङ्घर्षात् समाजं स्थापयेत् समम् ॥ ५६ ॥
स्वराज्यं समताराज्यं श्रम-श्रमिक-गौरवम् ।
लोकार्थो लोकतन्त्रं च समाजः सम उच्यते ॥ ५७ ॥
दमनाधिप्यनिर्मुक्त - श्रमिक - क्षेमशासनम् ।
वृत्तेः समाजीकरणं व्यवस्था लोकतान्त्रिकी ॥ ५८ ॥
लोककल्याणसंसृष्टा उद्योगाः सार्वलौकिकाः ।
सर्वेभ्यो वृत्तिसौलभ्यं जीवनानन्दसाधनम् ॥ ५९ ॥
संस्कृतिः समतामूला वर्गवैषम्यनिर्गता ।
रक्षा सर्वाधिकाराणां साम्यराज्यगुणाः स्मृताः ॥ ६० ॥
समे समाजे सुजनाः सेवन्ते सहजं समम् ।
सर्वोत्थानं समोत्कर्षं सौभ्रात्रं सहकारिताम् ॥ ६१ ॥
जातिवंशपदानां ते दर्पाहङ्कारनिर्गताः ।
वर्गसङ्घर्षनिर्मुक्ताः समाः सर्वोपकारकाः ॥ ६२ ॥
सर्वक्षेत्रेषु सन्न्यायं लोकतन्त्रं नृगौरवम् ।
कल्याणोत्कर्षसौविध्यं यत्नतो वर्धयन्ति ते ॥ ६३ ॥
साम्याधृतव्यवस्थायां श्रम-व्यक्तित्व-गौरवम् ।
स्वातन्त्र्यं समतामूलं सहकार्य-समन्वितम् ॥ ६४ ॥
आधिपत्याद् विनिर्मुक्तिः शोषणादभिरक्षणम् ।
सौविध्यं लोकयात्रायै समोत्कर्षाय साधनम् ॥ ६५ ॥
प्रबन्धे ह्यधिकारं च वर्तनं मानवोचितम् ।
सर्वस्थितौ लोकरक्षां लभन्ते श्रमिका जनाः ॥ ६६ ॥
समाजहितसंवृद्धयै समता - न्यायसिद्धये ।
व्यापारोद्योगलाभाः स्यू राज्यादेशनियन्त्रिताः ॥ ६७ ॥
श्रमिक-क्षेम-सम्पन्नं समत्वेन समन्वितम् ।
भूषितं जनकल्याणैः समाजोत्कर्ष-संयुतम् ॥ ६८ ॥
प्रेरितं लोकभावेन शोषणाधिप्यनिर्गतम् ।
आर्थिकं संविधानं हि सर्वश्रेष्ठमुदाहृतम् ॥ ६९ ॥
समाजोत्कर्ष - संसिद्ध्यै जनकल्याणवृद्धये ।
उद्योगानां महाङ्गानां समाजीकरणं चरेत् ॥ ७० ॥
सुव्यवस्थितराष्ट्रे वै समाजीकृतसम्पदः ।
विनाशयति वैषम्यं वर्गसङ्घर्ष - शोषणे ॥ ७१ ॥
प्रतिष्ठापयते न्यायं श्रमिकानां च गौरवम् ।
संवर्धयति सौभ्रात्रं राष्ट्रोत्कर्षं नृमङ्गलम् ॥ ७२ ॥
सम्पदं लोकयात्रार्थं लोकः सर्वः समर्जयेत् ।
अधिकं यदि सामर्थ्यं तल्लोकार्थं समर्पयेत् ॥ ७३ ॥
लोकतन्त्र - समायुक्ते समाजे समतास्थिते ।
लोकसेवासमोत्कर्षः स्वातन्त्र्यं सहकारिता ॥ ७४ ॥
लोकन्यायसुसम्पुष्टिः सौजन्यं साम्यसंयमौ ।
लोकार्थस्य सुसंवृद्धिः संस्कृतिः समुदाहृता ॥ ७५ ॥
व्यक्तित्वं समतासिद्धं समष्टेर्भावभूषितम् ।
मानवत्व-समायुक्तं लोकात्मोत्कर्षतत्परम् ॥ ७६ ॥
लोकज्ञानेन सम्पन्नं शील-साहस-संयुतम् ।
समे समाजे सुजनैः श्रेष्ठव्यक्तित्वमुच्यते ॥ ७७ ॥

१०. लोकतन्त्रम्

स्वातन्त्र्यं जीवनप्राणाः सर्वमानवगौरवम् ।
प्रबुद्धं लोकतन्त्रं वै तस्योत्कृष्टप्रसाधनम् ॥ ७८ ॥
सर्वेषु संविधानेषु श्रेष्ठं वै लोकतान्त्रिकम् ।
सर्वे वै राष्ट्रिका यस्मिन् सर्वसत्तासमन्विताः ॥ ७९ ॥

समतासहितं न्यायं स्वातन्त्र्यमधिकारकम् ।
मानवं गौरवं ज्ञानमैश्वर्यं प्राप्नुवन्ति ते ॥ ८० ॥
स्वातन्त्र्यं देशबन्धुत्वं समत्वं सहकारिता ।
न्यायो नराधिकारश्च लोकतन्त्रं प्रशस्यते ॥ ८१ ॥
समत्वं लोकतन्त्रस्य गुणो नैसर्गिकः स्मृतः ।
सर्वक्षेत्रेषु तद्वृद्धिस्तन्त्रस्य ध्येयमुच्यते ॥ ८२ ॥
जनशक्तिः समाजस्य शक्तेर्हि मूलकारणम् ।
जनशक्त्या धृतं राज्यं लोकतान्त्रिकमुच्यते ॥ ८३ ॥
जनशक्त्यभिवृद्धिर्हि जनकल्याणसाधनम् ।
तस्मात् सर्वप्रयत्नेन जनशक्तिं विवर्धयेत् ॥ ८४ ॥
तितिक्षुर्लोकसन्निष्ठः कार्यशीलः पराक्रमी ।
समत्वार्थी सदादर्शः सौम्यः सर्वोपकारकः ॥ ८५ ॥
देशभक्तः सदाचारी न्यायस्वातन्त्र्यनिष्ठितः ।
सहकार्ये राष्ट्रहिते रतो वै लोकतान्त्रिकः ॥ ८६ ॥
नराधिकारसम्माने ये नराः सर्वमानवम् ।
आत्मतुल्यं हि मन्यन्ते ते वै सन्नागराः स्मृताः ॥ ८७ ॥
लोकतान्त्रिकभावेन सम्भृतो दृढनिष्ठया ।
समाजोत्कर्षसंलग्नो यः स सन्नागरः स्मृतः ॥ ८८ ॥
कर्मण्यो राजनीतिज्ञः समाजोन्नतिहेतवे ।
प्रसाधयेत् प्रयत्नेन विधानं लोकतान्त्रिकम् ॥ ८९ ॥
पोषयेत् तस्य सम्मानं नीतिसिद्धान्तमान्यताः ।
शोधयेत् तस्य वैकल्यं सद्गुणांश्च प्रसारयेत् ॥ ९० ॥
शिक्षयेज्जनतां तस्य लक्ष्यपद्धतिनीतिषु ।
सार्वलौकिककर्तव्ये समाजस्य परिस्थितौ ॥ ९१ ॥
मताधिकारसम्पन्न - जनता राष्ट्रनिष्ठया ।
सेनावर्गदलाधिप्यं नृपतन्त्रं विरोधयेत् ॥ ९२ ॥
कुर्याल्लोकसभासभ्यान् वृत्तशीलगुणान्वितान् ।
देशबन्धुत्वसन्निष्ठान् कर्तव्यन्यायनिष्ठितान् ॥ ९३ ॥
क्रौर्यं रूढिं निराकृत्य लोकन्यायं प्रपोषयेत् ।
लोककल्याणसम्पन्ने नीतिं रीतिं समर्थयेत् ॥ ९४ ॥

सभ्यो लोकसभामध्ये लोकसेवाव्रतान्वितः ।
लोकतन्त्रस्य मर्यादां पद्धतिं परिपालयेत् ॥ ९५ ॥

सभाध्यक्षस्य सम्मानं लोकन्यायं प्रपोषयेत् ।
साहसेन विवेकेन भ्रष्टाचारं विरोधयेत् ॥ ९६ ॥

रचनात्मकसङ्घर्षैरन्यायं प्रतिरोधयेत् ।
वर्धयेल्लोककल्याणं स्वातन्त्र्यं साम्यबन्धुताम् ॥ ९७ ॥

जनविश्वाससम्पन्ना मन्त्रिणो न्यायनिष्ठिताः ।
तत्परा जनसेवायां स्वार्थाहङ्कारनिर्गताः ॥ ९८ ॥

न्यायिताभाव - चारित्र्यविवेकोत्साहसाहसैः ।
भजेयुर्जनकल्याणं राष्ट्रोत्कर्षं जगद्धितम् ॥ ९९ ॥

मायादम्भेन्द्रजालानि परित्यज्य प्रयत्नतः ।
निष्पक्षमतिभावाभ्यां शासको न्यायमाचरेत् ॥ १०० ॥

११. लोककल्याणराज्यम्

कुरुते जनकल्याणं सुराज्यं प्रगतिप्रियम् ।
रक्षणं रञ्जनं सेवा प्रजायास्तस्य लक्षणम् ॥ १०१ ॥

राष्ट्रकल्याणसंवृद्धिर्दीनानां परिपालनम् ।
सार्वलौकिककल्याणविस्तरः परिपोषणम् । १०२ ॥

लोकजीवननिर्माणं दुराचारस्य शोधनम् ।
लोककल्याणराज्यस्य सद्गुणाः समुदाहृताः ॥ १०३ ॥

उद्योगानां समुत्थानं कृषिवाणिज्यवर्धनम् ।
सर्वेभ्यः श्रमसौलभ्यं वेतनं जीवनोचितम् ॥ १०४ ॥

श्रमिकानामधिकारगौरव - क्षमतोन्नतिः ।
लोककल्याणराज्यस्य सद्गुणाः समुदाहृताः ॥ १०५ ॥

लोकसंस्कृतिसम्पुष्टि - ज्ञानविज्ञानविस्तृतिः ।
विदुषां चैव सम्मानः कलाकौशलसम्भृतिः ॥ १०६ ॥

विकलाङ्गस्य शुश्रूषा दौर्गत्येषु सहायता ।
लोककल्याणराज्यस्य सद्गुणाः समुदाहृताः ॥ १०७ ॥

(क्रमशः)

प्राचीन-भारतीयाः क्रीडाः

—डॉ० नरेश झा शास्त्री—

(२)

१६. वाह्य-वाहक-क्रीडा

पूर्वोक्तपद्धत्या हरिणाक्रीडने य पराजितः स विजयिनं स्कन्धेन वहन् पूर्वयोजितस्थानपर्यन्तं नीत्वा तत्र च पणानुसारं गोधनादिकं चारायित्वा ततः पुनः प्लुतिदेशपर्यन्तं नयति । एष पणबन्धो यस्यां क्रीडायां सा वाह्य-वाहक-क्रीडानाम्नी निगद्यते यथोक्तं श्रीमद्भागवते—

आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः ।
यत्रारोहन्ति जेतारो वहन्ति च पराजिताः ॥
वहन्तो वाह्यमानाश्च चारयन्तश्च गोधनम् ।[1]

श्रीकृष्णादिषु गोपबालकेषु हरिणाक्रीडने ये पराजिता विजिताश्च, ते वाह्यवाहकक्रीडामेनामकुर्वन् । एतस्याः क्रीडाया उपलक्षणञ्च ब्रह्म-विष्णुपुराणयोः यथा—

ते वाहयन्तस्त्वन्योऽन्यं भाण्डीरस्कन्धमेत्यवै ।
पुनर्निवृत्तास्ते सर्वे ये ये यत्र पराजिताः ॥[2]

१७. देव-दैत्य-क्रीडा

इयं क्रीडा तदा प्रचलिता, यदा प्राचीने भारते दैत्यानां प्रबलप्रतापेन देवाः सन्तर्जिता अभवन् । अत एवास्यां क्रीडायां दैत्यानां विजयः देवानां पराभवश्च कल्प्यते । यथा—अत्र समवेता बालकाः द्विधा विभज्यन्ते तत्र प्रथमे विभागस्थाः स्वात्मानं देवरूपेण कल्पयन्ति बालकाः । द्वितीयविभागस्थाश्च स्वात्मनो दैत्यत्वं कल्प्यन्ते । ते च परस्परं क्रीडन्ति । क्रीडा चेयं मस्तकं मस्तकेन, वृक्षो वक्षो वक्षसा, बाहुभ्यां बाहू च संहत्य जलेन, रजसा, मुष्टिभिः, कन्दुकैः, कर्दमैः, गोमयैः, आन्दोलनैः, विकर्षणैरपि च शृङ्ग-शङ्खशब्दैः कोलाहलेन च खेल्यते । एतस्या क्रीडायाः विशेषतो निदर्शनं गणेशपुराणे यथा—

ययुर्बहिर्मुदा युक्ता धृत्वा हस्तान् परस्परम् ।
द्विभागीभूय चिक्रीडुः नानायुद्धविचेष्टितैः ॥
मस्तकं मस्तकेनैव वक्षसा वक्ष एव च ।
बाहूभ्यां चैव बाहू च निजघ्नुस्ते परस्परम् ॥
जलेन रजसा चैव कन्दुकैर्मुष्टिभिस्तथा ।
कर्दमैर्गोमयैः केचिदान्दोलन - निकर्षणैः ॥
कोलाहलं प्रकुर्वन्तः शृङ्गशङ्खरवैरपि ।
दैत्यभूता जयं प्रापुर्देवभूताः पराजयम् ॥[1]

१८. जलक्रीडा

इयं क्रीडा द्वेधा सम्पद्यते—एका बालकानां क्रीडारूपा । द्वितीया च स्त्री-पुरुषाणां मनोरञ्जनरूपा । तत्र प्रथमायां क्रीडनोत्सुका बालकाः कस्याञ्चिद् दीर्घसरस्यास्तटे स्थितं वृक्षमारुह्य जले पतन्ति । ततो जलमध्यस्थितं कमप्येकं बालकं लक्ष्यीकृत्याऽन्ये सर्वे बालकास्तदुपरि जलं प्रक्षिपन्ति । सोऽपि तेषामुपरि जलं प्रक्षिपति । अनया रीत्या श्रान्त एकलो बालकः पराजितो भवति, तदाऽन्यमभिलक्ष्य परस्परस्योपरि वा जलमञ्जलिभिः प्रक्षिपन्ति । अस्याः क्रीडायाः प्राथम्येनोल्लेखः गणेशपुराणे यथा—

---

[1] श्रीमद्भागवतम् १०.१८.२१-२२ ।

[2] ब्रह्म० १८७.१३; विष्णु० ५.९.१४ ।

[1] गणेशपु० उ०, ९४.८-१० ।

प्रादेशिक संस्कृतविद्यालयाध्यापक समितेः

चतुर्थ-महाधिवेशन-वृत्तान्तः

अयोध्या। जनवरीमासस्य २८ दिनाङ्के प्रादेशिक-संस्कृत-विद्यालयाध्यापक-समितेः चतुर्थ-महाधिवेशने प्रदेशस्य प्रतिजनपदीयानां संस्कृतविद्यालयाध्यापकानां विशालतरेण समूहेन एकस्वरेण उत्तरप्रदेश-शासनं सुस्पष्टं प्रतिबोधितं यत् 'सामान्यशिक्षा-शिक्षकाणामिव संस्कृतविद्यालयाध्यापकानां कृते तदचिरादेव समानवेतनक्रमस्य महार्घताभृतेः भविष्यनिधेः विश्रामवेतन-व्यवस्थायाश्च समुद्घोषणं कुर्यात्। अन्यथा उद्बुद्धानां संस्कृतविद्यालयाध्यापकानां विशालं जनमतं तस्मै तैरेव उपायैः स्वीयान् प्रस्तावान् स्वीकर्तुं विवशयिष्यति येषां किल तत्सुपरिचितमास्ते।

एतदर्थं समुपस्थितेन अध्यापकसमाजेन 'तदर्थ-समितिर'पि सङ्घटिता या हि प्रादेशिक-वेतनायोगतः एतेषां कृतेऽपि समुचित-वेतनक्रमादेः संस्तुत्यभावे तत्कालं सुदृढतरं महाभियानं प्रारभेत। समितेः संभाव्यमानस्य महाभियानस्य एकः प्रकारो नाम शान्तिमयमहिंसकं प्रदर्शनम्, कार्यनिरोधः, शासकानां परिवेष्टनम्, अनशनादिकं भवेच्चेत् अपरः प्रकारः पुनः शासनद्वारा चिरात् सिद्धान्तरूपेण स्वीकृतानामेवैतेषां प्रस्तावानां विषये न्यायाधिकरणं शरणीकृत्य तत एव न्यायप्रापणं स्यात्। एतदर्थं विधिविशेषज्ञैः सह विचार-विमर्शः तदर्थं समपेक्षितस्य धनराशेश्च सङ्ग्रहोऽपि सम्पादितो वर्तते।'

महाधिवेशनस्य फलश्रुतिमिमां जनसाधारणेषु समुद्घोषयता समितेः अध्यक्षेन आचार्य रामाश्रय त्रिपाठिना विद्यावयोवृद्धानां प्रायस्त्रिशतसंख्यकानां विदुषां स्वागतं कृत्वा तेभ्योऽभिनन्दनपत्रं समर्प्य तेषामाशीर्षि समासादितानि, समवयस्काः कार्यरताश्च प्रौढा विद्वांसः शरीरवाङ्मनोभिः सहयोगाय समाहूताः, समुल्लसितयौवनाश्च पण्डिता रक्तदानाय प्राणदानाय संप्रार्थिताः। तैरुक्तं यत्संस्कृतस्य प्रत्येकशः विद्यालयाध्यापकः 'कार्यं वा साधयामि देहं वा पातयामी'ति प्रतिज्ञया स्वयमुत्स्फूर्तया आत्मानं प्रतिबध्नात्वि'ति। अध्यक्षस्यानेन समाह्वानेन निखिलं तत्सभाभवनं तालीस्वनैः प्रतिध्वनितमभवत्। अपरस्मिश्च क्षणे सर्वत्र सूचीपातध्वनि-सूचकं निश्शब्दतागाम्भीर्यं प्रसृतं यद्धि प्रश्नस्य अस्य अनुपेक्ष्यत्वमवश्यसमाधेयत्वञ्च स्फुटं संसूचयदासीत्।

समितेरिदं चतुर्थं महाधिवेशनं भारतीय-गणतन्त्रस्य २३तम-जयन्ती-शुभदिने साकेतीये श्री भगवदाचार्य-स्मारक-सदनस्य सुविशाले सभाभवने प्रारभत, यस्य साभापत्यं शिक्षाविशेषज्ञैः भारतशासन-संस्कृतशिक्षा-विशेषाधिकारिचरैः आचार्य सरस्वती-प्रसाद चतुर्वेदैः कृतम्। अकस्माद् रोगाक्रान्तत्वात्तेषामनुपस्थित्या सभाया आध्यक्ष्यकार्यं महावैयाकरणैः आचार्य रुद्रप्रसाद त्रिपाठि महाभागैः कृतम्।

समितेरध्यक्षैः आचार्य रामाश्रय त्रिपाठिभिः श्री चतुर्वेद-महाभागानां मुद्रितम् अध्यक्षीयमभिभाषणं वाचितम्। (भाषणमिदम् अस्मिन्नेवाङ्के अन्यत्र सङ्कलितम्।)

महाधिवेशनेन अष्टौ प्रस्तावाः, अन्ये च त्रयः सद्यः समुपयोगिनः प्रस्तावा। सर्वसम्मत्या स्वीकृताः। (एते प्रस्तावा अस्मिन्नेवाङ्के प्रकाशिताः।)

महाधिवेशनस्य साफल्याय महामहिमराष्ट्रपतीनाम्

मञ्जलिना जलं प्रक्षिपन्ति स्म। वात्स्यायनप्रणीत-कामसूत्रानुसारं तु (४.६ एकपुरुषाभियोगप्रक०) 'जलक्रीडायां तद् दूरतोऽप्सु निमग्नः समीपमस्याः गत्वा स्पृष्ट्वा चैनां तत्रैवोन्मज्जेदिति ज्ञायते। (क्रमशः)

उपराष्ट्रपतीनाम्, प्रधानमन्त्रिणाम्, उत्तर-प्रदेशराज्यपालानाम्, राज्यशिक्षामन्त्रिणाम्, (माध्यमिक) शिक्षानिदेशकानाम्, पण्डितराज पद्मभूषण राजेश्वरशास्त्रि द्राविडानाम्, श्रीसुरतिनारायणमणि त्रिपाठिनां विधान-परिषत्सदस्यानाम् (वाराणसेयसंस्कृतविश्वविद्यालयोपकुलपतिचराणाम्), समाजवादी-दलनेतृणां श्रीसालिगराम जायसवालानां शुभसन्देशाः सम्प्राप्ता आसन्, येषामत्र वाचनमभवत् ।

ततः पदं प्रादेशिक-संस्कृत-विद्यालयाध्यापकसमितेः महामन्त्रिभिः श्री गोविन्द नरहरि वैजापुरकर महाभागैः (एम० ए०, न्याय-वेदान्त-साहित्याचार्यैः, काशिक-स्याद्वादमहाविद्यालय - साहित्यविभागाध्यक्षैः) समितेर्विगतवर्षचतुष्टयस्य विवरणम्, उपलब्धयश्च 'स्मरणिका'-पुस्तिकामाध्यमेन श्राविताः, यत्र समितेर्जन्महेतुरुपलब्धयश्च प्रमुखा आसन् ।

महाधिवेशनस्य उद्घाटनं आन्ध्रप्रदेशस्य संस्कृतशिक्षोपनिदेशकचरैः श्री कप्पगन्तुल लक्ष्मणशास्त्रिपादैः कृतम् (यच्चात्रैव अन्यत्र प्रकाशितम्)। महाधिवेशनस्य स्वागताध्यक्ष्यं फैजाबाद-मण्डलायुक्तैः गिरिजाप्रसाद पाण्डेय महोदयैः कृतम् । तेषामनुपस्थितौ तत्प्रतिनिधिभिः श्री सुशीलकुमार महोदयैः अतिथीनां स्वागतं कृतम् । सभायां फैजाबादमण्डलस्य अतिरिक्तायुक्तैः श्री प्रकाशचन्द्र मिश्रैरपि संस्कृत-संस्कृतितदुपासक-गौरवपरं भाषणं कृतम् ।

महाधिवेशनस्य महीयान् कार्यक्रमो नाम प्रादेशिकानां नैकेषां विभिन्न-जानपदीनानां विद्यावयोवृद्धानां विद्वदग्रेसराणां समभिनन्दनं तेभ्योऽभिनन्दनपत्रार्पणञ्चासीत् । त्रिंशद्वर्षाणि यावत् ज्ञानदानोत्तरं (विश्रामवेतन-भविष्यनिध्यादिलाभेन सर्वथाऽसम्पृक्तानाम्) सर्वथा निष्किञ्चनानां ज्ञान-भगीरथानां सभामञ्चे समास्तृता विबुधपङ्क्तिरियं सहृदयस्य कस्यापि चेतः अष्टविधसात्त्विकभावाभिभूतं विधातुमलं वक्तुं शक्या । सर्वेषामपि शीर्षाणि तेषां पदपाथोजेष्ववनतानि समभवन् ।

सभाध्यक्षैः आचार्य श्री रुद्रप्रसाद अवस्थी महोदयैः शास्त्रीयदृष्ट्या अध्ययनाध्यापनपदार्थस्य पाण्डित्यपूर्णं परिष्करणं विधाय संस्कृतशिक्षाया अन्यशिक्षाभ्योऽतिशायितोपादेयताविषये प्रभूततमा विचाराः समुपस्थापिताः ।

बरेलीक्षेत्रीय-संस्कृतपाठशाला - निरीक्षकैः श्री काशीप्रसाद मिश्रपादैः स्वीये सारगर्भे भाषणे उक्तम्—'स्वल्पैरेवाहोभिः समितेरस्या महतीयं समुपलब्धिर्यत्तया प्रादेशिकाः सर्वे संस्कृतविद्यालयाध्यापकाः स्व-स्वकर्तव्याऽधिकारविषयेषु परं प्रबोधिताः । इतः परं संस्कृताध्यापकानां कर्तव्यमिदं यत्ते सर्वविधौ मानापमानौ, अधिकारानधिकारविचारौ सङ्कुचितक्षेत्रीयताजातीयताभावौ च दूरं समुत्सार्य सर्वेषां विचारान् कृतींश्च एकस्मिन्नेव लक्ष्यभूते पथि योजयेयुरिति । कस्यापि न्याय्यमपि वक्तव्यं कोऽपि स्वभावतो न शृणोति, तद्धि स्वीयबलतः श्रावणीयमेव भवति । एतदर्थं सुदृढसङ्घशक्तेर्बलमनिवार्यतां भजते । शासनं बाधितं सदैव कस्यापि वचसि मन आदधाति । परम्पराया: शालीनतायाश्च निर्वहणपुरस्सरं जनताजनार्दनस्य चेतसि स्नेहाप्लुतं पदमासाद्य तत्र भवन्तो भवन्तः पूर्णतमेनोत्साहेन शासनस्य पुरतः समुपस्थिताः भवन्तु' इति ।

मिश्रपादैरग्रे उक्तम्—'अस्माकं शासनाधिकारिणः संस्कृतविद्यालयानाम् तदध्यापकानाञ्च समालोचनं स्वीयपदस्य गौरवपूर्णं कार्यं मन्यमानाः प्रायो दृश्यन्ते । सर्वथा च तान् सर्वसाधारणशिक्षकाणां परिप्रेक्ष्येणैव विलोकयन्ति । किन्तु संस्कृतविद्यालयाध्यापकानां या किल जीवनयात्रानिर्वहणदुर्दशाः पाठ्यविषयाणामनितरसाधारणगौरवश्च, तत्सर्वमविगणय्य शासकानामेतादृशं संस्कृताध्यापकसमालोचनं नूनं दुर्भाग्य-

पूर्णं कस्यापि विवेकशालिनः कृतेऽशोभनञ्च बलाद् वक्तव्यमापतति। अतस्तैरत्र नूनं सदयैः सहृदयैश्च भाव्यमित्येव अस्माकमभिप्रायः।'

अन्ते च महाधिवेशन-संयोजकैः फैजाबाद-क्षेत्रीय-संस्कृतविद्यालयाध्यापकसमितेः अध्यक्षैः श्री वैद्यनाथ द्विवेद पादैः सर्वेभ्यः सप्रश्रयं धन्यवादा वितीर्णाः। महाधिवेशनस्य साफल्याय साकेतगतानां हनुमानगढोकोशलेशसदन-छोटीछावनी-लक्ष्मणकिला-प्रभृतिप्रमुख-धर्मसंस्थानानामधिपतिभिः काय-मनो-धनैः सर्वविधः सहयोगः प्रदत्त इति ते सादरं सप्रश्रयञ्च धन्यवादार्हा इति भूयोभूयस्तेषां विषये कार्तज्ञं प्रकटीकृतं समितेर्महामन्त्रिणा। एवमेव महामन्त्रिणा भगवते रामभद्रस्य सहायक-कपीश्वराणामिव महाधिवेशन-सहायकाः कवीश्वरा विद्वांसः कार्यकर्तारश्च सर्वे हार्दिकेन प्रेम्णा श्रद्धया च भूयो भूयः समुपश्लोकिताः।

रात्रौ 'गुरुदक्षिणा' - नामकः संस्कृताभिनयः, प्रहसनञ्चापि जनसाधारणस्य नूनं हृदयावर्जकमभवत्।

विराट्-संस्कृत-सम्मेलनम्

जनवरीमासस्य २७ दिनाङ्के अत्रैव महाधिवेशन-प्रसङ्गे विराट्-संस्कृत-सम्मेलनं प्रादेशिक-क्षेत्रीय-जनपदीय-समितीनां समवेतं सम्मेलनञ्च आन्ध्रशासनस्य संस्कृतशिक्षोपसञ्चालकचराणां श्री कप्पगन्तुल लक्ष्मण-शास्त्रिणामाध्यक्ष्ये समभवत्। तेषां भाषणमतीव प्रेरणाप्रदमासीत् (यच्चात्रैव अन्यत्र प्रकाशितम्)। सम्मेलनस्यास्य समुद्घाटनं फैजाबादक्षेत्रीय-संस्कृत-पाठशालानिरीक्षकैः श्री शिवपूजन पाण्डेयैः कृतम्। नैकैर्विद्वद्भिः स्वीयाः प्रश्नाः समुपस्थापिताः। वर्तमान-राष्ट्रिय-शिक्षापद्धति-परिष्करण-परिप्रेक्ष्ये संस्कृत-शिक्षायाः शिक्षापद्धतेश्च को दायः? इति विषये मार्मिको विचारः समभवत्। सार्वमतेन सुनिर्णीतमेतद् यत् यावत् प्राचीना गुरुकुलशिक्षापद्धतिः तत्त्वतो गुरुशिष्यभावस्य मधुरतमः सम्बन्धश्च कस्यामपि शिक्षापद्धतौ प्रतिफलितो न भवेत्, तावत्साम्प्रतिक्यः शैक्षणिक्यः कीदृश्यः अपि अव्यवस्थाः न जातु परिमार्जिताः स्युरिति।

सार्वभौम - संस्कृतप्रचार - समितेः सञ्चालकैः श्री वासुदेव द्विवेद पादैः स्वीये महत्त्वाधायके भाषणे शिशुकक्षातः संस्कृतपाठनस्य सर्वथाऽनुपेक्षणीयत्वम्, तत्पाठनप्रकाराणां संक्षिप्ता रूपरेखा, तस्य फलञ्च महता आटोपेन समुपस्थाप्य सर्वे विद्वांसो जनप्रतिनिधयः शासकाश्च संप्रार्थिता यत्तथा भवद्भिर्यतनीयं यथा संस्कृतं जनसाधारणस्य औत्सुक्यपदं लभेतेति।

सङ्गीत-सम्मेलनम्

रात्रौ भव्यं सङ्गीत - सम्मेलनमभवत्। बालकद्वयस्य स्थानीयस्य तबला-सोलो-वादनम्, वाराणसेयानां श्री दामोदर विष्णु कालविण्ट एम.ए. बी.एड. संगीतप्रवीणानां कण्ठसङ्गीतम्, साकेतरत्नायमाणानां श्री बाबा पागलदास महाभागानां मृदङ्गवादनम्, श्री शङ्कर गौड पाटिल-श्री विद्यानन्द मुद्गल-प्रभृतीनां गायनं परं रससृष्टेः सहायकमभूत्।

महाधिवेशन-शुभारम्भः, श्रीरामानन्द-जयन्ती गणतन्त्रदिवसश्च

महाधिवेशनस्य प्रथमदिने २६ जनवरीदिनाङ्के कोसलेन्द्रमठ?

सर्वथा राज्याश्रिता एव आसन्। किन्तु चिरकालिकवैदेशिकदासताभिशापेन विदुषां स राज्याश्रयः साम्प्रतं शशविषाणायितः संवृत्तः। साम्प्रतिके लोकतन्त्रे लोकाः जनतापर्याया एव शासनशक्तेः परमधिष्ठानम्। अतो लोकैरेव विदुषां परिपालनस्यायं भरः सर्वथा वहनीय' इति।

आचार्यपादैरग्रे उक्तम्—'संस्कृतमेवैतादृशी अनन्यसाधारणी भाषा या किल अनेकतासु ऐक्यसूत्रं ग्रथयति। साम्प्रतं प्रचलितस्य उग्रतमस्य भाषाविवादस्य तद्दुष्फलभूतस्य नव-नवराज्यसङ्घटनविवादस्य च शमनाय एकमात्र उपायोऽस्माकं दृष्ट्या संस्कृतस्य राष्ट्रभाषापदे प्रतिष्ठापनं नाम। यतो हि भाषेयं सर्वथा पूर्णा, क्षमा, सर्वासां भाषाणां जनयित्री च भाषातत्त्वविदैरपि जेगीयते। प्रयत्नशतैरपि भाषेयं भारतीयजनजीवनतो वियोजयितुमशक्या। यतो हि भारतीयानां जीवनेन आजन्मात्ययादियं सुसंश्लिष्टा। हिन्दीभाषाया राष्ट्रभाषापदे समभिषेचनोत्तरमपि तस्याः पालन-पोषण-संवर्धनाय देववाणीरियं स्वीयमनुपेक्ष्यत्वमक्षुण्णतामेव द्योतयति। एतादृश्या भाषायाः समुपासका विद्वदग्रेसरा भवन्तोऽद्य जीवनयापननिर्वाह-विचारायात्र समवेताः, किमतः परं विधुरम्! वस्तुतो भवतां सर्वविधसंरक्षणं कस्यापि भारतशासनस्यानुपेक्ष्यं स्वोत्कर्षपर्यवसायि च कर्तव्यम्। 'सङ्घे शक्तिः कलौ युगे' इति सिद्धान्तानुसारं भवतामेतदर्थमत्र सम्मेलनं नूनं कालप्रवाहानुरूपमेव। अस्मिन् विधौ भवद्भिः सर्वविधं सङ्कुचितताधायकं भावजातं दूरेऽवस्थाप्य पारस्परिकमतभेदांश्च समुत्सार्य एकीभूय स्वलक्ष्यसिद्धौ दृढं प्रयतनीयम्। भगवान् मर्यादापुरुषोत्तमो रामभद्रो भवत्सु सर्वविधं बलमादध्यादित्येव कामये।'

स्वागताध्यक्षाणां लक्ष्मणकिलाधीशानां श्री सीतारामशरण महाभागानां विशेषकार्यवशादनुपस्थितौ स्वागतभाषणं रामगोपाल-संस्कृतमहाविद्यालय-प्राचार्यैः श्री वैद्यनाथ द्विवेदपादैः कृतम्।

सभायामस्यां जगद्गुरुवराणां श्री रामानन्दाचार्याणां जयन्तीमहोत्सवोऽपि महता समारोहेण समायोजितोऽभवत्, येषु महन्त श्री नृत्यगोपालदासानां बाबा हरिनामदास वेदान्ती महोदयानां च भाषणानि समुल्लेख्यानि। सभायां गणतन्त्रमहोत्सवविषयेऽपि विदुषां भाषणानि समभूवन्।

रात्रौ भव्यम् 'संस्कृत-हिन्दी - कविसम्मेलनम्' समभूत्।

धार्मिकानुष्ठानेभ्यो दैवबल-समर्जनम्

महाधिवेशनस्यास्य सर्वातिशयितं वैशिष्ट्यमिदमासीद् यत्सम्मेलनस्य त्रिष्वपि दिवसेषु महत्तराणां धर्मानुष्ठानानां दैवबलमपि संस्कृतवाङ्मयप्रतिरक्षकैः स्वात्मनि शौर्यातिशयसम्पादनार्थं महत्या श्रद्धया समर्जितम्।

प्रथमदिने २६ दिनाङ्के शास्त्रविध्यनुसारं महागणपतेः वाग्देव्याश्च षोडशोपचारं समर्चनं विधाय, एकादशसंख्यकवैदिकमाध्यमेन वैदिकवीरशक्कैः भगवतो रुद्रस्य प्रीतये लघुरुद्राभिषेकानुष्ठानं सविधि समभवत्।

द्वितीयदिने २७ दिनाङ्के श्रीवाल्मीकिरामायणस्य आदिकाव्यस्य सुन्दरकाण्ड-प्रकरणपाठः सदीप-पूजनपूर्वको नैकैर्विद्वद्भिः समाचरितः। भगवतो रामभद्रस्य सीताजातेः सहनुमतः षोडशोपचारपूजनञ्च पर्यन्ते समभवत्।

तृतीयदिने २८ दिनाङ्के सर्वोच्चयाज्ञिकानां नेतृत्वे स्थालीपाकविधिना स्थण्डिलादिपूर्वकं भगवन्तमग्निनारायणं प्रज्वाल्य पुरुषसूक्त-श्रीसूक्त-नवग्रहादिमन्त्रैः स्वाहाकारः समभवत्। समवेतैर्विद्वद्भिः सह यजमानेन श्री वैद्यनाथ द्विवेद पादेन भगवतेऽग्निनारा-

यणाय पूर्णाहुतिः समर्पिता । अन्ते च क्षेत्रपालाय बलिप्रदानपूर्वकं वर्चोदायकः श्रीमदग्निदेवः सम्पूजितः ।

अन्तरङ्गसमितेरुपवेशनम्, साधारणसभायाः विषयनिर्वाचिनी-सभायाश्च उपवेशने

प्रथमदिने प्रातः ९ वादनतः १२ वादनपर्यन्तम् अन्तरङ्गसमितेः उपवेशनमभूत् । तत्र आगतानां द्विशतसंख्यकानां जनपदीय-क्षेत्रीयप्रतिनिधीनां परस्पर-परिचयकार्यक्रमः समुल्लेख्य आसीत् ।

द्वितीयदिने तदैव समितिसमस्तानां साधारणसभाया उपवेशनमभूत्, यत्र समितेः पूर्वकेन्द्रीय-कार्यकारिणीसभया स्वीकृतस्य संविधानस्य वाचनं संशोधनञ्च समभवत् । सर्वैरैकमत्या संविधानमिदं स्वीकृतम्, पञ्जीकरणाय प्रेषणस्य निर्णयश्च प्रदत्तः । अन्ते च नवसंविधानानुसारं केन्द्रीयकार्यकारिण्या निर्वाचनमभवत् ।

तृतीयदिने तस्मिन्नेव समये विषयनिर्धारिणी-समित्या एकादश प्रस्तावाः शब्दरूपतां नीताः ।

महाधिवेशनस्य बाह्यः परिवेशः

महाधिवेशनस्य कृते एकं संयोजकमण्डलम् ३६ सदस्यायां स्वागतसमितिश्च सङ्घट्टिता सदस्यैः । स्वागतसमितेः संरक्षकाः हनुमानगढी-संस्थानाधिपतयः श्रीरामदासजी महाभागाः, श्री रामानुजाचार्य-पीठाधीश्वराश्च रामनारायणाचार्या आसन् । स्वागतसमितेरध्यक्षाः लक्ष्मणाकिलाधीशाः श्री सीताराम शरण महोदयाः, फैजाबादमण्डलायुक्ताः श्री गिरिजाप्रसाद पाण्डेयाः, स्वागतमन्त्रिणाश्च श्री रामनाथ मिश्र (बनारसी पण्डा) महोदया आसन् ।

स्वागतसमितेश्च अन्तर्गताः आवासमिति-भोजन-स्वागत-धनसंग्रहव्यय-यज्ञ-प्रचार - स्वास्थ्य - स्वयंसेवक-प्रकाशनोपसमितयोऽपि सङ्घट्टिताः । सर्वाभिश्च सुव्यवस्थितं स्व-स्वकार्यं निर्व्यूढम् । अत एवास्मिन् महाधिवेशने २०० प्रतिनिधीनां १००० दर्शकानाञ्च समीचीना व्यवस्थाऽभवत् । सभामञ्चोऽपि परमाकर्षक आसीत्, यत्र दूरध्वविस्तारकयन्त्र-प्रतिकृतिग्रहण-यन्त्राणाञ्च संयोजनमासीत् । प्रतिनिधीनां भोजनावासादेश्च समुचितः प्रबन्ध आसीत् ।

चतुर्थ-महाधिवेशने स्वीकृताः प्रस्तावा

१. (क) प्रादेशिक - संस्कृत - विद्यालयाध्यापक-समितेरिदं चतुर्थं महाधिवेशनम् उत्तरप्रदेशशासनतः सुदृढं कामयते यत् सामान्याशिक्षा-संस्थासु प्रचलितस्तत्तत्कक्षानुरूपो वेतनक्रम एव वाराणसेय-संस्कृत-विश्वविद्यालय - सम्बद्धेषु संस्कृत - महाविद्यालय-विद्यालयेषु सर्वेष्वपि वर्गीकृताऽवर्गीकृतेषु शीघ्रं परिचालनीयः । सहैव लाभत्रयी योजना (अ. भविष्यनिधिः, आ. विश्रामवेतनम्, इ. जीवन-बीमा) सर्वेभ्यः प्रदेया ।

(ख) सर्वेभ्यः संस्कृत-महाविद्यालय-विद्यालय-पाठशालाध्यापकेभ्योऽविलम्बं महार्घता - भृतेर्व्यवस्था भाव्या ।

(ग) भविष्यनिधेः विश्रामवेतनस्य च व्यवस्थामन्तरेण कोऽपि संस्कृतविद्यालयाध्यापकः सेवानिवृत्तो न विधीयेत । तस्मै अपि अन्यसेवेव सेवायुर्वृद्धेरवसरः प्रदेय एव ।

(घ) संस्कृत-महाविद्यालय-विद्यालयेभ्यो वेतनक्रमोऽयं उत्तरप्रदेश - शिक्षासंहितायाः ७३ अनुच्छेद-सम्बद्ध-राजाज्ञायाः प्रचारणतिथित एव कार्यान्वितः करणीयः, तेभ्यश्च ततोऽद्य यावत् अवशिष्टो वेतनांशश्च नूनं प्रदेयः ।

२. प्राच्य - संस्कृत - शिक्षाक्षेत्राणां संस्कृतमहाविद्यालय-विद्यालयानां च सर्वविध - कार्यजातस्य सञ्चालनाय पृथक् संस्कृत - निदेशालयः शीघ्रातिशीघ्रं सङ्घट्टनीयः, संस्कृतनिदेशक-सहिताः उपशिक्षानिदेशकाश्च तदर्थं सक्रममवस्थापनीयाः ।

३. संस्कृत-शिक्षानिदेशकपदे उपशिक्षानिदेशकपदे वा प्राच्य-संस्कृतशिक्षा-क्षेत्रीय एव आहितानुभवः, प्रशासनकुशलः आचार्यपरीक्षोत्तीर्णश्चैव अधिकारी नियोज्येत । तदैवास्माकीना एतद्विषयिणी अभ्यर्थना संस्कृतविद्यालयानां समुत्कर्षश्च तत्त्वतो भवितुं शक्नुयात् ।

४. संस्कृतविद्यालयानां च स्थावर-जङ्गम सम्पत्तीनां सर्वेक्षणं कारयित्वा ताभ्यो राजकीयं संरक्षणमविलम्बं दीयेत । एतदर्थं प्रादेशिकस्तरीणा 'संस्कृत-पाठशाला-संरक्षिका उपसमितिः' सङ्घटय्य त्वरितं सा कार्यानुयुक्ता स्यात् ।

५. उत्तरप्रदेशस्य प्रतिजनपदम् एकैकः सर्वाङ्गपरिपूर्णं आदर्श-राजकीय-संस्कृतमहाविद्यालयः शीघ्रतरं स्थापनीयः । उक्तविद्यालयानां प्राचार्येष्वेव जनपद-पाठशाला-निरीक्षकस्य कार्यभारः प्रदेयः ।

६. प्रादेशिक - संस्कृतमहाविद्यालयेषु आधुनिकविषय-प्राध्यापकेभ्योऽयूनं सहायक - प्राध्यापकपदस्य वेतनमानो विशेषभृतिश्च प्रदेया । एतेषामाधुनिकविषयाणां कृतेऽपि 'विभागाध्यक्ष' - पदं शीघ्रतरं स्वीकृत्य शिक्षकपदं ततः सर्वथा समाप्येत ।

७. यतः आचार्य-शास्त्रिपरीक्षे एम. ए. बी. ए. परीक्षासमकक्षे, अतः आचार्य-शास्त्रि-पाठ्यक्रमाध्यापयितारो विद्यालयाः जातुचिदपि माध्यमिक-शिक्षा-निदेशालयान्तर्गता न भाव्याः । अविलम्बं ते ए. एम. बी. ए. परीक्षा-पाठ्यसम्बद्धेन उच्चशिक्षानिदेशालयेनैव योजनीयाः ।

८. वाराणसेय-संस्कृतविश्वविद्यालयः किल प्रादेशिकानां सर्वेषां संस्कृतविद्यालय-महाविद्यालयानामङ्गीभूतं संस्थानम्, संस्कृतविद्यालय-महाविद्यालयाश्च तस्याऽङ्गानि । अतो महाधिवेशनमिदं विश्वविद्यालयाधिकारीन् सुदृढं प्रार्थयते यत्तैरयं सम्बन्धः शीघ्रतरं कार्यरूपतां परिणमनीयः, संस्कृत-विद्यालय-महाविद्यालयानां शासनकृतामुपेक्षाञ्च दूरीकर्तुमङ्गोसुलभः सार्वत्रिकः सहयोगो देयः । यदि वाराणसेय-संस्कृत-विद्यालयोऽत्र उपेक्षापूर्वकं प्रमाद्यति तदेते संस्कृत-विद्यालय-महाविद्यालयास्तदीयानां सर्वासां परीक्षाणां बहिष्कारं करिष्यन्ति ।

९. महाधिवेशनमिदं क्षेत्रीय-समितेर्मान्यतया अनुभूतेश्च औचित्यं विचारयत् राज्यशासनमनुरुणद्धि यत्तेन भगवतो रामभद्रस्य जन्मभूमौ साकेते नव्यः संस्कृत-विश्वविद्यालयो नूनं स्थापनीयः ।

१०. महाधिवेशनमिदं राज्यशासनं प्रार्थयते यत् संस्कृतविद्यालयेभ्यो दीयमानाम् अन्तरिम-सहायताम्, तदर्थवृद्धि, विशेषानुदानादिकं च सर्वविधमनुदानं प्रबन्धकमाध्यमेनाऽप्रदाय स्वतन्त्रतया अर्थदानपत्रेण (चेकद्वारा) तेषां नाम्नैव प्रहितव्यम् ।

११. महाधिवेशनमिदं शासनं प्रार्थयते यत् संस्कृतशिक्षाऽपि प्राथमिककक्षातः (शिशुकक्षातः) परिचाल्यताम्, येनाऽग्रिमकक्षासु संस्कृतशास्त्रशिक्षाप्रदानाय छात्राणां भूयस्त्वं सुलभं भवेत् । येषु विद्यालयेषु यथाक्रममयं प्राथमिक-संस्कृतशिक्षाविभागः प्रचलति, तेभ्यः प्राथमिककक्षा (प्राइमरी)-सुलभमनुदानं नूनं दीयेत ।

प्रादेशिकी कार्यकारिणी-समितिः

प्रादेशिक-संस्कृतविद्यालयाध्यापक-समितेः चतुर्थ-महाधिवेशने साधारणसभया १९७३-७४ मितेशवीय-वत्सरयोः कार्यसञ्चालनाय या प्रादेशिकी कार्यकारिणी-समिति-र्निर्वाचिता, या च पञ्चसमिति-र्निर्वाचिता १९७३ तः १९७७ वत्सरपर्यन्ता, तयोः सदस्याः पदाधिकारिणश्च निम्नलिखिताः—

अध्यक्षः श्री रामाश्रय त्रिपाठी, शाहजहांपुर। **उपाध्यक्षाः** १. श्री ज्वालाप्रसाद गौड़ः, वाराणसी (पूर्वक्षेत्रीयः), २. श्री बैजनाथ द्विवेदी, अयोध्या (मध्यक्षेत्रीयः), ३. श्री डा० श्यामसुन्दर दास, हरिद्वार (पश्चिमक्षेत्रीयः)।

महामन्त्री : श्री गोविन्द नरहरि वैजापुरकरः, वाराणसी। **संयुक्तमन्त्रिणः** १. श्री त्रिवेणीप्रसाद दीक्षित, वाराणसी (पूर्वक्षेत्रीयः), २. श्री चन्द्रदेवमणि त्रिपाठी, जौनपुर (मध्यक्षेत्रीयः), ३. श्री ओङ्कारनाथ मिश्रः, लखीमपुर-खीरी (पश्चिमक्षेत्रीयः)।

उपमन्त्रिणौ १. श्री माणिकचन्द्र शास्त्री, प्रयाग, २. श्री दामोदर विष्णु काळविण्ट, वाराणसी।

सङ्घटनमन्त्रिणौ १. श्री प्रभुदास आचार्य, अयोध्या, २. श्री रामचरण दीक्षित, फिरोजाबाद।

प्रचारमन्त्री श्री प्राणगोपाल आचार्य, वृन्दावन।

कोषाध्यक्षः श्री वायुनन्दन पाण्डेय, वाराणसी।

सदस्याः १. श्री राजनारायण शास्त्री शुक्ल, वाराणसी। २. श्री रघुवीर पाण्डेय, वाराणसी। ३. विश्वनाथ वामन देव, वाराणसी। ४. श्री रामकिशोर शर्मा, खुरजा। ५. श्री हरिवंश चतुर्वेदी, चुनार (मिर्जापुर)। ६. श्री ब्रह्मानन्द पाठक, अयोध्या। ७. श्री शिवप्रसाद द्विवेदी, अयोध्या। ८. श्री संकठाप्रसाद उपाध्याय, जौनपुर। ९. श्री कपिलदेव मिश्र, खेतासराय जौनपुर। १०. श्री गिरिराज शर्मा आचार्य, वृन्दावन। ११. श्री मदनमोहन द्विवेदी, बरेली। १२. श्री भक्तदर्शन मेठानी, लक्ष्मणझूला, गढवाल। १३. श्री प्रेमकृष्ण गुजराती, कानपुर। १४. श्री रमेशनारायण, झांसी। १५. श्री वासुदेव द्विवेदी (संस्कृत-सङ्घटन प्रतिनिधिः) वाराणसी। १६. श्री पट्टाभिराम शास्त्री (वा० सं० विश्वविद्यालय-प्रतिनिधिः)। पञ्चसमिति सदस्याः पदेन कार्यकारिणी सदस्याः सन्ति।

पञ्चसमितिः—१. पञ्चप्रमुखः श्री रामाश्रय त्रिपाठी। **२. संयोजकः** श्री गोविन्द नरहरि वैजापुरकरः। **सदस्याः** ३. श्री बुद्धिवल्लभ शास्त्री, हरिद्वार। ४. श्री कृष्णबिहारी पाण्डेय, लखनऊ। ५. श्री रामवृक्ष उपाध्याय, घुघुली, गोरखपुर।

(३२ पृष्ठस्य शेषांशः)

निर्णयानुसारं वेतनं दीयेत, तर्हि विद्वांसः निश्चिन्तं संस्कृतविद्यालयेष्वेव कार्यकरणाय समुत्सुका भवेयुः । एवं व्यवस्था अस्माकमान्ध्रप्रदेशशासनेन कृता । अस्मच्छासनेन न केवलं संस्कृताध्यापकेभ्यः संस्कृतमहाविद्यालयेषु यू० जी० सी० वेतनानि दत्तानि । प्रत्युत एषु विद्यालयेषु वेदाध्यापकेभ्योऽपि तानि वेतनानि दत्तानि ।

अभिनवगुप्त-कैयट-मम्मट-कह्लण - विह्लणादिमहामनीषिणां जन्मभूमौ काश्मीरप्रदेशे तु एकोऽपि संस्कृतविद्यालयः सम्प्रति नास्ति । यश्च एको विद्यालयो महाराजहरिसिंहस्य समये प्रचलित स्म, सोऽपि शेख अब्दुल्ला महोदयैः स्वमन्त्रित्वकाले अरबो-फारसीभाषयोः समावेशेन "ओरिएण्टल स्कूल" सम्पादितः । तत्र सम्प्रति अरबी-फारसीभाषयोः समक्षं संस्कृतभाषा तथा तयोरध्यापकानां छात्राणां च समक्षं संस्कृतस्य अध्यापकाश्छात्राश्च दीनदीना इव, पराभूता इव, उपेक्षिता इव च कथमपि दिनानि यापयन्ति । एवञ्च यस्मिन् प्रदेशे संस्कृतसरस्वत्या मन्दाकिनी प्रवहति स्म, तत्र तस्या एकः सरोवरोऽपि न दृष्टिपथमायातीति पर्यालोच्य कस्य सचेतसः संस्कृतप्रणयिनो हृदयं शोकाकुलं नेत्रे च अश्रुपरिप्लुते न भववतः ?

एवञ्च संस्कृतभाषायाः सामान्यज्ञानस्य तथा तदीयशास्त्राणां विशिष्टवैदुष्यस्य च परित प्रसारमार्गे अवरुद्धे तथा पुराण-कथा-प्रवचनादिष्वपि विरलतां गतेषु कथमिव भारतीया संस्कृतिः प्राणान् धारयितुं शक्नोति; कथं च संयम-नियमप्रधाना सदाचारमयी अस्माकं परम्परागता जीवनपद्धतिः चिरं स्थातुं शक्नोतीति सामान्यधियाऽपि सम्यगवगतुं शक्यते ।

भारतस्य सर्वेष्वपि प्रदेशेषु भ्रमणं कुर्वता मया किञ्चिन्न्यूनाधिकरूपेण इयमेव दशा सर्वत्र विलोक्यते । यदि विभिन्नप्रदेशेषु विद्यमानायाः संस्कृतदुर्दशायाः पृथक् पृथक्रूपेण विस्तृतं विवरणं दीयते, तदा स्वतन्त्र एवैकः सुमहान् निबन्धः सम्पद्येत, इत्यत्रैव मया विरम्यते विस्तरात् । विदितश्चायं विषयः सर्वेषां विदुषाम्, अनुभूयमानश्च दिने दिने वर्तते । ततोऽप्यहं न समुत्सहे विषयस्यास्य विस्तरशो निरूपणे ।

मन्ये, अनेन चिन्तासन्तापजनकेन मदीयेन वक्तव्येन नितरां नैराश्यमुपगताः स्युः केवलं विद्वांसः संस्कृताभिमानिनश्च । परन्तु अस्यां परिस्थितौ नैव किञ्चित् परिवर्तनं कर्तुं शक्येत इति मत्कथनस्य कदापि नाशयो मन्तव्यः । वस्तुतस्तु अयमेव कालः संस्कृतपण्डितानां संस्कृताभिमानिनां च सङ्कटनस्य स्वकर्तव्यपालनस्य तथा स्वपुरुषार्थप्रदर्शनस्य चेति सर्वथा अनुकूलः समुचितश्चेति निरूपणायैव मया विषयस्यास्य समुपन्यासस्तथा विहितः ।

संस्कृते खलु गोशब्दस्य त्रिविधा अर्था भवन्ति—एकः वाणीरूपोऽर्थः, द्वितीयो धेनुरूपोऽर्थः, तृतीयश्च भूमिरूपोऽर्थः । दौर्भाग्यवशात् सम्प्रति श्रुतेः संस्कृतभाषायाश्च उपेक्षितत्वात्, धेनूनाञ्च अहरहः सहस्रसहस्राणां घातात्तथा चीन-पाकिस्तानराष्ट्राभ्यामन्यायपूर्वकं भारतभूमेर्विपुलभागस्य अपहृतत्वात् आक्रान्तत्वाच्च गोशब्दस्य त्रयोऽप्यर्थाः सङ्कटग्रस्ताः शोचनीयाश्च संवृत्ता वर्तन्ते । परन्तु भारतभूमिरक्षायै भारतीयसैनिकाः प्रचुरसंख्यायां सीमान्तप्रदेशेषु अहर्निशं जागरूकाः विराजन्ते । बहवो गोभक्ताश्च गोहत्या-निवारणाय सङ्घबद्धा भूत्वा आन्दोलनं कुर्वन्ति, कारागारेषु गच्छन्ति तथा स्वसमीहितपूर्तिपर्यन्तं निरन्तरमान्दोलनसञ्चालनाय कृतप्रतिज्ञाश्च वर्तन्ते । अतः भूमिरूपस्यार्थस्य धेनुरूपस्य चार्थस्य सम्प्रति तादृशी चिन्तनीया परिस्थितिः नास्ति । किन्तु वाणीरूपस्यार्थस्य रक्षायै न केन्द्रस्य ध्यानं वर्तते, न वा तद्भक्तानामेव किमपि गोरक्षासदृशमान्दोलनं वर्तते

युगोऽयं सन्देष्टि—संस्कृतज्ञाः सङ्घटयेयुः !

(४८ पृष्ठात् परतरो भागः)

इति अयमेव विषयः सम्प्रति सर्वथा चिन्तनीयतां भजते। अतश्च सम्प्रति एतद्रक्षायै संस्कृतपण्डितसमाजस्य संस्कृताभिमानिवर्गस्य च विशेषरूपेण जागरूकतायाः सन्नद्धतायाः तथा सङ्कल्पग्रहणस्य च आवश्यकता वर्तते। अस्यां परिषदि समुपागता भवन्तः सर्वेऽपि परमपवित्रेऽस्मिन् सरयूतटे संस्कृतशिक्षायाः तत्पण्डितानां चाभ्युन्नतये सर्वथा प्रयत्नं विधाय सुदृढं सङ्कल्पमादाय च इतो गृहान् गच्छन्तु, यथाकालं यथाशक्ति यथामति च किञ्चिदपि संस्कृतोपयिकं च कार्यमवश्यमेव स्वस्वस्थाने सम्पादयन्तु इति मम भवद्भ्यः सबहुमानं सविनयं च व्यक्तिशो निवेदनं वर्तते। तदर्थमहं सम्प्रति द्वित्राणि समयोचितानि आवश्यकानि कर्तव्यानि श्रीमतां सेवायामुपस्थापयितुमिच्छामि। मन्ये, अत्रावधानदानेन भवन्तो नूनं मां कृपाभाजनतां नयेयुस्तत्पालनेन च मदीयामभ्यर्थनां सफलां विदध्युः।

बहूनां सुशिक्षितजनानां हृदये संस्कृतशिक्षाविषये बहवः सन्देहाः बह्व्यो भ्रान्तधारणाः अनेके कठोरतरा आक्षेपाश्च वर्तन्ते ये समये समये विविधासु पत्रपत्रिकासु प्रकाशिताः। तेषु प्रमुखा इमे—

१. संस्कृतं खलु आर्याणां-ब्राह्मणानां तथा दरिद्राणां भाषा।

२. संस्कृतं केवलं धर्मभाषा, परलोका-भाषा स्वर्ग-नरक-भाषा भाग्यवादिनी सङ्कीर्णमनोवृत्तीनां च भाषा।

३. संस्कृतं सर्वाधिका कठिना, जटिला, रटनप्रधाना च भाषा।

४. वर्तमाने वैज्ञानिके क्रान्तियुगे संस्कृतशिक्षाया उपयोगो नास्ति।

५. संस्कृतसाहित्ये न वर्तमानसमस्यानां समाधानम्।

६. संस्कृतशिक्षा परस्परं विरोधम्, अनैक्यम्, भेदभावम्, पार्थक्यम्, सङ्कीर्णतां च शिक्षयति; विशालतां, विश्वप्रीतिं विश्वबन्धुतां च विरुणद्धि।

७. अस्मिन् देशे संस्कृतं कदापि सर्वजनप्रचलिता भाषा नासीत्।

८. संस्कृतशिक्षा आधुनिकभारतीयभाषाणां प्रगतौ बाधिका अस्ति।

९. 'संस्कृतशिक्षिता जनाः परस्परविरोधिनः, कलहप्रियाः, ईर्ष्यालवः, दाम्भिकाः, पाखण्डिनः, स्वार्थसाधनपरायणाः, धनिकानां चाटुकाराः, हीनदीनजनानां शूद्रादीनां च उपेक्षकाः, देश-जातिसेवा-पराङ्मुखा भवन्ति। केवलमात्मलाभाय च संस्कृतप्रचारं कामयन्ते।

ईदृशा अनेके संस्कृविरोधिनो विचाराः बहूनां हृदये वर्तन्ते। अतस्ते संस्कृतशिक्षायै सहयोगप्रदाने उदासीनास्तिष्ठन्ति, अस्माकं संस्कृतशिक्षाकार्याणि च राष्ट्रविरोधीनि तथा केवलं पण्डितसमाजस्य हितसाधकानि मन्यन्ते।

एतेषां विचाराणां युक्ति-प्रमाणपुरस्सरं समाधानं तथा संस्कृतशिक्षा-समाजगतानां यथार्थदोषाणां निराकरणं कृत्वा तद्विषये शिक्षितजनेषु विश्वासोत्पादनं च संस्कृतप्रचारदृष्ट्या परमावश्यकं वर्तते।

पञ्जीकृत-संख्या —एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५ सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगतगंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४९

❀

अङ्कः ३

❀

सम्पादकः
गो० न० वैजापुरकरः

❀

मार्च
१९७३

❀

वार्षिक-मूल्यम्
५) रूप्यकाणि

❀

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

❀

माधव, मधुरमुरलिकां वादय !

●

१. कलुषतरं खलु यमुनातीरे पल्लवितं शेवालम् ॥
परिमलरहितकुमुदनिकुरम्बे रोदिति मधुकरजालम् ।
ललितलवङ्गलतानां केशव कर्शितदशां निभालय ॥
माधव, मधुरमुरलिकां वादय !

२. वृन्दावनधेनवः सार्थरहिता नर्दन्ति निकामम् ॥
तासामद्य प्रियतरं रक्तं नैव दुग्धमभिरामम् ।
पुनरपि गोवर्धनधर वृन्दाविपिने सुरभीः सञ्चारय ।

३. गोपीव्रातः सततं विन्दति सुरतं केलिनिकुञ्जे ॥
हिप्पीभूतः पीतगञ्जको विहरति नागरपुञ्जे ।
केशिनिषूदन कथमपि मदिरं योगरहस्यं संसाधय ॥

४. शरत्पूर्णिमा प्रतिनगरं प्रतिनिशं जायते रम्या ।
विद्युन्मन्दचन्द्रिकालोके रमयति युगलं धन्या ॥
एहि मुरारे रासविहारे नग्नं यौवतमुन्मादय ।

५. तृणावर्तवेगेन लुप्यते सनातनो व्यवहारः ।
लाक्षागृहे शयानो हृष्यति नेत्रहीन - संसारः ॥
दत्वा दिव्यदर्शनं भूयो भगवद्गीतामनुनादय ।
माधव, मधुरमुरलिकां वादय !

—डॉ० भास्कराचार्य त्रिपाठी

ग्राहकेभ्यो विनिवेदनम्

'सूर्योदय'स्य अयं तृतीयोऽङ्कः पाठकानां सेवासु प्रेष्यते। अद्यावधि नैकैः प्राचीनग्राहकैः नवीनं वार्षिकशुल्कं न प्रेषितम्। अतस्ते स्मार्यन्ते यदङ्कप्राप्तिसमकालमेव तत्प्रेषयन्तु। सहैव अन्यूनमेको नव्यो ग्राहकश्चापि सुलभीकरणीयः। पत्रस्य ग्राहकसंख्या यथा यथा वर्धेत, तथा तथा वयमपि पत्रमधिकाधिकं सम्पन्नं कर्तुं पारयिष्यामः। अतोऽस्य पत्रस्य समुत्कर्षस्तेषामेव हस्ते वर्तते। आशास्महे, यत्तेऽस्माकमिदं निवेदनमवश्यं सफलयिष्यन्तीति। व्यवस्थापकस्य

अनुक्रमः

◆

प्रपानकः	पत्रपुटम्	परिवेषकः
सुप्रभातम्	४९	सङ्कलितम्
श्रीमहर्षि-ज्ञानानन्दचरितम्	५०	श्री स्व० विन्ध्येश्वरीप्रसाद शास्त्री
विश्व-जीवनव्यनस्था संस्कृतञ्च	५१	सम्पादकीयम्
भक्तेः नवरसातिरिक्तत्वे युक्तयः	५२	श्री डॉ० कपिलदेव ब्रह्मचारी
भगवती पञ्चाशिका	५३	श्री बिहारीलाल शर्मा
संस्कृतशिक्षोन्नयनस्य सार्वभौमा उपायाः	५७	श्री सरस्वतीप्रसाद चतुर्वेदः
(३) कल्याणोत्कर्ष-सत्पथम्	६१	श्री मुकुटबिहारी लाल
(३) प्राचीन-भारतीयाः क्रीडा	६४	श्री डॉ० नरेश झा शास्त्री
स्व० महाकावयः कालीपद तर्काचार्याः	६६	श्री श्रीजीवन्यायतीर्थं
(९) ध्वनि-वैभवम्	६७	श्री रवीन्द्रकुमार सिद्धान्तशास्त्री
प्राचीन-संस्कृतकवीनां वसन्त-विलासः	६१	श्री 'अङ्गारः'
भगवतो लीलायाः समीक्षा	७०	श्री चन्द्रशेखर सर्मा हिरेमठ
अपूर्वं सद्भावना-प्रेरकं प्रदर्शनम्	७१	सङ्कलितम्

◆

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४९ वर्षं] वाराणसी, फाल्गुनः, २०२९ वै० : मार्च १९७३ ई० [३ अङ्कः

सुप्रभातम्

श्रीपद्मनाभ पुरुषोत्तम वासुदेव वैकुण्ठ माधव जनार्दन चक्रपाणे।
श्रीवत्सचिह्न शरणागत-पारिजात श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ १॥

कन्दर्पदर्पहर-सुन्दर-दिव्यमूर्ते कान्ताकुचाम्बुरुह-कुड्मल-लोलदृष्टे।
कल्याण-निर्मल-गुणाकर-दिव्यकीर्ते श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ २॥

मीनाकृते कमठ-कोल-नृसिंह-वर्णिन् स्वामिन् परश्वथ तपोधन रामचन्द्र।
शेषांशराम यदुनन्दन कल्किरूप श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ ३॥

एला-लवङ्ग-घनसार-सुगन्धितीर्थं दिव्यं वियत्सरिति हेमघटेषु पूर्णम्।
धृत्वाऽद्य वैदिकशिखामणयः प्रहृष्टास्तिष्ठन्ति वेङ्कटपते तव सुप्रभातम्॥ ४॥

भास्वानुदेति विकचानि सरोरुहाणि संपूरयन्ति निनदैः ककुभो विहङ्गाः।
श्रीवैष्णवाः सततमर्थितमङ्गलास्ते धामाश्रयन्ति तव वेङ्कट सुप्रभातम्॥ ५॥

ब्रह्मादयः सुरवराः समहर्षयस्ते सन्तः सनन्दनमुखास्त्वथ योगिवर्याः।
धामाश्रयन्ति तव मङ्गलवस्तुहस्ताः श्रीवेङ्कटचलपते तव सुप्रभातम्॥ ६॥

लक्ष्मीनिवास निरवद्यगुणैकसिन्धो संसारसागर-समुत्तरणैकसिन्धो।
वेदान्तवेद्य निजवैभवभक्तभोग्य श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ ७॥

—शेषाद्रिमन्दिरे नित्यपाठ्य-स्तोत्रतः

पूर्वतोऽनुवृत्तम्

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

-- स्वर्गीयाः श्रीविन्ध्येश्वरीप्रसाद शास्त्रिणः --

(एकोनविंशे सर्ग)

३१. भुवर्लोकमध्ये ग्रहास्तारकाद्या अनन्ता दरीदृश्यमाना लसन्ति ।
तदन्ते ध्रुवो राजते यः स्थिरोऽस्ति समे तेन विष्वक् परिभ्राम्यमाणाः ।।
३२. ध्रुवो महाकर्षणशक्तिशाली विराजते सर्वत उत्तरस्याम् ।
खेटादि - सप्तर्षि - वियत्स्थितानामाकर्षकोऽयं कथितो मुनीन्द्रैः ।।
३३. तदाकर्षणादेव भूचक्रकीलः सुसन्तिष्ठते ह्यूर्ध्वभागे सदैव ।
धरित्रीस्थ-विद्युद्गतिश्चापि नित्यं सरीसर्ति सा दक्षिणस्या उदीच्याम् ।।
३४. अतः कारणादेव दिक्सूचकस्य मुखं सर्वदाऽऽस्ते हि यन्त्रस्य सौम्ये ।
जलान्तःस्थपोते-ऽन्धताच्छन्नदेशे स्थितानां नृणां जायते दिक्प्रबोधः ।।
३५. भुवो मण्डलेऽस्मिन् पुरःप्राच्यदेशे नरैश्चापि विद्वत्प्रकाण्डैरशेषैः ।
शिरोमानचित्रस्य सौम्यस्थमेव सदा मन्वते तन्निदानं तदेव ।।
३६. स्वर्गो लोकस्तत्परो वेदितव्यः पुण्यात्मानो यत्र गत्वा वसन्ति ।
गच्छन्त्येनं काम्यधर्मे रता ये शास्त्रे गीतो यस्य शास्ता महेन्द्रः ।।
३७. महर्लोक योऽसौ जनाख्यश्च लोकस्तपःसत्यलोकौ सदभ्यर्थनीयौ ।
उपर्यास्थिताः स्वर्गतस्ते क्रमेण महात्मान एवाधितिष्ठन्ति चैतान् ।।
३८. निम्नस्थितेषु भुवनेषु हि सप्तकेषु त्रैविष्टपारि-विविधासुर-सेवितेषु ।
अत्यन्तघोरतमसः सुखमस्ति तेषु यद्वर्जनीयमिह सत्पुरुषैः सदैव ।।
३९. मद्येषु मैथुनविधिष्वशुभक्रियासु ह्यत्यन्तनिन्द्य-पिशिताशन-गर्हितासु ।
सर्वेषु चेन्द्रियसुखेष्वतितामसेषु मोमुह्यमानमनसो विचरन्ति दैत्याः ।।
४०. ये भुञ्जते भुवि निजाधिकृतं सुखं हि ते देवतुल्यमनुजाः सकलार्हणीयाः ।
ये चान्यवीय-सुख वैभवमाहरन्तो लोके चरन्ति गदिताः किल तेऽपि दैत्याः ।।

(क्रमशः)

सम्पादकीयम्

विश्व-जीवनव्यवस्था संस्कृतञ्च

नीतिविदां सुविचारितः सुपरीक्षितश्चैकः श्लोको जागर्ति—

> **यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता ।**
> **एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥**

ताटस्थ्येन आत्मनिरीक्षणे क्रियमाणे अद्यास्माकं देशे समापतितायाः स्थितेरियमेव मूलभूतं निदानं परिदृश्यते । अक्ष्णोरविषयमिदं कथमपि कर्तुं न पार्यते यदद्य राष्ट्रमिदं शरदां पञ्चविंशति - हायनानि स्वतन्त्रराष्ट्रात्मिकाया अभिनव-प्रसूतेः समुपभुञ्जत् नैकेषु अन्ताराष्ट्रियविषयेषु तारुण्यसुलभं सफलञ्च समुत्साहं बिभर्ति । आत्मनो दासतां मोचयित्वा स्वतन्त्रराष्ट्ररूपेण अवस्थानप्रयाससन्दर्भे किल नैकानि राष्ट्राणि उदाहरणत्वेन समुपस्थापयितुं शक्यन्ते । परेषां स्वतन्त्रराष्ट्राणां स्वातन्त्र्यापहारकाश्चापि नव-चीनाद्या नैके देशा भूमौ विजृम्भन्ते । परं परपुष्टस्य स्वपोषक - कृतघ्नताकारिणो राष्ट्रविशेषस्य भयादोहनपरिप्लुष्टं राष्ट्रखण्डं स्वतन्त्र - 'बांगलादेश' नाम्ना सुस्थिरीकृत्य स्वतन्त्रतादेव्याः अद्वितीयं समर्चकं स्वतन्त्रभारतमेव राष्ट्रमस्माकं वक्तुं शक्यम् । विश्व-शान्ति-स्थापनकर्मण्यपि राष्ट्रेणानेन पञ्चविंशतिवर्षेषु सुबहु प्रयतितं यद्यत्, तदपि परीक्षकाणां नापरोक्षम् । सत्यप्येवं स्वराष्ट्रसुव्यवस्था-सम्पादने स्वस्वरूपरक्षण-विधौ नेदं तथा कृतकार्यं परिलक्ष्यते, प्रत्युत तत्रास्य महान् प्रमादोऽपि परिलक्ष्यते इति महता खेदेन वक्तव्यं भवति । अस्य एकमात्रो हेतुरस्माकं मते भारतशासकेषु एतद्राष्ट्रस्य मूलभूतानां सिद्धान्तानामनुष्ठाने निष्ठान्यूनता वैदेशिकसिद्धान्तानामापादशिखमनपेक्षितप्रभावाभिभूतता चैव दृश्यते ।

ऐतिहासिकमिदं तथ्यम्—विश्वस्य साम्प्रतिकानि भौतिकदृष्ट्या सर्वोच्चपदवीं समारूढानि राष्ट्राणि यदा उदयोन्मुखान्यपि नासन्, तदा अस्माकं चिरन्तनं राष्ट्रमिदं समुन्नतेश्चरमं शिखरं परिचुम्बदासीत् । राष्ट्रमिदं जीवमात्रं लोकलीलासूत्रधारस्य प्रभोरमृतस्य सन्ततिं सम्मनुते । प्रत्येकस्य हितमुत्कर्षञ्च कामयते । कस्यापि हितमपरस्य परिपोषकमेव भूयात्, कदापि विसंवादि न स्यात्, एकैकोऽपरस्य यथा परिपूरको भवेत्, तथैव तस्य तस्य जीवनयापनव्यवस्था निरधायि । जीवन-निर्माणशास्त्रमिदमस्माकं वेदा एव । ब्रह्म-क्षत्र-वैश्य-शूद्रात्मिका वर्णव्यवस्था ब्रह्मचर्य-गार्हस्थ्य वानप्रस्थ-संन्यासरूपाश्च आश्रमपद्धतिः किल अधिकार-कर्तव्ययोः साङ्कर्यस्य स्पर्धायाश्च लेशतोऽपि पदं निवारयितुं आविर्भाविता शास्त्रकृद्भिः । सामान्यधर्माः विशेष-धर्माश्च एतयोरेवोभयोर्व्यवस्था-पद्धत्योः परिपोषका एव आसन् । व्यक्तेः, समाजस्य, देशस्य विश्वस्य च निर्विशेष-सुदृढमैहिक-पारलौकिक-जीवनयात्राया मूल-भूताया अस्या व्यवस्थायाः सुचारुव्यवहारसम्पादनाय देववाणी संस्कृतसदृशी भाषाऽपि तैर्निरधायि । कामं तेषामनुष्ठानकर्तॄणां प्रमादैस्तत्र काश्चन अव्यवस्थाः समापतिताः स्युः । नैतावता मूलभूताया व्यवस्थाया कश्चन दोषः समुद्भावयितुं ताञ्चापलपितुं शक्यते । अत एव सर्वं पुरातनं कालविशेषोपयोगि, अविकसित-बुद्धिमतां विचारविलासो नूतनस्पर्धाशीलजगतश्च कृते सर्वथाऽनुपयुक्तमपि कथमपि न वक्तुं शक्यते । इदं पुनरवश्यं वक्तव्यं यदत्र व्यवस्थायां ये दोषाः स्युस्तान् परिहृत्य, नूतनयुगसन्दर्भानुसारमस्या मौलिकस्वरूप-मक्षुण्णं विदधत् नव्यरूपेणोद्भावनं कृत्वा तदनुसारि सर्वेषां जीवनं संयोजनीयमिति ।

प्राचीनस्यास्य रत्नस्य इत्थं युगानुरूपसंयोजनस्य माध्यमं देववाणीसंस्कृतमेव भवितुं शक्नोति । तत्रैवेदं रत्नं सुसंगोपितम् । सैवास्य समग्रं रूपं प्रकाशयितुं प्रभवति । अत इयं भाषा इदं प्राच्यं वाङ्मयं वा न सामान्यशिक्षाकोटौ अन्तर्भवति । ततोऽप्यस्या विशिष्टा कोटिः, सैवास्माकं यात्रायाः सीमा भूयात् । किन्तु मार्गक्रमणप्रसङ्गे सोपानरूपेण सामान्यशिक्षास्तर-समतिक्रमणमपि अनिवार्यमेव । भारतशासकैः संस्कृतस्य कृते सोऽपि स्तरोऽद्यावधि न प्रदत्तः । अत एव प्रादेशिक-संस्कृतविद्यालयाध्यापकसमितिः सक्रिया समभवत् । अस्याः प्रवृत्तेरखिलायाः सामान्यपराजयोऽस्माभिरङ्कद्वयेन प्रदत्तः । शिक्षाक्रमविषयेऽग्रे विवेचयिष्यामः ।

भक्तेः नवरसातिरिक्तत्वे युक्तयः

—डॉ० श्री कपिलदेव ब्रह्मचारी—

[साहित्य-व्याख्याता—रामानन्द संस्कृत-महाविद्यालयस्य, काशी]

प्रायः सर्वेषां रसाचार्याणां मते भरतमुनिना केवलं शृङ्गारादयोऽष्टावेव रसाः स्वीकृताः, किन्तु परवर्तिन आचार्याः **शान्तोऽपि नवमो रसः** इत्यादिना रसानां नवत्वमामनन्ति। मुनीन्द्रमतानुसारेण वात्सल्यरसोऽपि न्यूनाधिकरूपेण काव्यजगति स्वस्थानं गृह्णात्येव। एवमेव भक्तिक्षेत्रे भक्तिरसोऽपि स्वीकृतोऽभवत्, कालान्तरे च तस्य स्वीकृतिः काव्यजगति भवेत्।

अपि च—अलङ्कारविषयेऽपि भरतमुनिना केवलं चत्वार एवाऽलङ्काराः स्वीकृताः, परम् अधुनाऽलङ्करणरूपलक्षणेन काव्यशोभाधायकत्वरूपधर्मेण चालङ्काराः शतधायन्ते। इत्थं यथा ये रसा अलङ्कारश्च भरतमुनेः असम्मताः, तेऽपि विभिन्नसंख्याका विभिन्नाचार्यैः पल्लविताः स्वीकृताश्च ; तथैव रसनरूपेण आस्वादनादिरूपेण वा सामान्यधर्मेण भक्तिरसोऽपि स्वीकर्तव्य एव। किन्तु न तथा कृतं रसशास्त्रविद्भिः। यतो हि तेषां मते रसनिष्पत्तिविषये यत् सामान्यरूपमभिनवगुप्तादिभिः विहितम्, तत् भक्तिरसविषये पूर्णरूपेण चरितार्थं न भवति। न च भक्तिरसविषयककाव्यस्य समालोचना एव भवितुमर्हतीति। अतो रसशास्त्रविद्भिः भक्तिरसो न स्वीकृतः। अत एव भक्तिरसशास्त्रनिर्मातृभिः भक्तिरसज्ञैः साधकैः महता आटोपेन भक्तिरस आविष्कृतः भगवद्भक्तैः काव्यशास्त्र जगति।

श्रीमदभिनवगुप्तपादाचार्यमतानुसारं रसास्वादनकाले समस्तलौकिकचित्तवृत्तीनां विलयः प्रधाननायकस्य चित्तवृत्तौ जायते, प्रधाननायकस्य चित्तवृत्तिस्तु साधारणीकरणप्रक्रियया स्वस्मिन् समस्तसहृदयानां चित्तवृत्तिं क्रोडीकुर्वती (आत्मसात् कुर्वाणा) रसास्वादस्य हेतुता (प्रवर्तिका)-मुपैति। तस्मिन् काले समस्तविभावादिभावाः तिरोहिता भूत्वा साधारणीकृतभावमात्रमेव समवशिष्यते। तदानीं सहृदयस्य चित्तवृत्तेर्बहिर्गामिता विनश्यति। तथा च तदानीं प्रधाननायकस्य चित्तवृत्तिरेवावशिष्यते। इत्थं च साधारणीकरणंस संविद्विश्रान्तिश्च रसास्वादने परमोपयोगितत्त्वं स्थायि चाभिनवगुप्ताचार्यमते। किन्तु इयं प्रक्रिया न भक्तिरसास्वादनोपयोगिनी, यतो हि तथा भक्तिरसो नानुभूयते।

भक्तिमार्गे भगवल्लीलायाः (कृष्णलीलायाः) आनन्दोऽनुभूयते। तत्र राधाकृष्णस्य रतिरूपे यशोदाया वात्सल्यरूपे वाऽस्माकं मनसः परिणतिर्न भवति। किन्तु तत्र भगवद्भक्तिविषयकरतिरेव जागर्ति। तत्र प्रधाननायकस्य चित्तवृत्तिरस्माकं चित्तवृत्तिं नाऽत्मसात् करोति, किन्तु सा केवलमस्माकं भगवद्विषयकरतिमुद्दीपयति। तत्र राधाकृष्णस्य सीतारामस्य वा स्व-स्वरूपाच्छादने भक्तकवीनां नाभिप्रायः, किन्तु तस्य प्रबोधनमात्रमेवाऽभिप्रायः। अत एव यावदेव वयं राधां प्रति कृष्णस्य रतेः परिशीलनं कुर्मः, तावत्कालपर्यन्तमेव भक्तिभावना अस्माकमुद्दीप्यत एव। एवं च भक्तिमार्गे वयममिश्रितभावनायाः आस्वादनं न कुर्मः। किन्तु कृष्णस्य भक्तिभावनया मिश्रिता भक्तिभावा एव समास्वाद्यन्ते। इयं प्रक्रिया रसशास्त्रप्रतिपादकानां रसनिष्पत्तिविषयक-सिद्धान्तात् सर्वथा भिन्ना वर्तते।

तात्पर्यमिदं श्रीकृष्णभक्तिमध्ये भक्तस्य या समुद्भवति, तथा चोपात्तभावातिरिक्तं यत् सहृदयगतं कृष्णप्रेमानुभूयते, तस्य समुचितं समाधानं रसशास्त्रे नास्ति। प्राचीनमतानुसारेण रसास्वादनविषये कृष्णलीला-प्रशस्तिकाव्यमिव भक्तभावना उद्दीपिका भूत्वा रसवदलङ्काररूपेण परिणमति। ततोऽधिका नास्ति काचिदपि भक्तिः। एतत्तु नोचितम् ; यतो हि तदवस्थायां कृष्णलीला गौणभूता एव भवेत्, तद् भक्ताचार्याणामभिमतं नास्ति। यतो हि भक्तिभावनया सह श्रीकृष्णलीलाऽपि तेषामभीष्टा, तस्याः समुचितं समाधानं रसशास्त्रं नास्ति। तस्मादेव कारणाद् भक्तिरसरूपा नवीना सरणिः प्रसृता संस्कृत-साहित्य-काव्यशास्त्रजगति भक्तिरसज्ञैः।

अभिनवगुप्तानुसारेण स्वाभाविकचित्तवृत्तिरेव लोकवृत्तपरिनिष्ठिता भूत्वा यदा सहृदयैरभ्यस्यते, तदा सैव विभावादिमाध्यमेन रङ्गमञ्चेऽवतीर्य सहृद-

भगवती-पञ्चाशिका

—श्री बिहारीलाल शर्मा—

[साहित्यप्राध्यापकः—काशिक-स्याद्वाद-महाविद्यालयस्य]

नूत्नेनाऽप्यनेन कविना ग्रथितेयं मधुमासलक्ष्म्या भगवत्याः पञ्चाशिका योग-वेदान्तादि-दर्शनालोक-बृंहितस्य भक्तिभावसाम्राज्यस्य कमपि सरसं भव्यमुन्मेषं जनयतीति दृष्ट्वा समुत्कर्षाशीर्भिः संभावयामो वयम् ।—सम्पादकः

१. दग्धा यथाऽनलरुचेर्बहवः स्फुलिङ्गाः,
बीजानि दाडिमफलाद् बहिरेत्य भान्ति ।
प्रादुर्भवन्ति सकलास्त्वणवोऽपि यस्याः
वन्दे समग्रजगतां जननीं प्रसन्नाम् ॥

२. निर्माय जालभवनं चपलोर्णनाभि-
र्भूयः स्वकीयवदने प्रकरोति लीनम् ।
संसृज्य लोकमखिलं हरति प्रहृष्टा,
संहारकर्मपरुषा भवती तथैव ॥

३. आकर्षितानि सबलैस्तव शक्तिलेशै-
राधारहीन - गगने भुवनानि तानि ।
सर्वाणि लोहशकलानि यथेह लोके,
सार्धं प्रयान्ति सहसा खलु चुम्बकेन ॥

४. पीयूषवृष्टितरले सरले पदे ते,
जीवाः प्रसन्नहृदया निरता भवन्ति ।
अम्भोज - पुञ्ज - सदने मकरन्दपूर्णे,
लग्नं यथाऽलिपटलं परिदृश्यते हि ॥

५. अन्तःस्थया तनुभृतां सततं भवत्याः
शक्त्या च जीवनिचयाः परितश्चरन्ति ।
नव्यानि बाष्पचपलानि सुवाहनानि
सर्वत्र यान्ति विपुले गगने यथाद्य ॥

६. सम्पोषिताः खलु चिदः प्रभया भवत्याः
नक्षत्रचन्द्रतपना गगने लसन्ति ।
विद्युत्प्रवेश - ललितानि मनोहराणि
दीप्तानि पौरभवनेष्विव गोलकानि ॥

यानां रसास्वादस्य हेतुभूता भवति । किन्तु भक्तिस्तु न स्वाभावाविकी चित्तवृत्तिः, न तु तस्या अनुभावा एव बाहुल्येन समुद्भूताः, ये सहृदयैरभ्यस्यन्ते । अपि च उद्धवादीनां प्रसङ्गे यत्र कुत्रापि रङ्गमञ्चे भक्तेरभिनयः क्रियते, तत्र तस्या भक्तेर्विवेचनं कर्तुं शक्यते । किन्तु यत्र राधा-कृष्णयोः रतिभावस्याभिनयः क्रियते, तत्र रङ्गमञ्चे प्रत्यक्षरूपेण भक्तिभावो नावतरति, येन तस्य समास्वादनं भवेत् । अर्थाद् यदा भक्तिभावो न प्रत्यक्षीक्रियते, तदा तस्य समास्वादनं कथम् ? किन्तु भक्तिरसशास्त्रानुसारेण सः समास्वाद्यते । तस्य समुचितं समाधानं रसशास्त्रज्ञैः न क्रियते । अत एव भक्तिरसः समुद्भावितो भक्तिरसज्ञैः ।

प्रायः प्राचीनरसतत्त्वास्यानुचिन्तनं नाट्यप्रसङ्गे कृतं रसज्ञैः । अतोऽस्मिन् मार्गेऽभिनयस्य सर्वथा प्राधान्यं वर्तते । काव्यजगति रसतत्त्वेभ्योऽनिवार्यताप्रदानाय अभिनयस्य स्थानं गुणालङ्कारैः स्वीकृतम्, अर्थात् काव्ये गुणालङ्कारैः रसः समास्वाद्यते । किन्तु भक्तिमार्गे भक्तिविषयककाव्यस्यैव, न तु नाट्यकाव्यस्य प्राधान्यं वर्तते, तत्र भक्तिनाटकस्य रचना तु गौणरूपेण यदा कदा कृता । इत्थञ्च प्रोक्तकारणेन रसशास्त्रदृष्ट्या भक्तिकाव्यानां विवेचनार्थमेव भक्तिरसविद्भिः भक्ति-रसमूलया नवीनरसधारया सिक्ता वसुन्धरा !

७. ऊर्जोबलेन चपलानि च यन्त्रकानि
व्यापार - कर्मनिपुणानि यथा भवन्ति।
सामर्थ्यशक्ति - सहितानि तथा त्वयैव
सम्प्रेरितानि विषयेषु दशेन्द्रियाणि॥

८. खद्योतजातिरखिला समवेत्य रात्रिं
विस्तीर्य दीप्तिकणिकां हरति स्वयं च।
सृष्टिं विधाय जगतां जगदम्बिके! त्वं
संहारकर्म कठिनं कुरुषे तथैव॥

९. आच्छादनेन कठिनेन हिरण्मयेन
पद्माननं सुललितं पिहितं त्वदीयम्।
वाञ्छामि दर्शनसुखं सुकृतैककेन्द्रं
दुर्गे! निवारय ममाऽऽवरणान्धकारम्॥

१०. हर्षातिरेकरतया स्मितरेखया ते
सम्भासिता सतपनाः शशितारकास्ताः।
सञ्चारितं च सलिलं पवनोऽनलोऽपि
सम्फुल्लिता मधुलतास्तरवश्च सर्वे॥

११. नित्यं प्रशासनकरी जगदीश्वराणां
मातस्त्वमेव तरणि - र्भवसागरस्य।
संहारकर्म कुरुषे सृजनं तथैव
नास्त्यत्र तत्त्वमपरं भवतीं विहाय॥

१२. मञ्चेषु नृत्यनिपुणा सुनटी यथैव
प्रायाति लोकपुरतो विविधैः स्वरूपैः।
एकाऽपि कर्मकुशला बहुरूप-जीवैः
सम्मोहयत्यविरतं भवती तथैव॥

१३. चैतन्यशक्तिरपरा वपुषां त्वमेव
सञ्चालिकाऽसि महतां परिचालकानाम्।
प्राच्याऽपि नूतनरुचिर्नवला सदा त्वं
नित्यापि देवि! जगतः क्षणभङ्गुरस्य॥

१४. सञ्जीविताः प्रमुदिताः खलु प्राणवन्तः
सन्दृश्यमानमचलं सकलं जगच्च।
अन्यच्च दृश्यरहितं यदपि त्रिलोक्यां
सञ्छादितं तदखिलं भवदेकशक्त्या॥

१५. आकाशतत्त्वमखिलेषु यथा घटेषु
विद्युद् यथा जलमयेषु बलाहकेषु।
वह्निश्च दारुषु विभाति यथा तथैव
विद्योतसे हि हृदयेषु शरीरिणां त्वम्॥

१६. वायौ स्थलेऽपि सलिले सह पावकेन
व्योम्नीति पञ्चसदनेषु जगन्मयेषु।
सुस्पर्श - गन्धसहितैः रस - रूपशब्दै-
रतत्त्वै रहस्यविषयैः खलु राजसे त्वम्॥

१७. आधारचक्रभुवने मृदुलास्यरक्ता
सम्प्राप्य ताण्डवकला - कुशलैक - देवम्।
निर्माति लोकमखिलं जनजन्मदाया
तां त्वां नतोऽस्मि सततं परिरक्ष मातः॥

१८. आलोकभव्यमपरं भुवने स्वचक्रे
चण्डाग्निमाश्रितमिमं समयासमेतम्।
संवर्तकं परिभुवं विनतो भजामि
कोपे ययोस्तव दृशा शिशिरोपचारः॥

१९. सौदामिनी - विवलितं विविधेन्द्रचापं
मेघं नमामि रञ्जकं मणिपूरलोके।
पीयूषतुल्य - शिशिरैः सलिलप्रवाहै-
र्यो मे प्रदग्धहृदयं सरसं करोति॥

२०. ज्ञानाम्बुजस्य मकरन्द - रसैकलीनं
वन्दे विनम्रशिरसा खलु हंसयुग्मम्।
विद्याब्धिपूरजनकं रणितं हि यस्य
दूरीकरोति मनसो निखिलान्धकारम्॥

२१. चक्रे विशुद्धि - विदिते रससिन्धुपूरे
ध्यात्वा शिवं परतमं चितिशक्ति - युक्तम्।
कान्त्या विधोरिव ययोः प्रभया कदाऽहं
स्थास्यामि धूततिमिरो मुदितश्चकोरः॥

२२. आज्ञादि-चक्रनिलये रविकोटिदीप्त-
मालिङ्गितं पशुपतिं रतया चिदेकम्।
आराधयन् परशिवं मनसैकगम्यं
लोके समस्तमहसां गमितः कदाऽहम्॥

२३. संस्थाप्य सा मणिमयं खलु सूर्यकान्त-
माकाश एव विमले रजतैकपात्रे ।
ऊषा मनोज्ञललना ललित - प्रभाते
नीराजनं मधुमयं विदधाति देवि ॥
२४. नीहार - बिन्दु - पटलैः परिसीव्यमान-
मादाय रम्यवसनं जलजात - हस्ते ।
मातर्ददाति विनतो दिनपः प्रसन्नो
भूयः समर्पयति ते किरणावलीं ताम् ॥
२५. सन्ध्याऽपि रम्यवदना मृदुहास्य - दीपै-
रारातिकीं रसमयीं परितः प्रदर्श्य ।
चित्ते निवेश्य मधुरं रमणीयरागं
नक्षत्र-सौधकणकान् किरति प्रहृष्टा ॥
२६. नीलाम्बरं विलुलितं शुभकेकिबर्हं
नक्षत्रमेचकयुतं व्यजनं गृहीत्वा ।
संवीजयत्यविरतं रजनी - वधूस्त्वां
सौन्दर्यपूतभुवना सुखभोगदात्री ॥
२७. आदाय चन्द्रकमणिं जनभाग्यरूप-
माकाश 'इत्र'भरिते कमनीयपात्रे ।
रात्रिः प्रसन्नहृदया खलु सन्दधाति
नक्षत्र - दीपकुसुमै - र्विजयोत्सवं ते ॥
२८. चन्द्रं विलासचषकं परिपूर्य दुग्धै-
नक्षत्रमोदकगणं गगनैकपात्रे ।
नैवेद्यरूपसकलं रजनी स्वहस्ते
प्रादाय भावतरला पुरतस्तवेशि ॥
२९. नद्याः सुशीतलजलैः परितः सुलभ्यः
पौष्पं रसं विमिलितो मृदुगन्धवांश्च ।
मन्दो वसन्तपवनो जगतोऽनुकूलः
संवीजयत्यविरतं व्यजनं त्वदग्रे ॥
३०. मेघोऽभिवृष्य सलिलं जलजातपादे-
नीराजनं विरचयन् चपला-मिषेण ।
इन्द्रायुधस्य ललितां महनीयमाला-
मादाय पूजनविधिं विदधाति मातः ॥
३१. भावेऽभिजात - मृदुले रमणीयसूत्रे
नेत्राश्रु-हीरकगणं परिगुम्फ्य देवि ।
हारोपहारमनघं जननीह तुभ्यं
खल्वर्पयामि मुदितो हृदये विधेहि ॥
३२. मातर्ममापि विकलं हृदयार्पणं त
तुच्छं विचार्य मनसा नहि निन्दनीयम् ।
दैन्यार्तिखिन्न - मनसां शरणागतानां
नास्त्यत्र देयमपरं वपुषः कदाचित् ॥
३३. सर्वः क्षरिष्यति रसः सहसैकवारं
गन्धं हरिष्यति रुषा पवनः कठोरः ।
मूर्च्छां गमिष्यति महारजनी - तमिस्रै-
रौन्नत्यमेष्यति पुनर्वपुरम्बुजं किम् ॥
३४. भग्नो न हीरकमणिः पुनरेति रूपं
नाप्नोति भावममलं विकृतं हि दुग्धम् ।
नष्टोऽपि जीवति कुतस्तत एव मातः
संरक्ष मामशरणं शरणं प्रपन्नम् ॥
३५. पाषाण-पारसमणिः कलुषं हि लोहं
स्वर्णं करोति विमलं नितरां प्रसिद्धिः ।
नित्यं सचेतहृदया परमीक्ष्यते नो
कल्याणकर्मकरणे भवती प्रवृत्ता ॥
३६. पाथोजतन्तु - रुचिभिः परिशोभिता त्वं
सर्पाकृतिं विदधती परिवर्त्य मूर्तिम् ।
आधारचक्रशयने समुदं प्रविष्टा
किं मां विहाय दुःखिनं तनयं रुदन्तम् ॥
३७. कल्लोल - हस्तकमलैः परिगृह्य स्रोतः
सम्प्रापयन्ति जलधिं सरितः शुभास्ताः ।
हा ! मां विहाय भुवने विपदः समुद्रे
हर्षैकमग्नहृदये रमसे क्व मातः ॥
३८. किं देवि ! बान्धवजनान् त्यजतीह कोऽपि
त्यक्तो यथाहमबलो भवदङ्कलाभैः ।
दुःखापहारनिरतो मधुरोपचारै-
श्चन्द्रो जहाति हरिणं नहि लाञ्छितोऽपि ॥

३९. मीनो विनापि सलिलं रमते कदाचित्
लब्ध्वा तुषारकणकान् खलु जीवनाय।
किन्तु त्वदीयममलं चरणं विहाय
नाहं भवामि भुवने परिरक्ष मातः॥

४०. पाषाणतोऽपि सलिलं क्षरति प्रवाहै-
र्लोहं कठोरशकलं द्रवतीति चित्रम्।
भूयो न दीनकरुणा भवतीं रुणद्धि
नामापि भक्तशरणे कुरु सार्थकं त्वम्॥

४१. लोकोपकारनिरतौ रवि-चन्द्रदेवौ
दूरं स्वयं प्रकुरुतः सकलान्धकारान्।
मेघोऽपि वर्षति जलं जलधेः समेत्य
सम्प्रार्थितापि सततं विपदं धुनोषि॥

४२. दुःखस्य घोरतिमिरं परिवर्धतेऽद्य
विस्तारमेति जगतो जलधेः प्रवाहः।
कैरत्र साधनपदैः पुलिने भवेयं
दुर्गे! विहाय विमलं भवदीय-पादम्॥

४३. यातः समं मधुकरै-रसकृद् वसन्तः
शीर्णो न हृद्विपिनतः खलु शीतकालः।
मेघोऽभिवृष्य सलिलं सकलो विनष्टो
नाद्यापि खिन्नमनसः शमितो नु तापः॥

४४. सूर्योऽपि दीव्यति दिवा निशि शीतरश्मि-
र्नक्षत्रयूथसहितो जगदम्बिके हे।
किन्तु त्वदीयममलं वदनं विनाऽद्य
लोकोऽन्धकारविकलः परिदृश्यते मे॥

४५. पुण्ये त्वदीयचरिते श्रवणं न गाने
त्वय्येव वन्दनमिदं न तु चाटुकार्ये।
त्वत्पाददास्यमनघे नहि वित्तभाजां
सख्यं त्वदीयतनयैनं तु धूर्तलोकैः॥

४६. माता त्वमेव सरला भगिनी त्वमेव
विद्या त्वमेव सकला धनवर्गशक्तिः।
मेघोऽस्मि रोदनपरः पथहीनगामी
भूत्वा त्वमेव चपला हर मे तमिस्रम्॥

४७. वृक्षोऽस्मि देवि! भवती मधुमासशोभा
शृङ्गारितं प्रकुरुते खलु जीवनं मे।
नीरं सहायरहितं परिकीर्णमस्मि
नेतुं समुद्रकुहरे सरिताऽसि मातः॥

४८. दुःखान्धकारपटलं प्रविधाय दूरं
कर्तुं समस्तभुवनं विमलं लसन्ती।
हेमन्तशीतमथितं हृदयाब्जकोष-
माह्लादनाय भवती भवतूत्सुकाय॥

४९. आगच्छ गर्ज मदिरं घनमालिके हे,
शम्पामिषेण परितो विमलं हसन्ती।
तृष्णाविनोद-रहितस्य हि चातकस्य
चञ्चौ प्रवर्षतु जलं कृपयाऽर्द्रचित्ते॥

५०. शुष्कोऽत्र नीरसतरु-र्विलपामि मात-
र्हेमन्तकालमथितोऽस्मि सदा नतोऽस्मि।
संरक्ष लालय च मां नवपत्र-पुष्पै-
र्भूत्वा त्वमेव सफला मधुमासलक्ष्मीः॥

संस्कृतशिक्षोन्नयनस्य सार्वभौमा उपायाः

——आचार्य-श्री सरस्वतीप्रसाद चतुर्वेदः——

[विगताङ्के-चतुर्वेदमहाभागानां भाषणस्य पूर्वांशे संस्कृतशिक्षाया व्यावहारिकी त्रिसूत्री-योजना प्रस्ताविता । उत्तरांशेऽस्मिन् वर्तमान-संस्कृतसंस्थानानां न्यूनताः, परिष्कारविषयः, शासनस्य विषयेऽत्र घोरोपेक्षाभावप्रदर्शनपुरस्सरं देशस्य श्रेयसे अविलम्बं तेन समनुष्ठेयाः प्रकाराश्च गभीरया दृशा विचार्य समुपस्थापिताः ।]

—**सम्पादकः**

संस्कृत-संस्थानानां दयनीया दशा

साम्प्रतं संस्कृतशिक्षा-संस्थानानां दशा अतितरां दयनीया वर्तते । कामं शासनं 'क-ख'-वर्गीय-महाविद्यालयानाम् अतिरिक्तमार्थिकभरं वहतु नाम, ये किल सार्धशतसङ्ख्यामतीत्य न सन्ति । 'ग'वर्गीय-पाठशालानां कृते पुनः, येषां सङ्ख्या प्रायः सप्तशतमिता उच्यते, कीदृशस्यापि सुनिश्चित-वेतनक्रमस्य व्यवस्था नास्ति । सर्वेभ्यो वर्गीकृताऽवर्गीकृत-विद्यालयेभ्यो यदनुरक्षणानुदानं दीयते, तत्पद्धतिरपि सर्वथा दोषपूर्णा। पद्धत्याऽनया शासनतोऽध्यापकानां वेतनस्य कियानेवांशो लभ्यते, सोऽपि न दीयमान-वास्तविक-वेतनस्य। सर्वेषां वेतनं त्रिंशत्युत्तरशतं पञ्चसप्तति-रूप्यकात्मकं वा मत्वा तस्यैव कियदंशात्मकमिदम् अनुरक्षणानुदानम् । नास्मिन् वेतने कश्चन क्रमो निर्धारितः । सर्वमेतत् सर्वथाऽनुचितम्, निराधारं तर्कविरुद्धमव्यावहारिकञ्चैव वक्तव्यं भवेत्। शिष्टांशस्य कृते पुनस्तपस्विन एते सर्वथा प्रबन्धकमुखापेक्षिणश्च भवन्ति। जानन्त्येव भवन्तो यदद्य उदाराणां दानशीलानां च सज्जनानामस्तित्वं लुप्तप्रायमेव । संस्कृतशिक्षायै शुल्कविचारस्तु अकल्पनीय एव। सत्येवं वेतनस्य शिष्टोंऽशः अध्यापकः कुतो लभ्येत ? विद्यालयीयस्य चाशेषव्ययजातस्य पूर्तिः कुतः स्यात् ? एतदर्थं व्ययाधिक्यप्रदर्शनम्, अनुदानलब्धवेतनांशमात्रदानस्य वा विकल्पः। तत्रापि च समुचितवेतनस्याभावः। प्रायोऽद्य अनुदानित-संस्थासु वास्तविक-दीयमानवेतनस्य बाहुल्येन समुपस्थापनम्, अवास्तव-व्ययप्रदर्शनम्, कल्पिताध्यापक-प्रदर्शनम्, एवमादिभिरुपायैः लब्धेनाऽनुदानेनैव यथाकथञ्चन व्यवस्था करणीया भवति । तथापि वस्तुतः कार्यरतेभ्यो नैकेभ्योऽध्यापकेभ्यो वेतनं दातुं न पार्यते संस्थाचालकैः, न दीयते वा स्वकीयदुरभिसन्धिभिरिति हि वस्तुस्थितिः ।

संस्कृताध्यापकाः पुनर्विद्यार्थीन् शास्त्रिपाठ्यान् आचार्यपाठ्यांश्च ग्रन्थानध्याप्य तासु तासु परीक्षासु प्रवेशयन्ति । अनुसन्धानार्थमपि शोधोपाधये मार्गदर्शनं विदधति । किन्तु वराकाणां कृते वेनतक्रमस्य कोऽपि नियमो नास्ति । आचार्यपरीक्षापर्यन्तं पाठयिता अध्यापकः प्राथमिकविद्यालयस्य (प्राइमरी स्कूल) अध्यापकतः, चतुर्थश्रेणिक-भृत्यतोऽपि न्यूनं वेतनं लभते । तदपि त्रिभिश्चतुर्भिः मासैः त्रैमासिकाऽनुदानलाभानन्तरमेव, तदपि च पुनरपूर्णमेव ।

संस्कृतशिक्षया सहाऽयं कियानन्यायो दुर्व्यवहारो वा वक्तव्यो भवेत् ? नूनमिदं प्रजातान्त्रिकस्य, समाजवादि-समाजस्थापकस्य शोषण-वृद्धि - निश्शेषीकरणोद्घोषकस्य च शासनस्य सिद्धान्तेभ्यः स्वरूपेण च विरुद्धं घोरविडम्बना-

त्मकमिति सहृदया एव प्रमाणम्। प्रजातान्त्रिकेऽस्मिन् काले संस्थाभ्यः सविशेषायाः, अन्यूनं समानवेतनक्रमस्य, महार्घताभृतेश्च आर्थिक-सुविधायाः, लाभत्रयी - योजनायाश्च व्यवस्थाऽकरणं जघन्यतमोऽपराधः। वैज्ञानिकस्यास्य युगस्य अनुपेक्षणीयः सन्देशो यत् प्राचीनपद्धतौ युगानुरूपमावश्यकं परिवर्तनं परिष्करणञ्च विधाय, सा अखिलभारतीय-राष्ट्रियशिक्षाक्रमस्य महत्त्वपूर्णाङ्गरूपेण समुपस्थाप्यताम्। इदं च तदैव भवेत् यदा तपस्विभिरेभिः संस्कृताध्यापकैः सह पूर्णतो न्यायो विधीयते।

अतो नितान्तमावश्यकं यदेतेषां संस्कृतविद्यालयानां वर्गीकरणं कमपि निश्चितं सिद्धान्तविशेषं समाश्रित्यैव भाव्यम्। प्रथमा-मध्यमापरीक्षापाठ्याध्यापकेभ्यो हाईस्कूल इण्टरमीडिएट - परीक्षापाठ्याध्यापकेभ्यो न्यूनं वेतनं न कथमपि क्षम्यम्। एवमेव आचार्य-शास्त्रिपरीक्षापाठ्याध्यापकानां वेतनक्रमोऽपि तदनुसारमेव महाविद्यालय-विश्वविद्यालयस्तरतः कथमपि न्यूनो न भाव्यः।

संस्कृतविद्यालयेषु शुल्कव्यवस्थाया अभावात् तेषां समग्रं वेतनम् अनुदानरूपमेव भाव्यम्, न तु सामान्याऽऽङ्ग्लपद्धतीयविद्यालय - महाविद्यालयानाम् (स्कूल-कालेजानाम्) आयव्ययकानुसारम्। आङ्ग्लविद्यालयेषु संस्कृतविद्यालयेषु च मौलिकमिदमन्तरं जागर्ति यत् संस्कृतविद्यालय - प्रबन्धकेभ्योऽन्येषाम् आयस्रोतसां काऽपि सुविधा न भवति। अतस्तेषां सर्वोऽपि भारः शासनेनैव निर्वाह्यः। 'समान कार्याय समानवेतन' नियमानुसारं स्व-स्ववर्गानुरूपविद्यालयेभ्यो वेतनदाने कस्यापि प्रबुद्धस्य स्वतन्त्रदेशशासकस्य कृते नितान्तं वाञ्छनीयम्। तच्च कथमपि कालहरणं नानुमन्येत।

सहैवाऽनेन असाधारणेऽस्मिन् महार्घतायुगे अन्याभिरपि आर्थिकसौविध्ययोजनाभिः संस्कृताध्यापकाः कथमपि वञ्चिता न भाव्याः। संस्कृतशिक्षाया रूपं प्रयोजनं च विचार्यैव शासनेन अनुदानराशौ वृद्धिः नूनमचिरात् करणीया।

क्रान्तिकारि परिवर्तनं समपेक्षितम्

> एतदर्थं वर्तमान-संस्कृतशिक्षाव्यवस्थायां विशेषपरिवर्तनं करणीयं भवेत्। कटुसत्यमेतत् यत् विशुद्ध - संस्कृतपाठशालानामस्तित्वस्य नायं कालः। अद्य तु प्रारम्भिकपाठशालास्वेव शिक्षाग्रहणकाले एव विकल्परूपेण संस्कृतशिक्षाव्यवस्था आवश्यकी। स्कूल-कालेजेषु तु छात्रा वैकल्पिकरूपेण संस्कृतं पठिष्यन्त्येव। नवीनयोजनानुसारं संस्कृतविद्यालयेषु अनिवार्यसंस्कृताध्ययनेन साकम् आधुनिकविषया वैकल्पिकरूपेण उपादेयाः। विशुद्ध - संस्कृतछात्राणां तु सर्वोच्चशिक्षासंस्थानेष्वेव व्यवस्था भाव्या।

नूनमिदं क्रान्तिकारि परिवर्तनम्। किन्तु साम्प्रतिके युगे एतादृशव्यवस्थामन्तरा संस्कृतविद्यायाः प्रसारो नूनं कठिनतरः। स हि विशिष्टध्येयसाधनायैव भाव्यः। प्रारम्भिकविद्यालयेषु आवश्यक - संस्कृताध्यापनाय बहुला अध्यापकाः सुलभा भवेयुः। किन्तु उत्तरोत्तरम् उच्चकक्षासु तेषां सङ्ख्या न्यूना भवेत्। जीविकोपार्जनार्थं व्यवसायार्थं च सर्वसाधारणस्य उपाधिस्तरीणस्य स्नातकस्य निर्माणे संस्कृतविद्याया एकं वैकल्पिकं रूपं भवेत्। ततः परम् अत्युच्चस्तरे तु शास्त्रसंरक्षणाय तत्संवर्धन-समुन्नयनाय च केन्द्रीय-प्रान्तीय-संस्थानानि समुपलभ्येरन्, यत्र विद्या केवलं विद्यायै एव पाठनीया भवेत्, न जातु व्यावहारिकक्षमताप्राप्तये। तथा सत्येव उच्चशास्त्राणां वास्तविकं संरक्षणं भवेत्।

दूषिता आधुनिकी परीक्षा-प्रणाली

आधुनिकी परीक्षा-प्रणाली अपि अतितरां दूषिता सञ्जाता। विद्यार्थी केवलं परीक्षामेव समुत्तर्तुमिच्छति। अध्यापका अपि कतिपयवार्षिकाणि प्रश्नपत्राणि विलोक्य कतिपयान् प्रश्नान् निश्चिन्वन्ति। परीक्षार्थी विद्यार्थी च तानेव कण्ठस्थीकुरुते। सहैव साम्प्रतम् अनुमित-प्रश्नपत्राणां कुञ्जिकाऽपि समुपलभ्यते, यया अध्यापकानामावश्यकतैव लुप्यते। आवेदनपत्र-पूरणमेव तदीयमुद्दिष्टमवशिष्यते। छात्राः विद्यालय-महाविद्यालयेषु समुपस्थितिमपि न चिन्तयन्ति, उच्चमुपाधि समासाद्याऽपि केवलं ग्रन्थदर्शकत्वमेव समासादयन्ति। तेभ्यः किञ्चिदपि ज्ञानं न समुलभ्यते। अत एव संस्कृतस्य विद्यार्थिनो लौकिकदृष्ट्या सर्वथाऽनुपयोगिन एव एव प्रतीयन्ते।

वस्तुतः आचार्य-शास्त्रिपरीक्षासु छात्राणां मौखिकी परीक्षा एतादृशी भाव्या यद् विद्यार्थिनां सम्पूर्णशास्त्रीयज्ञानस्य परीक्षा भवेत्, न जातु परीक्ष्य-प्रश्नानामेव। सहैव आचार्य-शास्त्रिपरीक्षासु एकैकं विशेष-प्रश्नपत्र-मेतादृशं भाव्यं यत्र त्रिभिर्वर्षैः पठितानां ग्रन्थानां सन्दर्भमनुसृत्यैव प्रश्नानि पृष्ठानि स्युः। अस्मिन् प्रश्नपत्रे उत्तीर्णता अनिवार्या स्यात्। अन्यप्रश्नपत्रेषु साफल्यलाभेऽपि पत्रेऽस्मिन् अनुत्तीर्णाय विद्यार्थिने कथमपि उपाधिर्न दीयेत। एवमेव मौखिक-परीक्षाया अपि विशिष्टा नियमाः भवेयुः, काममेतदर्थं विशेषपरिवर्तनं करणीयं स्यात्। परीक्षासमितिद्वारा क-ख-ग-प्रभृतयो धाराः विस्तार्य वैधानिक-योजनाः निरोद्धुं सुदृढः प्रयास आवश्यकः।

पुरा नालन्दा-प्रभृति-विश्वविद्यालयेषु प्रवेशद्वार-परीक्षायां दिग्गजा विद्वांसो नियुज्यन्ते स्म। तैरुत्तीर्ण एव विद्यार्थी विश्वविद्यालये प्रवेष्टुमर्हति स्म। तथैव यदि नव्यं परिवर्तनं विधीयेत, तदा अध्यापकानां विद्यार्थिनां च स्तरोन्नयनं नूनं भवेत्। वैधानिककल्पान् नियमान् विधाय विद्यार्थीन् अध्यापकांश्च पथभ्रष्टान् कुर्वतां प्रकाशकानां लेखकानां च अवैधानिको व्यापारोऽपि तेन निरुद्ध्येत। अन्यथा शिक्षाया दैनन्दिनं ह्रासं किमपि शासनं निरोद्धुं न प्रभवेत्। कामं कियन्त्यपि सम्मेलनानि सभाश्च समायोजयन्तु, शिक्षाया ह्रास एतादृशसुदृढव्यवस्थामन्तरा कथमपि परिहृतो न स्यात्। तदा विषयेऽत्र सर्वमपि अरण्यरुदितमेव भवेत्।

अध्ययनक्रमोऽपि परिष्कार्यः

साम्प्रतिक अध्यापनक्रमोऽपि अपेक्षितकोटिको नास्ति। व्याकरण-साहित्य-न्यायादि-विषयाणामध्यापकाः समुचितप्रकारेण छात्रान् न पाठयन्ति। तेन केवलं शुकवत् कण्ठस्थीकरणाय ते विवशा भवन्ति। ग्रन्थस्य माहात्म्यम्, तदुद्दिष्टम्, तत्र च निहितानां विभिन्न-शास्त्रीय-प्रणालीनामपि सम्यग् विवेचनं न क्रियते। यद्येतत्सर्वमनुष्ठीयेत तदा एकशास्त्रस्य अध्येता छात्रः स्वशास्त्रेण सहैव अन्यशास्त्रेष्वपि पारङ्गतः स्यात्। यथा व्याकरणाध्येता लघुकौमुदीतः सिद्धान्तकौमुदीं लक्षणग्रन्थांश्च समधीत्य उच्चकोटिको विद्वान् भवितुं शक्नोति। साहित्याध्येता काव्य-नाटकादिभिः सह लक्षणग्रन्थान् समधीत्य उच्चकोटिकः साहित्यिको भवितुं शक्नोति। एवमेव अन्येषामपि शास्त्राणां सम्यग् ज्ञानमासादयितुं शक्यते। एकस्मिन्नेव शास्त्रे नैकेषां सम्बद्धशास्त्राणां विषया निहिता वर्तन्ते। महत्खेदास्पदमेतद् यदेतादृशा अध्यापका अध्येतारश्च अद्य अङ्गुलिगण्या एव समुपलभ्यन्ते। अस्माकं सुदृढं मतं यत् सर्वाणि शास्त्राणि अन्योन्याश्रितानि। तेषां च विधिवदध्ययनाध्यापनं यदा भवेत्, तदैव प्राच्यविद्यायास्तत्त्वतो ज्ञानमासाद्येत। अतोऽद्य प्रचलितस्य अपूर्णशिक्षण-क्रमस्य त्वरितं परिवर्तनमपि अत्यावश्यकमेव।

संस्कृत-विश्वविद्यालयोऽप्यत्र दोषी

विषयेऽत्र वाराणसेय-संस्कृत-विश्वविद्यालयोऽपि

निर्दोषो वक्तुमशक्यः। यतो हि अध्ययनाध्यापनस्य पाठ्यक्रमस्य च पूर्णमुत्तरदायित्वं तस्मिन्नेव वर्तते। परीक्षासञ्चालनकार्येण तदीय-पूर्णसाफल्येन च नैकाः समस्याः समाहिता भवितुं शक्नुवन्ति। किन्तु सम्यगध्ययनाध्यापनाय संस्कृतसंस्थानानां तेषां मान्यतावर्गीकरणादीनां च नियमनं नियन्त्रणञ्च नितान्तमावश्यकम्। मान्यताया मानदण्डो निर्धारणीयः। संस्कृत-विश्वविद्यालयद्वारा मान्यताप्राप्तये अपेक्षितसंख्यकानाम् अध्यापकानां प्राविधान - मावश्यकम्। अद्य वर्तमान-निर्देशिकानुसारं चतुर्भिः, पञ्चभिः, षड्भिर्वा अध्यापकैरेव क्रमशो मध्यमा, शास्त्री, आचार्यकक्षाः प्रचलन्ति, यासु क्रमशः सप्त, नव, द्वादश वा कक्षा अवान्तरा भवन्ति। यद्ययमेव क्रमः प्रचलितः स्यात्, चत्वारः, पञ्च षड् वा अध्यापकाः सप्त-नव-द्वादशकक्षाभ्यः पाठनाय विवशीक्रियेरन्, तदाऽस्य कथमपि समाधानं न भवेत्।

> इत्थमध्यापकानां स्वल्पतमे प्राविधानेऽपि आचार्याद्युच्चकक्षाणां चतुर्विंशतिघटिकासु अष्टादशघटिकाः यावत् अध्यापनशीलास्तपस्विनः संस्कृतविद्वासः शासनद्वारा उचितवेतनक्रमेण, महार्घताभृत्या लाभत्रयीयोजनातश्च वञ्चिता अवस्थाप्यन्ते, तदा संस्कृतसम्बद्धानामासां समस्यानां समाधानं साक्षाद् बृहस्पतिरपि कर्तुं न पारयेत्। एतदर्थं वाराणसेय-संस्कृत-विश्वविद्यालयः, उत्तरप्रदेश-शासनम्, शिक्षानिदेशालयः, संस्कृतविद्वद्वर्गश्च, सर्वेषां कार्येषु परस्परं पूर्णसमन्वयः सामञ्जस्यञ्च नितान्तमावश्यकम्।

संस्कृताध्यापकसमितेः समुचिताः प्रस्तावाः

अस्माकमध्यापकेभ्योऽपि संस्कृतसेवायै महान् त्यागस्तपस्या च करणीया भवेत्। किन्तु नास्यायमाशयो यत् ते स्वस्मिन् जायमानमन्यायं सहन्त्विति। तेषामभ्यर्थनाः किल सर्वथा समुचिताः, यथाशीघ्रं ताः पूरणीया एव। तेषामभ्यर्थनासु प्रमुखा एताः— समानवेतनक्रमः, समाना महार्घताभृतिः, लाभत्रयोयोजना, पर्याप्तानामध्यापकानां प्राविधानम्, लिपिकपदानां स्वीकृतिः, संस्कृत-निरीक्षकाणां पदप्रोच्चीकरणं तेभ्यश्च पर्याप्तसहायकवर्ग-संयोजनं कार्यालयसुदृढीकरणञ्च, प्रत्येकस्मिन् जनपदे प्रत्येक-स्तरीणस्य अन्यूनमेकैकस्य सर्वाङ्गपूर्णस्य राजकीय-संस्कृतविद्यालयस्य महाविद्यालयस्य च स्थापनम्, संस्कृतशिक्षासम्बद्धानां सर्वेषामधिकाराणां सामान्यशिक्षाधिकारितः प्राच्यसंस्कृतशिक्षाधिकारिणे प्रत्यावर्तनम्, संस्कृतशिक्षासम्बद्धपदेषु कथमपि सामान्यशिक्षोपडिग्री-कालेजाधिकारिणां नियुक्तिमकृत्वा प्राच्यसंस्कृतशिक्षाधिकारिवर्गत एव प्रोन्नततया नियोजनम्, प्राच्यसंस्कृतशिक्षानियन्त्रणाय तत्सम्पत्तिरक्षणाय चाधिनियमनिर्माणम्, एतेषां सर्वेषां च विषयाणां सञ्चालनाय संस्कृतशिक्षायाः पृथक् स्वतन्त्रनिदेशालयस्य संस्कृतशिक्षानिदेशकस्य च नियुक्तिस्तथा संस्कृतशिक्षाया राष्ट्रीकरणम् (Nationa Lisahon)।

संस्कृताध्यापकानामुपर्युक्ताः सर्वा अभ्यर्थनाः न्यायोचिताः, शीघ्रं प्रपूरणीयाश्च। एतासामुपेक्षणं संस्कृतशिक्षया सह घोरतरोऽन्यायः स्यात्। यथार्थमिदमनुभवामि यद् एतासां संस्कृतपाठशालानां सुसञ्चालनार्थं राज्यशासनस्य कोऽपि आदर्शो नास्ति। अतो राजकीयविद्यालयानां स्थापना न्यायोचिता व्यावहारिकी च। स्पष्टमेतत् यत् वर्तमान-निदेशालयस्य संस्कृतशिक्षया, संस्कृतविद्यालयैः, तत्प्राध्यापकैः अधिकारिभिश्च सह न्यायपूर्णः साधीयांश्च व्यवहारो अद्यावधि नास्ति। स्वातन्त्र्योत्तरं शिक्षापुनस्सङ्घटनम्, तदनन्तरम् अधिकारस्य प्रत्यायुक्ति (Delegation), वर्तमान - शिक्षाविकेन्द्रीकरणे संस्कृतस्य उपेक्षा, संस्कृतस्य अवाञ्छनीयरूपेण

कल्याणोत्कर्ष-सत्पथम्

—प्राध्यापकः श्री मुकुटबिहारी लाल—

[काशी-हिन्दूविश्वविद्यालये राजनीति-विभागाध्यक्षचरः]

(३)

राष्ट्रियत्वम् :

सर्वेषां जातिधर्माणां देशबन्धुषु सङ्गतिः ।
देशभक्तिसमायुक्ता राष्ट्रियत्वं प्रकीर्तितम् ॥१०८॥
स्वातन्त्र्यं देशबन्धुत्वं समत्वेन समन्विते ।
लोकतन्त्रं देशभक्ती राष्ट्रियत्वगुणाः स्मृताः ॥१०९॥
लोके मानवमात्रस्य स्वातन्त्र्यं क्षेमवर्धनम् ।
स्वातन्त्र्यरहितं राष्ट्रं विश्वकल्याणघातकम् ॥११०॥
देशबन्धुत्वसंसृष्टं राष्ट्रियत्वं विवर्धयेत् ।
समाजोत्कर्षकल्याणं स्वातन्त्र्यं लोकसङ्गतिम् ॥१११॥
समता श्रमिकक्षेमं लोकतन्त्रं मनुष्यता ।
भावनां राष्ट्रियत्वस्य शोभयन्ति हि सद्गुणैः ॥११२॥
देशबन्धुत्वसंसृष्टं स्वातन्त्र्यसमतायुतम् ।
श्रमिक-क्षेमसम्पन्नं राष्ट्रियत्वं प्रपोषयेत् ॥११३॥
देशभक्तिसमायुक्तै - मानवत्वविभूषितैः ।
हिते मानवमात्रस्य कार्या देशसामुन्नतिः ॥११४॥
अन्ताराष्ट्रियभावेन सम्भृतो राष्ट्रनिष्ठितः ।
राष्ट्रविश्वहितार्थाय लोकनीतिं विधारयेत् ॥११५॥
अन्ताराष्ट्रिय - सौहार्दं मानुष्य-समताश्रितम् ।
विधत्ते विश्वसन्धान - सहयोगी जगद्धितम् ॥११६॥

लोकनेता :

सिद्धान्ते दृढविश्वासो विचारः प्रगतिप्रदः ।
तितिक्षा मतभेदेषु कर्तव्यन्यायनिष्ठता ॥११७॥
भावना लोकसेवाया धैर्य-साहस-भद्रताः ।
लोकतान्त्रिक - नेतृत्वसद्गुणाः समुदाहृताः ॥११८॥
लोकनेता जनाधीनः सेवको मार्गदर्शकः ।
जनविश्वाससम्पन्नो भजते जनमङ्गलम् ॥११९॥
देशभक्तियुतो नेता लोकाराधनतत्परः ।
विधत्ते त्रस्तदीनानां क्षेमोत्कर्षौ विशेषतः ॥१२०॥
आशानुप्राणितो नेता समताऽऽदर्शसंयुतः ।
साहसोत्साहसंयुक्तो विरोधेनाऽपराजितः ॥१२१॥

माध्यमिक (Secnedary) शिक्षाधीनीकरणम् संस्कृतविश्वविद्यालयस्य च उच्चशिक्षाधीनीकरणञ्च संस्कृतोपशिक्षानिदेशकस्य नवसृष्टपदेऽपि प्राच्यशिक्षाविशेषज्ञस्य अनियोजनञ्च सर्वथा अवाञ्छितानि तत्त्वानि । एभिस्तत्त्वैः सुस्पष्टं यत् राज्य-शिक्षानिदेशालयो नूनं संस्कृतशिक्षानुकूलप्रस्तावेषु सर्वथा उदासीनं द्वेषपूर्णं चैव भावं बिभर्ति । अतः संस्कृतशिक्षा-सुसंचालनाय पृथक् निदेशालयो नितान्तमनुपेक्ष्यो वर्तते । तदैव संस्कृतशिक्षायाः, प्रदेशस्य भारतराष्ट्रस्य च कल्याणं भवेत् ।

अन्ते निवेद्यते यत्स्वतन्त्रदेशस्य प्रदेशस्यास्य च समुद्बुद्धाः शासकाः यावज्जीवं प्रत्यक्षं शिक्षाक्षेत्रे, विशेषतः संस्कृतशिक्षाक्षेत्रे समासादित-प्रात्यक्षिकानामनुभवानामाधारेण ताटस्थ्येन सुविचारितम् अस्मादृशानां सूत्रात्मकमिदं संस्कृतशिक्षाबालारिष्टनिवारकं संयोजनं स्वीयप्रगल्भप्रतिभया परीक्ष्य विशुद्धे च निर्णीते अचिरात् कार्यरूपेण तत् परिणमय्य देशस्य महत्तरममुं सांस्कृतिकनिधिं संगोपयिष्यन्तीति कृतं पल्लवितेन ।

●

रचना - क्रान्ति - सङ्घर्षैः समाजोत्कर्षहेतवे ।
स्थापनाय समत्वस्य प्रयत्नं कुरुतेऽनिशम् ॥१२२॥
निर्माणार्थं समाजस्य लोकनेता दृढव्रतः ।
सार्वलौकिकमर्यादां न्यायेन परिशोधयेत् ॥१२३॥
पोषयेज्जनकल्याणं श्रम - व्यक्तित्वगौरवम् ।
रचनात्मकसामर्थ्यं लोककल्याणभावनाम् ॥१२४॥
राष्ट्रकल्याणपुष्ट्यर्थं राष्ट्रिका दृढनिश्चयाः ।
नेतृणां सर्वकार्याणां समीक्षां कुर्वतेऽनिशम् ॥१२५॥
नेतत्वाद्धि निराकृत्य नेतारं गुणवर्जितम् ।
समर्थयन्ति नेतारं गुणवन्तं हि राष्ट्रिकाः ॥१२६॥

प्रगतिः

संसारे नैतिकादर्शो मानव-संस्कृतिः स्थितिः ।
व्यवस्था-न्याय-मर्यादाः परिणामगुणान्विताः ॥१२७॥
सर्वं विकाससम्भूताः प्रगतेः क्षमतायुताः ।
प्रभावयन्ति चान्योन्यं विकसन्ति यथाक्रमम् ॥१२८॥
मानवः स्थितियोगेन सङ्घात - बल-पौरुषैः ।
ज्ञान-चारित्र्य-सेवाभिर्विधत्ते प्रगतिं शुभाम् ॥१२९॥
प्रगत्यर्थी प्रपुष्णाति सङ्गतिं समतान्विताम् ।
लोकन्यायं सदादर्शं विधानं लोकतान्त्रिकम् ॥१३०॥
विरुद्धे शोषणं क्रौर्यं दमनं मत्सरं भयम् ।
संस्थापयति सौभ्रात्रं समाजं समताश्रितम् ॥१३१॥
नारीणां सर्वकार्येषु ह्यधिकारः समः स्मृतः ।
तासां समः समोत्कर्षः लोकप्रगतिहेतुकः ॥१३२॥
रचना - क्रान्ति - सङ्घर्षैर्दीनानां हितमाचरेत् ।
तेषामुत्कर्षकल्याणं समाजोन्नतिलक्षणम् ॥१३३॥
सङ्घशक्ति-महाशक्तिर्निर्बलानां परं बलम् ।
कर्मण्यः सङ्घयोगेन नाशयेत् शोषणं भयम् ॥१३४॥
श्रमिको वर्गचैतन्यो वर्णसङ्घेन यत्नतः ।
पोषयेद् वर्गसङ्घर्षं वर्गाधिप्यं विनाशयेत् ॥१३५॥
व्यक्तिवादमहंवादं यत्नतः प्रतिरोधयेत् ।
जनजागर्तिकल्याणे जनानन्दं विवर्धयेत् ॥१३६॥
श्रमिकोत्थानसम्मानं समानोत्कर्षमुद्वहेत् ।
स्थापयेल्लोकतन्त्रं च समाजं समतास्थितम् ॥१३७॥
रचनात्मक - सङ्घर्षो राष्ट्रप्रगतिहेतुकः ।
नितरां रचनाहीनः सङ्घर्षो नाशकारकः ॥१३८॥
नरः स्वमतिचारित्र्यभावकर्माणि शोधयेत् ।
मानवोचितमार्गेण शुभं साध्यं प्रसाधयेत् ॥१३९॥

नैतिकत्वम् :

मानुष्यं सामुदायित्वं समत्वं न्यायनिष्ठता ।
स्वैच्छिका लोकसेवा च नैतिकत्वस्य सद्गुणाः ॥१४०॥
आदर्शो नैतिकत्वस्य सद्भिः सामाजिकः स्मृतः ।
सङ्गतिप्रेरणाबद्धः समाजक्षेममूलकः ॥१४१॥
नैतिकत्वं गतिस्रोतः प्रगतिस्तस्य सद्गुणः ।
प्रगतिक्षेमसामर्थ्यं परीक्षा तस्य वै स्मृता ॥१४२॥
व्यापकं सर्वकार्येषु सर्वकल्याणसम्भृतम् ।
कर्तव्यसमतायुक्तं नैतिकत्वं परं शुभम् ॥१४३॥
स्वेच्छया प्रेरितं कर्म जनकल्याणभूषितम् ।
निःस्वार्थभावसम्पन्नं समताबुद्धिशोभितम् ॥१४४॥
सदन्तः क्षमातायुक्तं शुभसाधनसम्भृतम् ।
सच्चारित्र्यसमायुक्तं नैतिकं सद्भिरुच्यते ॥१४५॥
अन्धविश्वासनिर्मुक्तिर्मानुष्य - न्यायनिष्ठता ।
लोककल्याणलग्नत्वं नैतिकोत्कर्षसाधनम् ॥१४६॥
चित्तशुद्धिः सदाचारो भावना स्नेहसङ्गतेः ।
औदार्यं स्वार्थनिर्मुक्तं नैतिकोत्कर्षसाधनम् ॥१४७॥
भावना नैतिकत्वस्य स्थितिकालप्रभाविता ।
स्थितौ वैषम्ययुक्तायां विक्रियामधिगच्छति ॥१४८॥
ततस्तस्य विकासार्थं नीतिनिष्ठः प्रयत्नतः ।
व्यवस्थां स्थापयेद्राष्ट्रे कल्याणसमताश्रिताम् ॥१४९॥
स्वार्थ-वैषम्य - सम्पन्ने समाजे नीतिनिष्ठितः ।
शोषणस्य विनाशाय न्यायसङ्घर्षमुद्वहेत् ॥१५०॥
क्रान्तिशीला नैतिकता मानुष्यसमताधृता ।
विनाशयति वैषम्यं दमनं शोषणं भयम् ॥१५१॥

प्रतिष्ठापयते न्यायं स्वातन्त्र्यं समतां तथा ।
राष्ट्रोत्थानं मनुष्यत्वं बन्धुतां सहकारिताम् ॥१५२॥
संस्कृतिः समतामूला वर्गवैषम्यनिर्गता ।
लोकन्यायसमायुक्ता मानवत्वेन मण्डिता ॥१५३॥
भद्रताज्ञानसम्पन्ना क्षेमोत्कर्षगुणान्विता ।
भूषिता लोकतन्त्रेण विद्वद्भिर्नैतिका स्मृता ॥१५४॥

कर्तव्यम् :

न्यायः कल्याणमुत्कर्षो नूनं सत्कर्मलक्षणम् ।
एतैः समन्वितं कर्म कर्तव्यं समुदाहृतम् ॥१५५॥
कल्याणार्थाय जीवानां समाजोत्कर्षहेतवे ।
स्वातन्त्र्याय सत्त्वाय संस्कृतेरभिवृद्धये ॥१५६॥
आत्मोत्थानाय सेवायै सत्यस्थापनहेतवे ।
लोकन्याययुतं कार्यं कर्तव्यं समुदाहृतम् ॥१५७॥
कर्तव्यं न्यायसंसृष्टं कल्याणक्षमतायुतम् ।
युगादर्शगुणायुक्तं जीवनोत्कर्षसाधनम् ॥१५८॥
अन्यायप्रतिरोधो वै कर्तव्यं परमं स्मृतम् ।
कर्तव्ये निरतो वीरो दुराचारं विरोधयेत् ॥१५९॥
दमनस्य विनाशाय निग्रहार्थाय दुष्कृताम् ।
लोककल्याणसंसिद्ध्यै कार्यं कर्म समाचरेत् ॥१६०॥

अधिकारः

स्वातन्त्र्यं समतामूलं कर्तव्येन समन्वितम् ।
समष्टेर्हितसम्पन्नअधिकारो नृणां स्मृतः ॥१६१॥
अधिकारा मनुष्याणां कर्तव्येन समर्थिताः ।
वर्धयन्ति जनोत्कर्षं समाजोन्नतिगौरवम् ॥१६२॥
कर्तव्यरहिता ह्येते जीवनोन्नतिघातकाः ।
परिपुष्यन्ति पाखण्डमाधिक्यमभिमानताम् ॥१६३॥
नूनमुत्तरदायित्वमधिकारस्य लक्षणम् ।
लोककल्याणसंवृद्धिस्तस्य कर्तव्यमुच्यते ॥१६४॥
समतासहितो न्यायो जीवनस्याभिरक्षणम् ।
स्वातन्त्र्यं सहयोगस्य विचारस्य च संस्कृतेः ॥१६५॥
सौविध्यं लोकमात्रायै समोत्कर्षाय साधनम् ।
श्रमव्यक्तित्वसम्मानो ह्यधिकारा नृणां स्मृताः ॥१६६॥
अधिकारान्मानवानां कर्तव्यानि च यत्नतः ।
राष्ट्रियो ज्ञानसम्पन्नः संरक्षेत् परिपालयेत् ॥१६७॥

(क्रमशः)

'सूर्योदय'स्य स्वामित्वादिविषयकं विवरणम्

प्रपत्रम् : ४ (द्रष्टव्यो नियमः ८)

१. प्रकाशन-स्थलम्	: वाराणसी
२. प्रकाशनावधिः	: मासिकम्
३. मुद्रक-नाम	: गोविन्द नरहरि वैजापुरकरः
राष्ट्रियता	: भारतीयः
पत्र-सङ्केतः	: भारतधर्ममहामण्डलम् जगत्गंज, वाराणसी
४. प्रकाशक नाम	: गो० न० वैजापुरकरः
राष्ट्रियता	: भारतीयः
पत्र-सङ्केतः	: वाराणसी
५. सम्पादक-नाम	: गो० न० वैजापुरकरः
राष्ट्रियता	: भारतीयः
पत्र-सङ्केतः	: ३०/४० घासीटोला वाराणसी
६. तेषां व्यक्तीनामंशभागीनां वा नामानि पत्रसङ्केताश्च येषां सविधे समग्रस्य मूलधनस्यैकप्रतिशततोऽधिको भागो वर्तते ।	: श्रीभारतधर्ममहामण्डलम् जगतगंज, वाराणसी कैण्ट वाराणसी

अहं गोविन्द नरहरि वैजापुरकर नामा एतद्द्वारा घोषयामि यदुपरि लिखितं विवरणं मदीयज्ञानविश्वासानुसारं सत्यमस्ति ।

दिनाङ्कः १-३-'७३

(ह०) गोविन्द नरहरि वैजापुरकरः
प्रकाशकः

प्राचीन-भारतीयाः क्रीडाः

--डॉ० नरेश झा शास्त्री--

(३)

द्वितीयप्रकारायां क्रीडायाञ्च स्वस्त्रिया स्त्रीभिर्वा सह अनेकप्रकारैः क्रीडा-मनोरञ्जनं प्रावर्त्यते स्म । तथाहि—परस्परशरीरोपरि जलं सिञ्चामीति कृत्रिम-भीत्या पतिकण्ठदेशावलम्बनं काष्ठनयतरिभिरितस्ततस्तरणं पुनस्ततो जलमध्ये पतनमित्याद्यनेकप्रकारैः एषा क्रीडा प्रवर्तते । तथा च हरिवंशे—

सिषिचुः केशवं पत्न्यो धारा इव महोदधिम् ।
सिषेच ताश्च गोविन्दो मेघः फुल्लता इव ॥
अवलम्ब्य पराः कण्ठे हरिं हरिणलोचनाः ।
उपगूहस्व मां वीर पतामीत्यब्रुवन् स्त्रियः ।
काश्चित्काष्ठमयैस्तेरुः प्लवैः सर्वाङ्गशोभनाः ॥[1]

अपि च वायुपुराणे—

भ्राजते सरितां श्रेष्ठा सर्वपापप्रणाशिनी ।
तस्यास्तीरे मया दृष्टाः पादपाश्च सहस्रशः ॥
अमराः क्रीडमानाश्च जलक्रीडां पुनः पुनः ।
विशालजघना यस्यां गन्धर्वाः सामगा इव ॥
भुजङ्गावनताङ्ग्यश्च किन्नर्यश्च सुगायनाः ।
दिव्यभूषणसम्भोगैः क्रीडन्त्यत्र समागताः ॥[2]

ब्रह्मवैवर्तपुराणे च—

जलं ददौ राधिकायै सकामो माधवः स्वयम् ।
ददौ सा च माधवाय कामतोयाञ्जलित्रयम् ॥[3]

एतादृशं जलक्रीडावर्णनं श्रीमद्भागवते पुराणे,[4] रघुवंशे,[1] किरातार्जुनीये,[2] शिशुपालवधे,[3] अमरुशतके[4] अन्येषु च काव्यग्रन्थेषु बहुत्र समुपलभ्यते । काव्यवर्णनवैशिष्ट्यमिदं यद् स्त्रीणामेव जलक्रीडावर्णनं न पुनः स्त्री-पुरुषयोः ।

ग्रन्थविस्तरभयादनपेक्षितत्वाच्चात्र नात्र संगृहीतानि तान्युदाहरणानि । विशेषरूपेणेयं क्रीडा ग्रीष्मर्तौ प्रवर्तते स्म । वात्स्यायनेन स्पष्टमेव जलक्रीडाकालः ग्रीष्मर्तुः स्वीकृतः । तद्यथा—

एतेन रचितोद्ग्रहोदकानां ग्रीष्मे जलक्रीडागमनं व्याख्यातम् ।[5]

नात्रैव, अपितु मानसोल्लासेऽपि तदेव समर्थितं राज्ञा सोमेश्वरेण—

निदाघे समनुप्राप्ते चण्डे मार्तण्डमण्डले ।[6]

प्रखरतररश्मौ सूर्ये अर्थात् मध्याह्ने इयं प्रारभ्य अपराह्णे परिसमाप्यते स्म । यथा तत्रैव मानसोल्लासे—

नद्यां वा पुष्करिण्यां वा जलकेलिप्रवृत्तये ।
निर्वृत्य सलिलक्रीडां किञ्चिदवशिष्टे च वासरे ॥[7]

आशयोऽयमत्र सूर्यास्तमनवेलायां क्रीडां परिसमाप्य जलान्निस्सरन्ति स्म । एवमियं क्रीडा सर्वजन-

---

१. हरिवंश-विष्णु० ८८.२५ ।
२. वायु० १९७.१६—१८ ।
३. ब्रह्मवैवर्त, खण्ड ४,२८.१३३ ।
४. भाग० १०.६५.२३; १०.६९.२७.२ ।

१. १६.६१—६७, .६.३२ ।
२. ८.३०-५३ ।
३. ८.८—५० ।
४. १३१ ।
५. कामसूत्रम् ४१ ।
६. मानसोल्लासः ५.५. २४४ ।
७. तत्रैव ५.५.२८१ ।

हितकारिणी शारीरिकबलवर्धिनी मनोरञ्जिनी च लोके प्रसिद्धा।

१९. वनविहार-क्रीडा :

अस्यां क्रीडायां युवदम्पतीनामितस्ततो गमनम्, क्वचिच्च सखीभिः सह सङ्घर्षेण इतस्ततो धावनम्, क्वचित् अक्षिनिमीलनादिकम्, क्वचिच्च पुष्पावचयादिकमनुष्ठीयते स्म। शिशुपालवधकाव्यस्य सप्तमे सर्गे विशेषतो वर्णितेयम्। वात्स्यायनेन च 'उद्यान-यात्रा' इति संज्ञया निरूपिता। रघुवंशे इन्दुमतेः नैषधे च नलस्य वनविहारक्रीडा समुल्लेखनीया। मानसोल्लासे सोमेश्वरेण स्वमहिष्या सह राज्ञः इयं क्रीडा च वर्णिता।

२०. वनभोजन-क्रीडा :

कदाचित् क्रीडकाः परमरमणीयमुपवनमरण्यभागं वा सम्प्राप्य स्वगृहादेवानीतानि भोजनानि परमाह्लादपूर्वकमशनं कुर्वन्ति। तत्रादौ वनभोजिनः छायायुक्तं स्थण्डिलं प्राप्य मण्डलाकारमुपविश्य चानीतं भोजनं पल्लवेषु, पर्णेषु, पत्रपुटेषु, शिक्येषु, दृषत्सु च परिवेश्य परस्परं हसन्तः हासयन्तश्च भोजनं कुर्वन्ति। भगवतो श्रीकृष्णस्य परितः व्रजबालकाः समुपविश्य वने भोजनमकुर्वन्। तदुल्लेखो यथा श्रीमद्भागवते—

कृष्णस्य विष्वक् पुरुराजिमण्डलै-
रम्याननाः फुल्लदृशो व्रजार्भकाः।
सहोपविष्टा विपिने विरेजु-
श्छदा यथाम्भोरुहकर्णिकायाः॥
केचित्पुष्पैर्दलैः केचित् पल्लवैरङ्कुरैः फलैः।
शिग्भिस्त्वग्भिर्दृषद्भिश्च बुभुजुः कृतभाजनाः॥
सर्वे मिथो दर्शयन्तः स्वस्वभोज्यरुचिं पृथक्।
हसन्तो हासयन्तश्चाभ्यवजह्रुः सहेश्वराः॥[1]

तथा च तत्रैवाग्रे—

क्वचिद् वनस्पतिक्रोडे गुहायां चाभिवर्षति।
निर्विश्य भगवान् रेमे कन्दमूलफलाशनः॥
दध्योदनं समानीतं शिलायां सलिलान्तिके।
सम्भोजनीयैर्बुभुजे गोपैः सङ्कर्षणान्वितः॥[1]

एवमेतैर्निर्देशैः वनभोजनक्रीडा प्राचीनकाले सुतरां प्रसिद्धाऽऽसीत्।

२१. रास-क्रीडा :

नृत्यप्रधानेयं क्रीडा। रासमण्डल-रासकेलिनामभ्यामपीयं सम्बोध्यते। 'रासक्रीडा'-शब्देन भगवतः श्रीकृष्णस्य गोपिकाभिः सह क्रीडामूलकं वर्तुलाकारं नृत्यं पुरः प्रस्फुरति। तत्रापि शरदर्तौ प्रकाशिते शीतरोचिषि चन्द्रमसि[2] नद्याः पुलिने कन्यकाः पुत्रकाश्च अन्तरा बालकमन्तरा कन्यकाञ्च कृत्वा परस्परकरग्रहणपूर्वकं नृत्यन्तो गायन्तश्च तालिकावादनपुरस्सरं मण्डलाकारम् उपविश्योपविश्य, उत्थायोत्थाय च गायन्तः क्रीडन्त्येव। तत्र वाद्यादिना हस्तमितकाष्ठदण्डद्वयेन आघातपुरस्सरं मण्डलाकारं नृत्यं गायनमपि जायते।[3] श्रीमद्भागवतीयाः दशमस्कन्धीयाः पञ्च अध्यायाः (२९–३३) 'रासपञ्चाध्यायो'ति नाम्ना सुप्रसिद्धा एव। तत एव रासक्रीडाविश्लेषणाय कतिपयानि पद्यान्युद्ध्रियन्ते—

तत्रारभत गोविन्दो रासक्रीडामनुव्रतैः।
स्त्रीरत्नैरन्वितः प्रीतैरन्योऽन्यं बद्धबाहुभिः॥
रासोत्सवः सम्प्रवृत्तो गोपीमण्डलमण्डितः।

---

[1] श्रीमद्भागवतम् १०.१३.८–१०।

[1] भागवतम् १०.२०.२८-२९।

[2] क्रीडन् वने निशि निराकररश्मिगौर्यां
रासोन्मुखः कलपदायतमूर्छितेन। (भाग० २.७.३३)

[3] नद्याः पुलिनमाविश्य गोपिभिर्हिमवालुकम्।
रेमे तत्तरलानन्द-कुमुदामोदवायुना॥
(श्रीमद्भागवतम् १०.२९.४५-४६)

स्वर्गीयाः महाकवयः म० म० कालीपद तर्काचार्याः

——श्री श्रीजीव न्यायतीर्थाः——

[ऐषमे विगत-सौरश्रावणमासि ११ दिनाङ्के वङ्गविद्वत्कुलकमलदिवाकराः महामहोपाध्याय श्री कालीपद-तर्काचार्या दिवं गताः । तेषां चरणयोः श्रद्धाञ्जलिं समर्पयन्तो वयं विलम्बतः समुपलब्धा श्रीजीवन्यायतीर्थानां तेषां तद्विषयिणी शोकगाथेयमुपस्थाप्यते ।—**सम्पादकः**]

यातोऽस्तमद्य नयनेन्दुरनिन्द्यकान्तिः
पृथ्वीतलप्रथित - शीतल - शीलयोगी ।
हा हन्त हन्त ! सदिगन्तमहीमहीय-
स्तेजश्चिराय चलितस्तिमिरान्तरालम् ॥ १ ॥

निस्तन्द्रचन्द्र - करनन्दित-वङ्गभूमि-
र्जातान्धकारपिहिताऽद्य कुहूनिशेव ।
दुर्दैवराहुकवलं प्रबलं गतोऽसौ
लोकैकलोचन - विलोभन - शुभ्रभानुः ॥ २ ॥

सुप्ता नु लुप्तनिनदा सित-सप्ततन्त्री
वाग्देवताकरधृता चिरझङ्कृता या ।
प्राणायमान इह भो जगतां निरुद्धे
सा स्तब्धतां भजति लब्धवियोगबोधा ॥ ३ ॥

विद्यानवद्यनिधि - सिन्धु - रसप्रबन्धा-
दध्यापनात् प्रवचनाद् रचनाबलाच्च ।
आचार्यतामभजदत्र य आर्यभावाद्
वाचस्पतित्वमिव देवगुरु - द्युलोके ॥ ४ ॥

विश्वप्रसारियशसा कमनीयभासा
यो निष्कलङ्कचरितेन सदोदयेन ।
दीव्यंश्च पक्षनिरपेक्षरुचिः स हन्त !
जित्वाऽपि चन्द्रमसमस्तमगादकस्मात् ॥ ५ ॥

सौजन्यजन्यविनयः प्रियदर्शनत्वं
हास्यप्रसन्नमुखता प्रियभाषिता च ।
वाग्मित्व-लेखपटुते बहुशास्त्रवित्त्वं
हा सप्तसारगुण-सागर एष शुष्कः ॥ ६ ॥

ओङ्कारनाथकरुणाङ्कित - कर्मजातो
मर्मप्रतिष्ठ-प्रणवोज्ज्वल - पारिजातः ।
सन्तानसम्मित - सनातनशास्त्रपालो
हा हा ! व्यराजत स दिव्यविभूतिमालः ॥ ७ ॥

कालीपदेति निजनाम दधत् समर्थं
विद्याग्रगण्यभवनं शिवसङ्गधन्यम् ।
गङ्गेशनन्दनकरं परमार्थकन्दं
हा हा ! श्मशानमवसान उपैति किं तत् ॥ ८ ॥ ●

योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ।
प्रविष्टेन गृहीतानां कण्ठे स्वनिकटं स्त्रियः ॥[1]

अन्योऽन्याबद्धबाहुभ्यां चङ्क्रमण-परिभ्रमणाभ्याञ्च श्रीकृष्णस्य मुरली-शिखिपिच्छमुत्तरीयं पीतवस्त्रञ्च पपातेति ब्रह्मवैवर्तपुराणे लिखितम्—

पपात मुरली तस्य क्रीडाकमलमुज्ज्वलम् ।
द्वितीयं पीतवस्त्रं च शिखिपिच्छं शरीरतः ॥[2]

अस्याः रासक्रीडायाः चर्चा भट्टनारायणेन वेणीसंहारनाटकेऽपि कृता । यथा—उत्सृज्य रासे रसं गच्छन्तीम् ।[3]

गीतागोविन्दे जयदेवोऽपि वर्णयति—

रासे हरिमिह विहितविलासं
स्मरति मनो मम कृतपरिहासम् ।[1]

इत्थमुपवर्णितायाः लोकसिद्धायाः क्रीडाया प्रचारः प्रसारश्च भारते चिरकालादेवास्ति । केचन विद्वांसः ज्योत्स्ना-क्रीडायास्तृतीयं भेदं रासक्रीडास्वरूपमेतत् मन्यन्ते ।[2] किन्तु तत्र रासस्य संपूर्णलक्षणानां समन्वयो भवेन्नवेति सन्देह एव । आंशिकलक्षणैस्तु तादात्म्यमस्त्येव ।

(क्रमशः)

---

[1] श्रीमद्भागवतम् १०.३३.२-३ ।
[2] ब्रह्मवैवर्तं० २८.६३ ।
[3] वेणीसंहारम् १.२ ।

---

[1] गीतगोविन्दम् २.१ श्लो. ।
[2] मानसोल्लास : एक अध्ययन, पृ० ४०४ ।

ध्वनि-वैभवम्

—श्रीरवीन्द्रकुमार सिद्धान्तशास्त्री—

(९)

ननु व्यङ्ग्यार्थप्राधान्ये भवति ध्वनिः, तस्याप्राधान्ये च गुणीभूतव्यङ्ग्यमित्युच्यते । उक्तञ्च दर्पणकारै —

अपरन्तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये ।[1]

कस्मिन् वाक्ये व्यङ्ग्यार्थः प्रधानतां याति, कुत्र वा स वाच्यार्थेन सह समतां तस्मात् न्यूनतां वा गच्छेदिति कथमवगन्तव्यमिति चेत् ? उच्यते ; सहृदयजनचित्तमेवात्र प्रमाणमिति । यत्र वाक्ये वाच्यार्थ-व्यङ्ग्यार्थयोः प्राधान्याप्राधान्ये तावदपरिस्फुटे भवतस्तत्रैव तयोः साम्यं विज्ञेयम् । यत्र तु वाच्यार्थ एव व्यङ्ग्यार्थान्मनोरमतरस्तत्र ज्ञातव्या व्यङ्ग्यार्थस्य न्यूनता । गुणीभूतव्यङ्ग्यानामष्टौ भेदाः प्रदर्शिताः पूर्वाचार्यैः मम्मट-विश्वनाथादिभिः । ते च भेदा नामतो निर्दिष्टाः काव्यप्रकाशे यथा—

अगूढमपरस्याङ्गं वाच्यसिद्ध्यङ्गमस्फुटम् ।
सन्दिग्ध-तुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ।
व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदाः स्मृताः ॥[2]

ननु कथमेवंविधस्य व्यङ्ग्यार्थस्य गुणीभूतत्वमङ्गीक्रियत इत्यपेक्षायामुक्तं तत्रैव—**कामिनीकुचकलसवद् गूढं चमत्करोति; अगूढन्तु स्फुटतया वाच्यायमानमिति गुणीभूतमेव**[3] इति ।

अगूढव्यङ्ग्यस्योदाहरणमुक्तं तत्रैव यथा—

यस्यासुहृत्कृत-तिरस्कृतिरेत्य गुप्त-
सूचीव्यधव्यतिकरेण युनक्ति कर्णौ ।
काञ्चीगुणग्रथनभाजनमेष सोऽस्मि
जीवन्न सम्प्रति भवामि किमावहामि ॥

अत्र श्लोके जीवन्निति पदस्य वाच्यायमानत्वात् सर्वजनसंवेद्यत्वं भवेत् । तेन च भवति तस्य चमत्कारितातिशयताभावः सर्वजनसंवेद्यत्वादेव व्यङ्ग्यार्थस्यास्य अगूढत्वमङ्गीक्रियते सुधीभिः । ध्वनौ यथा चित्तचमत्कारिताधिक्यं विद्यते, व्यङ्ग्यार्थेऽस्मिन् तथेति गुणीभूतत्वमस्य व्यङ्ग्यस्य ।

अपराङ्गभूत-गुणीभूतव्यङ्ग्यो यथा—

अयं स रसनोत्कर्षी पीनस्तन-विमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥[1]

कुरुक्षेत्रसमरे शत्रुबाणैश्छिन्नं भूरिश्रवसो हस्तमवलोक्य तत्पत्न्या विलापोऽयम् । अत्र खलु शोकाभिभूताया वैधव्यतापिताया युवत्या मुखात् करुणरसनिःसरणावसरे तदङ्गरूपेण शृङ्गाररसस्य निःसरणात् करुणरस एव व्याहन्यत इति व्यङ्ग्यार्थस्यास्य नितरामल्पीयस्त्वाद् गुणीभूतत्वमवगन्तव्यम् । महासमुद्रापेक्षया यथाल्पीयस्त्वं तडागस्य, तथैवाल्पीयस्त्वमस्य गुणीभूतव्यङ्ग्यस्य ध्वन्यपेक्षया । एवमन्येषामपि गुणीभूतव्यङ्ग्यानां काव्यलोकललामभूताद् ध्वनेः नितरामल्पीयस्त्वमवगन्तव्यम् ।

ध्वनि-गुणीभूत-व्यङ्ग्ययोर्भेदः

गुणीभूतव्यङ्ग्यार्थो ज्ञातुं शक्यते मध्यम-सहृदयैरपि ; ध्वन्यर्थस्तु केवलमुत्तमसहृदयैरिति स्फुटमस्ति तयोर्भेदः । चित्तचमत्कारिता-सम्पादने यथा विद्यते दौर्बल्यं गुणीभूतव्यङ्ग्यस्य, तत् प्रदर्शितमस्माभिः प्रागेव । ध्वन्यर्थस्य तु विद्यते चित्ताह्लादकता-सम्पादने सीमातीतं वैभवम् । तथा हि—

दृष्टिं हे प्रतिवेशिनि ! क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति ।
एकाकिन्यपि यामि सत्वरमितः स्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः ॥

इति श्लोके श्रुतिपथमायाते, मूढो जनो व्यङ्ग्यार्थस्य गन्धमपि ज्ञातुं न शक्नोति । मध्यम-सहृदयोऽपि बोद्धुं

---

[1] साहित्यदर्पणम्; चतुर्थपरिच्छेदः; कारिका १३ ।

[2] काव्यप्रकाशः; पञ्चमोल्लासः ।

[3] तत्रैव ।

[1] महाभारतम्; स्त्रीपर्व २४.१९ ।

नार्हति कस्तावत् चमत्कारितातिशयपूर्णः कवेरभिप्रेतार्थं इति । उत्तम-सहृदयस्तु श्रुत्वैव श्लोकमिममवगन्तुमर्हति, भावि-परपुरुषसमागमचिह्नं गोपयितुमेव वाक्चातुर्यं विस्तार्यतेऽभिसारिकयेति । अनुभवमात्रगम्यो ध्वन्यर्थोऽयं विस्फारयति तदीयं चित्तमुत्पादयति च तत्र महान्तमानन्दपारावारम् ।

दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥[1]

इति कालिदासश्लोके समुच्चारिते, "अहो महाप्रभावोऽयं सूर्यवंशावतंसो रघुः यः खलु तेजसा रविमप्यतिक्रम्य वर्तते" इत्येवं ध्वन्यर्थः सहृदयस्य श्रोतुश्चित्तपटमारुह्य तत्र समुत्पादयति कञ्चन लोकातीतं चमत्कारातिशयम्, येन खलु स सचेताः रघुप्रभावमनुचिन्त्य तद्भावभावितचित्तो विस्मरति कियत्कालं जागतिकं सुख-दुःखादि-व्यापारम् ।

प्रहरविरतौ मध्ये वाह्नस्ततोऽपि परेण वा
किमुत सकले याते वाह्नि प्रिय त्वमिहैष्यसि ।
इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं बालाऽऽलापैः सबाष्प-गलज्जलैः[2] ॥

इत्यत्रापि विप्रलम्भ-शृङ्गार-ध्वनिवशादेव श्लोकस्य नितरां चित्तचमत्कारित्वम् ।

यद्यपि चित्रमीमांसायामप्पयदीक्षितैः श्लोकेऽस्मिन् गुणीभूतव्यङ्ग्यमित्युक्तम् । तदसङ्गतमिव प्रतिभाति ; व्यङ्ग्यार्थस्यैवात्र प्राधान्यात् । तत्रभवद्भिर्जगन्नाथपण्डितैरपि रसगङ्गाधरग्रन्थे चित्रमीमांसाकृतो मतमिदं खण्डितम् । उक्तञ्च तैः—"सबाष्पगलज्जलानां प्रहरविरतौ इत्याद्यालापानामेव प्रियगमननिवारणरूपवाच्यसिद्ध्यङ्गतया व्यङ्ग्यतया व्यङ्ग्यस्य गुणीभावाभावात्" इति ; "अस्तु वा ततः परं प्राणान् धारयितुं न शक्नोमीति व्यङ्ग्यस्य वाच्यसिद्ध्यङ्गतया गुणीभावस्तथापि नायकादेर्विभावस्य विप्रलम्भेन ध्वनित्वं को निवारयेत् ?"[1] इति च । एवम्—

शिखरिणि क्व नु नाम कियच्चिरं
किमभिधान - मसावकरोत् तपः ।
सुमुखि येन तवाधरपाटलं
दशति बिम्बफलं शुकशावकः ॥

इत्यस्माद् यदा 'तवाधरः पुण्यातिशयलभ्यः' इति ध्वन्यर्थः प्रतीयते, तदा तत्समकालमेव भासते सहृदयस्य श्रोतुश्चेतसि सुमुख्यास्तस्याः काचिदनिर्वचनीयाऽऽकृतिः । तया चाकृत्या सह विभासते बिम्बफलादपि अधिकतरलौहित्यमण्डितेन तदधरेण विभूषितं लोकललामभूतं तस्या वदनम् । तेन च लोकातीतसौन्दर्यदर्शन-जनितेन विमलानन्देन परिपूरितं भवति सहृदयस्य तस्य हृदयम् । एवमानन्दानुभवसमये विराजते खलु तदीये चेतसि केवलं चमत्कारातिशय एव । तेन च लौकिकीं सर्वामेव घटनापरम्परां विस्मरति स सहृदयः कियत्कालम् ।

अहो विचित्रं सामर्थ्यं ध्वनेः ! येन खलु दैहिकी मानसिकी च व्यथा विदूरीक्रियते सहृदयचित्तात् । यः खल्वेवं पार्थिवानि व्याधि-वेदनादीनि दूरीकर्तुमर्हति, कथन्नाम विपुलवैभवाकरः स ध्वनिरस्माकं सर्वेषामेव वरणीयो न भवेत् ?

यः खलु भाग्यवान् पुरुषो ध्वनिप्रधानं वाक्यं रचयितुमर्हति, स एव महाकविसंज्ञां लभते । उक्तञ्च तत्रभवता राजशेखरेण—

शब्दार्थोक्तिषु यः पश्येदिह किञ्चन नूतनम् ।
उल्लिखेत् किञ्चन प्राञ्चं मन्यतां स महाकविः ॥[2]

(क्रमशः)

---

[1] रघुवंशम् ४.४९ ।

[2] अमरुशतकम् ; श्लोक १२ ।

---

[1] रसगङ्गाधरः ; प्रथममाननम् ।

[2] काव्यमीमांसा ; एकादशोऽध्यायः ।

प्राचीन-संस्कृतकवीनां वसन्त-विलासः

— श्री 'शृङ्गारः' —

'सूर्योदय'-पाठकानां प्रमोदायाऽत्र प्राचीन-संस्कृतकवीनां वसन्त-विलासः, पर्यन्ते च चम्पूभारतकर्तुः श्री अनन्तभट्टस्य वसन्त-विहारश्च समुपस्थाप्यते ।

अग्रे स्त्रीनखपाटलं कुरबकं श्यामं द्वयोर्भागयोः
बालाशोक - मुपोढराग - सुलभं भेदोन्मुखं तिष्ठति ।
ईषद् - बद्धरजःकणाग्रकपिशा चूते नवा मञ्जरी
मुग्धत्वस्य च यौवनस्य च सखे मध्ये मधुश्रीः स्थिता ॥

—महाकविः कालिदासः

सौमित्रे शोभते पम्पा वैदूर्य - विमलोदका ।
फुल्लपद्मोत्पलवती शोभिता विविधैर्द्रुमैः ॥
तस्य रूपाणि सौमित्रे वनानां पुण्यशालिनाम् ।
सृजतां पुष्पवर्षाणि वर्षं तोयमुचामिव ॥
इमानि शुभगन्धीनि पश्य लक्ष्मण सर्वतः ।
नलिनानि प्रकाशन्ते जले तरुणसूर्यवत् ॥
पश्य लक्ष्मण संनादं वने मदविवर्धनम् ।
पुष्पिताग्रेषु वृक्षेषु जले तरुणसूर्यवत् ॥

—आदिकविः वाल्मीकिः

द्रुमाः सपुष्पाः सलिलं सपद्मं
स्त्रियः सकामा पवनः सुगन्धिः ।
सुखाः प्रदोषाः दिवसाश्च रम्याः
सर्वं प्रियं चारुतरं वसन्ते ॥
छायां जनः समभिवाञ्छति पादपानां
वक्त्रं तथेच्छति पुनः किरणं हिमांशोः ।
हर्म्यं प्रयाति शयितुं सुखशीतलं च
प्रियाञ्च गाढमुपगूहति शीतलत्वात् ॥
न तज्जलं यत्र सुचारु पङ्कजं
न पङ्कजं तद्यदलीनषट्पदम् ।
न षट्पदोऽसौ कलगुञ्जितो न यो
न गुञ्जितं तन्न जहार यन्मनः ॥
मधुरया मधुबोधित - माधवी
मधुसमृद्धित मेधित - मेधया ।
मधुकराङ्गनया मुहुरुन्मद-
ध्वनिभृता निभृताक्षरमुज्जगे ॥

मधु द्विरेफः कुसुमैकपात्रे
पपौ प्रियां स्वामनुवर्तमानः ।
शृङ्गेण च स्पर्शनिमीलिताक्षीं
मृगीमकण्डूयत कृष्णसारः ॥
ददौ रसात् पङ्कजरेणुगन्धि-
गंजाय कण्डूय जलं करेणुः ।
अर्धोपभुक्तेन बिसेन जायां
संभावयामास रथाङ्गनामा ॥
पुंस्कोलित - श्चूतरसासवेन
मत्तः प्रियां चुम्बति रागहृष्टः ।
कूजद् द्विरेकोऽप्ययमम्बुजस्य
प्रियः प्रियायाः प्रकरोति चाटुः ॥

चम्पू-भारतम् :

अथ कदाचिद् अखिलहरिदन्तर-निरन्तर-वलमान-मलय-पवमान कम्पित-चम्पकसम्पादित-सौरभसम्पदनुकम्पितनिलिम्पपथाः केसरकुसुम-केसरशिखर-भासुर-धूलिधूसरदिशो मनसिज-विजयसहकारचतुर-सहकारपल्लवतल्लज परिचय- गर्वायमाण-कलकण्ठ-युवकण्ठोक्त-पथिकजनसन्दोह-जीवितसन्देहा वनदेवता-वदन-तिलकायमान - तिलककलिकावलिपलित - भावुकनभो-विभागा मदनहुतभुगङ्गारसदृश-कमलभृङ्गारु-मधुररसासङ्गा-रचित-मरभृङ्गारव-विभवतुङ्गारहित - मिथुन - शृङ्गारसाः समुन्मिषद्-वासन्तिकामिषेण सोमन्तिनीरतेरुदन्तं दुरन्तं विचिन्त्य रहसि नृपं तमिव हसन्तो वसन्तोदयवासरा मन्दं मन्दमरण्याङ्ग-धरण्यां कमपि विकासमासादयामासुः ।

किं शुकस्य वदने रुचिरत्वं
किं शुकस्य हृदयेऽपि वशित्वम् ।
किं शुकस्य कुसुमेषु नदन्ती
शंसति स्म मधुपालिरितीव ॥
कुरबकं रवकेलिभृतः सुधा
समधुरं मधुरं मधु षट्पदाः ।
पपुरवापुरवार्यमपि स्मयं
नृपवने पवनेरितपादपे ॥

भगवतो लीलायाः समीक्षा

—श्रीचन्द्रशेखर शर्मा हिरेमठ—

तत्र तावत् भगवान् बादरायणः लोकवत्तु लीलाकैवल्यम् इति सूत्रेण जगतः चेतनकर्तृत्वं प्रतिपादयति। तदनुसारमहमपि किञ्चिन्निवेदयामि। तत्र प्रधानाद्यचेतनकारणिकाः सांख्यादयः एतदनङ्गीकुर्वन्तः एवम् आक्षिपन्ति—**न प्रयोजनवत्त्वात्** (ब्रह्मसूत्र २.१.३३)। न खलु चेतनः ईश्वरः इदं जगद्बिम्बं विरचयितुमर्हति। कुतः इति चेत्, प्रयोजनवत्त्वात् प्रवृत्तीनाम्। "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति वचनात्। सर्वा हि प्रवृत्तयः प्रयोजनपूर्विका एव दृष्टा लोके। चेतनः ईश्वरः जगन्निर्माणे प्रवर्तेत चेत्, तर्हि तस्यापि किञ्चित् स्वकीयं प्रयोजनमवश्यमभ्युपेयम्। अन्यथा तस्य प्रवृत्तिर्न स्यात्। तथा हि लोकप्रसिद्ध्यनुवादिका श्रुतिरपि—**न वा अरे पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय पतिः प्रियो भवति; न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति, आत्मनस्तु कामाय सर्वं प्रियं भवति इति**। यदि ईश्वरः स्वात्मप्रयोजनाय प्रवर्तते इति कल्पेत, तदा आप्तकामस्य का स्पृहा इत्यादौ तस्य नित्यतृप्तत्व - प्रतिपादक - श्रुतिविरोधः स्यात्। चेतनोऽपि उन्मत्तः पुरुषः बुद्ध्यपराधात् प्रयोजनं विना यथा प्रवर्तते, तथा ईश्वरस्यापि प्रवृत्तिः स्यादिति चेत्, तदा **यः सर्वज्ञः सर्ववित्, यस्य ज्ञानमयं तपः** इत्यादिश्रुत्या प्रतिपादितस्य सर्वज्ञत्वस्य बाधप्रसङ्गः। एवं विश्वरचनायाम् ईश्वरस्य प्रयोजनस्वीकारे नित्यतृप्तत्वहानिः, अस्वीकारे च असर्वज्ञत्वापत्तिरिति उभयतः पाशारज्जुः। तस्मात् त्याज्योऽयं चेतनकर्तृत्वभिनिवेश" इति।

अस्यैव पूर्वपक्षिणामाक्षेपस्य प्रतिक्षेपाय भगवता बादरायणेन **लोकवत्तु लीलाकैवल्यम्** (ब्रह्मसू० २-१-३३) इत्युपदिष्टम्। अत्र 'तु'शब्देन आक्षेपं परिहरति। अस्य सूत्रस्य अयमभिप्रायः—लीलाभिन्नाः याः प्रवृत्तयः, तदर्थमेव प्रयोजनविशेषप्रतिसन्धानस्य आवश्यकता। याश्च पुनर्लीलारूपाः, ताः प्रयोजनं नापेक्षन्त एव। यथा लोके आप्तकामस्य कस्यचित् राज्ञः तदमात्यादेर्वा क्रीडादिषु प्रवृत्तिः प्रयोजनमनुद्दिश्यैव भवति, तद्वद् ईश्वरस्यापि।

ननु महतीयं विश्वरचना कथं लीला इत्युच्येत चेत्? सत्यम्; अल्पज्ञानां अल्पशक्तियुक्तानाम् अस्माकं कृते विश्वरचना महतीव प्रतिभाति। अथापि सर्वज्ञस्य सर्वशक्तिसमन्वितस्य ईश्वरस्य कृते तु लीलैव केवलम्।

ननु एवं सति 'का नाम लीला - प्रवृत्तिरि'ति जिज्ञासायाम्, इदमेव वक्तुं शक्यते, या यद् प्रवृत्तिः अल्पायाससाध्या विधेयनिष्पत्तिमात्रफलिका, लीलाकर्तुः उद्देश्यस्य असाधिका च, सैव लीला। विश्वरचनायाः अल्पायाससाध्यत्वे उक्तं वाचस्पतिमिश्रैः भामत्याः मङ्गलाचरणे—

निःश्वसितमस्य वेदा वीक्षितमेतस्य पञ्च भूतानि।
स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रलयः॥

यद्यपि लौकिकलीलासु किञ्चिदपि प्रयोजनमुत्प्रेक्षितुं शक्यते, अथापि न ईश्वरलीलायाम्। "आप्तकामस्य का स्पृहा" इति तस्य नित्यतृप्तत्वप्रतिपादनात्।

न चैवं सति अप्रवृत्तिः; **यतो वा इमानि भूतानि जायन्ते** इत्यादिश्रुत्या विश्वरचनायाम् ईश्वरप्रवृत्तिश्रवणात्। नाप्युन्मत्तप्रवृत्तिः; **यः सर्वज्ञः** इत्यादिना सर्वज्ञत्वप्रतिपादनात्। अत एव विश्वरचना लीलामात्रमित्येव प्रस्फुटम्। तस्मात् सिद्धः चेतन एव ईश्वरः जगतः कर्ता इति वेदान्त राद्धान्तः। ●

अपूर्वं सद्भावना-प्रेरकं प्रदर्शनम्

विधायकानां संस्तुतिः——मुख्यमन्त्रिणः समुद्घोषणम्

(विशेष प्रतिनिधि-सङ्कलितम्)

प्रादेशिक-संस्कृत - विद्यालयाध्यापक-समितेश्चतुर्थं-महाधिवेशने संस्कृताध्यापकानामभ्यर्थनानां कार्यान्वयनाय शासनमभिमुखीकर्तुं 'तदर्थं - समितिरे'का सङ्घट्टिता। समितेरस्याः विशेषोपवेशनं फरवरी-मासस्य १५ दिनाङ्के लखनऊ नगरे शारदा - संस्कृत-महाविद्यालये समभवत्। तत्र सर्वसम्मत्या निर्णीतं यत् मार्चमासस्य १२ दिनाङ्के तत्रैव नगरे विधान-भवनस्य पुरतः सद्भावना-प्रेरक-प्रदर्शनमेकमभिनवं समायोज्य शासक-मनःपरिवर्तनाय भगवदधिष्ठानं प्रात्यक्षिकं सम्पादनीयमिति। तदनुसारमेतत् प्रदर्शनं नियते दिनाङ्के समायोजितं सत् परं साफल्यं गतम्।

प्रदर्शनस्यास्य समारोपे समायोजितायाः सभायाः सभापतिपदेन सम्बोधयद्भिः वाराणसेय संस्कृत-विश्वविद्यालयस्य उपकुलपतिचरैः उत्तरप्रदेश - विधान-परिषत्सदस्यैः श्री सुरतिनारायणमणि त्रिपाठि महाभागैः २५ विंशतिसङ्ख्यकानां स्वीय-सहयोगिनां विधायकानां स्वरेषु संवादितां विदधद्भिरुक्तम्—

"संस्कृतविद्यालयाध्यापकानां समानवेतनस्य महार्घताभृतेः, भविष्यनिधेः, विश्रामवेतनस्य पृथक् संस्कृत-निदेशालयस्थापनस्य च प्रस्तावाः नूनं न्याय्याः मानवत्वस्पर्शिनश्च। किमपि शासनं सहृदया जनप्रतिनिधयश्च ताः कथमप्यपलपितुं न प्रभवेरन्। वयमपि निखिलेन बलेन प्रस्तावानेतान् अविलम्बं स्वीकर्तुं शासनं साग्रहं निवेदयामः। किन्तु संस्कृताध्यापका अपि स्वात्मनः दीन-हीनान् मत्वा स्वीयाः न्याय्या अभ्यर्थनाः प्रस्तोतुं कदापि प्रमादमालस्यं वा न विधीयेरन्। सत्यप्येवं साम्प्रतिकैर्बीभत्सैः प्रदर्शनैरपि साग्रहं सदैव विरतैर्भाव्यम्' इति।

सभाया अस्याः संयोजनं प्रदेशस्य भूतपूर्व-शिक्षोपमन्त्रिमहोदयैः श्री रामनारायण पाण्डयैः कृतम्। सभायामस्यां सत्तारूढकांग्रेस - सङ्घटनकांग्रेस-जनसङ्घ - भारतीयक्रान्तिदल - समाजवादीदलादिनैक-राजनैतिकदलीयैः पञ्चविंशति - विधायकैः शिक्षक-निर्वाचनक्षेत्रीयैः सर्वैर्निर्वाचित - विधायकैः स्व-स्व-भाषणेषु एते एव भावाः प्रकटीकृताः। एकेन विधायकेन १८६ विधायकानां हस्ताक्षराणि कृत्वा प्रश्नस्यास्य विधानसभाध्यक्षाणां समक्षं प्रस्तुतीकरणस्य दायित्वमपि स्वीकृतं निर्व्यूढञ्च। प्रदेशस्य माध्यमिक-शिक्षक-सङ्घस्य शिक्षका-ऽध्यापकसमन्वयसमितेः राज्य-कर्मचारि - संयुक्तपरिषदश्च नेतृभिरपि समुपस्थाय संस्कृताध्यापकानां प्रस्तावानां हार्दिकमनुमोदनं विहितम्, सर्वविधसहयोगस्य समाश्वासनञ्च प्रदत्तम्।

सद्भावना प्रेरक-प्रदर्शनम्

चिरचर्चितानां स्वीयाभ्यर्थनानां विषये राज्य-शासनस्य जनप्रतिनिधीनां चेतांसि समाक्रष्टुं तत्र च सुस्थितां देववाणीसंस्कृत-विषयिणीं सद्भावनाञ्च प्रोद्बोधयितुं प्रादेशिक-संस्कृतविद्यालयाध्यापक-समितेः अध्यक्षैः आचार्य रामाश्रय त्रिपाठिभिः, महामन्त्रिभिश्च श्री गोविन्द नरहरि वैजापुरकर शास्त्रिभिः कृतामभ्यर्थनामनुलक्ष्य प्रदेशस्य ५४ जनपदस्थानां

संस्कृतविद्यालयानां प्राध्यापकप्रतिनिधिभिः सङ्घीभूय विगते मार्चमासीये १२ दिनाङ्के विधानसभाभवनस्य साम्मुखीने विधायकावास-क्षेत्रे मौन नगर-यात्रापूर्वकं प्रस्थानं कृतम्। यात्रायामस्यां राजपुरुषोच्चधिकारिणः एस० एस० पी० प्रभृतयोऽपि व्यवस्थारक्षायै सन्नद्धा आसन्। विधायकावास-क्षेत्रे निर्मिते दूष्ये सभाभवने समुपविश्य प्रमुख - संस्कृतविदुषां नेतृत्वे ४०० प्रतिनिधिभिः पराम्बाया भगवत्या श्रीदुर्गायाः चण्डीसप्तशतीपाठः, आशुतोषस्य भगवतः शङ्करस्य रुद्राष्टाध्यायी-पाठश्च सामूहिकरूपेण समनुष्ठितः।

प्रादेशिकः सामूहिकोऽवकाशः

अस्यायोजनस्य पूर्वं मार्चमासस्य प्रथमदिनाङ्के पूर्वीयोत्तरप्रदेशभागे, एकादश - दिनाङ्के च पश्चिमीयोत्तरप्रदेशभागे निखिल-संस्कृत-पाठशालासु पाठयद्भिरध्यापकैः सामूहिकमवकाशं विधाय सद्भावनाप्रेरक-प्रदर्शनस्यास्य व्यापकं समर्थनं कृतम्।

अध्यक्ष-मन्त्रिणोः संयुक्तं वक्तव्यम्

समितेः अध्यक्ष-मन्त्रिभ्यां प्रदर्शनस्य फलश्रुतिरूपे संयुक्तवक्तव्ये उक्तं यत् 'अस्माकं शिष्टतां संयमशीलतां च न जातु कोऽपि आस्माकीनीमक्षमतामवगच्छेत्। स्वप्नेऽपि वयं स्वशासनस्य कीदृशमपि अहितं न चिन्तयामः, नापि च तद्विषमे सङ्कटे पातनस्य कल्पनां वा कुर्मः। मातुः पुरतो बालकस्य समाक्रोशनमिव शासनमभ्यर्थयामः। वाञ्छामश्च तदप्यस्मभ्यं स्ववंशस्य अक्षुण्णतायै स्वार्भकपोषणाय प्रवृत्तिमत्या मातुरिव स्नेहदानेनाऽनुगृह्णात्विति। प्रदर्शनमिदमस्यैव हार्दिकभावस्य प्रतीकमात्रम्। किन्तु यदि शासनमस्यभ्यं तत्स्नेह-न्यायदाने राजहठं समाचरति चेद्विनम्रं स्पष्टं सूचयामो यद् बालहठोऽपि राजहठतो न जातु न्यूनो भवति। तथापि अस्माकं सर्वाः प्रवृत्तीः पूर्णाहिंसकाद् आत्मसमर्पणादर्शाद् रेखामात्रमपि क्षुण्णा न भवेयुः। सर्वेषां भूतानां चेतस्सु बुद्धिरूपेणावस्थितां भगवतीं प्रार्थयामो यत्सा शासकेभ्योऽस्माकं न्याय्याभ्यर्थनास्वीकाराय सद्बुद्ध्या योजयेदिति।

प्रसङ्गेऽस्मिन् वयं शासनं सप्रश्रयं सावधानमपि कर्तुं वाञ्छामो यत् 'कोठारी-आयोग'-प्रतिवेदनानुसारं महाविद्यालयेभ्यः संस्तुतस्य वेतनक्रमस्य अवशिष्टोंऽशः (शिक्षासंहितायाः ७३ विभागानुसारं तैरेव कालेजापरपर्याय महाविद्यालयैः समकक्षेभ्यः) वाराणसेय-संस्कृत-विश्वविद्यालयसम्बद्धेभ्यः आचार्यशास्त्रि-पाठ्य-पाठक-महाविद्यालयेभ्योऽपि १९५८ मितेशवीयवत्सरतः शीघ्रं प्रदेयः। अन्यथा न्यायाधिकरणं शरणीकृत्य संस्कृतविद्यालयाध्यापकास्ततस्तं समासादयितुं विवशा भवेयुरि'ति।

लाभत्रयी-योजनातः संस्कृताध्यापका अपि लाभान्विताः स्युः

मार्चमासस्य २२ दिनाङ्के संस्कृत-पाठशालाध्यापकानां प्रस्तावानां प्रदर्शनस्य क्रमिकानशनस्य च विषये उत्तरप्रदेश - विधानसभायां मुख्यमन्त्रिभिः श्री कमलापति त्रिपाठिभिः सदनं संसूचितं यत् संस्कृत-पाठशालाध्यापकानाम् अन्यशैक्षिकसंस्थागत - कर्मचारि - समान - वेतनक्रम - निर्धारणादि - विषयिणीः सर्वोच्चा अभ्यर्थनाः वेतनायोगस्य समक्षं प्रस्तोतिताः, तत्प्रतिवेदनञ्चापि अस्माभिरासादितम्। समितेः पदाधिकारिणश्च यथासमयं प्रवृत्त्याऽनया संसूचिताश्च।

श्री त्रिपाठिभिरुक्तम्—लाभत्रयी - योजना केवलं तेषामेव अध्यापकानां कृते भवति, येषां वेतनाक्रमो निर्धारितो भवति। अद्यावधि योजनयाऽनया संस्कृताध्यापका लाभान्विता न सञ्जाताः। किन्तु वेतनायोग-प्रतिवेदनानुसारं शासननिर्णयानन्तरं प्रदेशस्य सर्वानध्यापकान् लाभत्रयी - योजनापरिधौ समानेतुं विचार्येत। संस्कृतविद्यालयाध्यापकानां सेवानियमावली अपि वेतनायोग-संस्तुति - कार्यान्वयानन्तमेरव निर्मिता स्यादि'ति।

●

अहमदाबाद (मणिनगर) स्थित-विशिष्टाद्वैत-स्वामिनारायणधर्मपीठ-प्रमुखाधीश्वराणाम्

श्री मुक्तजीवन स्वामि महोदयानां

स्वागतपद्य-पुष्पाञ्जलिः

[मार्चमासस्य २४ दिनाङ्के काशीयात्रा-प्रसङ्गे गुर्जरच्छात्रसहायकसमितिविशालसभामण्डपे समायोजितायां विद्वत्सभायां वाराणसेयैः संस्कृतविद्वद्भिः नागरिकैश्च समर्पितमिमं पुष्पाञ्जलिं प्रकाशयन्तो वयमपि महात्मनामेषां स्वागतं व्याहरामः ।—**सम्पादकः**]

समुन्मीलन्मालः सुरविटपिपुष्पैर्मृगमद - स्फुरद्भालः शिञ्जन्मणिवलयजालः स्मितमुखः ।
विरामः कामानां सततमभिरामः सुमनसां घनश्यामः पायान्मुनिहृदयधाम-स्थिरपदः ॥ १ ॥

मायाम्भोनिधिदुस्तरङ्गपरुषाघातैर्विशीर्णान्तरां त्रातुं धर्मधनाश्रितां वसुमतीं भक्तानुकम्पोद्धुरः ।
पूर्णात्मा पुरुषोत्तमः समुदयं लेभे नवम्यां मधौ शुभ्रे शुभ्रयशो-विशोधितधरः श्रीस्वामिनारायणः ॥ २ ॥

दिव्यैर्यच्चरित-क्रमैरभिनवैर्धर्माध्व-संस्थापनैर्लोकानुग्रह-कर्मभिर्मतिमतां चेतश्चमत्कारिभिः ।
अद्याऽपि प्रथयन्ति सत्कविवचोभङ्गीविपञ्चीरवैर्माहात्म्यं हरितः प्रसादविशदस्वान्ता जगत्पावनम् ॥ ३ ॥

तत्सिद्धान्तमयं महः क्रमवशाद्दीपानुदीपप्रभा - रश्मिश्रेणिमनोरमं भवभयध्वान्तौघविध्वंसनम् ।
आचार्येश्वरलोकवन्द्यचरणे प्राप्तं बिमुक्तिप्रदे श्रीमन्मुक्तमनोज्ञजीवनबुधे जागर्ति लब्धास्पदम् ॥ ४ ॥

सत्सम्प्रदायपरिवर्धनपारिजातः श्रीमुक्तजीवनसुधीः सुरभीकरोति ।
वाचा सुधारसमुचा नमतां जनानां स्वान्ताभिधानि सदनानि शुभाशयानि ॥ ५ ॥

श्रीमद्भारतभूमि-भालतिलकीभूतः प्रभूतोल्लसत्कारुण्यः शुभधर्मशोधितमतोनुद्धर्तुंकामो जनान् ।
बभ्राम स्वयमेष दूरपदवीगम्येषु देशेष्वपि द्वीपेषु स्थिरतां निनाय च हरिप्रेमप्रथावल्लरीम् ॥ ६ ॥

प्रत्यक्षं समुपेत्य यं शिशुमपि श्रीस्वामिनारायणः सिद्धान्ताध्वविधौ त्रिधौतमनसां चक्रे सदाग्रेसरम् ।
आचार्योत्तमपीठपूतचरितारम्भाय सम्भावितप्रज्ञालोकदिवाकरं, स महतां मान्यो मुनिर्वर्धते ॥ ७ ॥

वैदुष्येण महत्तरेण तपसा सर्वातिशायिश्रिया लोकानुग्रहलीलया प्रतिपदप्रस्यन्दिमृद्वीकया ।
नानामन्दिर–चारुपाठनकलाशाला–चिकित्सालयैराचार्यस्य यशःसुधाकरसुधाकाराय वीरायते ॥ ८ ॥

वाराणसी शिवपुरी विपुलप्रमोदमग्ना भवन्तमिह कल्पितसन्निधानम् ।
विद्वत्समाजपरिकल्पितवाक्प्रसूनस्तोमैः सभाजयति भाजनमीशवाचाम् ॥ ९ ॥

वरिवस्यन्ति भवन्तं विश्वेषां कुशलदायिनं विबुधाः ।
इह 'विश्वधर्मचूडामणि'रिति बिरुदप्रदानेन ॥ १० ॥

पञ्जीकृत-संख्या—एल० १९८

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५ सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
[illegible] वाराणसी।

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४९

* * *

अङ्कः ४

* * *

सम्पादकः
गो० न० वैजापुरकरः

* * *

अप्रैल
१९७२

* * *

वार्षिक-मूल्यम्
५) रूप्यकाणि

* * *

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

* * *

मधुमासः

दिशि-गुञ्जति मधुकर-माला,
विलसति वसुधा सरसरसाला ।
मदयति मुनिमपि कोकिलगानम्,
हरति न कस्य मनो मधुपानम् ।
वहति लता-द्रुम-चुम्बित-वातः,
अरुणशिखा-ध्वनि-मञ्जुल-प्रातः ।
प्रसरति पथि-पथि पृथुलपरागः,
प्रथयति रतिमति प्रणय-तडागः ।
नवलतिकासु कुसुम-शर-हासः,
विहरति भुवि सम्प्रति मधुमासः ।
प्रणयि-कवीन्द्र-कवित्व-विकासः,
शारद - सारद - चरण - विलासः ।

--डा० रामनाथ पाठकः 'प्रणयी'

अनुक्रमः

●

प्रपाठकः	पत्रपुटम्	परिवेषकः
मति प्रबोधनम्	७३	श्री श्रीधरस्वामी
श्रीमहर्षि-ज्ञानानन्दचरितम् महाकाव्यम्	७४	श्री स्व० विन्ध्येश्वराप्रसाद शास्त्रिणः
ब्रह्मलीनाः श्री श्रीधर स्वामिपादाः	७५	सम्पादकीयम्
गृह्यसूत्र-कालिको शिक्षा	७७	डॉ० नन्दकिशोर पाण्डेयः
यतिराजाः श्रीविद्यारण्य स्वामिनः	८१	श्री स्वामी ब्रह्मानन्दः
कल्याणोत्कर्षं-सप्तयम्	८६	श्री मुकुटबिहारी लाल
किमद्यापि जगति संस्कृतं जीवति ?	८८	डॉ० श्री रासबिहारी द्विवेदी
ध्वनि-वैभवम्	९०	श्री रविन्द्रकुमार सिद्धान्तशास्त्री
प्राचीन-भारतीयाः क्रीडाः	९३	डॉ० नरेश झा शास्त्री

●

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्त्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४९ वर्ष] वाराणसी, चैत्रः, २०३० वै० : अप्रैल १९७३ ई० [४ अङ्कः

मति-प्रबोधनम्

अये तव न संशयोऽस्तु न च निर्घृणोऽयं शिवः
मतेऽतिदयया युतो न च परीक्षते त्वां क्वचित्।
वरं समनुलेभिरे कपटचाटुका राक्षसाः
अलं शठय मा चिरं भज शिवं स न त्वां त्यजेत्॥ १॥
कथं न किल दृश्यते गरलकालकूटं गले
जहाति न च शङ्करः कमपि यः प्रपन्नोऽस्ति तम्।
समीक्ष्य फणिभूषणं किमिति हन्त संशेरसे
मते त्वमपि धार्यसे व्रजसि चेदिमं शङ्करम्॥ २॥
गृहेण च धनेन वा तव किमस्ति दारासुतैः
मते गृहधनादिकं त्यजसि किं न देहात्यये।
शरीरमपि यत्स्वकं तदपि नैव भिन्नैस्तु किं
मृषैव खलु लुभ्यसि श्रय शिवं स्वरूपं शिवम्॥ ३॥
मते बत न दृश्यते मृडपुरस्थ-नन्दीश्वरः
शिवात् प्रथममर्च्यते किल तदाज्ञयाऽऽराधनम्।
यदि त्वमिह यास्यये शरणमस्य निःसंशया
तथैव खलु हे मते! प्रथमपूजनं ते भवेत्॥ ४॥
सं एक इति माऽस्तु ते बत विलोक्य कीर्तेर्मुखं
न चित्रमिदप्यहो किल नरा असङ्ख्या इमे।
शिवस्य भजनान्मते गुरव एव भूत्वाऽनिशं
शिवात्प्रथममर्चिताः किमिह विस्मृतं तेऽधुना॥ ५॥

—समर्थानुगृहीत महात्मा ब्रह्मलीनः श्री श्रीधरस्वामी

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— स्वर्गीयाः श्रीविन्ध्येश्वरीप्रसाद शास्त्रिणः —

(एकोनविंशे सर्ग)

४१. कामा निरन्तरमहो परिभोगतस्ते तृप्ति न यान्ति कुटिला बत कामयन्ते ।
सौख्यं नवं नवमनारतमेव यत्नान् दुष्टा इवेह पशवः कवलं तृणानाम् ॥
४२. ऊर्ध्वस्थितेषु भुवनेषु च सौख्यसत्ता त्रिष्वस्ति तेन दनुजाः कलहायमानाः ।
जित्वा शतक्रतुमथान्यवरांश्च देवान् निःसारयन्ति बहुधा सुरलोकतस्तान् ॥
४३. आधिपत्यं च नैजेन्द्रियाणां गणे कुर्वते ये मताः साधवः सत्तमाः ।
ते महर्लोकमासाद्य मोदान्विता वासमातन्वते तत्र निर्भीतयः ॥
४४. कर्तुमीशा मनोनिग्रहं ये नरा योगिनां ते वरेण्याः सदभ्यर्हिताः ।
ते जनाख्यं प्रपद्याशु लोकं परं वीतरागैः समं संवसन्ति ध्रुवम् ॥
४५. बुद्धतत्त्वेऽधिकारं च ये बिभ्रते वन्दनीयेषु ते वन्दनीया मताः ।
दर्शनेनैव येषां च पापक्षयस्ते तपोलोकमासादयन्तेऽमलम् ॥
४६. यैस्तु सालोक्य-सामीप्य-सारूप्यतः ख्यातिमाप्ता विमुक्तिः समासादिता ।
स्वेष्टदेवेषु येषां रतिः सात्त्विकी सत्यलोकं गतैर्ब्रह्मणा युज्यते ॥
४७. मृत्युलोकातिरिक्तास्तु लोकाश्च ये स्थूलनेत्रै-र्नरै-र्दर्शनीया नहि ।
सूक्ष्मरूपा अतो ज्ञान-विज्ञानभृद् दर्शनैर्द्रष्टुमर्हा विपश्चिद्वरैः ॥
४८. ऊर्ध्वं चाधो लोकसंस्थानमेतज्ज्ञानाज्ञानात् तद्बुधैर्बोधनीयम् ।
सत्त्वासत्त्वाद् वापि गीतं पुराणैः शीर्षादूर्ध्वं नैव तत्कल्पनीयम् ॥
४९. राजानुशासनमिदं नहि नाकतोऽस्मादूर्ध्वस्थितेषु महरादिचतुष्टयेषु ।
लोकेषु विद्यत इति प्रथितोऽत्र हेतुर्व्यर्थयिते सततशिष्टजनेषु शिष्टिः ॥
५०. शिरः-कण्ठ-हृन्नाभि-गुह्यादिदेशाः शरीरे करौ पादयुग्मं यथा हि ।
तथा सन्ति ते ब्रह्मणश्चाण्डकेऽपि सुधीभिर्मनोयोगतो बोध्यमेतत् ॥

(क्रमशः)

ब्रह्मलीनाः श्री श्रीधर स्वामिपादाः—श्रद्धा-सुमाञ्जलिः

अप्रैलमासस्य १९दिनाङ्के प्रातः कर्णाटकप्रदेशस्य कारवार-शिमोगा मण्डलान्तर्गते सागर-तालुकान्तःपातिनि वरदपुर-नामके पावने क्षेत्रे सविशेषनिर्मिते ऐकान्तिकैकान्तस्थले प्रायो दशभिः वत्सरैस्तपस्यन्तोऽस्माकमाराध्यचरणाः सद्गुरुवर्याः समर्थानुगृहीत-महात्मानः श्री श्रीधरस्वामिपादाः पद्मासनमाबद्ध्य नासाग्रदृष्टमः अखण्डं सच्चिदानन्दमवाङ्मनसगोचरं देवं ध्यायन्तः परे ब्रह्मणि लीनाः। अगतेर्दुर्गतस्य वा वियोगः शोचनीयो भवतु नाम। एतादृशानां योगभ्रष्टमानवनां मरणमपि मङ्गलाय जायते इति तद्विषये वियोगो निवापाञ्जल्यो वानू नमस्थाने एव। तथापि लौकिक-मायामोह-मतङ्गजोऽस्मादृशां तद्विधेयानां मानसं सर्वतो निर्मथ्य आविलीकृत्य च तत्र किल तात्त्विकं विवेकं पदमपि प्रस्थापयितुं नानुमनुते। अस्यामेव विवशताविप्लुतायां स्थितौ यानि कानिचन भावकुसुमानि लेखनीरुन्मेषयिष्यति, तानि किल बालस्य भक्तिपरिप्लुतपायनमिति मत्वा प्रेम्णा तमञ्जलिं स्वीकुर्वन्तु आचार्यपादाः, क्षामयन्तु चैनं तथास्थितं कृपालवः पाठकाः !

सद्गुरुवर्या श्रीधरस्वामिपादाः यावज्जीवं साम्प्रतिकयुगदुर्लभमलौकिकं तपस्तप्त्वा सर्वेषां सात्त्विनकाशाकेन्द्रतां गताः तपसा किन्न सिद्ध्यति इति शास्त्रवचनमेतदवितथं विदध्युः। भगवतो योगाचार्यशिरोमणेः अनसूयानन्दनस्य कृपाप्रसादात् १९०४मितेशवीयवत्सरस्य तदीयजन्मदिने तस्मिन्नेव च मुहूर्ते ऋक्वेदीय-शाकलशाखाध्यायि-महाराष्ट्रदेशस्थब्राह्मणान्ववाये 'बक्षी' इत्युपनामके हैदराबादनगरे जनिं गृह्णन् तदीयं शरीरं षोडशे एव हायने यौवनोन्मेषसङ्कुले श्रीरामपद-चञ्चरीकस्य आचार्यवर्यस्य समर्थरामदासस्वामिनः समाधिस्थले सज्जनगडे पावने क्षेत्रे दीक्षितं सत् भूयांसं कालं एकान्तवासतपसि शिष्टञ्च लोकानुग्रह-यात्रासु विनियुक्तपस्येव लीनतामाप। ते किल तपसस्तपोऽतिरिक्तं फलं स्वीकृत्य तस्मिन् साधने साध्यतोऽपकर्षतापादनं कथमपि असहमाना विगत-'दासनवमी-दिने' स्वीये प्रवचनेऽनुगृहीतानामिदं पथप्रदर्शनं चक्रु :—

> “ममास्यास्तपःसाधताया अत्याग्रहं निरीक्ष्य देवा मां पृच्छन्ति—'वत्स ! भारतीयेषु सात्त्विकास्मितां प्रबोधयितुमित्थं क्लिश्यतश्चापि ते कालस्यानुकूल्यं न लभ्यते चेत् किमर्थमात्मानं परितापयसि ?' मया किल निस्सङ्कोचमुत्तरितम्—'प्रभो ! तत्किमप्यास्तां तावत्, विप्रदेहोऽयं मूलत अस्मै एव कर्मणे राष्ट्रे सत्तां बिभर्ति। अतस्तस्य या काऽपि गतिर्भूयात्, अहं पुनरेवमेव स्वकर्तव्यमाचरन् देहं निर्वापयिष्ये। मूलतो मे रूपं कालजयी मृत्युञ्जयात्मकम्। तस्मै कदाऽपि कीदृश्यपि पीडाऽसम्भविनी। कर्मणः कर्तव्यस्य वा न तदितरत् फलम्, कर्तव्यनाम कर्तव्यकरणमेव प्रशस्ततमं परिगण्यते” इति।

सद्गुरूणामेतद्वचो नूनं गीतोक्तस्य निष्कामकर्मयोगस्य प्रायोगिकं रूपं यद्धि तैः स्वजीवने साकारतां नीतम्। सदैव व्यवहारविधौ स्त्री-पुंजाति-सम्प्रदाय-निरपेक्षं निरुपाधिकं प्रेम सक्रियसेवाञ्च सदैव मुक्तहस्तं वितरतोऽस्य महात्मन एतद्वचो नूनं तेषां नेत्रयोरञ्जनायितं ये किलापनन्ति यत् 'आध्यात्मिकता देव-दैववादश्च राष्ट्रस्य अवनतिहेतवः' इति। सत्यमेव श्रुतिमाता ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इत्यादिना फलेच्छाविरहितं षडङ्गवेदाध्ययनं सन्ध्यादिकर्तव्यजातञ्च ब्राह्मणस्य कृते विहितम्। तेन

सह स्वीयकर्मनिष्ठया स्पर्धितुं को नाम तपस्वी साम्प्रतं पुरस्तिष्ठेदिति यक्षप्रश्न एव वक्तव्यो भवेत् ।

एतादृशेभ्य एव कर्तव्याय कर्तव्यमनुतिष्ठतो ब्राह्मणान् समुद्दिश्यैव शास्त्राण्याहुः—

गोभिर्विप्रैश्च वेदैश्च सतीभिः सत्यवादिभिः ।
अलुब्धै-र्दानशूरैश्च सप्तभिर्धार्यते मही ॥

सत्येवं वक्तुं शक्यते यत् सद्गुरूणां श्रीधर स्वामी सदृशानां विप्राणां ब्राह्मणश्रमणानां च तपश्चरणमेव स्वातन्त्र्यलाभेन सहैव अद्यावधि विविध-बाह्यान्तर-विपद्भ्योऽपि राष्ट्रमेतत् अविचलस्य प्रतिष्ठितं कर्तुं प्राभवदिति भारतराष्ट्राय तेषामप्रतिमं सम्प्रदानमेतत् !

ब्रह्मलीना गुरुपादाः समर्थं रामदास स्वामिनामनुगृहीतास्तेषां पदे एव पदं निधाय व्यवहरन्तः 'अभिनव कल्याणस्वामिनः' एवेति तेषां क्षणमपि सम्पर्कसौभगो जनो वक्तुंशक्नुयात् । कल्याणस्वामिन इव जगत्-कल्याणमेव तेषां समग्र जीवनस्य परममुद्दिष्टमासीत् । जनसम्पर्ककाले तेषामन्ते समागच्छातां केषामपि विविधार्तीनां निवारणस्य समुदारो यत्नः किल स्वामिचरणभ्योऽन्यत्र महात्मसु कदाचिदेव दृश्यते । कोऽपि भावुकः कृपाकाङ्क्षी तैर्न कदापि विमुखीकृतः । 'वत्स' ('बाळ') इति मधुरा रससिक्ता वाक् आश्वासनस्य विशालमञ्चलञ्च तेषामनन्यसाधारणं वैशिष्ट्यम् ।

स्वामिपादानां जीवनोदिष्टं विश्वधर्मस्य प्रतिष्ठापनमेवासीत् । एकत्र ते कथयन्ति—“निजकिरणविकासितं जगत् गमयति निजसौख्यमद्वयं यत् । सुखशरधि भवांशुभानयं जगति विजयतेऽत्र विश्वधर्मः ।” अनेनैव धर्मेण जगतः समुद्धारो भवितेति तेषां दृढा निष्ठाऽऽसीत् । तदर्थञ्चते जगतः सन्मार्ग-प्रवृत्ति तस्मिश्च जगच्चालक-विषये कार्तज्ञभावनाञ्चा सर्वथाऽनिवार्यां मन्वते स्म । इदमेवाऽऽसीत्तेषां स्वीयजीवनस्य चरममुद्दिष्टम् । तस्य च मौलिकं साधनं स्वामिपादानां मतेन भगवदधिष्ठानमेवाऽऽस्ते । तेषां परमगुरुभिः समर्थं रामदासस्वामिभिरप्येतत् स्वोक्त्या प्रमाणितमस्ति—“सामर्थ्य आहे चळवळीचे । जो जो करील तयाचे । परंतु तेथे भगवंताचे । अधिष्ठान पाहिजे ।” अत एव पूज्यपादैः स्वीयजीवनस्य प्रभूततरो भागो भगवदधिष्ठानस्यैव समर्जने यापितः । तस्मिन्नेव च प्रयत्ने स्वीयोऽवतारोऽपि समुपसंहृतः ।

बाह्यदृष्टया प्रत्यक्षफलाभावेऽपि तेषां सुदीर्घतर प्रयासोऽयं कदापि नैष्फल्यं न गच्छेत् । कोऽपि प्रयत्नः कदापि सर्वथा निष्फलो न जायते—साधु असाधु वा किमपि फलं तस्य भवत्येव । स्वामिपादानामस्याः कठोरतपः साधनायाः भगवदधिष्ठानलाभानुकूल-सुदीर्घप्रयत्नानां बीजानि तेषां समाधिना सहैव कर्णाटकप्रदेशीय-वरदपुर-पार्वतप्रदेशस्य तपोभूमौ यथा यथा अन्तः प्रविशेयुस्तथा तथैव उपरि नव्यतर-कल्पतरोरङ्कुराणि स्फुटितानि भवेयुः, स्वल्पैरेवाहोभिस्तेषां महान् देवतरुर्भूत्वा जगतस्त्रिविधतापनिवारणाय सच्छायी महामहीरुहो भवेदिति नैकेषां भक्तानां सुदृढा भावना । तत्प्रदेशीयैः सन्तवरैः 'सत्य साईं बाबा' महाभागैः पुनः स्ववचसाऽप्येतत्समर्थितम् ।

किन्तु अत्रान्तरे तेषामनुगृहीतानां शिष्याणां कृते तेषां स्वोपज्ञं गद्य-पद्यात्मकं संस्कृतभाषानिबद्धं भक्तिवेदान्त-स्तोत्रादि काव्यवाङ्मयम्, मराठी-कर्नाटकाङ्ग्लादिभाषानिबद्धाः बहवो मार्गदर्शनपराः सद्ग्रन्था एव प्रथप्रदर्शकाः सन्ति । सर्वतोऽधिकं तेषामादर्शं चरित्रमेन नूनं प्रेरणाप्रदं स्यात् । आशास्महे च तेषां सर्वेऽनुगृहीता अमुमेव आलम्बनं समाश्रित्यसदाचारद्वारा समयपरिरक्षणं करिष्यन्ति । भारतराष्ट्रस्य कृते एतादृशानां महात्मनां पुनः पुनरवतारः सर्वथा क्षेमायैव जायते । अतो वयमद्य सनातनधर्मानुयायिनः सर्वे ईश्वरविश्वासिनस्तेषां महात्मनां चरणयोः सादरममुमेव सदाशा सौगन्ध्य सम्भृतं श्रद्धा-शब्दसुमाञ्जलि समर्पयामः ।

गृह्यसूत्र-कालिकी शिक्षा

—— डॉ० नन्दकिशोर पाण्डेयः, वेदाचार्यः ——

[व्याख्याता——श्यामा-महाविद्यालयस्य, वाराणसी]

शिक्षाया उद्देश्यम्

निष्कारणं षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति श्रौत उपदेशो गृह्यसूत्रकालिके समाजे पूर्णतश्चरितार्थं आसीत्। त्रैवर्णिकानां कृते वेदानामध्ययनमावश्यकमासीत्। अत एव सर्वे त्रैवर्णिकाः वेदानामध्ययनं निष्कारणं स्वकीयं कर्तव्यञ्चेति मत्वा कुर्वन्ति स्म। त्रिपुरुषं यावत् यस्य गृहे वेदानामध्ययनं विच्छिन्नं भवति स्म, स दुर्ब्राह्मणः कथ्यते स्म (पारस्कर-गृह्यसूत्रम् २.५.४४)।

तदा शिक्षायाः प्रथमोद्देश्यं मानवताया निर्माणमासीत्। सभ्यः सुशिक्षितो जनः 'शिष्ट'शब्देन कथ्यते स्म। शिष्टत्वं समाजे उत्कृष्टगुणः प्रथित आसीत्। शिष्टत्वमिदं शिक्षया चरित्रेण चासाद्यते स्म। शिक्षाया मूलं वेदाध्ययनमेवासीत्। शिष्टपुरुषाणां वचनं समाजे विशेषतः श्रुतिस्मृति-वचनवत् परिपाल्यते स्म (वैखा० गृ० सू० ९.१४; पा० गृ० सू० १८.११–१३)। सन्मानवताया निर्माणे शिक्षाया चरित्रस्य च विशेषयोगदानमासीत्। शिक्षालये मानवतासंरक्षणोचितस्य चरित्रस्य चोपदेशः सर्वेषां कृतेऽनिवार्यं आसीत्, येन शिक्षालयात् प्रत्यावर्तकः स्नातकः मानवतानिर्माणादिराष्ट्रसंवर्धनकार्येषु महत्त्वपूर्णं योगदानं करोति स्म। गृह्यसूत्रकालिकशिक्षाया मुख्यं फलद्वयं बौद्धिकविकासो नैतिकोन्नतिश्चेति। अनयोश्च समुद्दिष्टं संस्कृतेर्वाङ्मयस्य च रक्षणम्।

शिक्षालयः (विद्यालयः)

शिक्षालयो यत्र अध्ययनाध्यापनं भवति स्म, स आचार्यकुलं, गुरुकुलं वेति कथ्यते स्म। तद्धि आचार्यस्य गुरोर्वा गृहमेव। छात्राः विद्याध्ययनान्तं यावत् तत्रैव द्वादशवर्षाणि, चतुर्विंशतिवर्षाणि, षट्त्रिंशद्-वर्षाणि, चतुश्चत्वारिंशद्वर्षाणि यावद्वा निवसन्तः वेदं वेदौ वेदान् वा पठित्वा यम-नियम-व्रतादिकञ्च सम्यक् परिपाल्य तदनन्तरं परावर्तन्ते स्म (पा० गृ० सू० २.७)।

केचन एतादृशा अपि आसन् ये आजीवनं यमनियमौ वेदाध्ययनञ्च सम्यक् परिपालयन्तः गुरोः गृहे एव निवसन्ति स्म, नाम्ना च 'नैष्ठिक-ब्रह्मचारिणः' इति उच्यन्ते स्म (आप० गृ० सू० ८.३)।

शिक्षालय-प्रवेशनियमः

शिक्षालय-प्रवेशनियमः पा० गृह्य सूत्रे (२.५.३६–३८) 'उपनयन'शब्देन उच्यते। तदर्थश्च तत्र आचार्यसमीपे बालकस्य कृते बालकपित्रादिना स्वयं वा स्वस्य कृते बालकेन वेद-विद्याध्ययन-पूर्णस्वास्थ्य-मूलहेतुभूत-वीर्यसंरक्षणादि-लाभकरकार्यरूप - ब्रह्मचर्य-व्रतचरणाय आचार्याश्रयप्राप्त्यर्थम् आचार्यप्रार्थनम्, आचार्यद्वारा च तत्स्वीकृतिश्चेति आसीत्। अस्य विस्तृतं रूपं गृह्यसूत्रेषु सुस्पष्टम्।

शिक्षालय-प्रवेशकालः

उपनयनस्यैव कालः शिक्षालयप्रवेशकाल आसीत्। स च प्रवेशो वारत्रयं जायते स्म वसन्ते ग्रीष्मे शरदि च। (पा० गृ० सू० २.५.३९-४०)। यत्र तत्र वर्षाकालेऽपि प्रवेशो भवति स्म (२.३.६)। प्रवेशे अवस्थाया प्रतिबन्ध आसीत्। वसन्ततौ अल्पवयस्कानां प्रवेशः, ये च प्रायो ब्राह्मणबटव एव। यतो ब्राह्मणबालकानां गर्भाष्टमे

वर्षे अध्ययनार्थं गुरोः समीपे प्रेषणनियम आसीत् । ग्रीष्मे प्रायः क्षत्रियबालकानां प्रवेशो जायते स्म, येषामवस्था गर्भादिकादशवार्षिकी । शरदृतौ वैश्यबालकानां प्रवेशनियम आसीत् । वर्षर्तौ रथकार-बालकस्य प्रवेशनियम आसीत् (२.५.३६–३८)। विशेषस्थितौ प्रवेशकालनियमे अवस्थायां च शैथिल्यमपि जायते स्म । विशेषपरिस्थितौ स्व-स्वप्रवेशकालस्य द्विगुणितकालं यावत् प्रवेशार्थमधिकार आसीत् । तदनन्तरं सर्वथा प्रवेशो निषिद्ध आसीत् । तत ऊर्ध्वं त्रैवर्णिकबालकाः पतितसावित्रीका उच्यन्ते स्म । तेभ्योऽध्ययनं समाजतः सौविध्यञ्च नोपलभ्यते स्म (२.५ ३९-४०) । अत एवानुमीयते यत् तदा प्रवेशे अवस्थाया विशेषप्रतिबन्ध आसीत् ।

अध्ययनारम्भः (सत्रारम्भः)

शिक्षालये (गुरुकुले) प्रवेशदिनमारभ्य संवत्सरे पूर्णमासषट्के - चतुर्विंशत्यहे, द्वादशाहे षडहे त्र्यहे वा ब्रह्मचारिणं सावित्रीमाचार्य अध्यापयति स्म (२.३.६) । एते कालविकल्पा आचार्यशुश्रूषादि-शिष्यगुणतारतम्यमपेक्ष्य आसन् । अत्रान्तरे एव बालकस्य शिष्टताऽशिष्टतायाश्च परिज्ञानं जायते स्म । तदनन्तरं तेषां कृते अध्यापनमपि भवति स्म । ब्राह्मणब्रह्मचारीणां प्रवेशानन्तरमेव अध्यापनं प्रारभ्यते स्म । अनुमीयते यदत्रान्तरे तेषां कृते नित्यकर्मविधेः सन्ध्योपासन-व्रत-यम-नियम-गुरुकुलनियमानाञ्च उपदेशः क्रियते स्म ।

अध्यापनविधिः

अध्ययनकाले अध्यापनप्रकोष्ठे पूर्वाभिमुखो आचार्यः प्रत्यङ्मुखश्च शिष्यः, एकेषामाचार्याणां मते च उत्तराभिमुखः शिष्य उपविशति स्म (२.३.६) । शिष्य ऊर्ध्वंमुखो भूत्वा गुरुं समीक्षते स्म । प्रारम्भिकाध्यापने गुरुर्मन्त्रस्य प्रतिपादं पृथक् पृथक् कृत्वा पाठयति स्म । प्रथमं तावत् पादः, ततोऽर्धर्चशः, ततस्तृतीयवारं सह बटुना सर्वाम् ऋचाम् अनुवर्तयन् पाठयति स्म (२.३.५) । ब्राह्मणबालकानामध्यापनारम्भः गायत्रीसावित्रमन्त्रेण, क्षत्रियस्य त्रैष्टुभछन्दस्कसावित्रीमन्त्रेण, जगतीछन्दस्कसावित्रीमन्त्रेण च वैश्यबालकानां भवति स्म । तदनन्तरं वेदं वेदौ वेदान् तदनन्तरं षडङ्गान् इतिहासपुराणानि च अध्यापयति स्म आचार्यः (२.३.५) ।

छात्रः

गृह्यसूत्रेषु 'छात्र'शब्दार्थे ब्रह्मचारि,[1] अन्तेवासि,[2] स्नातक[3] - शब्दाः सर्वत्र समुपलभ्यन्ते । गुरुकुलमागत्य गुरुद्वारा ब्रह्मचर्यव्रतस्य स्वीकृतितोऽध्ययनान्तं यावत् छात्रस्य नाम ब्रह्मचारीति आसीत् । गृहीतब्रह्मचर्यव्रती एव ब्रह्मचारीशब्देन आख्यायते स्म । ब्रह्मचारी प्रायः अध्ययनारम्भाद् अध्ययनसमाप्ति यावद् गुरुकुले एव निवसति स्म (२.५) । ब्राह्मण-क्षत्रिय-वैश्यब्रह्मचारिणः गुरुकुलप्रवेशानन्तरं द्वादश-चतुर्विंशति-षट्त्रिंशत्-चतुश्चत्वारिंशद्वा समाः गुरुकुले निवसन्ति स्म (२.५.१५) । गुरोः परिवारे पारिवारिकसदस्यवत् व्यवहारेण छात्रस्य अपरं नाम 'अन्तेवासी' अपि आसीत् । स च गुरोः कृते अग्नि-रक्षणं तस्य च कुत्रचन सायंप्रातरग्निहोत्रकर्म अपि गुरोः कृते करोति स्म । यत्र तत्र अन्तेवासिद्वारा निर्मितं भोजनमपि गुरुणा अद्यते स्म ।

गृह्यसूत्रे चतुर्विधाः ब्रह्मचारिणो उक्ताः[4]— गायत्रो ब्राह्मः प्राजापत्यो नैष्ठिकश्चेति । तत्र

---

[1] कौषी० गृ० सू० १५.१३ ।

[2] वा० गृ० सू०, पृ० २२; पा० गृ० सू०, पृ० २५; आश्व० गृ० सू०, पृ० २३, १०७ ।

[3] पार० गृ० सू० २.५ ३६; लौ० गृ० सू०, पृ० २०२ ।

[4] वै० गृ० सू० ८.३.११२ ।

'गायत्रो' नाम—उपनयनादूर्ध्वं त्रिरात्रमक्षारलवणाशी गायत्रीमधीत्य आसावित्रव्रतसमाप्तेरत्र ब्रह्मचारी आसीत् । सावित्रव्रतादूर्ध्वमनभिशस्तापतितानां गृहस्थानां भैक्षाचरणं, वेदव्रतचरणञ्च कृत्वा द्वादशसमाः विंशतिसमाः वा गुरुकुले स्थित्वा वेदान् वेदौ वेदं वा सूत्रसहितमध्ययनं कृत्वा गार्हस्थ्यं यः स्वीकरोति स्म, स 'ब्राह्म'-नामको ब्रह्मचारी आसीत् ।[1]

यः स्नात्वा नित्यकर्म-ब्रह्मचर्यशीलो नारायणपरायणो वेद-वेदाङ्गार्थान्विचार्य दारसंग्रहणं करोति स्म, स 'प्राजापत्य'नामको ब्रह्मचारी कथ्यते स्म ।[2]

यो हि काषायं वस्त्रमजिनं वल्कलं वा परिधाय जटी, शिखी वा मेखली, दण्डी, सूत्राजिनधारी ब्रह्मचारी शुचिरक्षारलवणाशी यावदात्मनो विप्रयोगस्तावद् गुरुकुले स्थित्वा निवेदितभैक्ष्यभोजी भवति स्म, स 'नैष्ठिक'-ब्रह्मचारी' इत्युच्यते स्म ।[3]

कक्षाः

गृह्यसूत्रकाले साम्प्रतिकविद्यालयीयकक्षानिर्धारणमिव कक्षा नैव निर्धार्यन्ते स्म । अत एव एतादृशाः केचन शब्दाः नोपलभ्यन्ते गृह्यसूत्रेषु । तथापि अध्ययनाध्यापनयोः काचिच्छृङ्खला आसीदेव । सा च सप्तसु विभागेषु विभक्ता । तैरेव विभागैः, अध्येतॄणां योग्यता-निर्धारणमपि जायते स्म । तत्र प्रथमो विभागः—त्रैवर्णिकानां बालकानां गुरुकुले आगमनं, गुरुणा उपनयनविधिद्वारा तेषां बालकानां व्रतग्रहणस्वीकृतिदानम्, तदनन्तरं सावित्र्यध्यापनं वेदानां किञ्चिदध्ययनञ्च । एतस्य कृते समयोऽपि षडहं, त्र्यहं, द्वादशाहमिति वा निर्धारित आसीत् । एतत्कालपर्यन्तमध्ययनं सर्वेषां त्रैवर्णिकानां कृते आवश्यकमासीत् । तावदध्ययनं कृत्वैव ब्राह्मणः, क्षत्रियो वैश्यश्चेति वर्णाख्या आसीत् ।

द्वितीय-विभागे—सावित्र्यध्ययनानन्तरं वेदस्यैकां शाखां यावदध्ययनमासीत् । तस्मिन् सम्पन्ने सति ब्रह्मचारिण आख्या 'श्रोत्रिय' इति भवति स्म ।

तृतीय-विभागः—वेदवेदाङ्गाध्ययनं यावदासीत् । एतत्कालपर्यन्तमधीतस्य ब्रह्मचारिणः कृते 'अनूचान'-नाम व्यवह्रीयते स्म ।

चतुर्थ-विभागे—सावित्र्याध्ययनमारभ्य कल्पान्तं यावद् वेदस्याध्ययनमासीत् । अस्मिन् सम्पन्ने छात्रस्य कृते 'ऋषिकल्पः' इत्याख्या आसीत् ।

पञ्चम-विभागे—पूर्ववत् सावित्र्यादिसूत्रप्रवचनाध्यायी ब्रह्मचारी आयाति स्म । एतत्कालपर्यन्तमधीतानां ब्रह्मचारिणां कृते 'भ्रूण' इति उपाधिः प्रदीयते स्म ।

षष्ठ-विभागे—चतुर्णां वेदानामध्ययनं तेषामङ्गानाञ्चाध्ययनं विधीयते स्म । तत्कालपर्यन्तमधीतब्रह्मचारिणो उपाधिः 'ऋषिः' इति भवति स्म ।

सप्तमे विभागे—वेदवेदाङ्गानामध्ययनं यमनियमव्रतोपवासादीनां परिपालनञ्च कृत्वा नारायणपरायणो निर्द्वन्द्वो भूत्वा यथा स्यात्तथा विचरणमासीत् । तेषां ब्रह्मचारिणां 'मुनिरि'ति उपाधिर्भवति स्म ।[1] अयमेवोपाधिः सर्वोच्चो मन्यते स्म ।

अनुमीयते यदस्यैव सप्तविभागस्य अनुकृतिरूपेण तात्कालिकः प्रथमो विभागः साम्प्रतिक्याः प्रवेशिकाकक्षायाः, द्वितीयविभाग प्रथमकक्षायाः, तृतीयविभाग मध्यमकक्षायाः, चतुर्थविभागः शास्त्रिकक्षायाः, पञ्चमविभागः आचार्यकक्षायाः षष्ठविभागो विद्यावारिधि-कक्षायाः, सप्तमविभागश्च वाचस्पत्युपाधिकक्षायाः स्वरूपम् ।

स्नातकः

मन्त्र-ब्राह्मणात्मकं वेदं वेदौ वेदान्वा पाठतोऽर्थतश्चान्तं नीत्वा गुरुणाऽभ्यनुज्ञातो गुरुकुले अध्ययन-

---

१. वै०गृ०सू० ८.३.११३ । २. तत्रैव ८.३.११२ ।
३. तत्रैव ८.३.११२ ।

१. वैखानस-गृह्यसूत्रम् १.१ पृ० २ ।

समाप्तिनिमित्तं विशिष्टस्नानं कृत्वा गुरुकुलात् परावृत्तो ब्रह्मचारी त्रिविधो भवति स्म—एको विद्यास्नातकः, अपरो व्रतस्नातकः, अन्यो विद्याव्रतस्नातकश्च इति ।

पाठतोऽर्थतश्च वेदं वेदस्य मन्त्र-ब्राह्मणात्मिकां शाखामधीत्य द्वादशवार्षिकं ब्रह्मचर्यव्रतं समाप्यैव यः स्नाति स्म, स 'विद्यास्नातकः' कथ्यते स्म ।

द्वादशवार्षिकं ब्रह्मचर्यव्रतं समाप्य सम्पूर्णवेदमनधीत्यैव यः समावर्तते स्म, स 'व्रतस्नातकः' उच्यते स्म ।

उभयं वेदं ब्रह्मचर्यव्रतञ्च समाप्य यः स्नाति स्म, स 'विद्याव्रतस्नातकः' इत्युच्यते स्म । यथाह भगवान् पारस्करः—**त्रयः स्नातकाः भवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातकश्चेति । समाप्य वेदमसमाप्य व्रतं यः समावर्तते स विद्यास्नातकः। समाप्य व्रतमसमाप्य वेदं यः समावर्तते स व्रतस्नातकः । उभयं समाप्य यः समावर्तते स विद्याव्रतस्नातक इति** । (२.५.३३-३६)।

समावर्तनम् (दीक्षान्तमहोत्सवः)

गुरुकुलात् प्रत्यावर्तनकाले वेदं वेदौ वेदान् वा समधीतेन पूर्वोक्तस्नातकेण क्रियमाणं कर्म 'समावर्तन'-(साम्प्रतिको दीक्षान्तमहोत्सवो विश्वविद्यालयानां तत्स्थानीयः) शब्देनाख्यायते स्म । गृहस्थाश्रमे प्रवेशार्थं तत्र गुरूणां विशेषाज्ञायाः आवश्यकता भवति स्म । ब्रह्मचर्याश्रमानन्तरं गृहस्थाश्रमे कुशलगृहस्थस्य कृते आवश्यकानां विशिष्टगुणानामुपदेशोऽपि अस्मिन्नेव काले गुरुणा दीयते स्म । अयं छात्रः विद्याध्ययने निपुणः गृहस्थाश्रमप्रवेशार्थं योग्य इति उद्घोषणावसरः 'समावर्तन'शब्देन कथ्यते स्म ।

तत्र ब्रह्मचारी शुभे दिने आचार्यसमीपं गत्वा "अहं स्नास्ये" इति कथयति स्म । ततो गुरुणापि 'स्नाहि' इति अभ्यनुज्ञायते स्म । तदनन्तरं तत्रैव गुरुकुले मण्डपो निर्मीयते स्म । तत्र मण्डपे अग्निस्थापनम्, आचार्यासनादुत्तरभागे दक्षिणोत्तरायतानामष्टानां जलपूर्णानामुदकुम्भानां स्थापनम्, ततः पूर्वप्रागग्रं कुशास्तरणं कृत्वा आचार्यः ब्रह्मचारी च अग्नौ पञ्चभूःसंस्कारपूर्वकमधीतवेदानुसारं वेदाहुतिर्हुत्वा स्विष्टकृदाहुतीश्च हुत्वा हुतशेषाज्यस्य प्राशनं कुरुते स्म ।

ततश्च ब्रह्मचारी स्थापित-जलपूर्णघटानां समीपं गत्वा आस्तृतेषु कुशेषु उपरि उदङ्मुखः स्थित्वा विविधमन्त्रैः आत्मानमभिषिञ्च्य, मेखलां शिरोमार्गेण निस्सार्य तां च भूमौ निधाय अन्यद्वासः परिधाय आचम्य आदित्यमुपतिष्ठते स्म । ततः तिलान् दधि वा दक्षिणहस्तगतेन सोमतीर्थेन प्राश्य जटा-लोम-नखानि वापयित्वा स्नात्वा आचम्य औदुम्बरकाष्ठेन दन्तधावनं कृत्वाचम्य सुगन्धितद्रव्यमिश्रितेन यवादिचूर्णेन शरीरमुद्वर्त्य पुनः सशिरस्कं स्नात्वाऽऽचम्य चन्दनाद्यनुलेपनं पाणिभ्यां गृहीत्वा मुखं नासिकां च 'प्राणापानौ मे तर्पय, चक्षुर्मे तर्पय, 'श्रोत्रं मे तर्पय' इत्येतैर्मन्त्रैरनुलिप्य पाणि प्रक्षाल्य तदुदकमञ्जलिना आदायापसव्यं कृत्वा दक्षिणमुखो भूत्वा **पितरः शुन्धध्वम्** इतिमन्त्रेण भूमौ पितृतीर्थेन निषिञ्च्य यज्ञोपवीतीभूत्वा उदकमुपस्पृश्य चन्दनादिना आत्मानमुपलिप्य अहतं पीतं वासः परिधाय अपरं यज्ञोपवीतं परिधाय उत्तरीयं वास आच्छाद्य पुष्पमालामुष्णीषं, कुण्डले, अञ्जनं, छत्रं, वैणवदण्डञ्च गृहीत्वा आचार्यं प्रदक्षिणीकृत्य स्नातकः उपविशति स्म । आचार्यश्च स्नातकेभ्यो गार्हस्थजीवनपरिपालनोपयोगिनो नानाविधान् नियमान् उपदिशति स्म । स्नातकाश्च श्रुत्वा तेनैव प्रकारेण आचरन्ति स्म । (२.७.१-१०)।

छात्राणामुपलक्षणम्

(साम्प्रतिक - विद्यालयानां स्वीय-स्वीयछात्राणां परिधानम्) छात्राणां वर्णक्रमेण परिधानम् (वेशभूषा) आसीत् येन तेषां सुगमतया परिज्ञानं जायते स्म यदिमे छात्राः ब्राह्मणवर्णाः, इमे क्षत्रियाः, इमे वैश्याश्चेति ।

(शेषांशः ९६ पृष्ठे)

ससमीक्षं जीवनवृत्तम्

यतिराजाः श्रीविद्यारण्य स्वामिनः

—— श्री स्वामी ब्रह्मानन्दः ——

[शोधच्छात्रः—वाराणसेय-संस्कृत-विश्वविद्यालयस्य]

अद्वैतवेदान्तदर्शनस्य सुप्रसिद्ध - विवरणप्रस्थानस्य सुप्रतिष्ठाविधायकानां तत्र भवतां श्रीमद्विद्यारण्यस्वामिनां जन्म श्री शङ्करनाथ राय मतानुसारम्[1] आन्ध्रप्रदेशस्य वेल्लारि-मण्डले 'हम्पी'-नगरस्य समीपस्थे लघुतरे ग्रामे १२७८ ईशवीय-वत्सरे समभवत् । विजयनगर-महाराजाधिराजानां नैकैः शिलालेखैः शासनपत्रैश्च आचार्यवर्याणामेतेषां विषये बह्वप्यपेक्षितं वृत्तजातमुपलभ्यते इति महत्प्रमोदपदमैतिहासिकानाम् । श्री वासुदेवोपाध्यायो विजयनगर-साम्राज्येतिहासे (२३ पृष्ठे) लिखति यद् हरिहर-बुक्क - प्रभृतयश्चन्द्रवंशीया यादवाः सङ्गमवंशे समुत्पन्नाः शिलालेखैर्ज्ञायन्ते इति । अयं वंशो 'होयसाल'-वंशस्य शाखा आसीदित्यैतिहासिकप्रमाणैरवगम्यते ।

हरिहरः कम्पणो बुक्को मारप्पो मुद्दपश्चेति पञ्च पुत्राः सङ्गमस्याऽऽसन् ।

'फिरिस्ते'त्याख्यानुसारं[2] वीरबल्लालेन यवनानामाक्रमणमवरोद्धुं सङ्ग्रामस्य समस्तभारः पुत्रेषु समर्पितः । हरिहरो वीरबल्लालस्य जीवनकाले प्रान्तशासकः सन् शासनप्रबन्धमकरोत् । पश्चाद् होयसाल-वंशस्य चरमनृपतेः विरूपाक्षात् स्वयं शासनं गृहीत्वा १३३६ ईशवीये संवत्सरे विजयनगरे हिन्दू-साम्राज्यं स्थापितवान् । शासनस्यास्य प्रतिष्ठितो राजगुरूणां महान् दाय आसीत् । विजयनगरसाम्राज्य-स्थापकानामेतेषां महाराजाधिराज - श्री हरिहराणां मन्त्रिमूर्धन्यः कुलगुरुर्माधवाचार्यो विपश्चिदपश्चिमश्चासीत् । अयमेव पर्यन्ते कर्णाटकस्य (मैसूरस्य) पश्चिमे कैलासस्थाने प्रतिष्ठितस्य 'शृङ्गेरी'ति शङ्कराचार्यं-मठपीठस्याधीश्वरः श्री विद्यारण्यस्वामिनाम्ना ख्यातिं गतः ।

विजयनगर-साम्राज्यम्

विजयनगर-साम्राज्यस्यास्य तुङ्गभद्रा-नद्यास्तटे प्रतिष्ठा समभवत् ।[1] स्थानमिदमतीव रमणीयं प्रकृतेश्च कृपापात्रमिति नैकैः इतिवृत्तनिबन्धकैः मुहुर्मुहुः प्रशंसितञ्च । अद्यापि अस्य भग्नावशेषाः समुपलभ्यन्ते । अस्य विजयनगरस्य निर्माणकालः १३३६ ईशवीय-वत्सरः (१२५८ शके) निर्णीयते इतिहासकारैः । अन्यच्च प्रमाणं यथा—

नागेष्वर्कैमित इह शके शालिवाहस्य याते,
धार्यब्दे शुभसमुचिते मासि वैशाखनाम्नि ।
शुक्ले पक्षे सगुणपितृभे सूर्यवारे सुलग्ने,
सप्तम्यां श्रीविजयनगरी निर्ममे निर्ममेन्द्रः ॥

यदि नाम हरिहरमहाराजेन महतः शुभचिन्तकस्य बुधवरस्य राजनीतिज्ञस्य विद्यारण्यस्य पथ-प्रदर्शनं नासादितं स्यात्तदा आदर्शराज्यस्यास्य स्थापनं स्वप्नप्रायतां गतं स्यात् । सुस्पष्टमेतत् यत् हरिहर-महाराजस्य गुरोर्माधवाचार्यस्य प्रेरण-निर्देशयोरेव विमलं सुफलं दृढतरस्य विजयनगर - साम्राज्यस्य प्रतिष्ठापनम् ।

श्री माधवाचार्यः

पुर्तगालेतिहास-लेखको नुनिजो लिखति[2]—कोलर-नेल्लोरस्य शिलालेखैर्ज्ञायते यदेको मृगयाकुशलः सारमेयस्तुङ्गभद्रायास्तटे मृदुलोमकं दृष्ट्वा भीतोऽभूत् । मृदुलोमकश्च गर्जनं कृत्वा श्वानमदशत् । अयं

---

[1] भारतेर-साधकेतिहासः, ६ भागः, ३ पृ० ।

[2] विजयनगरसाम्राज्येतिहासः, पृ० २४–२७ ।

[1] भारतीयदर्शन का इतिहासः बलदेव उपाध्याय, पृ० १३४ ।

[2] भारतीय दर्शन का इतिहास, पृ० १४९ ।

सारमेयः स एव येन हरिहरस्य सिंहवधे साहाय्यं कृतम् । विस्मयावहामेनां घटनामालक्ष्य माधवाचार्यस्तत्रैव राजधानीनिर्माणाय राजानं प्रैरयत् । हरिहरो विद्यारण्यनाम्ना तन्नगरस्य 'विद्यानगरी' नामाकरोत्, तदेव च कालान्तरे 'विजयनगर'नाम्ना प्रसिद्धमगमत् । किन्तु 'हेरेसा'दयः वृत्तमिदमैतिहासिकं न मन्यन्ते । यतो हि तदानीं श्री विद्यारण्यो माधवाचार्य आसीत् । तेषां मतेन परवर्तिभिरिदं वृत्तं कल्पितम् । एतेषां मतेन विजयनगरस्य स्थापनायां विद्यारण्यस्य किञ्चिदपि साहाय्यं नासीत् । किन्तु एस० कान्तैया महोदयेन मतमिदं खण्डयित्वा शिलालेखाधारेण वृत्तमिदं सत्यापितम् । गुरुवंशकाव्येन तु स्पष्टमेव विद्यारण्यस्य सम्बन्धो विजयनगरसाम्राज्येन स्वीकृतः । नगरीनिर्माणानन्तरं तेनैव तस्मै सार्वभौमत्वोपाधिः प्रदत्ता । तथैवोक्तं माधवीयधातुवृत्तौ—

वेदानां भाष्यकर्ता विवृतमुनिवचा धातुवृत्तेर्विधाता
प्रोद्यद्विद्यानगर्यां हरिहरनृपतेः सार्वभौमत्वदायी ।

श्री के० ए० एन० शास्त्रिमतानुसारमपि[१] यत्र हरिहर-बुक्कप्रभृतिभिर्युद्धं कृतं तत्रैव विद्यानगरस्य स्थापनमभूत् । १३४६ ईशवीये दक्षिणदेशतो[२] यवनानां बहिष्करणाय शृङ्गेरीमठे एक उत्सवः सञ्जातः ।

अस्ति च प्रसिद्धिः श्री माधवाचार्येण[३] सप्तदिनानि यावत् निर्जलं भुवनेश्वरीदेव्या आराधना कृता धर्मराज्यसंस्थापनार्थं धनलाभाय च । अष्टमे दिवसे प्रसन्नाऽपि देवी धनं न ददौ । निराशो भूत्वा विरक्तीभूय शृङ्गेरीमठं गतवान् माधवाचार्यः । शृङ्गेरीमठस्य तात्कालिकशङ्कराचार्यपादेभ्यः श्री विद्यातीर्थपादेभ्यः स संन्यासदीक्षां स्वीचकार । ततः प्रभृति 'विद्यारण्य'नाम्ना प्रसिद्धिं गतः श्रीमाधवाचार्यः ।

सोऽयं माधवाचार्यो बुक्कमहाराजस्य बुक्कणमहाराजस्य वा सोदरः मायणाचार्यस्य श्रीमत्याश्च पुत्रः कृष्णयजुर्वेदस्य तैत्तिरीयशाखीय-बोधायनसूत्रानुसारी भारद्वाजगोत्रीयश्च आसीत् । तस्य द्वौ भ्रातरौ वेदशास्त्रसंपन्नौ बृहस्पति-शुक्रसदृशौ अभूताम् । प्रख्यातो वेदभाष्यग्रन्थकर्ता सायणाचार्यो ज्यायान् भ्राता, श्री भोगनाथश्च कनीयान् । अयं सङ्गमनरपतेः नर्मसचिवः कमनीयकाव्यकलाकुशलः कविश्चासीदिति माधवाचार्यप्रणीत-पराशरस्मृतिव्याख्यातोऽवगम्यते । तथा चोपक्रमणिकाश्लोकौ—

श्रीमती जननी यस्य सुकीर्तिर्मायणः पिता ।
सायणो भोगनाथश्च मनोबुद्धी सहोदरौ ॥
यस्य बौधायनं सूत्रं शाखा यस्य च याजुषी ।
भारद्वाजं कुलं यस्य सर्वज्ञः स हि माधवः ॥

निखिलेषु पारमार्थिकेषु व्यावहारिकेषु च विषयेषु अस्य शेमुषी नितान्तं निर्मलेति विदुषां न तिरोहितम् । अयं खलु चतुर्दशशतके दक्षिणभारते विजयनगरसाम्राज्यप्रतिष्ठातुःश्रीमन्महाराजहरिहरस्य आध्यात्मिकगुरुः नीतितत्त्वव्याख्याता निपुणो मन्त्रिवरोऽप्यभवत् । माधवाचार्यस्योपदेशस्यैव सुफलं यद् विनाशमुपेयुषि वारङ्गलमहीपतिकुले, प्रबलखिलीकृते निखिले यवनभारतीयप्रजावर्गे, महाराजहरिहरेण गोब्राह्मणानां हिताय, आर्यसभ्यतायाः समुदयाय, स्वातन्त्र्यलक्ष्म्या अभ्युदयाय च, विजयनगरेति साम्राज्यं प्रतिष्ठापितम् । पूर्वोत्तरमीमांसयोर्विस्ताराय धर्मशास्त्रस्य च प्रचुरप्रचाराय बहून् ग्रन्थानपि प्रणिनाय श्रीमन्माधवाचार्यः ।

मायणोऽपि सङ्गमनरेशस्य मन्त्री आसीदिति माधवीयधातुवृत्तौ पठ्यते—

अस्ति श्रीसङ्गमक्ष्मापः पृथ्वीतलपुरन्दरः ।
तस्य मन्त्रिशिरोरत्नमस्ति मायणसायणः ॥

सोऽयं माधवाचार्यो रामानुजाचार्यात् जैनहेमचन्द्रा

---

[१] हिस्ट्री आफ साऊथ इण्डिया, पृ० ३२६ ।
[२] हिस्ट्री आफ साऊथ इण्डिया, पृ० ३२२ ।
[३] भारतेर साधक, ६ भाग, ३ पृ० ।

चार्यात् काव्यप्रकाशकृतो मम्मटाच्च प्राचीन इति एतत्कृत-सर्वदर्शनसंग्रहीय-समुल्लेखेनावधार्यते ।

सामसंहिता-प्रथमभागभाष्यप्रारम्भश्लोकेषु[1] माधव आत्मानं श्री नारायणात्मजत्वेन वर्णयति । किन्तु पराशरस्मृति-व्याख्याप्रारम्भे, अन्येष्वपि च ग्रन्थेषु तस्य पितुर्नाम 'मायण' इति वर्णितम् । अतस्तन्नातिश्रद्धेयम् ।

माधवाचार्यो माधवमन्त्री च :

विजयनगराधीशस्य सभायामन्य एव कश्चन प्रतापी योद्धा माधवाचार्याद् भिन्न अमात्यमाधवः प्रकाण्डविद्वानासीत् । श्रूयते यदयमाङ्गिरसगोत्रोत्पन्नः चावुण्डभट्टस्य सूनुः 'काशीविलासक्रियाशक्ति'नाम्नः शैवाचार्यस्य शिष्यो महाराज-प्रथमबुक्कणस्य द्वितीयहरिहरस्य च व्यवहारप्रवीणो मन्त्री वनवासीगोवाप्रदेशयोस्तुरुष्कात् समुद्धर्ता युद्धविद्यावरिष्ठः शासकश्च बभूव । स स्वयमेव शिलालेखेषु केषुचित् स्वविजयप्रशस्तिमुद्घोषयति ।

प्रतिष्ठितांस्तत्र तुरुष्कसङ्घा-
नुत्पाट्य दोष्णा भुवनैकवीरः ।
उन्मूलितानामकरोत् प्रतिष्ठां
श्रीसप्तनाथादिसुधाभुजां यः ॥
गोत्रे योऽङ्गिरसां प्रचण्डतपसश्चावुण्डपृथ्वीसुर-
प्रष्ठादुद्भवमेत्य नीतिसरणौ दत्तां धियं धैषणीम् ।
सूरिः सन्नपि सर्वदानवमनः-प्रह्लाददानोचितां
यद्भूयः कवितां व्यनक्ति तनुते नो कस्य तेनाद्भुतम् ॥

अयं खलु भुवनैकवीरो माधवामात्यो माधवाचार्याद् भिन्न एवेति पण्डितानां प्रायोवादः । उभयोर्नामसाम्येन माधवमन्त्रिणः कार्यकलापो माधवाचार्ये समारोपित इति । किन्तु अयमारोप इतिहासादत्यन्तं विरुद्धः । माधवाचार्य-माधवमन्त्रिणोर्भेदं साधयितुं श्लाघनीयः प्रयासः सर्वप्रथमं कर्णाटकस्य (मैसूरस्य) पुरातत्त्ववेत्ता श्री सूर्यनारायणरावेण श्री नरसिंहचार्येण च कृतः ।

उपनिषन्मार्गप्रवर्तकाचार्येण महामन्त्रीश्वरेण श्रीमता माधवेन स्कन्दपुराणान्तर्गत-सूतसंहितायास्तात्पर्यदीपिकाभिधाना व्याख्यापि व्यरचीति आनन्दाश्रम-संस्कृतग्रन्थावल्यां प्रकाशितस्य तद्ग्रन्थस्य पुष्पिकातः प्रतीयते । अयं खलु माधवमन्त्री विशिष्टाद्वैतानुयायी आसीत् । अस्य गुरुः काशीविलासक्रियाशक्तिः तात्कालिकः प्रथितः शैवाचार्योऽभूत् । माधवमन्त्री शैवसम्प्रदाय - दीक्षामस्मादेव जग्राह । एतेषामाचार्याणामादेशेन भगवन्तं त्र्यम्बकनाथं समुपासितवान् माधवमन्त्री । तेन चायं उपनिषन्मार्गानुयायी विख्यातः शैवतान्त्रिको बभूव ।

वस्तुतस्तु 'एपिग्राफिका कर्नाटिका' (भाग ८, १३६८ ई०) ग्रन्थे प्रकाशितैः कर्नाटिक-शिलालेखैः । सुस्पष्टं यत् केवलं नामसाम्यौ भजन्तौ उभौ भिन्नावेव विद्वद्वरेण्याविति ।

अयमेव माधवो विजयनगर-भूपानां मन्त्र्यपि आसीत् । १३४७ ईसवीयशिलालेखैर्ज्ञायते यन्माधवो हरिहरप्रथमस्यानुजस्य मारप्पस्य मन्त्री बभूव । मारप्पः पश्चिमसमुद्रस्य तटस्थप्रदेशानां शासकोऽभूत् । अस्य राजधानी चन्द्रगुप्तिरासीत् । प्रथममारप्पो माधवं स्वस्य मन्त्रिपदेऽस्थापयत् । तदनन्तरं बुक्कराजः प्रथमोऽपि मन्त्रिपदेऽस्थापयत् । बुक्कराजनिधनानन्तरमपि मन्त्रिपदमध्यतिष्ठदयं हरिहरद्वितीयस्य शासनकालेऽपि । इत्थं माधवो हरिहरप्रथमस्य बुक्कप्रथमस्य हरिहरद्वितीयस्य चैतेषां त्रयाणामेव राज्ञां प्रतिष्ठितममात्यपदमधितिष्ठन् विशेषामुन्नतिमकरोत् । अयं तु न केवलं सुशासकः, अद्वितीययोद्धाऽपि आसीत् । यो 'भुवनैकवीर' इत्यादिसम्मानितशब्दैः शिलालेखेषु गीयते ।

ताम्रपत्रे '१३१३ प्रजापतिनामसंवत्सरे वैशाखकृष्णपक्षे अमायां सूर्यग्रहणे वैदिकमार्गप्रवर्तक-श्रीमन्मा-

---

[1] 'पञ्चाग्निना माधवेन श्रीनारायणसूनुना' इति ।

धवाचार्येण कुच्चर (कुचीर) संज्ञकग्रामस्य स्वनाम्ना माधवपुरमिति नाम[1] निधाय चतुर्विशतिब्राह्मणेभ्य उदकपूर्वकं दत्तमि'ति लेखदर्शनादपि १३ शकाभ्यन्तरेऽस्य जन्म निर्णीयते। ते ग्रामा अद्यापि सम्प्रदानाधोना एव। एतद्देशखण्डस्य नाम (शके १३१३ ए० डी० १३९१) अर्थात् (पुर्तगालदेशोय) वासक्रोडीमामासंज्ञकस्य पुरुषस्य तत्र प्रवेशतः १०७ वर्षान्तरिते पूर्वकाले माधवकृतैतद्देश-विजयस्मरणाय 'माधवपुर' इति स्थापितम्।

'चतुर्विशति-ब्राह्मणमण्डल्या युगपत्परिश्रमं कृत्वा ये ग्रन्था रचितास्ते माधवनाम्ना प्रसिद्धा' इति जेकब-मुद्रापित-दानपत्रेभ्यः प्रतीयते। तेभ्य एव दानपत्रेभ्यो माधवसम्बन्धि वृत्तमिदमन्यदपि प्रतीयते।

माधवाचार्यो विद्यारण्यश्च :

"माधवाचार्यः पूर्वाश्रमे राजकार्य-धुरन्धरोऽनितरसाध्य - नानाप्रबन्धरचनैः वेदशास्त्राणि प्रतिष्ठाप्य संसाराद् विरक्तस्तुर्यमाश्रमं परिगृह्य 'विद्यारण्य'नाम्ना प्रसिद्धः श्रृङ्गेरीमठे श्रीमद्भगवत्पाद-शङ्कराचार्य-पट्टमवाप" इत्यपि तन्मठस्थाचार्यपरम्परालेखाद्विनिश्चेतुं शक्यम्। अतो माधवाचार्यो विद्यारण्यश्च अभिन्नावेवेति प्राचीनानां पण्डितानां सम्प्रदायः।

केचिन्नवीनास्तु विषयेऽस्मिन् सन्देहदोलाधिरूढा एव दृश्यन्ते। किन्तु प्रमाणाभावान्न तेषां वाचोयुक्तिः सहृदयहृदयमाकर्षति।

श्री रामरावेण 'विद्यारण्य-माधवाचार्य'-नामके आङ्गलनिबन्धे[2] विषयेऽस्मिन् विस्तरेण नैके सन्देहाः प्रकटिताः। तदनुसारं माधवाचार्य-विद्यारण्ययोरभेदस्तात्कालिकशिलालेखैरपि न ज्ञायते। पुरातत्त्ववेत्ता श्री आर० नरसिंहाचार्योऽपि मतमिदं समर्थयति।

तदीया युक्तिरियं यन्माधवाचार्यः सायणाचार्यश्च कुत्रापि स्वग्रन्थेषु विद्यारण्यस्य नाम - प्रसङ्गादिकं नालिखत्। विद्यारण्यस्य ग्रन्थेष्वपि तस्य पूर्वाश्रमीयं माधवाचार्य - नाम न लभ्यते। अतो माधवाचार्यो विद्यारण्यश्च कदापि नाभिन्नौ इति।

सायणग्रन्थेषु विद्यारण्यनामानुल्लेखो नूनमाश्चर्यकरः। तथापि संभाव्यते, सायणग्रन्थ-रचनाकाले माधवो न संन्यस्तवान्। माधवग्रन्थेषु पुनः 'विद्यारण्य'-नाम असंभव्येव संन्यासग्रहणानन्तरमेव माधवो 'विद्यारण्यः' समभूत्। पूर्वाश्रमेण कथमपि सम्बन्धो न स्थापनीय इति संन्यासिनां मर्यादा। अतो विद्यारण्य-माधवाचार्यौ अभिन्नादेव।

नरसिंहसूरी 'तिथिदीपिका'नाम्नि ग्रन्थे लिखति यद् विद्यारण्यप्रभृतिभिर्विद्वद्भिरपि कालनिर्णयस्य वर्णनं कृतम्। उभयोर्भेदे कथनस्यास्य असङ्गतिः स्यात्। 'कालनिर्णयः' किल माधवाचार्येणैव रचितः। तथा च नरसिंहसूरी आह—

अनन्ताचार्यवर्येण मन्त्रिणा मञ्चिनल्लुना।
विद्यारण्ययतीन्द्राद्यैर्निर्णीतः कालनिर्णयः॥
अनिश्शेषीकृतस्तैश्च मम दिष्ट्या कियान् कियान्।
तमहं सस्फुटं वक्ष्ये ध्यात्वा गुरुपदाम्बुजम्॥

एवमेव नरसिंहेन (१३६५–१४३५ ई०) 'प्रयोगपारिजाते' 'कालमाधव'नाम्ना प्रसिद्धस्य कालनिर्णयस्य कर्ता विद्यारण्योऽस्ति इत्यप्युक्तम्। यथा—

श्रीमद्विद्यारण्यमुनीन्द्रैः कालनिर्णये प्रतिपादितः प्रकारः प्रदर्श्यते (प्रयोगपारिजातः, पृ० ४११)। अतः स्फुटमेवाभेद एतयोः सिद्ध्यति।

मित्रमिश्रेण वीरमित्रोदये उक्तं यत् 'पराशरस्मृतिव्याख्या' विद्यारण्येन कृता। किन्तु व्याख्येयं माधवाचार्यकृतेति प्रसिद्धम्। अतोऽपि द्वयोरभेदः।

श्रीरङ्गनाथेन व्याससूत्रवृत्ति - विद्यारण्यश्लोकाधारेण विरचिता इति स्वीक्रियते। तद्यथा—

---

[1] आनन्दाश्रममुद्रिता रुद्रभाष्य-भूमिका, ३ पृ०।

[2] Indian Historical Ouarterly (Vol. VI.PP.–701–717, Vol. VII. PP. 78–92)

विद्यारण्यकृतैः श्लोकैर्नृसिंहाश्रमसूक्तिभिः ।
संदृब्धा व्याससूत्राणां वृत्तिर्भाष्यानुसारिणी ॥

किन्तु माधवाचार्येण निर्मितोऽयं ग्रन्थ इति प्रसिद्धिः । अतोऽपि उभयोरभेदः सिद्ध्यति ।

तेलगूभाषावेत्ता माधवाचार्यस्य भागिनेय अहोबलो माधवीयधातुवृत्तिकर्तारं विद्यारण्यममन्यत ।

वेदानां भाष्यकर्ता विवृतमुनिवचा
धातुवृत्तेर्विधाता,
प्रोद्यद्विद्यानगर्यां हरिहरनृपतेः
सार्वभौमत्वदायी ।
वाणीनीलाहिवेणी - सरसिजनिलया
किं करोति प्रसिद्धा,
विद्यारण्योऽग्रगण्योऽभवदखिलगुरुः
शङ्करो वीतशङ्कः ॥

लोके माधवाचार्यविरचिता धातुवृत्तिः प्रसिद्धा । उक्तञ्च–आख्यया माधवीयेयं धातुवृत्तिर्विरच्यते । अतो विद्यारण्य-माधवाचार्ययोरभेदः ।

विद्यारण्येन वेदान्तसिद्धान्त-तत्त्वप्रकाशिका 'पञ्चदशी' विरचितेति प्रसिद्धमेव । सायणेन 'अलङ्कारसुधानिधौ' निबद्धा माधवाचार्यस्य प्रशस्तिरियं नूनं प्रशस्ता तथ्यसम्पन्नेति अस्माकं विश्वासः—

अनन्तभोगसंसक्तो द्विजपुङ्गवसेवितः ।
सचिवः सर्वलोकानां त्राता जयति माधवः ॥

सर्वदर्शनसङ्ग्रहस्य माधवोऽस्मात् माधवाचार्याद् भिन्न एवेति सप्रमाणं निरूपयन्ति आर० नरसिंहाचार्यमहोदयाः ।[1]

चौण्डाचार्य-रचित 'प्रयोगरत्नमाला'-नामकग्रन्थस्य प्रारम्भे ये शब्दा विद्यारण्यविषये प्रयुक्तास्त एव माधवाचार्यकृते । वेदविशदीकर्ता माधवाचार्य एव प्रसिद्धः, किन्तु प्रयोगरत्नमाला विद्यारण्यो वेदविशदीकर्तेत्यवदत् । अतो द्वयोरभेदः । यथा—

पदवाक्यप्रमाणानां पारदृष्ट्वा महामतिः ।
सांख्ययोगरहस्यज्ञो ब्रह्मविद्यापरायणः ॥
वेदार्थविशदीकर्ता वेदवेदाङ्गपारवित् ।
विद्यारण्ययतिर्ज्ञात्वा श्रौतस्मार्तक्रियापरैः ॥[1]

इत्यादिभिः १३८६ ईशवीय वत्सरीय - ताम्रपत्रैरपि द्वयोरभिन्नता प्रतिपाद्यते ।

अवश्यमेव गुरुवंशकाव्यानुसारं विद्यारण्यो माधवाचार्याद् भिन्नः । यथा—

सादरः सविधमस्य तदागान्-
माधवेन सह माधवमन्त्री ॥
तं तदा सविनयं स ययाचे
सन्ततिं सुचरितैः परितोष्य ।
सन्ततं सकलवेद्यगदीत् तौ
सन्ततिर्न युवयोर्भवितेति ॥
तन्निशम्य वचनं बहुचिन्ता-
पन्न - खिन्नमनसा - ऽवगृणीताम् ।
वित्तमस्ति बहुलं तदमुष्मात्
पुत्रिणां गतिमवापय वेति ॥
माधवीयमिति सायणीयमि-
त्यादराद्यतिवरोऽर्थित आभ्याम् ।
वेदशास्त्रगकृतीः सकलास्ताः
साधु संव्यधिततद्गयनाम्ना ॥[2]

किन्तु अयं ग्रन्थो न प्रामाणिकत्वेन स्वीकृतः । इतिहासविरुद्धत्वादिति नात्यन्तं श्रद्धेयः । तथा च एभिर्बहुभिः प्रमाणैः माधवाचार्यो विद्यारण्यस्वामी च एक एवेति अविप्रतिपन्नं सिद्ध्यति । (क्रमशः)

---

[1] इण्डियन ऐण्टिक्वेअरी, १९१६ ई०, २० पृ० ।

[1] सोर्सेज आफ विजयनगर हिस्ट्री, पृ० ५४ ।

[2] गुरुवंशकाव्यम्, सर्गः ४, श्लो० ४१-४४ ।

कल्याणोत्कर्ष-सत्पथम्

—प्राध्यापकः श्री मुकुटबिहारी लाल—

[काशी-हिन्दूविश्वविद्यालये राजनीति-विभागाध्यक्षचरः]

(४)

लोकन्यायः

विवेकनिश्चितं सत्यं समभाव-गुणान्वितम् ।
लोकधारणसामर्थ्यं - लोकरक्षा - बलान्वितम् ॥१६८॥
भूषितं जनकल्याणैः समष्टेर्हितसंयुतम् ।
तटस्थं वैरनिर्मुक्तं लोकन्यायः प्रकीर्तितः ॥१६९॥
व्यवस्था समता शान्तिः स्वातन्त्र्यं सहकारिता ।
कल्याणोत्कर्षसौहार्दं लोकन्यायगुणाः स्मृताः ॥१७०॥
आधिपत्यपराभूतं क्रौर्यंशोषणसंयुतम् ।
विधिमन्यायमूलं च दमनं तस्य शोषणम् ॥१७१॥
कर्तव्यनिष्ठितः क्रान्त्या लोकतन्त्रपथेन च ।
त्यक्त्वा हृदयदौर्बल्यं यत्नतः प्रतिशोधयेत् ॥१७२॥
लोकन्यायविशेषज्ञो विधिस्थितिविशारदः ।
शोधयेद् विधिवैकल्यं दोषपूर्णपरम्पराम् ॥१७३॥
संवर्धयेत् सदादर्शं मानुष्यसमतायुतम् ।
काशयेन्नीतिसिद्धान्तान् प्रगतिक्षेमसम्भृतान् ॥१७४॥

ज्ञानम् :

ज्ञानं न्यायसमायुक्तं समताक्षेमसम्भृतम् ।
चारित्र्योत्कर्षशक्तिभ्यां युतं सज्ज्ञानमुच्यते ॥१७५॥
शब्दशास्त्रं महारण्यं सज्ज्ञानं परमं स्मृतम् ।
कल्याणोत्कर्षसंसिद्ध्यै सज्ज्ञानं साधयेत् सुधीः ॥१७६॥
अन्धविश्वासनिर्मुक्तिः समता सत्यनिष्ठता ।
मानुष्ये दृढविश्वासो ज्ञानोत्कर्षप्रसाधनम् ॥१७७॥
सत्यस्याचरणं श्रेष्ठं मानवानां परं तपः ।
सत्यं वै लोककल्याणं मानुष्यं समदर्शनम् ॥१७८॥
संवर्धिष्णु हि सत्यं स्यात् सर्वलोकहितात्मकम् ।
काशयेन्नव तत्त्वानि कल्याणार्थं न च स्थितौ ॥१७९॥
नयादानप्रदाने च विश्वज्ञानसमन्वयः ।
प्रपुष्यन्ति विचारस्य स्वातन्त्र्यं विश्वसङ्गतिम् ॥१८०॥
प्रगतिं सर्वविश्वस्य जनताहितमङ्गलम् ।
ज्ञानविज्ञानसंवृद्धिं विश्वविद्वत्सु भद्रताम् ॥१८१॥
नानादेशसमुत्पन्नाः पण्डिताः प्रतिभायुताः ।
ज्ञानविज्ञानशोभाभि - र्मण्डयन्ति महीतलम् ॥१८२॥
ज्ञानार्थी निरहङ्कारो मानयेत् सर्वपण्डितान् ।
विवेकेन शुभं ज्ञानं सर्वतश्च समाप्नुयात् ॥१८३॥
राष्ट्रस्य संस्कृतिं ज्ञानमाचारमनुशीलयेत् ।
प्रगतिप्रदतत्त्वानि समारक्षेच्च वर्धयेत् ॥१८४॥
विश्वस्य सञ्चितं ज्ञानं विज्ञानमनुशीलयेत् ।
तयोः प्रगतिदं तत्त्वं वेशयेद्धि स्वसंस्कृतौ ॥१८५॥
नवीनस्थितिसन्दर्भे प्रगतिक्षेमहेतवे ।
ज्ञानस्य नव तत्त्वानि पण्डितः प्रतिपादयेत् ॥१८६॥

शिक्षा :

सर्वाधिकारो विद्यायां सा वै सर्वस्य गौरवम् ।
तस्याः सर्वाय सौविध्यं कल्याणोत्कर्षसाधनम् ॥१८७॥
सर्वसाम्यविधानेन व्यक्तिराष्ट्राभिवृद्धये ।
ज्ञानविज्ञानशिल्पेषु सर्वान् सम्यक् सुशिक्षयेत् ॥१८८॥
प्रौढाय दीनतप्ताभ्यां स्त्रियै च श्रमिकाय च ॥
राज्यं विशेषसौविध्यं शिक्षायाः सम्प्रसाधयेत् ॥१८९॥
लोकतान्त्रिकचारित्र्य - नीतिसिद्धान्तसंस्कृतौ ।
लोकतन्त्रयुतं राज्यं शिक्षयेत् सर्वराष्ट्रिकान् ॥१९०॥
राज्यं कल्याणसङ्कल्पं क्षमताक्षेमवृद्धये ।
सर्ववर्गेषु यत्नेन जनशिक्षां प्रसारयेत् ॥१९१॥
वैज्ञानिकप्रयोगेण तथ्यं ज्ञानं परीक्षयेत् ।
सत्यं विज्ञानसंसिद्धं क्षेमयुक्तं प्रसारयेत् ॥१९२॥
प्रयोगानुभवेनैव तर्कपूर्णानुमानतः ।
सिद्धं ज्ञानं हि विद्वद्भिर्वैज्ञानिकमुदाहृतम् ॥१९३॥

चिन्तनं युक्तिसम्पन्नं प्रयोगानुभवाश्रितम् ।
वस्तुस्थितिषु संसृष्टं सद्भिर्वैज्ञानिकं स्मृतम् ॥१९४॥

शिक्षको दम्भपाखण्डं जडत्वं मोहमुत्सृजेत् ।
युक्तियुक्तविचारेण सज्ज्ञानं प्रतिपादयेत् ॥१९५॥

समः सर्वेषु शिष्येषु शिक्षको ज्ञानसम्भृतः ।
ज्ञानचारित्र्यसद्भावैः सर्वशिष्यान् सुशिक्षयेत् ॥१९६॥

यो विवेकसमायुक्तं ज्ञानं शीलहितान्वितम् ।
अध्यापयति यत्नेन स स्मृतः शिक्षकोत्तमः ॥१९७॥

विद्यार्थी जडतां त्यक्त्वा ज्ञानविज्ञानमाप्नुयात् ।
भावबुद्धिशरीराणां क्षमतामभिवर्धयेत् ॥१९८॥

न्याय-मानुष्य-सन्निष्ठा ज्ञानविज्ञानसञ्चयः ।
स्वातन्त्र्यं भद्रतायुक्तं सहकार्यं नयान्वितम् ॥१९९॥

शीलचारित्र्यसम्पुष्टि - देशबन्धुत्वभावना ।
प्रेरणा लोकसेवायाः सङ्गोष्ठी ज्ञानवृद्धये ॥२००॥

सहपाठिषु सौहार्दं गुरुगौरवरक्षणम् ।
सौजन्यं व्यवहारे वै छात्राणां सद्गुणाः स्मृताः ॥२०१॥

मनोयोगविवेकाभ्यां विद्यार्थी सत्यनिष्ठितः ।
ज्ञानस्य नवतत्त्वानि लोकक्षेमं प्रसारयेत् ॥२०२॥

सम्यग् राष्ट्रहितज्ञाने जनतां परिशिक्षयेत् ।
वैज्ञानिकप्रयोगेण कृष्युद्योगौ प्रवर्धयेत् ॥२०३॥

जीवनं यो विजानाति कल्याणानन्दसाधनम् ।
संवर्धयति कल्याणमानन्दं वितनोति सः ॥२०४॥

जीवनं योऽभिजानाति सर्वलोकहितात्मकम् ।
स सेवा-साम्ययोगाभ्यां वितनोति जगद्धितम् ॥२०५॥

लोकशीलम् :

मृदुता मुदिता मैत्री मानवत्वं मनीषिका ।
सौजन्यं समतास्रोतः सेवा सौहार्दसम्भृता ॥२०६॥

सामाजिकत्वसंवित्तिर्वैदुष्यं विनयान्वितम् ।
गुणग्राहकगाम्भीर्यं लोकशीलं प्रशस्यते ॥२०७॥

लोकप्राणितचारित्र्यं स्वातन्त्र्यं शिष्टतान्वितम् ।
राष्ट्रकर्तव्यनिर्वाहः शौर्यं मानुष्यमण्डितम् ॥२०८॥

प्रतिवैशिकसौभ्रात्रं सौहृद्यं देशबन्धुषु ।
श्रमव्यक्तित्वसम्मानो लोकशीलं प्रशस्यते ॥२०९॥

सत्याधृतसदाचारः सत्कार्ये सहकारिता ।
व्यवहारान्वितं ज्ञानं कल्याणोत्कर्षवर्धनम् ॥२१०॥

कारुण्यं स्वार्थनिर्मुक्तं समता क्षेत्रसंश्रिता ।
लोककल्याणलग्नत्वं लोकशीलं प्रशस्यते ॥२११॥

सद्वृत्तिरुद्यमोत्साहो विवेकान्वितसाहसम् ।
सौम्यत्वं भावसंशुद्धिर्जीवनादर्शरक्षणम् ॥२१२॥

केलिक्रीडाप्रमोदेषु शीलस्य परिपालनम् ।
संयमो भोगतृष्णासु लोकशीलं प्रशस्यते ॥२१३॥

सत्पुरुषः

लोकस्य सङ्ग्रहार्थं यः समो भूत्वा फलं त्यजन् ।
सत्कार्यं कुरुते नित्यं महाकर्ता स उच्यते ॥२१४॥

आशाशील-प्रमायुक्तो धृत्युत्साहक्षमायुतः ।
लोकात्मोत्कर्षसंलग्नो न्यायशीलो दृढव्रतः ॥२१५॥

सत्यः प्राज्ञः प्रगत्यर्थी मानुष्य-समतायुतः ।
सिद्ध्यसिद्ध्योर्निर्विकारो नरः सात्त्विक उच्यते ॥२१६॥

समतासत्यसम्पन्नो विद्यावृत्तव्रतान्वितः ।
शोभितः शौर्यशीलाभ्यां भावभूषणभूषितः ॥२१७॥

निर्भीको निरहङ्कारो निष्कामो न्यायनिष्ठितः ।
मण्डितो मानवत्वेन मानवो मानितो मतः ॥२१८॥

शुभकामना :

सर्वः प्राप्नोतु मानुष्यं नैतिकत्वं सुसंस्कृतिम् ।
सज्ज्ञानं सद्विवेकं च सद्वृत्तिं प्रगतिं यशः ॥२१९॥

सर्वो भवतु कर्मण्यः सत्यार्थी विश्वनिष्ठितः ।
देशभक्तः समत्वार्थी लोकार्थी लोकतान्त्रिकः ॥२२०॥

सर्वो भजतु कल्याणं बन्धुत्वं सहकारिताम् ।
लोकन्यायं सदादर्शं स्वातन्त्र्यं जगतो हितम् ॥२२१॥

सर्वः पश्यतु भद्राणि सर्वो गच्छतु सत्पथे ।
सर्वत्र शान्तिमाप्नोतु सर्वः सर्वत्र नन्दतु ॥२२२॥

सर्वे सङ्घाः स्वसत्कृत्यैर्वर्धयन्तु जगद्धितम् ।
प्रगतिं सर्वसौहार्दं समत्वं सहकारिताम् ॥२२३॥

प्रतिभाशीलसम्पन्ना मण्डयन्तु महायशाः ।
संगोष्ठीं भद्रतायुक्तां सदादर्श - समन्विताम् ॥२२४॥

किमद्यापि जगति संस्कृतं जीवति ?

-- डॉ० श्री रहसविहारी द्विवेदी --

[स्नातकोत्तर-संस्कृतविभाग-प्राध्यापकः—शासकीय-महाविद्यालयस्य, शाजापुर, म० प्र०]

अद्य प्रश्नोऽयं कथं समुदियाद् यदि संस्कृतं जीवतीति विषये सर्वेषाम् ऐकमत्यं स्यात् ? अत्र सुधीभिर्विचारणीयम्। मृतभाषा संस्कृतमिति ये केचन मन्येरन्, तर्हि ते खलु प्रष्टव्याः। या भाषा अद्यापि जगति जीवति प्राध्यापकानां प्राध्यापनकर्मणि, तत्र तत्र पण्डितानां महाविद्यालये छात्राणाञ्च दैनन्दिनव्यवहारेषु यया भाषया पत्राणि लिख्यन्ते, यस्यां भाषायां विविधाः काव्यग्रन्था रच्यन्ते, पत्र-पत्रिकाः सम्पाद्यन्ते, निबन्धा निबध्यन्ते, आकाशवाणी-वार्ताः प्रसार्यन्ते, गृहे गृहे मन्दिरे मन्दिरे च भजन-पूजनादिधर्मकृत्यान्यनुष्ठीयन्ते, या भाषा विश्वस्मिन् जगति भाषाविज्ञानस्य मूलस्तम्भायते, यस्या भाषाया अक्षय्यमपरिमितं शब्दकोशमाश्रित्य सर्वाः प्रान्तीया भाषाः प्राणान् धारयन्ति, या भाषा राष्ट्रभाषाया अपि उच्छ्वसितम्, साऽपि भाषा मृतेति व्यवहरतां जिह्वा कथं न जिह्रेति ?

मन्ये, 'आम्लानि द्राक्षाफलानी'ति न्यायाद् दूरादेव कैश्चित् सुरभारतीसुधारसारसिकैरसूयिभिर्वा 'मृतभाषा संस्कृतमि'ति मिथ्याप्रवादः प्रचारितः। यावज्जगति जीवन्ति स्तोकसङ्ख्याका अपि जना ये संस्कृतभाषया व्यवहर्तुं पारयन्ति व्यवहरन्ति वा, तावत्कथं हि नामेयं भाषा मृतेति व्यपदिश्यताम् ? यावद् भ्रमन्ति भारतीयेषु विपिनेषु विरल-विरला अपि केचनोत्कृष्टजातीयाः सिंहविशेषाः, तावन् महनीया सा जातिः समाप्तिमुपगतेति कथं वा कोऽप्यमूर्खः प्रब्रूयात् ?

कदाचित् संस्कृतज्ञोऽपि कश्चित् स्वीकुर्याद् यद् वैज्ञानिकेऽस्मिन् युगे संस्कृतसरितोऽविच्छिन्नाया धाराया ग्रीष्मकालोऽयं समुपागतः। अतः क्षीणेव धारेयं प्रतीयते। परन्तु इदमपि न विस्मर्तव्यं यद् ग्रीष्मकालजलधारेव पिपासाशान्तयेऽधिकं जीवनदायिनीयं वर्वर्तीति नात्र सन्देहलेशोऽपि। ध्रुवमेव स्वर्लोक-भूलोकयोरेकीभूतमैश्वर्यम् अस्यामेव भाषायां प्रतितिष्ठति। किमधिकम्, अमेरिकादिपाश्चात्यदेशेष्वपि संस्कृतवाङ्मये भृशं प्रतिष्ठितयोर्भारतराष्ट्रनायकयोः रामकृष्णयोर्ध्वनिः—'हरे राम ! हरे कृष्ण !' इति रूपेणाद्यापि श्रूयते। अहो महानेष प्रभावः सुदृढं जीविताया देवगिरः !

धन्या वयं यदस्माकं भारते एतादृशं दुर्लभमैश्वर्यं सर्वात्मना जीवद् विराजते। ऋग्वेदत आकाशवाणी-वार्तां यावत् सर्वत्रैव अस्यां भाषायां काचिद् देवस्वभावाप्ययिताऽनुभूतिरजस्रं क्रियते देवभाषासंस्कृतैः संस्कृतज्ञैः। संस्कृताध्ययनं विनाऽपि को नाम भा-रतो भारतीयः ?

विना वेदं विना गीतां विना रामायणीं कथाम्।
विना कविं कालिदासं कीदृशी भारतीयता॥

सत्यमेतद् यद् भारतस्य पारतन्त्र्यावसरे जीविता सत्यपीयं भाषा न तावती विकासशीलाऽऽसीद् यावती सम्प्रति विद्यते। युगेऽस्मिन् महाकाव्य-खण्डकाव्य-सन्देशकाव्य-गीतिकाव्य-शृङ्गारिककाव्य - प्रकृतिकाव्य-वर्णनप्रधानकाव्य—अनुरणनमूलककाव्य—व्यङ्ग्यकाव्य-विरक्तिपरक- दार्शनिक—प्रतीकात्मककाव्य—नीतिकाव्य-

अन्यापदेशककाव्य - सुभाषित–राष्ट्रगीत–संवादकाव्य-प्रशस्तिकाव्य-स्तोत्र-लहरी-काव्यक्लेशमुक्तक-समस्यापूर्ति-चम्पू-गद्यकाव्य-उपन्यास-लघुकथा - बोधकथा - व्यङ्ग्य-कथा - 'रेडियो'–रूपकादि- नवविधासहित-विविधरूपक-जीवनी-यात्रासाहित्य-निबन्ध-शास्त्रीयप्रबन्ध-शोधप्रबन्ध-समीक्षा-समीक्षाशास्त्र-पत्रलेखन-कोशग्रन्थ - प्रभृतिरूपेण संस्कृतसाहित्यस्य भूयान् विकासो जातः। साप्ताहिक-पाक्षिक- मासिक - त्रैमासिक - षाण्मासिक - वार्षिक - पत्र-पत्रिकानां प्रकाशनञ्चापि भवति ।

अस्मिन् विश्वस्मिन्नद्यापि सर्वातिशायिनीयं संस्कृत-भाषेति प्रमाणीकर्तुं केवलमत्र विगते दशके [सन् १९६१ ईशवीयवत्सरतः १९७० ईशवीयवर्षं यावत्] प्रणीतानां प्रशस्त-महाकाव्यानामुल्लेखः क्रियते—

महाकाव्यानि — महाकवयः

१. सीता-चरितम्
—डॉ० रेवाप्रसाद द्विवेदः 'सनातनः', काशी ।
२. शिवराज्योदयम्
—डॉ० श्रीधर भास्कर वर्णेकरः, नागपुर ।
३. रुक्मिणी-हरणम्
—स्व० काशीनाथ द्विवेदी 'सुधीसुधानिधिः', काशी ।
४. बोधिसत्त्व-चरितम्
—डॉ० सत्यव्रतशास्त्री, दिल्ली ।
५. गणपति-सम्भवम्
—म० म० पं० प्रभुदत्तशास्त्री, दिल्ली ।
६. गङ्गासागरीयम्
—स्व० पं० विष्णुदत्त शुक्लः, सागर ।
७. श्रीमालवीय-काव्यम्
—स्व० रामकुबेर मालवीयः, काशी ।
८. कर्णार्जुनीयम्
—स्व० पं० विन्ध्येश्वरीप्रसादशास्त्री, काशी ।
९. महर्षि-ज्ञानानन्द-चरितम्
—स्व० पं० विन्ध्येश्वरीप्रसादशास्त्री, काशी ।
१०. विशालं भारतम्
—श्री श्यामवर्णं द्विवेदी, गोरखपुर ।
११. विश्व-मानवीयम्
—श्री विद्याधरशास्त्री, बीकानेर ।
१२. रक्ताक्त-हिमालयम्
—श्री परमेश्वरदत्त त्रिपाठी, बलिया ।
१३. परशुराम-दिग्विजयम्
—म० म० पं० छज्जूरामशास्त्री, दिल्ली ।
१४. श्रीनेहरू-चरितम्
—स्व० पं० ब्रह्मानन्द शुक्लः, खुरजा ।
१५. श्रीतिलक-यशोऽर्णवः
—स्व० पद्मभूषण माधव श्रीहरि अणे, पूना ।
१६. छत्रपति-चरितम्
—श्री उमाशंकर त्रिपाठी, काशी ।
१७. ऊषा-हरणम्
—स्वामी श्री अनन्तानन्दः, काशी ।
१८. झांसीश्वरी-चरितम्
—श्री सुबोधचन्द्र पन्तः, काशी ।

आधुनिके संस्कृतसाहित्ये औदासीन्याद् बहुसङ्ख्याकानां संस्कृतविदुषामपि धारणेयं यद् आसृष्टि 'कालिदास'-'बाण'-'श्रीहर्षादय' एव सर्वातिशायिनो महाकवयः। नैतादृशः कश्चिदाधुनिकः कविर्भवितुमर्हति। अतस्तस्य कृतेरध्ययने मुधा समयः को यापयेदिति। ममाल्पमतौ तु नेयं तेषां विमर्दक्षमा विचारसरणिः। भवतु नाम श्रीमती महादेवीवर्मा (हिन्दी-कवयित्री) आधुनिकी मीरा, भवतु नाम कश्चित् हिन्दीनाटककार आधुनिकः कालिदासः, किन्तु उपमेयसमोऽपि न कश्चित् संस्कृतकविराधुनिकः कालिदासो न च श्रीहर्षः ! दुखदोऽयं विषयः। हृदय-दौर्बल्यमेतत् संस्कृतज्ञानाम् । अभिनव-महाकाव्यरस-पानधन्यस्य मम दृढोऽयं विश्वासो यदस्मिन् कवि-परम्परावाहिनि संसारेऽवश्यमेव स समय आयास्यति—

(शेषांशः ९२ पृष्ठे)

ध्वनि-वैभवम्

—श्री रवीन्द्रकुमार सिद्धान्तशास्त्री—

(१०)

महाकवेः वैशिष्टम्

न खलु शब्दार्थालङ्कारमात्रं वैचित्र्यं विरच्यैव कश्चन कविर्महाकवित्वं लब्धुमर्हति। महाकवित्वलाभार्थन्तु विद्यते नवीनतर-ध्वनिसृष्टेः प्रयोजनं तस्य, पूर्वाचार्यैर्वर्णितं सत्यं सम्यगनुभूय चेत् स नवीनया भङ्गया ध्वनिगर्भं वाक्यं विरचयितुं शक्नोति, तदा तु तादृशरचनासामर्थ्यादपि लभ्यते तेन महाकविसंज्ञा। यतः खलुः कालिदासादीनां महाकवीनां निबन्धेषु विद्यन्ते ध्वनिसमृद्धानि वाक्यानि, तत एव ख्यातिं गतास्ते महाकवि-संज्ञया।

कवीनां ध्वनेर्लोकातीत-चमत्कारिता

सर्वजनसुविदिता अपि केचन भावाः कालिदासादीनां महाकवीनां वाक्यमासाद्य नवीनरूपतामिव यान्ति। महाकविना ये ये भावाः सम्यगनुभूयन्ते, त एव तेषां भाषामासाद्य स्थितिं लभन्त इति विचित्रः खलु महाकवि-व्यापारः। तथा च—

यदाह धात्र्या प्रथमोचितं वचो
ययौ तदीयामवलम्ब्य चाङ्गुलीम्।
अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः ॥[1]

इति कालिदास-रचिते श्लोके श्रुतिपथमागते झटिति समुत्पद्यते चेतसि काचिन्मनोऽभिरामा पुत्रविषया रतिः। व्यञ्जनावृत्तिलभ्यतया नितरां चित्तचमत्कारितया च ध्वनिमध्य एव गणनीया रतिरियम्। पुत्रस्यैवं शिशुसुलभं कार्यकलापमवलोक्य राज्ञो दिलीपस्य चेतसि समजायत य आनन्दपारावारः,—न खलु निर्मलानन्दो महाकवेर्भाषावैचित्र्यमासाद्य विचित्रभावेनैव विराजते। एतस्य तु लोकातीता चित्तोन्मादकता चमत्कारातिशयता च सहृदयमनोमात्रसंवेद्यैव। एवंविधो विचित्रोऽर्थो लोकातीतविषयवभूषितो नितरामनिर्वचनीयश्चेति ब्रह्मपदार्थेन सह तस्य सादृश्यं कल्पयितुं शक्यते।

दृश्यते च भवभूतेरुत्तररामचरिते—

अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात्।
आनन्दग्रन्थिरेकोऽयमपत्यमिति कथ्यते ॥[1]

इति तमसा कथितः श्लोकः। अहो कीदृशी विचित्रता विद्यते श्लोकेऽस्मिन्निति तावदनुभवितव्यं सहृदयपुङ्गवैः। अस्माभिश्चानुभूयते श्रुतिमात्रमेव श्लोकोऽयं वाच्यातिशायिनं चित्तचमत्कारकं कञ्चन ध्वन्यर्थमानयति चित्तपटे सहृदयानामिति। अपत्यमुद्दिश्य पित्रोश्चेतसि सञ्जायते यो लोकोत्तरः स्नेहराशिः, स एव श्लोकमिममाश्रित्य विराजते इति मन्ये। न खलु नितरामनिर्वचनीयोऽयं स्वीयापत्यस्नेहराशिर्भगवत्या सरस्वत्यापि भाषया वर्णयितुं शक्यते। यत्तु कतिपयमात्र-शब्दरचितोऽयं श्लोकसदृशं स्नेहराशिमानयति श्रोतुश्चित्तपटं, तत्तु ध्वनेरेव प्रभावफलमिति नास्ति सन्देहावकाशः।

अस्मिन्नेव उत्तररामचरिते प्रथमेऽङ्के चित्रदर्शनावसरे बभूव श्रीरामचन्द्रो नितरामसहनीयया विगतकालीनया दुःखमयस्मृत्या प्रपीडितः। पितुर्मातॄणाञ्च चित्राणि

---

[1] रघुवंशम् ३.२५ ।

[1] उत्तररामचरितम्; तृतीयोऽङ्कः।

विद्यन्ते तस्य पुरतः। समुपस्थिता च सीतादेवी तस्य पार्श्वे। एवं परिवेशः स्मारयति स्म तमतीतकालीनं सदृशं विवरणम्। अतीतं सुखं तदानीन्तनं मातॄणां सस्नेहव्यवहारकलापं पितुर्वियोगजञ्च दुःखमनुस्मृत्य, एवं सुखदुःखसम्मेलन-समुद्भूतया कयाचिदनिर्वचनीयानुभूत्या समन्वितो बभूव तदानीं श्रीरामः। सा चानुभूतिर्भाषामाश्रित्य तदीयं वदनमवलम्ब्य बहिरागच्छत्। नितरां व्यथितचित्तो रामो जगाद—

जीवत्सु तातपादेषु नवे दारपरिग्रहे।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः॥[1]

ध्वने-वैंभवम्

अहो! चित्तोन्मादकत्वमस्य श्लोकस्य; येनाद्यापास्य चतुर्थचरणमात्र-श्रवणेन श्लोकनिबद्धं सर्वमेवानिर्वचनीयं भावजातं झटिति भासते श्रोतुर्मानसपटे। तादृशानाञ्च भावानां न केवलं रामगतत्वेन प्रतीतिः। प्रतिपुरुषं प्रवर्तते नितरामेषा भावपरम्परा। यः कश्चिज्जनो यदैव दारपरिग्रहं करोति, तद्दिनादारभ्य कतिचिद्दिनानि पितुर्मातुश्च सकाशाल्लभते स विपुलं स्नेहराशिम्। नवागता सा वधूरपि नितरां स्नेहातिशयमेव लभते श्वश्रू-श्वशुरयोः सकाशात् ये ये सन्ति ननान्दृ-देवरादयः, सर्वेषामेव तेषां हृदयात् प्रवहति तदानीमनिर्वचनीया काचित् स्नेहनिर्झरिणी वध्वास्तस्या उपरि। अथ गच्छत्सु दिवसेषु क्रमेण सर्व एव श्वश्रू-श्वसुर-ननान्दृ-देवरादयः कथञ्चिद् विरूपतां यान्ति। समुद्भवति च स्वार्थसङ्घातः परिजनेषु। पिता मन्यते—'पुत्रो मे स्त्रैणत्वं गतः, तेन चास्मत्तो वधूमेवाधिकां मन्यते सम्प्रति। सा च पत्यावधिकस्नेहपरायणा मां मत्पत्नीञ्च न सेवते सम्यगधुने'ति। भगिनी मन्यते—'भ्राता मे स्त्रैणत्वाकुलो मयि न स्निह्यति पूर्ववत्।' भ्रातरोऽपि तथैव बुद्धिं बिभ्रति। एवं कथञ्चिदनात्मीयजनसुलभभावेन व्यवहार्यमाणौ तौ दम्पती व्यथामनुभवतश्चेतसि। एष एव शाश्वतो व्यापारः श्लोकेनानेन स्मृतिपथमानीयते इति श्लोकप्रतिपाद्यः सर्वजनसाधारणो ध्वन्यर्थोऽपरिच्छेद्योऽनिर्वचनीयोऽनुभवमात्रसंवेद्यश्चित्तचमत्कारकश्चेति तस्य विपुलं वैभवं निह्नोतुं न शक्यते।

कश्चित् सहृदयश्चेदेवंविधं व्यापारमवलम्ब्य स्वकीये जीवनेऽतिदारुणां व्यथामनुभूतवांस्तदा तु श्लोकस्यास्य श्रवणात् अतीतदुःखानुध्यानान्नितरां व्यथितचित्तस्य तस्य लोचनाभ्यामश्रुपातोऽपि जायते। विमूढतां याति च सर्वेषामेव चित्तम्। ध्वनौ चेत् काचिदलौकिकी शक्तिर्नास्थास्यत्, तदैवं नाभविष्यदिति महाविभवो ध्वनिरेषः।

देशे देशे कलत्राणि देशे देशे च बान्धवाः।
तं तु देशं न पश्यामि यत्र भ्राता सहोदरः॥[1]

इति श्लोके समुच्चारिते स्मृतिपथमारोहति देवप्रतिमस्य रामानुजस्य लोकातीता भ्रातृवत्सलता। पितुरदूरदर्शितया तत्कृतां प्रतिज्ञां पूरयितुं यदा दशरथ-नयनमणि-प्रतिमो रामो वनं गन्तुं प्रवृत्तस्तदा तु विमातृतनयोऽपि नितरां भ्रातृवत्सलो रामगतप्राणो लक्ष्मणो न केवलं राज्यसुखं, तदधिकमपि च भर्तृवत्सलाया लोकाभिरामायाः स्वदयितायाः सान्निध्यं मातृस्नेहञ्च समवधूय भ्रात्रा सह वनाय प्रतस्थे। अरण्ये मातृप्रतिमां भ्रातृजायां रक्षितुं स नितरां यत्नपरायण आसीत्। खरदूषणसंग्रामे च भ्रातुः पार्श्वे स्थित्वा स्वप्राणांस्तृणीकृत्य तं रक्षितवान्। संकुले लङ्कायुद्धे भ्रातुः रक्षार्थं पुरः प्रधाय यदा स शक्तिशैलेन मर्मणि पीडितो मूर्च्छामगच्छत्, तदा तस्य लोकातीतां भ्रातृवत्सलतामनुस्मृत्य श्रीरामः श्लोकमिमं जगाद। येन खलु नितरामनिर्वचनीयेन भावेन तदानीं रामस्य चित्तं व्याकुलीकृतं, स एव भावः

---

[1] उत्तररामचरितम्, प्रथमोऽङ्कः।

[1] रामायणम्, लङ्काकाण्डम् १०१.१४।

श्लोकाकारमासाद्य रामवदनाद् बहिरायातः। स्मारयति चैष श्लोकः सर्वानेव सहृदयान् श्रोतृप्रवरात् तादृशीमेव भावसरम्पराम् !

अहो दुर्दैवम् ! दृश्यन्ते जगत्यस्मिन् बहवो जनाः, ये पत्न्याः मित्रस्य वा तोषणाय भ्रातरं विजहति। एका पत्नी चेन्म्रियते तदा काचिदपरा तस्याः स्थानमधिकर्तुमर्हति। एवं मित्रञ्चेन्मित्रत्वं जहाति, तदा कश्चिदपरो जनस्तस्य स्थलवर्ती भवेत्। लक्ष्मणसदृशो भ्राता तु द्वितीयो नास्ति जगत्यस्मिन्नित्यहो चित्तव्याकुलकारिणीयं वाणी। एवंविधस्य व्यापारस्य सर्वलोक-साधारणतया सहृदयमात्रसंवेद्यतया च तदनुभवे परस्य न परस्येति ममेति न ममेति च इतिवद् भवति काचिदनिर्वचनीया बुद्धिमात्रसंवेद्या चित्तविक्षेपकारिता। एष एव ध्वन्यर्थो विपुल-सामर्थ्य-परिपूरितः !

(क्रमशः)

(८९ पृष्ठस्य शेषांशः)

यदा सीताचरित - शिवराज्योदयादि - महाकाव्यकारा। प्रशस्तक्रान्तिकारिमहाकविरूपेण विख्याता भविष्यन्ति। नात्राश्चर्यं विद्वद्भिः कर्तव्यम्। एषा पुरातनी प्रवृत्तिर्भारतीयानां दृश्यते। श्रेष्ठतमेन संस्कृतकाव्यालोचकेन ध्वनिकारेण 'द्वित्रा पञ्चषा वा महाकवयः कालिदासाद्या' इत्युक्त्वा यस्य सार्वभौमकवेः सर्वातिशायित्वं महता कण्ठेन स्वीक्रियते, तेनापि महाकविना नवकाव्योपेक्षादौर्गन्ध्यमनुभूय एकदा न चाऽपि काव्यं नवमित्यवद्यम् इति अभाणि।

वस्तुतो यदि मनस्येकं वचस्येकं कार्यमेकमिति वाग्विषयीभूता संस्कृतस्य विकासभावना संस्कृतज्ञानां संस्कृतप्रणयिनाञ्च हृदि विलसति, तर्हि—

याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।

इति बुद्ध्या जातोऽयं याचको न तिरस्करणीयः—

नायं पन्था यदपि भवतां नूतनः संस्कृतस्य
दृष्टः सम्यङ् नव इति धिया गर्हितश्चाऽपि हन्त।
भूयो भूयो न खलु कृतिनस्तावदार्या भवन्तो
नव्यैः काव्यैर्यदि न सरसैः संस्कृतज्ञा रमन्ते॥

प्राचीन-भारतीयाः क्रीडाः

--डॉ० नरेश झा शास्त्री--

(४)

नृत्यक्रीडा

नृत्यमवलम्ब्य या क्रीडा प्रवर्तते सा नृत्यक्रीडा। नृत्यञ्च गात्राविक्षेपात्मकम्। अत्र नृत्यम्, नृत्तं चेति भेदद्वयमुपलभ्यते। 'पदार्थाभिनयो नृत्यम्', 'गात्रविक्षेपमात्रं च नृत्तमि'ति। अस्यां क्रीडायां बालकाः बालिकाः वा कञ्चित् प्रकारं निश्चित्य नृत्यन्ति। प्रायो यदा कञ्चित् नृत्यति तदाऽन्यो करतालिकाभिरन्यैश्चोपायैस्तदनुकूलं शब्दं करोति। अन्यश्च गायति, अपरे पुनः 'साधु साधु' इत्येवं प्रशंसन्ति। अस्याः क्रीडायाः स्वरूपभूमिः श्रीमद्भागवते यथा—

रामकृष्णादयो गोपाः ननृतुर्युयुधुर्जगुः।
कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन्॥
वेणुपाणितलैः शृङ्गैः प्रशशंसुरथापरे॥[1]

अपि च—

क्वचिन्नृत्यत्सु चान्येषु गायकौ वादकौ स्वयम्।
शशंसतुर्महाराज साधु साध्विति वादिनौ॥[2]

अत्र केवलं गोपबालकानामेव नृत्यक्रीडा निर्दिष्टा। बालक-बालिकयोः समन्वितेयं क्रीडा गर्गसंहितायां वर्णिता—

श्रीरागं चापं हिन्दोलं रागमेवं पृथक् पृथक्।
अष्टतालास्त्रिभिर्ग्रामैः स्वरैः सप्तभिरग्रतः॥
नृत्यैर्नानाविधै रम्यैर्हावभाव - समन्वितैः।
तोषयन्त्यो हरिं राधा कटाक्षैर्व्रजगोपिकाः॥[3]

श्रीराग-हिन्दोलादि - गानप्रसिद्धरागान् गायन्त्यः हावभावसमन्विताश्च नृत्यन्ति गोपबालाः। इयञ्च क्रीडा बालिकाभिः सम्मिलितैर्बालकैर्भवति। पूर्वाः तु केवलं बालकैः, बालिकाभिश्च वा भवत्ययमेव उभयत्र भेदः।

कदाचिदन्यक्रीडाप्रसङ्गे समुत्सुकाः बालका तत्तत्क्रीडासु तान् नियोज्य स्वयमप्युत्साहेन नृत्यन्ति स्म। यथा भगवतो वृषभदेवस्य क्रीडाप्रसङ्गे—

मल्लविक्रियया काश्चिद् युयुत्सूननभिद्रुहः।
प्रोत्साहयन् कृतास्फोटवल्गनानभिनृत्यतः॥
स्रग्विण शुचिलिप्ताङ्गान् समेतान् सुरदारकान्।
दाण्डां क्रीडां समायोज्य नर्तयंश्च कदाचन॥[1]

तथा च रासक्रीडा (लीला) समयेऽपि श्रीकृष्णेन सह गोप्यः नृत्यन्ति स्म। उक्तं हि—

नृत्यन्ती गायती काचित् कूजन्नूपुरमेखला।[2]

इत्थं विविधविधाभिः नृत्यक्रीडाभिः शारीरिकबलसंवर्धनेन सह मनोविनोदमवापुः।

उपर्युक्तपद्धत्यैव श्रूयते च किल दक्षिणे (तमिळ) देशे प्रत्येकस्मिन् ग्रामे सुविस्तीर्णा क्रीडाभूमिरासीत् या 'आडुकलम्' नृत्यशाला वा कथ्यते स्म। अवकाशसमये ग्रामीणाः अस्यां भूमौ सङ्घीभूय नृत्यादिकमाचरन्ति स्म। एषु नृत्येषु स्त्रियोऽपि सम्मिलन्ति स्म।[3] कैरल्याञ्च कूटियाट्टम'-शब्दस्यार्थं एव भवति

---

१. श्रीमद्भागवतम् १०.१८.९-१०।
२. तत्रैव १०.१८.१३।
३. गर्गसंहिता २.२१.३७-३८।

४. श्रीभगवज्जिनसेनाचार्यः,महापुराण१४.१९८.२००।
५. श्रीमद्भावगतम् १०.३३.१४।
६. तमिल साहित्य और संस्कृति पृ० १९७।

सम्मिलित-नृत्यम्। 'कूटि' इत्यस्य मिलित्वा 'आट्टुक' 'आडुक' वेत्यस्य नर्तनमर्थः।[1]

महाराजेन सोमेश्वरेण तु क्रीडातिरिक्तकालेऽपि नृत्यप्रयोगो निर्दिष्टः। यथा मानसोल्लासे—

उत्सवेऽपि जये हर्षे कामे त्यागे विलासके।
विवादेऽथ परीक्षायां कार्यं नृत्यं विनोदने॥[2]

अत एव देवयात्रोत्सवादिषु, राजसंसदि, विशेष समाजे च नृत्यक्रीडा प्रचलति स्म। प्रायः सर्वत्र-पुराणेषु देवजयानन्तरं गायनम् अप्सरसां च नृत्यं च ननृतुश्चाप्सरोगणाः इत्यादिना समुपलभ्यते। तथैव देवेन्द्रसंसद्यपि नृत्यं प्रचलति स्मेति नैके कथा-प्रसङ्गाः ज्ञायते। यथा स्कन्दपुराणे कौमुदीमहोत्सवे—

प्रातःप्रभृति राजा च आज्ञापयति कौमुदीम्।
गायन्तु गायकाश्चैव नृत्यन्तु नटनर्तकाः॥

वस्तुतः बालकानां क्रीडावदाचार्य-नृत्यक्रीडा तस्य गौणरूपम्। मुख्यतया तु ऋग्वैदिकार्याणां नृत्यं मनोरञ्जनसाधनमिति।[3] अत एव वात्स्यायनेनापि गीतं वाद्यं नृत्यं आलेख्यमेताश्चतस्रो कलाः विशेषरूपेण समुपयुक्ताः स्वीकृताः। किम्बहुना, मुनिना भरतेन तु नृत्यस्याङ्गोपाङ्गवर्णनाय शास्त्रमेव निर्मितम्। नाट्यशास्त्रेऽस्मिन् ताण्डव-लास्ययोर्नृत्ययोः सविस्तरं वर्णनमुपलभ्यते। ताण्डवनृत्यप्रवर्तकः शिवः। तच्च नृत्तं विवाहजन्मप्रमोदाभ्युदयोत्सवेषु प्रायेण प्रयुज्यते। लास्यञ्च नर्तनानुकृत्या पार्वतीकृतं नृत्यम्।

एतौ नृत्यौ सुनृत - ताण्डवा - ऽनृत्त - लास्यभेदै-र्वात्स्यायनेन चतुर्धा विभक्तौ[4]।

मानसोल्लासे तु—

नाट्यं लास्यं ताण्डवं च लाघवं विषमं तथा।
विकटं चेति निर्दिष्टं नर्तनं षट्प्रकारकम्॥[1]

नर्तनक्रियावद् नर्तकाः अपि षड्विधाः भवन्ति। ते च यथा—

नर्तकाः षट् प्रकाराः स्यु नर्तकी नटनर्तकौ।
वैतालिकाश्चारणाश्च तथा च लटिकाऽपि च॥[2]

एतेषां समेषां पृथग्-पृथग् लक्षणानि मानसोल्लासे प्रतिपादितानि। राज्ञा रुद्रदेवनिर्मिते श्यैनिकशास्त्रे तु—

उद्धतं ताण्डवं यच्च लास्यञ्चाभिनयात्मकम्।[3]
चारी लयसमायुक्तं द्विविधं नृत्यमुच्यते॥

इत्थं बहुचर्चितस्य नृत्यकलाकलापस्य यद्यपि बौद्ध-वाङ्मये बौद्धभिक्षवे निषेध एव दर्शितः।[4] मनुः[5] याज्ञवल्क्यादि[6]स्मृतिष्वपि नृत्यकर्मणः गर्हणैव विहिता; तथापि मनोरञ्जन-विनोदसाधनीभूतं नृत्यं सर्वाङ्ग-सञ्चालनतथा शारीरिकोत्कर्षप्राप्तिविधौ सम्मानितमेव।

अक्षक्रीडा

अस्याः क्रीडायाः ऐतिह्यं प्राचीनकालत एव समुपलभ्यते। वैदिककालादेवास्याः क्रीडायाः प्रचारः। ऋग्वेदे[7] 'शारि'क्रीडा एतस्याः संज्ञा। इयं क्रीडा

---

७. केरली-साहित्यदर्शनम्, पृ० ३५।

[1] मानसोल्लासः ४.१८.२८४०।

[2] ऋग्वेदिक आर्य, अ० १४।

[3] कामसूत्रम् १.७।

[1] मानसोल्लासः ४.१८.२८४९-५०।

[2] तत्रैव ४.१८.२८५८-५९।

[3] श्यैनिकशास्त्रम् २.२६।

[4] 'तच्च-गीत-वादित - विसूक्त - दसूसना - पटिविरतो समणो गौतमो'—दीर्घनिकाय, ब्रह्मजालसुत्त, सू० १०। 'सेय्यथीदं, नच्चं गीतं वादितं पोख······एव रूपाविसूक-दस्सतापटिविरनो गौतमेति'—दीर्घ० ब्रह्म० सू० १३।

[5] मनु० ८.३६२, ८.६५।

[6] याज्ञवल्क्य० २.७०।

[7] ऋग्वेद १०.३४.८।

वात्स्यायनस्य कामसूत्रे 'आकर्षक क्रीडापाशक क्रीडा' इति[1], समवायसुत्ते 'जूयम्'[2], दीघनिकाये च 'अक्खक्रीडेति[3] च नामभिः सुप्रसिद्धा। महर्षेः पाणिनेः पूर्वमेवास्याः क्रीडायाः एतावान् महान् प्रचारः आसीत् यत्तैरपि आकर्षादिभ्यः कन्[4], सप्तमी शौण्डैः[5], निर्वृत्तेऽक्षद्यूतादिभ्यः[6], तेन दीव्यति[7] इत्येतेषु सूत्रेषु अस्या लोकव्यापकत्वं स्वीकृतम्। प्रायेः सर्वेष्वपि पुराणेतिहासग्रन्थेषु क्रीडायाः अत्याश्चर्या समुपलभ्यते। कतिपयानि स्थलानि अत्र निदर्शनाय समुपस्थाप्यन्ते तत्रादौ स्कन्दपुराणे (वैष्णव० उत्कल० ३९.३३)—

अक्षक्रीडादिभिः पुष्प - वस्त्र - माल्यानुलेपनैः।
ततोऽस्मिन् पौर्णमास्यायां रात्रावुत्सवसंयुतम्॥

अत्र पौर्णमास्यां रात्रौ कौमुदीमहोत्सव-समयेऽक्षक्रीडायारुल्लेखः। विष्णुपुराणे (४.४.३७.५.२८.११) च

तत्पुत्रश्च ऋतुपर्णः योऽसौ
नलसहायोऽक्षहृदयज्ञोऽभूत्।
अनक्षज्ञो हली द्यूते तथास्य व्यसनं महत्।
न जयामो बलं कस्माद् द्यूतेनैनं महाबलम्॥

श्रीमद्भागवते (१०.६१.२८ १०.६६.३६)—

अनक्षज्ञो ह्ययं राजन्नपि तद् व्यसनं महत्।
इत्युक्तो बलमाहूय तेनाक्षै रुक्म्यदीव्यत्॥
अक्षैः सभायां क्रीडन्तं भगवन्तं भयातुराः।
त्राहि त्राहि त्रिलोकेश वह्नेः प्रदहतः पुरम्॥

एवमेव महाभारते विराटपर्वणि (१३.५)—

स ह्यक्षहृदयज्ञस्तान् क्रीडयामास पाण्डवः।
अक्षवत्यां यथाकामं सूत्रबद्धानिव द्विजाम्॥

अपि च मृच्छकटिके नाटके (अङ्क २)—

बहुविधं द्यूतं क्रीडतः।

इत्थं सर्वत्र अक्षक्रीडा-वर्णनं दृश्यते। किन्त्वस्याः दुष्परिणामित्वात् ऋग्वेदादिषु निषेध एवोपलभ्यते। निरुक्ते दैवतकाण्डे (७.३) **भोजस्येदं पुष्करिणीव वेश्म** इत्येवम्, अक्षसूक्ते ऋग्वेदीये च द्यूतनिन्दा च कृषिप्रशंसा चेति दृश्यते। निरुक्तप्रतीकव्याख्यानप्रसङ्गतो दुर्गाचार्य-टीकाऽपि 'अक्षैर्मा दीव्यः (७.८.५.३) द्रष्टव्या।

वैखानसधर्मप्रश्नेऽपि, (३.३.१) **अक्षैः क्रीडां प्रेतधूमं बालातपं च वर्जयेत्। नाक्षैः क्रीडेत् कदाचिद्धि** इत्यादिना (४.७४) मनु-याज्ञवल्क्यादि- (१.१.३८) स्मृतिष्वपि निन्दितत्वात् महाभारते च दुष्परिणामत्वात् नूनं गर्हितैवैषा क्रीडा। तथापि मानसोल्लासे पाशकादीनां रचना तत्क्रीडाविधिश्च वर्णिता। अनया क्रीडया च शारीरिकबलसंवर्धने न कोऽपि लाभो दृश्यते। अतोऽत्र अस्या विशेषवर्णनं बुद्ध्या उपसंह्रियते। (क्रमशः)

---

[1] 'आकर्षफलकं द्यूतफलकं च।' कामसूत्र, १३।

[2] ए० वे० दि कलाज् सूची।

[3] दीघनिकाय, ब्रह्मजाल सुत्त १४।

[4] पाणिनि अ० ५.२.६४।

[5] तत्रैव २.१.४०।

[6] तत्रैव ४.४.१९।

[7] तत्रैव ४.४.२।

(८८ पृष्ठस्य शेषांशः)

ब्राह्मणब्रह्मचारिणां कृते अहतं शुक्लं शाणमयं वस्त्रम्, ऐणेयमुत्तरीयं, मौञ्जी-मेखला, मुञ्जाभावे कुशमेखला पालाशो बैल्वो वा दण्डः, इत्येतेषां धारणनियम आसीत् (२.५.१६—२८)।

क्षत्रियब्रह्मचारीणां कृते माञ्जिष्ठं, क्षौमं वस्त्रं, रुरुनामारण्यमृगस्य चर्मोत्तरीयं, चापस्य गुणो मेखला, तदभावे अश्मन्तकमयी मेखला, बैल्वं न्यग्रोधं वा दण्डं भवति स्म (२.५.१७-१८)।

वैश्यब्रह्मचारिणां कृते मेषरोमनिर्मितं पीतवस्त्रम् आजमुत्तरीयं, मौर्वी आविकी वा मेखला, औदुम्बरश्च दण्डो दीयते स्म (२.५ १७-१८)।

इत्थमनुमीयते यत् साम्प्रतिकविद्यालयानां स्वीयस्वीयच्छात्राणां कृते स्वतन्त्रपरिधानं 'स्कूलड्रेस' इत्याख्यं तस्यैव उपधानस्यानुकृतिभूतमस्ति। तात्कालिकच्छात्राणां कृते उपर्युक्तपरिधानस्य ये नियमा आसन्, तेषामयमेवाशयो यत् सरलतया छात्राणां परिज्ञानं भवेत् यदिमे छात्रा अमुकगुरुकुलस्य, इमे वा अमुकगुरुकुलस्य सन्ति।

छात्राणामाचरणमनुशासनञ्च

छात्राणां कृते आचरणस्य नियमाः निश्चिता आसन्। सर्वेषां त्रैवर्णिकानां ब्रह्मचारिणां कृते बहूनि नित्यकर्तव्यानि निश्चितानि आसन्। तेषां कृते दिवाशयननिषेध आसीत्। वाग्-नियन्त्रणमावश्यकमासीत्। ब्रह्मचारी स्थण्डिलशायी भवति स्म। प्रतिदिनं तस्मै समिदाहरणमावश्यकमासीत्। तेन गुरोरपि अग्निहोत्रादिकर्माणि सम्पाद्यन्ते स्म। ब्रह्मचारिणः भिक्षायै प्रथमं मातुरग्रे गत्वा भिक्षां याचन्ते स्म। सा प्रथमा भिक्षा वारत्रयं, षड्द्वादशपरिमितं वा भवति स्म। भिक्षायाचनेऽपि विशिष्टाः नियमा आसन्। ब्राह्मण-ब्रह्मचारी 'भवति भिक्षां देही'ति, 'भिक्षां भवति देही'ति क्षत्रियो ब्रह्मचारी, 'भिक्षां देहि भवती'ति वैश्यब्रह्मचारी उक्त्वा भिक्षायाचनं करोति स्म। अनेन प्रकारेण ब्रह्मचारिणः वर्णपरिज्ञानमपि भिक्षायाचनकाले जायते स्म। तनुसारमेव तेषां कृते भिक्षा अपि दीयते स्म। भिक्षां भिक्षित्वा ब्रह्मचारी गुरवे भैक्षं निवेदयति स्म (२.५.८)।

गुरुकुले वासपर्यन्तं ब्रह्मचारिणां कृते भूमौ शयनम्, अक्षारलवणाशनम्, कस्यचिन्मते असमीधान्यमन्नमशनं, दण्डधारणं, अग्निपरिचरणं, गुरुसुश्रुषा, सायंप्रातर्भोजनार्थं भोजनसन्निधानं वारद्वयं भिक्षाचरणम्, अनिन्द्ये ब्राह्मणगृहे भैक्षं याचित्वा गुर्वाज्ञया भोजनविधिनैव भोजनं कर्तव्यमासीत्। मधु-मांस-मज्जनोपर्यासन-स्त्रीगमना-ऽनृतादत्तादानानि अकृताअधर्मा इति यावत् आसन् (२.५.१२)।

आचार्येणाकारितो ब्रह्मचारी आसनादुत्थाय प्रतिवचनं ददाति स्म। यदाचार्यः स्वपन्तं ब्रह्मचारिणमाह्वयति स्म तदा स उपविष्टः सन् प्रतिवचनं ददाति स्म। उपविष्टं ब्रह्यचारिणं यदा आचार्यं आह्वयति स्म तदा स ब्रह्मचारी तिष्ठन् प्रतिवचनं ददाति स्म। यदि तिष्ठन्तं ब्रह्मचारिणमाह्वयति स्म, तदा आचार्याभिमुखं व्रजन् प्रतिवदति स्म। यदि अभिक्रामन्तं ब्रह्मचारिणमाह्वयति स्म, तदा स ब्रह्मचारी आचार्याभिमुखं धावन् प्रतिवदति स्म। एवं प्रकारेण कृतब्रह्मचर्यानुष्ठानस्य ब्रह्मचारिणः समाजे समादर आसीत् (२.९.३२)।

अनिवार्य-शिक्षा

गृह्यसूत्रकाले सर्वेषां त्रैवर्णिकानां कृते अनिवार्यशिक्षाया नियम आसीत्। अध्ययनाध्यायनकालात्यये (अध्ययनलोपे जाते सति) समाजे अतीव निन्दा भवति स्म। गुरुकुलप्रवेशकालाभ्यन्तरे यः स्तत्र न प्रविशति स्म यदि कालातिक्रमी भवति स्म। तदा तस्य कृते अध्ययनाध्यायनस्य यजनस्य च प्रतिबन्धो जायते

गृह्य सूत्र-कालिकी शिक्षा

(९६ पृष्ठान्ततः सङ्गतोऽवशिष्टोंऽशः)

स्म। आषोडशाद् ब्राह्मणानाम्, आविंशाद्राजन्यानां, आचतुर्विंशात् वैश्यानामध्ययनस्य प्रवेशकाल आसीत्, तदभ्यन्तरे अध्ययनार्थं प्रवेश आवश्यक आसीत्। तदनन्तरं तेषामध्ययनं, याजनं, समाजे व्यवहारश्च तैः सह प्रतिषिद्ध्यते स्म । ते पतितसावित्रिका भवन्ति स्म (२.५.३७) ।

अत एव अध्ययनमत्यावश्यकमासीत् । त्रिपुरुषं यावद् येषां गृहे अध्ययनाभावो भवति स्म तेषामपत्यानां वर्णजन्यसंस्काराध्यापनमपि न भवति स्म (३.५.३७)। किन्तु तेषु कोऽपि पठितुं संस्कारं वा कारयितुमिच्छति स्म, तदा स 'व्रात्यस्तोम'नामकं यज्ञविशेषं कृत्वा तत्तत्-कर्माधिकारी भवति स्म (२.५.४४)। एतादृशाः कठोरनियमाः समाजद्वारा परिचालिता आसन् येन कोऽपि अशिक्षितो न स्यात् । इत्थं कठोरनियमप्रचारणेन प्रायः सर्वत्र अनिवार्यतया शिक्षाया प्रचारः प्रसारश्च आसीत् ।

स्त्री-शिक्षा

गृह्यसूत्रकाले स्त्रीणां कृतेऽपि शिक्षा अनिवार्याऽऽसीत् । गृह्यसूत्रानुसारं विवाहे लाजाहोम-प्रकरणे कन्या अपि नियतैर्मन्त्रैरग्नौ लाजान् हुत्वा स्वपत्युरायुष्कामार्थं नैकाशिषो देवान् तैर्मन्त्रैर्याचते (१.६.१) । नहि अशिक्षिता कन्या मन्त्रं पठितं शक्नुयात् । अतो ज्ञायते यत् स्त्रीणां विवाहस्यानिवार्यतया विवाहे कन्यया उच्चार्यमाणमन्त्रादीनामध्ययनमभ्यासश्च विवाहात् पूर्वमेवानिवार्यतो भवति स्म । स्त्रीणां कृते विशेषतः सङ्गीतशास्त्रस्य तस्याङ्गभूतस्य नृत्यवादनशास्त्रस्य चाध्ययनमावश्यकमासीत् कस्मिंश्चित् समाजे । विवाहे स्त्रीणां कृते एकं 'प्रवदना'ख्यं कर्म भवति स्म, यस्मिन् कर्मणि वादित्राणि विधिवत् स्थापयित्वा तत्संज्ञकदेवतायै च हुत्वा कन्या स्वबन्धुबान्धवसमक्षं वरसमक्षञ्च सर्वाण्यपि वादित्राणि वादयति स्म ।[1] कस्मिंश्चित् समाजे चतस्रोऽष्टौ वा अविधवा स्त्रियः चतुरानर्तनं कुर्वन्ति स्म ।[2] एवं गृह्यसूत्राणामनुशीलनेन ज्ञायते यत् तदा स्त्रीणां कृतेऽपि एतावती शिक्षा आवश्यकी अनिवार्या चासीत् ।

---

१. वाराहगृह्यसूत्रम् १३.१.६ ।

२. कौषीतकीगृह्यसूत्रम् १.७.२, शांख्यायनगृह्यसूत्रम् १.११.५ ।

पञ्जीकृत-संख्या—एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५ सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज, वाराणसी

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसो कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसो।

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४९

* * *

अङ्कः ५

* * *

सम्पादकः
गो० न० वैजापुरकरः

* * *

मई
१९७३

* * *

वार्षिक-मूल्यम्
५) रूप्यकाणि

* * *

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

* * *

ग्रीष्म-तापः

न कं पीडयति दारुणो ग्रीष्मतापः ?

१. न सम्प्रति पलाशेषु शेते वसन्तः, न सम्प्रति परागैः परीतो दिगन्तः ।
न बाले ! रसालेषु कोकिल-कलापः न कं पीडयति दारुणो ग्रीष्म-तापः ॥
२. न वा पुष्पितः पादपातैरशोको न वा दृश्यते हर्षितो जीवलोकः ।
न जाने, वने कस्य फलितोऽद्य शापः न कं पीडयति दारुणो ग्रीष्मतापः ॥
३. न गीतिर्नि कुञ्जेषु मधुपावलीनाम्, न प्रीतिर्मिथो वल्लरी-तरुवतीनाम् ।
न पुष्पैरिदानीं वृतोऽनङ्गचापः, न कं पीडयति दारुणो ग्रीष्मतापः ॥
४. दिशां मण्डलं मलिनयति धूमलेखा, निपीताग्निना माधवी कान्ति-रेखा ।
न कूपेषु, वापीषु वा शैशिरापः, न कं पीडयति दारुणो ग्रीष्मतापः ॥
५. कुलायाकुलाः तृष्णया पक्षिबालाः मृडालाः हताः, दग्धपक्षाः मरालाः ।
न लीनोऽधुना सस्यशोभासु वापः न कं पीडयति दारुणो ग्रीष्मतापः ॥
६. प्रचण्डातपो वर्तते नाग दंशः ऋतु-गोपवंशेष्वयं क्रूरकंसः ।
न कस्याप्यधरसंपुटे मञ्जु लापः न कं पीडयति दारुणो ग्रीष्मतापः ॥

—श्री रामनाथ पाठकः 'प्रणयी'

अनुक्रमः

प्रपानकः	पत्रपुटम्	परिवेषकः
तनोतु मम शंतनो···	९७	श्री पूज्य श्रीधरस्वामी
श्रीमहर्षि-ज्ञानानन्द-चरितम्	९८	श्री स्व० विन्ध्येश्वरीप्रसाद शास्त्रिण।
संस्कृतोन्नयनमेव नेपालराष्ट्र-समुन्नयन-बीजम्	९९	सम्पादकीयम्
नेपाल-संस्कृत-विश्वविद्यालयस्य शोचनीयो गर्भपातः	१०१	श्री पूर्णचन्द्रशास्त्री ढुङ्गेलः
यावद् गङ्गे तव जलकणैः···	१०४	श्री देवीदत्तशर्मा वैद्य।
(२) यतिराजाः श्रीविद्यारण्य स्वामिनः	१०५	श्री स्वामी ब्रह्मानन्दः
कवीश्वराः कविता च	११२	श्री विट्ठलपन्त दफ्तरदार
भारवेः अलङ्कारविलास-वैचित्र्यम्	११३	श्री सीतानाथ आचार्यः
(११) ध्वनि-वैभवम्	११६	श्री रवीन्द्रकुमार सिद्धान्त शास्त्री
(५) प्राचीन-भारतीयाः क्रीडाः	११९	श्री डॉ० नरेश झा शास्त्री

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४१ वर्षं] वाराणसी, वैशाखः, २०३० वै० : मई १९७३ ई० [५ अङ्कः

तनोतु मम शं तनोः सपदि शन्तनोरङ्गना !

विधत्तां निःशङ्कं निरवधि समाधिं विधिरहो
सुखं शेषे शेतां हरिरविरतं नृत्यतु हरः।
कृतं प्रायश्चित्तरलमथ तपोदानयजनैः
सावित्री कामानां यदि जगति जागर्ति भवती॥ १॥

न कोऽप्येतावन्तं खलु समयमारभ्य मिलितो
यदुद्धारादाराद् भवति जगतो विस्मयभयः।
इतीमामीहां ते मनसि चिरकालं स्थितवती-
मयं संप्राप्तोऽहं सफलयितुमम्ब प्रणय नः॥ २॥

प्रदोषान्तर्नृत्यत्पुरमथनलीलोद्धतजटा-
तटाभोगप्रेङ्खल्लहरि - भुजसन्तानविधुतिः।
बिलक्रीडत्क्रोडज्जलडमरुडंकारसुभग-
स्तिरोधत्तां तापं त्रिदशतटिनी ताण्डवविधिः॥ ३॥

दरस्मित - समुल्लसद्वदनकान्ति - पूरामृतै-
र्भवज्वलनभर्जितामनिश - मूर्जयन्ता नरान्।
चिदेकमयचन्द्रिका - चयचमत्कृतिं तन्वती
तनोतु मम शं तनोः सपदि शन्तनोरङ्गना॥ ४॥

—पण्डितराजाः श्री जगन्नाथपादाः

पूर्वतोऽनुवृत्तम्

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— स्वर्गीयाः श्रीविन्ध्येश्वरीप्रसाद शास्त्रिणः —

(एकोनविंशे सर्गे)

५१. जनाख्यस्तपः-सत्यलोकौ त्रयस्ते मताः शीर्षभूता महर्लोककण्ठः ।
महेन्द्रस्य लोकोऽस्त्यसौ हृत्स्वरूपो मतौ भूर्भुवौ लोककौ नाभिभूतौ ॥
५२. अधस्तात् स्थिताः सन्ति ये सप्तलोका सुसंकीर्तिता गुह्यदेशस्वरूपाः ।
करौ लोकलोकौ पदे पादकुध्रौ सुमेरुर्मतो मेरुदण्डस्त्वमीषाम् ॥
५३. लङ्का कुमध्ये यमकोटिरस्याः प्राक् पश्चिमे रोमकपत्तनं च ।
अधस्ततः सिद्धपुरं सुमेरुः सौम्येऽथ याम्ये वडवानलश्च ॥
५४. ज्योतिःशास्त्रे गीतमास्ते मतं तत् प्रायो विद्वद्भिः परिज्ञातमास्ते ।
लङ्का चैषां केन्द्रभूता विबोध्या ज्योतिर्ज्ञानं साध्यते विद्भिरस्याः ॥
५५. लङ्काऽधुना सा कथिता मनुष्यैर्नासौ पुराणी परिचिन्तनीया ।
एतर्हि साऽन्यत्र समुद्रमध्ये कालप्रभावादभवद् विलीना ॥
५६. जनुष्मतां सर्वविधेषु वस्तुषु धरातलेऽस्मिन् विलसत्सु सर्वथा ।
प्रभावपातादमिताच्च तद्ग्रहाद् ग्रहा मताश्चेतनशक्तयोऽद्भुताः ॥
५७. सूर्योऽयमास्तेऽखिलविश्रुतो ग्रहस्तस्योदयाद् वै प्रथमं धरातले ।
सर्गादिकाले प्रबभूव वासरस्तदीय एवेति मतं विपश्चिताम् ॥
५८. काले तु तस्मिन् प्रथितैः सुधीश्वरैर्मधोः सिताऽऽद्या तिथिरस्ति मानिता ।
ततो नु तद्वासर - मास - हायनक्रमोऽभवद् भूमितले प्रवर्तितः ॥
५९. इमां धरित्रीं परितः शशी बुधः कवी रविर्भूमिसुतो बृहस्पतिः ।
शनैश्चरोऽनुक्रमतस्तथोर्ध्वगा भ्रमन्ति कक्षासु निजास्विमे ग्रहाः ॥
६०. खगोलमध्ये क्रमशस्तु ये ग्रहास्तेषां चतुर्थो दिननाथ ईरितः ।
आरभ्य सूर्याद् गणनाद् य आपतेत् परेऽह्नि तस्यैव दिनं क्रमाद् भवेत् ॥

(क्रमशः)

सम्पादकीयम्

संस्कृतोन्नयनमेव नेपालराष्ट्र-समुन्नयन-बीजम्

अस्मिन्नेवाङ्केऽस्माभिः श्री पूर्णचन्द्र ढुङ्गेल शास्त्रिणां सङ्कल्पित-नेपाल-संस्कृत-विश्वविद्यालयस्य गर्भपात-कथा प्रकाशिताऽऽस्ते, यां पठित्वा कस्यापि संस्कृतप्रणयिनश्चेतोऽतितरां खिन्नं भवेत्। शास्त्रिवर्यैरस्या दुःखद-घटनाया निवारणायाऽऽत्मनोऽभिमतं पत्रेषु प्रकाशितम्, अन्यच्च संवैधानिकमार्गेण बहु प्रयतितञ्च। किन्तु क्षोभावहा सा घटना न जातु परावृत्ता। प्रत्युत ते एव शास्त्रिणो नेपालशासनाधिकारिभिः सर्वसाधारणसंस्कृताध्यापकसुलभ - सुविधाभिर्वञ्चिताः। इतः परं किं विधुरं वक्तव्यं स्यात्? वस्तुतः संस्कृतं नाम दैवी वाक्। दैवी-सम्पदां पुरस्कर्त्री हिन्दुना सा नितरां समुपासनीया। नेपालराष्ट्रं च स्वात्मानमेकमात्रं हिन्दूराष्ट्रमित्युद्घोषयति। अतस्तस्य कृते संस्कृत-देववाणी-समुपासनं कियतोमनुपेक्ष्यतां भजते इति पृथक् वक्तव्यं नावशिष्यते। नेपालराष्ट्रस्य भूतपूर्वैः शासकैः सर्वदा संस्कृतस्य संस्कृतोपासकानां विदुषां च महता गौरवेण सर्वविधं संरक्षणं कृतम्। अत एव तद्राष्ट्रं चिरप्रतिष्ठं सदुत्तरोत्तरं समुन्नतिपथमाक्रमन्नासीत्। किन्तु यदा प्रभृति तत्र संस्कृतशिक्षार्थिभ्योऽपि शिक्षाशुल्कग्रहणस्य अनन्यराष्ट्रदुर्लभ उपक्रमः प्रारब्धः शासनेन, तद्दुष्फलमपि विविधाधिदैविकप्रकोपरूपं तद्राष्ट्रेन भुज्यते इति दृष्ट्वा सहृदयानां चेतांसि नितरां दूयन्ते। अत एव ते नेपालराष्ट्रकर्णधारान् प्रार्थयन्ते यद्भवद्भिः स्वपूर्वजानां पदमनुसृत्य संस्कृतद्रोहः सपदि परित्याज्यः, संस्कृतोन्नयनाय च प्रयतनीयमिति।

शास्त्रिणामेतेषां लेखेन ज्ञायते यत्तस्मिन् राष्ट्रे साम्प्रतम् अमेरिका - चीनप्रभृतिभौतिकतासाश्रव्रतिनां राष्ट्राणां महान् प्रमादो वरीवर्ति। ते किल वैदेशिकाः कथमपि न वाञ्छन्ति यद् भारतराष्ट्रेण सह नेपालराष्ट्रस्य हार्दिकं सम्मेलनं भवत्विति। तत्र संस्कृतोन्नयनेन भारतेन सह राष्ट्रस्य तस्य हार्दिकमैकमत्यं दृढतरं भवेदिति तेषां कल्पना। तेन च भारतप्रभावाधिक्यादेतेषां प्रभावः कूटनीतिश्च प्रायो विफला स्यात्। अत एव ते संस्कृतोन्नयनं संस्कृतविश्वविद्यालयादीनां प्रस्थापनञ्च अपव्ययरूपमिति प्रचार्य नेपालशासनकर्णधारान् सत्पथतोऽस्मात् प्रच्यावयन्तीति। यदि नामात्र किञ्चित्तथ्यं स्यात्तदा वयं सप्रश्रयं नेपालराष्ट्रकर्णधारान् निवेदयामो यद्भवद्भिः एतेषां कूटनीतिरियं सर्वथा उपसंहरणीया। अस्माकमेतत् सुदृढं मतं यद्यावत् नेपालराष्ट्रे संस्कृतदेववाण्याः दैवीसम्पत्प्रतिनिधिभूतायाः आर्यसंस्कृतेश्च सुदृढः प्रभावस्तिष्ठेत्, तावत् कोऽपि भौतिकवादी देशो राष्ट्रमिदं स्वायत्तीकर्तुं स्वीयाखण्डप्रभावे वा स्थापयितुं न प्रभवेत्। नेपालजनतासु यावान् संस्कृतस्य प्रचारो भवेत्, तावानेव तद्राष्ट्रं बद्धमूलं भवेत्। यतो हि संस्कृतवाङ्मयस्य स्वाभाविकोऽयं महिमा यत्तत् कथमपि परकीयस्वत्वमपहर्तुं नानुमनुते। तस्य सुविदिता घोषणा यत् 'सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्' इति। मूढाः खलु भौतिकताभिनिविष्टा देशाः ये किल संस्कृतमात्मनोऽहितकरं मन्वते। एतद्धि तेषामपि परं हितकरम्, तथापि ते यदि स्वार्थसाधनाय परहितं विनाशयितुं परस्वं वाऽऽहर्तुं वाञ्छन्ति चेत्तस्य नूनमिदं वाङ्मयं प्रतीपभूतम्। अतो नेपालशासनेन संस्कृतेन सहाचर्यमाणो

नेपाल-संस्कृत-विश्वविद्यालयस्य शोचनीयो गर्भपात: !

—श्री आचार्यः पूर्णचन्द्र ढुङ्गेलः—

अस्माकं परमं सौभाग्यमेतद् यत् नेपालराष्ट्रं किल जगति एकमात्रं विशुद्ध - हिन्दूराष्ट्रत्वेन विद्योतते। कामं केचन आपातदर्शिनो हिन्दुत्वं तथा-कथित-साम्प्रदायिकतासर्जकं मन्येरन्। परं तत्त्वतो विचार्यमाणे हिन्दुत्वसदृशमविशेषतो विश्वहितसाधकं सर्वधर्म-सर्वजाति - सर्ववर्ग-सर्वसम्प्रदाय - सामञ्जस्य-विधायकं तत्त्वं जगति किमप्यन्यत् भवितुं नार्हति। यतो हि एतदेव प्रतिक्षणं मानवं विश्वबन्धुताम्, विश्वात्मसु प्रतिष्ठितमैकात्म्यञ्च साक्षात्कर्तुं समुपदिशति। तस्यैवास्य हिन्दुत्वस्य संरक्षकेषु तत्त्वेषु संस्कृतवाङ्मयस्य संरक्षणमनिवार्यतां भजते हिन्दूराष्ट्रवादिनां कृते। तत्रैवायं महान् निधिर्गोपायितो वर्तते। संस्कृतवाङ्मयस्यास्य समुन्नयन-संरक्षणसाधनेषु पुनः श्रेष्ठतमं साधनं संस्कृत-विश्वविद्यालय-प्रतिष्ठापनं नाम।

अत एव नेपालाभिजनाः सुदीर्घकालतः स्वकीये राष्ट्रेऽस्य संस्कृत-विश्वविद्यालयस्य स्थापनाय प्रयतमाना सन्ति। एतदर्थं तैः अद्यावधि बहुत्र समायो-

---

विद्वेषः क्षिप्रमेव स्वात्महितं वाञ्छता परित्याज्य इत्यस्माकं तस्मै हितोपदेशः।

संस्कृत-समुन्नयनाय संस्कृत-विश्वविद्यालयस्थापनस्य समुपक्रमोऽद्यतनीयः क्रमः खलु। तथापि न वयमिदं वाञ्छामो यत् 'नाममात्रेण संस्कृत-विश्वविद्यालयं संस्थाप्य तत्र सर्वविधोऽपि व्यवसायः पाश्चात्त्यशिक्षा-विज्ञानादेरुपष्टम्भकश्चालनीयः, पाश्चात्त्यसंस्कृतेरेव सर्वाङ्गीणमनुकरणं तत्र कर्तव्यम्, तेनैव च विश्वविद्यालयस्य विश्वविद्यालयत्वं भवेदिति।' संस्कृतस्य स्वकीयं किमपि वैशिष्ट्यं विजृम्भते यदद्यावधि न कयापि भाषया तदुपष्टम्भकैर्वा देशैः समधिगतम्। तत्तु यथा-कथञ्चिदद्यापि भारते एव प्रतितिष्ठति। तस्य सर्वथा रक्षणं भाव्यम्। तद्विप्रतीपः कोऽपि स्वल्पोऽप्यनुरोधो नानुमन्यतेऽस्माभिः। संस्कृतस्य कापि अवर्णनीया संस्कृतिरस्ति या हि वास्तविकी वैश्विकी संस्कृतिः। तस्या रक्षणमेव विश्वविद्यालयस्य चरममुद्दिष्टं भाव्यम्। अतः संस्कृत-विश्वविद्यालयस्य स्वरूपं सर्वत्र न कथमपि साम्प्रतिक - विश्वविद्यालयेभ्यः सर्वथा संवादि भवितुमर्हति। तथापि साम्प्रतिक-विश्वविद्यालयानां कृते शासनेन याः किल सुविधाः साहाय्यं तत्र कार्यकर्तॄणामध्यापकानां पठतां छात्राणाञ्च यावान् गौरवः क्रियते, स सर्वोऽपि गौरवः संस्कृत-विश्वविद्यालयस्य भाव्यः येन स स्वीयमुद्दिष्टं संस्कृत - वाङ्मयस्य सर्वविधमुन्नयनं कर्तुं निराबाध सफलीभवेत्। एतादृशभावनयैव वयमपि नेपाल-हिन्दूराष्ट्रे स्वतन्त्र - संस्कृत - विश्वविद्यालयस्य अविलम्बं स्थापनं विधातुं नेपालशासनकर्णधारान् प्रार्थयामः। केनापि विरक्तेन तद्विषये पूर्वमनुमत्य ततः परं स्वीय - सहजवैराग्येण अन्येन वा कारणेन कार्यमिदं त्यक्तं चेत्तस्मिन् तादृशो रोषस्तेन शासनेन कथमपि न कार्यो येन तस्य स्वात्मनोऽपि हितं कृन्तितं स्यात्। संस्कृत-समुन्नयनं नेपालराष्ट्रस्य समुन्नतेः सुदृढं पदम्, तदवमाननं ह्रासकरणञ्च तस्यैवाऽऽत्मघातायितमिति नेपाल-शासनकर्णधारैर्दृढमवधेयम्। भगवन्तं सत्प्रेरणाप्रदं पशुपतिं प्रार्थयामो यत्स नेपाल-शासनकर्णधारान् सद्बुद्ध्या संयुनक्त्विति।

जितेषु बृहदाध्यात्मिक - सम्मेलनेषु, बुद्धिजीविसम्मेलनेषु, विद्वत्सम्मेलनेषु, पञ्चवर्गीय-सङ्घटनसम्मेलनेषु, प्रतिवार्षिक-छात्र-प्राध्यापकसम्मेलनेषु च नेकैः प्रस्तावैः संस्कृत - विश्वविद्यालय-स्थापनाय प्रार्थितम्। तेषां सर्वेषां प्रस्तावानां प्रतिलिप्यस्तात्कालिक-राष्ट्रनायकस्य नेपालनरेश श्री ५ महेन्द्र महोदयस्य सन्निधौ प्रेषिताः। तैरपि जनता-जनार्दनस्य संस्कृत - विश्वविद्यालयविषये स्वाभाविकीमुत्सुकतां श्रद्धामभिरुचिञ्च निरीक्ष्य संस्कृत-विश्वविद्यालयस्थापनामस्वीकृतिः, नामकरणं स्थाननिश्चयश्च युगपदेव समुद्घोषितः। अन्तिमे विद्वत्सम्मेलने समुपस्थितैः स्वदेशीय-विदेशीयविद्वद्भिरस्य नाम 'महेन्द्र-संस्कृत-विश्वविद्यालयः' इति निर्धारितम्। परं नेपालनरेशेन स्वनामतो देशनाम्नो गौरवं प्रदर्शयता विश्वविद्यालयस्यास्य नामकरणं 'नेपाल - संस्कृत - विश्वविद्यालयः' इत्येव अनुमतम्।

ततः परं श्री नेपालनरेशस्य आज्ञया नेपालशासनस्य शिक्षामन्त्र्यालयतो विश्वविद्यालय-व्यवस्थासञ्चालनाय समितिद्वयं (कार्यकारिणी-समितिर्महासमितिश्च) संघटितमभूत्। महासमितौ अधिराज्यव्यापिनो ३.०५। मान्याश्च जना समावेशिताः। कार्यकारिणी - समितौ प्रायो राप्त्यञ्चलस्था एव संस्कृत-संस्कृत्यनुरागिण आसन्। द्वयोः समित्योः प्रधानसञ्चालको योगिराजः श्री नरहरिनाथोऽभवत्। संस्कृत-विश्वविद्यालयस्य प्रारम्भिककार्यं हेमन्तपुरस्य बिल्वकुञ्जे महता उत्साहेन प्रारभत। विकासशीलस्य नेपालराष्ट्रस्य आर्थिकस्थिते - दौर्बल्यं पूर्वमेव प्रधानसञ्चालकेभ्यो योगिराजेभ्यो विज्ञापयता श्रीनरेशेनोक्तम्—'आर्थिकस्थितिः स्वयमेव भवद्भिर्बलिष्ठा करणीया। अस्माकं प्रत्यञ्चस्था जनता संस्कृत-विश्वविद्यालयं प्रति नूनं सानुरागा। अतस्तत्तदञ्चलजनताभ्योऽर्थसङ्ग्रहाय तत्तदञ्चलाधीशा मया विज्ञापिताः। किन्तु अर्थोपार्जनकाले भवता तत्र तत्र नूनमुपस्थेयम्। एवमेव समपीस्थो भारतदेशोऽपि संस्कृत-विश्वविद्यालयविषये श्रद्धधानोऽस्ति। तत्र महादेशे नैके श्रेष्ठिनो बिरला-टाटा-डालमिया-मोदीप्रभृतयो राजसदृशाः। तेभ्योऽपि अर्थादानं शक्यम्। अतोऽस्मिन् विषयेऽपि प्रधानसञ्चालकैर्भवद्भिर्विचारणीयमिति।

नेपालराष्ट्रे संस्कृत - विश्वविद्यालय - स्थापनस्वीकृतिः नेपालनरेशतो यदा समासादिता तदा योगिराजैः सुस्पष्टमेवोक्तं यत् शुष्का स्वीकृतिर्दीयताम्, अर्थोपार्जनं पुनर्वयमाकाश-पातालतोऽपि करिष्याम' इति। राज्ञा प्रतिवचनं प्रयच्छता उक्तम्—'एवं चेत् शुष्का स्वीकृतिरिदानीमेव दीयते। एतत्स्थापनाय महान् त्यागो भवद्भिः करणीयः। देशविदेशतः अर्थसङ्ग्रहस्य स्वीकृतिरपि दीयते। गम्यताम्, प्रयत्यताम्, संस्थाप्यताम्, सञ्चाल्यताञ्च संस्कृत-विश्वविद्यालयमि'ति। कार्यकारिणी - महासमित्योः सङ्घटनसमये योगिराजेन यत्किमपि प्रस्तारितं तत्सर्वं सर्वांशतो नेपालशासनेन स्वीकृतम्।

विद्याधनानां श्रीमतां गोरक्षनाथ-सम्प्रदायस्तम्भानां योगिराज - श्रीनरहरिनाथ - महोदयानामभूतपूर्वमुत्साहं वीक्ष्य राज्ञा महेन्द्रेण शिक्षामन्त्र्यालयस्थवरिष्ठकर्मचारिभिश्च संस्कृत-विश्वविद्यालयस्य प्रारम्भिकव्यवस्थार्थं पूर्वसङ्घट्टितां सालसां निष्क्रियां महत्त्वाकांक्षिणीमन्यथासिद्धाञ्च समितिं विघट्य योगिराजस्य प्रधानसञ्चालकत्वे नवीना समितिः सङ्घटिता।

अनया समित्या धर्मप्राणेषु नेपालीजनेषु एकोऽलौकिक उत्साह आनन्दश्च प्रसारितः। तेन स्थानीयजनेषु कैश्चित् छात्रावासनिर्माणकार्यं स्वकीयेन व्ययेन प्रारब्धम्। कैश्चित् फलपुष्पवाटिका निर्माणकार्यम्, कैश्चित् धान्यकुट्टनशाला (मिल)-दानम्, कैश्चित् टङ्कणकार्याय मुद्रणालयदानम्, कैश्चित् भूमिदानम्,

कैश्चित् धनदानम्, कैश्चित् गोदानम्, कैश्चित् पुस्तकादिदानञ्च प्रदत्तम्। अल्पीयसैव कालेन नेपाल-संस्कृत-विश्वविद्यालय-सञ्चालनप्राङ्गणे बहूनि इष्टकगृहाणि नैकाः पर्णशालाश्चादृश्यन्त। चतुःसहस्र-'बीघा'-परिमिता भूमिश्च अनायासेनोपार्जिता। सप्ताहव्यापीनि शिक्षाशिविराणि, शिक्षा प्रशिक्षा व्यवस्थापनसम्मेलनानि च सोत्साहं सञ्चालितान्यभवन्।

इयमस्ति केवलं राप्त्यञ्चलस्थानामुत्साहिजनानां वार्ता। अन्यान्यपि अञ्चलानि योगराजस्य शुभागमनं प्रतीक्षमाणान्यासन्। तत्रापि धनिकान्यञ्चलानि कोशी-मेची-नारायणी-लुम्बिनी-भेरी-गण्डकीप्रभृत्यञ्चलानि तु योगिराज-नरहरिनाथस्य स्वाञ्चले दर्शनकाल एव बहूनि अर्थ-भूम्यादि-साहाय्यानि कर्तुं व्याकुलान्यासन्। भारतदेशस्य हिन्दुत्वाभिमानिभिः श्रेष्ठिभिश्चापि संस्कृत-विश्वविद्यालयस्य कृते यथाशक्यं सहयोगं कर्तुं विचारितम्। तदर्थं काशिराजा विशेषतः प्रयत्नशीला आसन्। तत्तद्धार्मिक-संस्थान-मठाधीशानां धर्मगुरूणां शङ्कराचार्याणां श्रीमतां करपात्रस्वामिपादानाञ्च तत्र विश्व-विद्यालये ध्यानं समाकृष्टम्।

एतादृशे हिन्दुराज्ये नेपालेऽत्यावश्यकदृष्ट्या प्रारब्धस्य नेपाल-संस्कृत-विश्वविद्यालयस्य उदयकाल एव शुभघट्यां प्रधानसञ्चालकाः योगिराज-श्रीनरहरि-नाथ-महोदयाः संस्कृत-विश्वविद्यालयाय अर्थोपार्जनकार्यं त्यक्त्वा ऐतिहासिकवस्तु वेषणे दशमासान् यावत् गताः। तेषामियं कार्यान्तरव्यासक्तिः अचिरादेव मूर्तरूपतामासादयतो नेपाल-संस्कृत-विश्वविद्यालयस्य कृते महती अभिशापप्राया समभवत्। अधिकारिणः सरोषं वक्तुं प्रारभन् यत् 'शुष्का स्वीकृतिर्दीयताम्, अर्थसंग्रहः पुनः आकाशपातालतोऽपि करिष्यत एवे'ति योगिराजानां सगर्वोक्तिरिदानीं कुत्र विलीना? योगिवर्याः कुत्र सन्ति, किं कुर्वन्ति? किमर्थं वा तैः संस्कृत-विश्वविद्यालय-सञ्चालनाय प्रधानसञ्चालक-पदं स्वीकृतम्?' इति।

योगिराजानामेतेषामनया कार्यान्तरव्यासक्त्या अवसरं लब्ध्वा नेपालशासनेन नवीना शिक्षानीतिः सञ्चालिता। तदनुसारं नेपालराज्ये एक एव 'त्रिभुवन-विश्व विद्यालयः' संरक्षितः। अन्ये उदीयमाना उदेष्यमाणाः सर्वे विश्वविद्यालया निरुद्धाः। संस्कृत-विश्वविद्यालयस्य स्थाने एकं 'संस्कृत-संस्थानम्' (संस्कृत इन्स्टीच्यूट - पदवाच्यम्) एव स्वीकृतम्। प्रारम्भत एव संस्कृत-शिक्षाया तेन मूलमुन्मूलितम्। सम्प्रति यत्र कक्षायां शताङ्कमिता विदेशिभाषा निर्धारिताऽस्ति, तत्र एकाङ्कपरिमिताऽपि संस्कृत-भाषा न स्थापिता। संस्कृताध्येतृभिरपि नवीन शिक्षानीत्यनुसारं शिक्षाशुल्कं दातव्यमास्ते। भारतादि-देशेषु संस्कृताध्येतॄणां कृते शिक्षणशुल्कं न वर्तते, परं नेपाले हिन्दुराज्ये तद् दातव्यं भवतीति अहो विधेर्विडम्बनम्। इत्थं मनोनीते नेपाल-संस्कृत-विश्वविद्यालये प्रतिरुद्धे तत्र आस्थावतां जनानां पवित्रा भावना अपि नितरामवरुद्धाः विचारशीलास्तटस्था अनुभवन्ति यदनया नीत्या उदीयमानस्य हिन्दूराष्ट्रस्य नेपालस्य अकल्पितमहितमाशङ्क्यत इति।

नेपाल-संस्कृत-विश्वविद्यालयोपक्रमो नेपाले यावता उत्साहेनाभवत्, तस्येदृशोऽवरोधो जनानां रोषाय समभूत्। नवीन-शिक्षा-नीतेः समालोचनापि सर्वतोऽभवत्। मयाऽपि 'गोरखा-पत्र-विश्वात्म-दर्शन-जनजीवन-प्रभृति-दैनिक-साप्ताहिक-मासिक-पत्र-पत्रिकासु नेपालशासनस्य नीतेरस्या विरोधः कृतः। फलतः शासनेन लेखकोऽयं लाभांशतो वञ्चितोऽवमानितश्चेति बहुकष्टकरी वार्ता! उदेष्यभाषा-नेपाल-संस्कृत-विश्वविद्यालयस्य दारुणा संस्मृतिरियं कं नाम आर्य-वैदिक-सभ्यताभिमानिनं विचलितं न कुर्यात्?

नेपाल-शासनस्य कृते नेपाल-संस्कृत-विश्वविद्या-

लयावरोधविषये साम्प्रतं दूनचेतसां नेपालाभिजनानां बह्वयः किवदन्त्यः प्रचलिताः। तासु किन्नाम ग्राह्यम्, किं वा त्याज्यमित्यत्र विवेचका विचारयन्तु—

१. योगिराजस्य प्रभावशालि व्यक्तित्वं वीक्ष्यैव अर्थकार्श्येऽपि समये नेपालशासनेन विचारितं यदयं महात्मा देश-विदेशतोऽर्थोपार्जनं कृत्वा एकं संस्कृत-विश्वविद्यालयं चालयितुं नूनं समर्थः। स्वयञ्च तेन स्पष्टमुक्तं यत् एतस्य कृते शुष्का स्वीकृतिर्दीयताम्, अर्थ-संग्रहः पुनः आकाशपातालतोऽपि अस्माभिः करिष्यत एवेति। अत एव शासनेन ते विश्वविद्यालस्यास्य प्रधानसञ्चालकपदे नियोजिताः। परमेतैः योगिराजैः असमये एवं कार्यान्तरं प्रारब्धम् तेनैव रुष्टाः सर्वेऽधिकारिणस्तेषु अनास्थां प्रकटयन्तोऽचिरादुदेष्यमाणं संस्कृत-विश्वविद्यालयं निरुद्धवन्त इति योगिराजानामसामयिकी कार्यान्तरव्यासक्तिरेवसंस्कृत-विश्वविद्यालय-गर्भपाताय कारणमिति केचित् कथयन्ति।

२. अपरञ्च, केषाञ्चित् कथनमिदं यत् योगिराजो नास्ति कारणम्, किन्तु अवसरं समीक्ष्यमाणा नेपालशिक्षाक्षेत्रे लब्धस्थाना अमेरिका-ब्रिटेनराज्यगुप्तचराः संस्कृत-विश्वविद्यालयस्थगनरूपं षड्यन्त्रं चक्रुः। तत्र महद्रहस्यं निहितं वर्तते। अधिराज्यस्थजनतानां महत्या आस्थया प्रारप्स्यमाणे संस्कृत-विश्वविद्यालये सर्वाङ्गपूर्णे जाते भारतनेपालयोः सांस्कृतिकसम्बन्धस्तेन माध्यमेन उत्तरोत्तरमवर्धयिष्यत्। द्वयोर्देशयोः सम्बन्धश्च दृढतमो भवेदिति। तत्खलु तेषां नेष्टम्। अत एव तैरेव एतन्महापातकमनुष्ठितमिति।

३. अन्ये समीक्षका यथार्थदर्शिनो विचारयन्ति यत् नेपालराज्ये सञ्चालितस्य एकस्यैव त्रिभुवन-विश्वविद्यालयस्य स्नातकाः समये-समये तादृशमान्दोलनं कुर्वन्ति, यस्य समाधानं राज्यशासनस्य शिरोवेदनायितं जायते। शैक्षणिकसमस्यानामपि समाधानाय ते प्राचीनान् राजनैतिकानपि अतिशेरते। अन्येषु विश्वविद्यालयेषु तत्तद्विश्व-विद्यालयीय-स्नातकानां यादृशं ताण्डव-नृत्यं जायते तादृशमत्रापि भवेत्तदा एतद्-राज्यशासनं स्थातुं शक्नुयान्न वेति शतशो भयमार्गान् विचार्य महता उत्साहेन प्रारप्स्यमाणोऽधिराज्यजनतासु प्रासादरोऽपि नेपालसंस्कृत-विश्वविद्यालयो नेपालशासनेन स्वबुद्ध्यैव निर्दयमवरुद्धः। तथापि संस्कृत-विश्वविद्यालय-निर्माणार्थं बहुवर्षतो जनैः कृतेषु शतशः प्रयत्नेषु तुषारापातोऽतितरां कष्टकरः। प्रशासकानामिदं कार्यं कथमपि न समर्थनीयमिति मत्वा ते क्रुद्ध्यन्ति च।

४. केषाञ्चित्कथनमिदं यत् प्रारप्स्यमाणस्य नेपाल-संस्कृत-विश्वविद्यालयस्याऽज्ञानात् अवरोधे कृतेऽपि, सम्प्रति तत्र पुनर्विचारकरणाय अधिकारिणः समयं प्रतीक्षन्तो वर्तन्ते।

यद्येतत्सत्यं चेत् यथाशीघ्रमेव तादृश-समनुकूलपरिस्थितेर्निर्माणं कृत्वा पुनरयं स्वराष्ट्रोत्कर्षकरो विचारः प्रवर्तनीयो नेपाल-शासनेन। एष एव पन्था ज्यायान्, नेपालराष्ट्रस्य सर्वाभ्युदयकारकः स्थायित्वदायकश्च। अन्यथा जातायामधिकायां क्षतौ पश्चात्ताप एव हस्तगतो भवेत्। न तेन किमपि कार्यं सेत्स्यतीति दृढमस्माकमभिमतम्।

●

यावद् गङ्गे तव जलकणैः स्पर्शितो नैव कायः !

१. भोगाद् भोक्तुं हरिपदभवे धावितो मर्त्यलोके
रोगान् सर्वानपि विनिमये लब्धवान् पापशीलः।
ज्ञात्वा कण्डूं किल मनसिजं मायया वञ्चितोऽहम्, यावद् गङ्गे……

२. मोहस्तावच्चरणनिगडो जायते जन्मदात्रि
कारावासी भवति निलयस्तावदत्रैव मातः।
राग-स्तेनो हरति सुमतिं मानवस्यैव तावत्, यावद् गङ्गे……

३. क्रोधः शत्रुः स्थगयति धियं पण्डिताधीश्वरस्य
लोभ - व्यालो दशति विनयं जाङ्गलिकस्य पुंसः।
कुम्भीपाको जनयति भयं तावदेवात्र मर्त्यम्, यावद् गङ्गे……

४. मिथ्यासक्ता जगति मनुजा दूषका मातृपित्रोः
पापात्मानः कुमतिशरणाः सर्वथा मार्गभ्रष्टाः।
क्रोधैर्दग्धाः कुटिलहृदयाः कामिनः सन्ति तावत्, यावद् गङ्गे……

५. हीना व्रात्याः सुरधुनि सदा धर्मविज्ञानशून्याः
दम्भाचारा दुरितचरिताः सर्वथा स्वार्थमग्नाः।
तृष्णासक्ताः प्रकृतिमुखराः हिंसकाः सन्ति तावत्, यावद् गङ्गे……

६. उग्राः पापाश्छलबलयुता अग्निदा ब्राह्मणघ्नाः
दुष्टाः क्रूरा परधनरताः साक्षरा राक्षसास्ते।
गेहे शूराः प्रकृतिकृपणाः सन्ति तावद्धि मातः, यावद् गङ्गे……

७. विद्या व्यर्था सुरधुनि शिवे पण्डितोपासनाऽपि
धिक् धिक् कृत्वा वदति सुरजस्तं सदा कीर्तनस्थः।
नूनं वन्ध्या बहुसुतयुता वर्तते तावदत्र, यावद् गङ्गे……

८. त्यागो व्यर्थः श्रुतमथ तपो व्यर्थमेव स्वरूपं
मौनं व्यर्थं जप अपि वृथा व्यर्थं पर्वोपवासः।
धर्म-व्याख्या रहसि वसनं तावदत्रैव व्यर्थम्, यावद् गङ्गे……

९. शीलं व्यर्थं भुवि तनुभृतां सर्वसङ्गीतशास्त्रं
काव्यं व्यर्थं ललितलपनं लेखनं भाषणं च।
युक्तिर्व्यर्था प्रखरधिषणा-कौशलं कार्यमात्रे, यावद् गङ्गे……

१०. मर्त्यस्तावत् कुटिलहृदयः क्षुद्रस्वार्थे निमग्नः
चित्तोद्रेकं जननि मनुते वीतरागस्य वृत्तिम्।
ते शालीनः परममहिमा ज्ञायते नैव तावद्, यावद् गङ्गे……

—वैद्यवाचस्पतिः श्रीदेवीदत्तशर्मा, भीलवाड़ाभिजनः।

यतिराजाः श्री विद्यारण्य स्वामिनः

— श्री स्वामी ब्रह्मानन्दः —

[शोधच्छात्रः—वाराणसेय-संस्कृत-विश्वविद्यालयस्य]

लेखस्यास्य प्रथमेंऽशे विजयनगरसाम्राज्यम्, श्रीमाधवाचार्यः, माधवाचार्यो माधवमन्त्री च, माधवचार्यो विद्यारण्यश्चेति विषयाः सुसमीक्षिताः विदुषा श्री ब्रह्मानन्दस्वामिना । तत्र परतरोंऽशोऽत्र समुपस्थाप्यते ।

(२)

श्री सायणाचार्यः

श्रीसायणाचार्यो माधवाचार्यस्य अनुज आसीत् । तदुक्तं तैत्तिरीय-संहिताभाष्ये—

आदिशन्माधवाचार्यं वेदार्थस्य प्रकाशते ।[1]
स ह्याह नृपतिं राजन् सायणोऽस्ति ममानुजः ॥
सर्वं वेत्त्येष वेदानां व्याख्यातृत्वे नियोज्यताम् ।
इत्युक्तो माधवाचार्येण वीरबुक्क-महीपतिः ॥
अन्वशात् सायणाचार्यं वेदार्थस्य प्रकाशने ।

एवमेव 'अलङ्कार-सुधानिधौ' अपि सायणपरिचयः समुपलभ्यते—

महेन्द्रवन्माननीयो मन्त्री मायण-सायणः ।
मण्डलेषु कृतचारमण्डलः
सायणो भवति मायणात्मजः ।
मन्त्री मायण-सायणस्त्रिजगती मान्यापदानोदयः ॥

श्रीमत्पूर्वपश्चिमदक्षिणोत्तरसमुद्राधिपति-बुक्कराय-प्रथम - देशिक - माधवाचार्यानुजन्मनः श्रीमत्सङ्गमराजसकलराज्यधुरन्धरस्य सकलविधानभूतस्य भोगनाथाग्रजन्मनः श्रीमत्-सायणाचार्यस्य कृतौ अलङ्करसुधानिधौ···। पूर्वपश्चिमसमुद्राधीश्वरारिरायविभाल श्रीकम्पराज-महाप्रधान-भारद्वाज-वंशमौलिक-मायणरत्नाकरसुधाकर-माधवकल्पतरुसहोदर-श्रीसायणार्यविरचिते 'सुभाषित-सुधानिधौ' अपि—

भारद्वाजान्वयभुजा तेन सायणमन्त्रिणा ।
व्यरच्यत विशिष्टार्थः 'सुभाषित-सुधानिधिः' ॥

एवं श्रीमाधव-भोगनाथसहोदरस्य मायणनन्दनस्य कृतौ 'प्रायश्चित्तसुधानिधौ' अपि—

तस्य मन्त्रिशिरोरत्नमस्ति मायण-सायणः ।
तेन मायणपुत्रेण सायणेन मनीषिणा ।
ग्रन्थः कर्मविपाकाख्यः क्रियते करुणावहा ॥

'यज्ञतन्त्रसुधानिधौ' अपि—

तस्याऽभूदन्वयगुरु - स्तत्त्वसिद्धान्त - दर्शकः ।
सर्वज्ञः सायणाचार्यो मायणार्यतनूद्भवः ॥
उपेन्द्रस्येव यस्यासीदिन्द्रः सुमनसां प्रियः ।
महाक्रतूनामाहर्ता माधवार्य - सहोदरः ॥
अधीताः सकला वेदास्ते च दृष्टार्थगौरवाः ।
तत्प्रणीतेन तद्भाष्यप्रदीपेन प्रथीयसा ॥

अस्य कुलनाम 'सायण' इत्यासीदिति 'सर्वदर्शन-संग्रह'स्य प्रारम्भिकश्लोकादवगम्यते—

श्रीमत्सायणदुग्धाब्धिकौस्तुभेन महौजसा ।
क्रियते माधवार्येण सर्वदर्शनसंग्रहः ॥

एवमेव 'माधवीयधातुवृत्तेः' आदिमश्लोकेऽस्य पितुर्मायणस्यापि सायणतया समुल्लेख्यो दृश्यते ।

---

[1] कलिकातानगरे १८६० मितेशवीयवत्सरे मुद्रित-भूमिकायां 'तैलङ्ग'लिपिलिखितपुस्तकपाठभेदो दर्शितः ।

अस्ति श्रीसङ्गमक्ष्मापः पृथ्वीतलपुरन्दरः।
तस्य मन्त्रिशिखारत्नमस्ति मायणसायणः॥

एतेन सुस्पष्टमेतद् यत् सायणाचार्येण ज्येष्ठभ्रातरि भक्त्यतिशयात् प्रायः स्वनिर्मिताः ग्रन्था माधवीयतया निर्दिष्टाः। न तु माधवाचार्य-सायणाचार्ययोरैक्यम्; उक्तप्रमाणानां जागरूकत्वात्। अत एव सायणाचार्यविरचितायां माधवीयाख्यायां धातुवृत्तौ उपक्रमणिकायाम्—

तेन मायणपुत्रेण सायणेन मनीषिणा।
आख्यया माधवीयेयं धातुवृत्तिर्विरच्यते॥

सायणशब्दस्य वंशनामत्वादेव सर्वदर्शनसंग्रहे माधवाचार्यस्यापि सायणतया समुल्लेखो यथा—

श्रीमत्सायणमाधवः प्रभुरुपस्थास्यत् सतां प्रीतये।

अतः सुस्पष्टमेतद् यत् सायणाचार्यः कुलनाम्नैव प्रसिद्धि गतः, सायणो भोगनाथश्च इति पाराशरव्याख्यादौ दर्शनादित्येव मन्तव्यम्।

एवञ्च तैत्तिरीयसंहिताभाष्ये (कलिकाताराजधान्याम् १८६० ईशवीयवर्षे मुद्रिते पाठभेदेषु) 'आदिशन्माधवाचार्यं वेदार्थस्य प्रकाशने' इत्येतदुत्तरं 'स ह्याह नृपतिं राजन् सायणार्यो ममानुजः' इत्यादिदर्शनाच्च सायणस्य वंशनामत्वं कल्प्यते। अत एव केषुचिद् ग्रन्थेषु 'सायण-माधवीये' इत्यादिलेखे सङ्गच्छते कुलनाम्ना निर्देशः।

वेदभाष्यं तु न माधवाचार्येण, किन्तु तदनुजेन सायणाचार्येणैव प्रणीतम्। तथा च सायणचार्यकृते 'यज्ञतन्त्रसुधानिधौ' सायणाचार्यं प्रति सभासदामुक्तिः—

अधीताः सकला वेदास्ते च दृष्टार्थगौरवाः।
त्वत्प्रणीतेन तद्भाष्यप्रणीतेन प्रथीयसा॥

अत एव वेदभाष्ये जैमिनीयन्यायमालाश्लोकोद्धरणवेलायां 'न्यायविस्तरकार आह' इत्युक्तिः सङ्गच्छते। अत एव च वेदभाष्यादौ सायणाचार्यकृतित्वेन समुल्लेखः।

यच्च क्वचित्—

कृपालुर्माधवाचार्यो वेदार्थं वक्तुमुद्यतः।

इत्युक्तिर्दृश्यते, साऽपि ज्येष्ठभ्रातरि भक्त्यतिशयख्यापनार्था। स्वकृतेरेव तत्कृतितया समुल्लेखस्तस्मिन् भक्त्यतिशयमेव ख्यापयति।

एवञ्च यत्र 'सायणाचार्यविरचिते माधवीये' इति लेखो दृश्यते तत्तत्प्रपाठकादिपरिसमाप्तौ पुष्पिकायाम्, तत्र 'माधवाज्ञया सायणाचार्यविरचिते' इत्यर्थेन न कोऽपि दोषः। प्रसिद्धिश्च कुलनाम्ना तद्भ्रातुर्निश्चयास्पदा।

श्री भोगनाथः

माधवाचार्यस्य कनीयान् भ्राता भोगनाथोऽभवत् स खलु बित्रगुण्ट-शासनस्थप्रशस्तेः रचयिता आसीत्। तत्र भोगनाथ आत्मानं सङ्गमनरपतेः नर्मसचिवत्वेन व्यपदिशति। सायणाचार्यविरचितस्य 'अलङ्कारसुधानिधेः' परिशीलनं भोगनाथस्य सङ्गम(द्वितीय)भूपतेश्च नितान्तं स्निग्धं परिचयं प्रमाणीकरोति। तथा च तत्रत्यौ श्लोकौ—

अन्योऽन्यप्रणयापराधनिभृत-व्यापारदीप्तात्मनोः,
देवी-सङ्गमयोः पराङ्मुखतयाऽप्येकासने तस्थुषोः।
मध्ये सायणमन्त्रिणा न भणितं श्रीभोगनाथेन वा,
नोक्तं नर्मसखीजनेन च तदप्यन्योन्यमुद्वीक्षतम्॥
भूभृतः सङ्गमेन्द्रस्य भोगनाथस्य वा कवेः।
वारणां वारणो नाथ द्वारि प्रविशतां हि ये॥

एतेन प्रशस्तिलेखकस्य भोगनाथस्याऽऽसीद् अलौकिकी प्रतिभा, असाधारणञ्च नैपुण्यं कविकर्मणीति वक्तुं शक्नुमः। किन्तु तद्विरचित-सरसकाव्यग्रन्थानामलाभो नितरां खेदास्पदः।

साम्प्रतं सायणीये 'अलङ्कारसुधानिधौ' बहूनां तत्काव्यग्रन्थानामुल्लेखाद् दिष्टया वर्धतेऽयं महाकविर्भोगनाथः। सुधानिधौ निर्दिष्टाः भोगनाथीयप्रतिभोल्लासिनो ग्रन्थाः यथा—

१. रामोल्लासः । २. त्रिपुरविजयम् । ३. उदाहरणमाला । ४. महागणपतिस्तवः । ५ शृङ्गारमञ्जरी । ६. गौरीनाथष्टकम् ।

उदाहृतपद्यानामालोचनया ध्रुवं प्रतीयते यद् भोगनाथः प्रतिभासम्पन्नः कविर्बभूव । स हि माधवाचार्य-सायणाचार्ययोः सर्वथाऽनुरूपो भ्राताऽऽसीत् । तदीयाः कतिपये सरसाः श्लोकाः सहृदयहृदयोल्लासायात्र समुद्ध्रियन्ते ।

ईषन्मृष्ट-कुरङ्गनाभितिलकै-रिद्धाम्बु-घर्मोदयै-
व्यक्तीभूत-रदक्षतव्यतिकरै-र्व्याकीर्णचूर्णालकैः ।
शाम्यत्कुण्डलताण्डवैः शशिमुखीवक्त्रैस्तथाव्रीडितै-
रम्भोविभ्रमदर्पणैर्निजगदे सम्भोगलीलाश्रमः ॥

—शृङ्गारमञ्जर्याम् ।

उपर्यधोरचितसमयश्च राजतं तयो-
र्द्वयोः कनकमयं च मध्यतः ।
पुरत्रयं दहनविधेः पुराऽप्यगात्
सधूमतां सदहनतां समस्ताम् ॥

—त्रिपुरविजये ।

कष्टाय प्रसवाय शास्त्ररदनोशिष्टायकाङ्क्षानल-
प्लुष्टाय प्रथमानमत्सरगुणाविष्टासाय दुष्टात्मने ।
रुष्टाय प्रतिषिद्धकार्यघटनातुष्टाय सृष्टागसे,
गौरीनाथ गुणधिनाथ जनक प्रीणातु मह्यं भवान् ॥

—गौरीनाथाष्टके ।

उपलभ्यते ह्यन्यदावश्यकं कौटुम्बिकं सायणीयं वृत्तं तद्रचितालङ्कारसुधानिधिपद्येभ्यः । अधोनिर्दिष्टपद्येन ज्ञायते यत् सायणाचार्यस्य त्रयः सूनवोऽभवन्-कम्पणः, मायणः शिङ्गणश्चेति । तेषु कम्पणः सङ्गीतकलासु कामपि कमनीयां कुशलतामाकलयत् ।

मायणः काव्यकलावीथीपथिको गद्यपद्यरचनाचणश्चतुरः कवयिताऽभवत् । अलभत च शिङ्गणः क्रमजटाचर्याचर्चितवेदाभ्यासेषु कामपि विस्मयनीयां चातुरीम् । त्रयोऽप्येते सायणाचार्यस्य सुताः स्वस्वशास्त्रेषु प्रकृष्टपाण्डित्यमण्डिता विपश्चिदपश्चिमा बभूवुः । तथा च अलङ्कारसुधानिधौ—

तत्संव्यञ्जय कम्पण! व्यसनिनः सङ्गीतशास्त्रेषु ते
प्रौढिं मायण! गद्यपद्यरचनापाण्डित्यमुन्मुद्रय ।
शिक्षां दर्शय शिङ्गण! क्रमजटाचर्चासु वेदेष्विति,
स्वान् पुत्रानुपलालयन् गृहगतः सम्मोदते सायणः ॥

श्री विद्यारण्यस्य गुरवः

माधवाचार्यप्रणीते कालमाधवे उपोद्घाते लिखितं यद् विद्यातीर्थो भारतीतीर्थः श्रीकण्ठश्चेति त्रयोऽस्य गुरव आसन् विद्यारण्यस्वामिनः । किन्तु कस्माद् किमधीतमित्यत्र विप्रतिपत्तिरस्त्येव । तथा च—

सोऽयं प्राप्य विवेकतीर्थपदवीमाम्नायतीर्थे परं
मज्जन् सज्जनसङ्गतीर्थनिपुणः सद्वृत्ततीर्थं श्रयन् ।
लब्धामाकलयन् प्रभावलहरीं श्रीभारतीतीर्थतो
विद्यातीर्थमुपाश्रयन् हृदि भजे श्रीकण्ठमव्याहतम् ॥

—कालमाधवे ।

अत्र 'सोऽयं प्राप्य विवेकतीर्थपदवीमि'ति स्वयमभिधानाद् 'विवेकतीर्थ' इत्युपाधिर्माधवाचार्यस्य आसीदित्यवगम्यते । 'विवेकतीर्थेति पदवीमभिधामि'ति कालमाधवटीकायामपि । सोऽयं माधवाचार्यो भारतीतीर्थभिधस्य कस्यचन यतीन्द्रस्य शिष्य इति तत्कृतग्रन्थेषु बहुशो लेखदर्शनादवगम्यते ।

एतेषां गुरुः विद्यातीर्थो महान् तपःसम्पत्तिसम्पन्नो यतिराजो रुद्रप्रश्नभाष्यस्य प्रणेता परमात्मतीर्थानां शिष्यश्च बभूव । विद्यावैभवप्रभावेण विद्यातीर्थममुं महेश्वरस्यावतारत्वेन वर्णयति सायणाचार्यः सर्वेषां वेदभाष्याणामुपक्रमे—

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थं महेश्वरम् ॥

श्रीमाधवाचार्यः शृङ्गेरीमठे 'विद्याशङ्करे'ति नाम्ना विद्यातीर्थस्यैव मूर्तिं निरमापयत् । 'अनुभूतिप्रकाश'-ग्रन्थस्थोऽयं निम्नलिखितः श्लोकः स्फुटं प्रकाशयति यद् विद्यातीर्थो माधवाचार्यस्य मुख्यो गुरुरासीत्—

अन्तःप्रविष्टशास्तेति योऽन्तर्यामिश्रुतीरितः ।
सोऽस्मान् मुख्यगुरुः पातु विद्यातीर्थो महेश्वरः ॥

जीवन्मुक्तिविवेकेऽपि तेन विद्यातीर्थो महेश्वररूपेण स्वीकृतः—

जीवन्मुक्तिविवेकेन तमोहार्दं निवारयन् ।
पुमर्थमखिलं देयाद् विद्यातीर्थमहेश्वरम् ॥

—जीवन्मुक्तिविवेके: ।

'विवरणप्रमेयसङ्ग्रह'ग्रन्थस्यान्ते विद्यातीर्थगुरुपादयोः ग्रन्थसमर्पणवेळायामतीव श्रद्धा प्रकटिता विद्यारण्यमुनिना—

यद्विद्यातीर्थगुरवे शुश्रूषाऽन्या न रोचते तस्मात् ।
अस्त्वेषा भक्तियुता श्रीविद्यातीर्थपादयोः सेवा ॥

अयञ्च विद्यातीर्थयतिः श्रीभारतीतीर्थयतेर्गुरुरेव प्रतीयते । 'कालमाधव'व्याख्याता सुदर्शनमाथुर एवं वर्णयति—

व्यामूढानामिह तनुभृतां जाह्नवीतीर्थमेकं
विद्यातीर्थं प्रकृतिविमलं सद्विवेकोदयानाम् ।
सर्वेषां तु प्रथमसुखदं भारतीतीर्थमाहु-
स्तद्भावान्मे विमलमनसो निर्णये शक्तिरस्ति ॥

इति श्लोकव्याख्यायां तीर्थपदावसानानि च गुरुतरगुरुतमनामानि स्मृतानि । तथा हि वैयासिकन्यायमालायां वेदान्ताधिकरणमालादौ भारतीतीर्थस्य पद्यम्—

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।
वैयासिकन्यायमालाश्लोकैः संगृह्यते स्फुटम् ॥

जैमिनीयन्यायमालायाः सप्तमश्लोकेऽपि भारतीतीर्थस्य नतिरुपलभ्यते । एतेनापि प्रतीयते भारतीतीर्थयतिरयं श्रीविद्यारण्यस्य गुरुरिति ।

स वन्द्याद् भारतीतीर्थयतीन्द्रचतुराननात् ।
कृपामव्याहतां लब्ध्वा परार्घ्यप्रतिमोऽभवत् ॥

एवं जैमिनीयन्यायमालाचतुर्थश्लोके स्वयमेव—

इन्द्रस्याङ्गिरसो नलस्य सुमतिः
शैब्यस्य मेधा - तिथि
र्धौम्यो धर्मसुतस्य वैन्यनृपतेः
स्वोजा निमेर्गौतमः ।
प्रत्यग्दृष्टि - ररुन्धतीसहचरो
रामस्य पुण्यात्मनो—
र्यद्वत्तस्य विभोरभूत् कुलगुरु-
र्मन्त्री तथा माधवः ॥

अतो विद्यारण्यगुरुर्भारतीतीर्थः, तस्य च गुरुर्विद्यातीर्थ इति विद्यारण्यस्य परमगुरुर्विद्यातीर्थं इति सिद्ध्यति । प्रथमतो विद्यातीर्थादधिगम्य ब्रह्मभूयं गते तस्मिन् तच्छिष्याद् भारतीतीर्थादयं विद्यामधिगतवान् वेति कल्पने विद्यातीर्थोऽस्य साक्षाद्गुरुरपि सिद्ध्यति । गुरुः परमगुरुर्वा भवतु, विद्यातीर्थोऽस्य परमाराध्य आसीदित्यत्र तु न विवादावसरः ।

काञ्चीस्थशासनपत्रे माधवाचार्यः श्रीकण्ठाचार्यमात्मनो गुरुर्निर्दिशति । माधवाचार्यस्य भोगनाथस्य च ग्रन्थेषु श्रीकण्ठनाथः गुरुरूपतामादधानो बहुषु स्थलेषु समुद्दिष्टो विलसतितरामिति न परोक्षं तद्ग्रन्थ-विवेचनशीलानां विवेचकानाम् ।

भोगनाथः श्रीकण्ठं स्वीये महागणपतिस्तवे स्तौति-

मन्दारश्च तरुः परेऽपि तरवो मेरुश्च शैलः परे-
ऽप्याशैलाः कमलागृहस्थशयनं चाब्धिः परेऽप्यब्धयः।
श्रीकण्ठश्च गुरुः परेऽपि गुरवो लोकत्रयेऽप्यद्भुतं
भक्ताधीनभक्षांश्च दैवतमहो सर्वेऽप्यमी देवताः॥

शार्ङ्गपाणितनयः सर्वज्ञविष्णुरपि माधवाचार्यस्य गुरुरासीत् । पुराणसार-पराशरस्मृति व्याख्याय वेदभाष्यतः प्राक् श्रौतधर्मप्रकाशिकेयं जैमिनीयन्यायमाला विरच्य वीरबुक्काज्ञैव विस्तीर्णा माधवाचार्येण । तथा च सर्वदर्शनसङ्ग्रहे—

पारं गतं सकलदर्शनसागराणा-
मात्मोचितार्थ - चरितार्थितसर्वलोकः ।
श्रीशार्ङ्गपाणितनयं निखिलागमज्ञं
सर्वज्ञविष्णुगुरु - मन्वहमाश्रयेऽहम् ॥

वृद्धावस्थायां श्रीशङ्करानन्दतो माधवाचार्यः संन्यस्तवान्, पञ्चदश्यां विवरण-प्रमेय-सङ्ग्रहे च तस्य नतिरुपलभ्यते—

नमः श्रीशङ्करानन्दगुरुपादाम्बुजन्मने ।
सविलासमहामोह - ग्राहग्रासैककर्मणे ॥
स्वमाश्रयाऽऽन्दयद्ब्रजन्तून्
सर्वात्मभावेन तथा परत्र ।
यच्छङ्करानन्दपदं हृदब्जे
विभ्राजते तद्यतयो विशन्ति ॥

आश्रयदातारः

विजयनगराधीशानां चतुर्णां साम्राज्येऽतिगौरव-सम्पन्नं महामन्त्रिपदमभजत माधवाचार्यः सायणश्च । तेषु प्रथमो बुक्कमहीपतिरित्यासीत् । स खलु विजयनगरस्य प्रथमाधिपतेः महाराजाधिराज-श्रीहरिहरस्य भ्राताऽभवत् । अयमेव वेदार्थप्रकाशनाय मन्त्रिवरं माधवाचार्यमादिशत् । अस्यैवादेशं ज्येष्ठभ्रातृमुखेनादाय वेदभाष्यानां प्रणयनेन प्रवृत्तोऽभवत् श्रीमत्सायणाचार्यः । वेदभाष्येषु सायण आत्मानं बुक्कभूपालसाम्राज्यधुरन्धर इति बहुधा वर्णयन्ति ।

सायणेन बुक्कभूपतेरनुजस्य कम्पराजस्य (कम्पणस्य) महाप्रधानपदमधिकृतमासीदिति सुभाषितसुधानिध्यादि-ग्रन्थानामालोचनया प्रतीयते ।

कम्पणभूपतिरेष जीवत्येव ज्यायसि बुक्कण-नरपतौ आत्मनो बाहुबलेन नेल्लोर-कुड्डाप्पादिस्थले स्वतन्त्र राज्यमेकं स्वीयमस्थापयदिति भारतीयेतिहासविद आमनन्ति । दिवंगतेऽस्मिन् नरपतौ तत्सुतस्य सङ्गमनरेन्द्रस्य प्रधानामात्यपदं स्वीचकार सायणः । सङ्गम (द्वितीय)-नरेन्द्रोऽयं बाल्यकालादेव सायणाचार्यस्य शिष्यो बभूव । सायणतो बह्वीषु विद्यासु कलासु च प्रशिक्षितोऽयं सङ्गमभूपतिरगच्छत् किमपि पाटवं शासनकर्मणि ।

अधोलिखितैः श्लोकैरैतिहासिकं तथ्यमिदं स्फुटमनुमातुं शक्यते विवेकबुद्धिभिर्विद्वद्भिः—

सत्यं महीं भवति शासति सायणार्ये
सम्प्राप्तभोगसुखिनः सकलाश्च लोकाः ।

× × ×

सम्यक् शिक्षां सचिवगमितां शैशवे सायणार्यात्
प्रौढिं गाढां प्रकटयति ते सङ्गमेन्द्रः प्रयोगे ।

अन्यच्च—सायणः समुपागते स्वीये वार्धक्ये हरिहर (द्वितीय)-महाराजाधिराजस्य साम्राज्यधुरमवहदिति तद्ग्रन्थेभ्यः स्फुटमवभासते । अथर्वसंहिताभाष्ये सायणाचार्य आत्मानं श्रीमद्राजाधिराज-परमेश्वर-श्रीवीरहरिहरमहाराजस्य साम्राज्यधुरन्धरत्वेन वर्णयति । आसीदेष हरिहरमहाराजो बुक्कमहीपतेः सूनुः । हरिहरनरपतिरयं पराक्रमशाली धर्मपथपथिकः प्रजारञ्जनतत्परो वेदार्थरसिकश्चाभवत् । सायण एनमथर्ववेदसंहिताभाष्योपोद्घाते प्रशस्तं स्तौति–

विजितारातिव्रातो वीरश्रीहरिहरक्ष्माधीशः ।
धर्मब्रह्माध्वन्यः कलिं स्वचरितेन कृतयुगं कुरुते ॥
साधयित्वा महीं सर्वां श्रीमान् हरिहरेश्वरः ।
भुङ्क्ते बहुविधान् भोगानसक्तो रामवत् सुधीः ।
विजयी हरिहरभूपः समुद्वहन् सकलभूभारम् ।
षोडश महान्ति दानान्यनिशं सर्वस्य तुष्टये कुर्वन् ॥

एतेषां बुक्कप्रथम-कम्पराजसङ्गमराज (द्वितीय)-हरिहर (द्वितीय)-भूपतीनां विजयनगराधीश्वराणां साम्राज्यधूः श्रीमता सायणाचार्येण निपुणमूढेति सप्रमाणं गदितुं पार्यतेऽस्माभिः । किन्तु हरिहर-द्वितीयस्य शासनकाले माधवाचार्यो मन्त्रिपदं विहाय संन्यस्तवान् । अतो हरिहरद्वितीयेन माधवाचार्यो विद्यारण्यनाम्ना संबोधितः ।

आविर्भाव-कालः

एतेषु निर्दिष्टेषु भूपतिषु बुक्कराजः (प्रथम) वि. सं. १४०१ वर्षादारभ्य १४३६ वर्षं (१३४४ ईशवीयवर्षादारभ्य १३७९ वर्षं) यावत् विजयनगर-सिंहासनमलञ्चकार ।

तत्सूनुर्हरिहरमहाराजश्च स्वपितुर्निधनानन्तरं साम्राज्याश्रयमलभत, अशिक्षच्च १४३६ वै. (१३७९ ई०) वर्षादारभ्य १४५६ वै० (१३९९ ई०) वर्षपर्यन्तं विंशतिवर्षाणि यावत् । १३९२ वि० (१३३५ ई०) वर्षे विजयनगरस्य स्थापना माधवाचार्यस्यादेशमनुसृत्य श्रीमता हरिहर (प्रथम)-महाराजेन विहितेति वदन्ति इतिहासविदः । अतो बुक्क-हरिहरयोः प्रधानामात्यस्य माधवाचार्यस्य त्रयोदशशतकस्य अन्तिमे भागे समभवदाविर्भावो नास्त्यत्र निर्विवादे विषये सन्देहस्य कणिकाऽपि कापि । हरिहर-द्वितीयशासनकालिक-शिलालेखैर्ज्ञायते यत् शतकस्यान्तिमे भागे विजयनगरे १४४३ वैक्रमे संवत्सरे (१३८६ ईशवीये) विद्यारण्यस्वामी ब्रह्मलीनोऽभवदिति कापि जनश्रुतिरपि श्रूयते । एतदनुसारम् १३५३ वैक्रमे संवत्सरे (१२९६ ईशवीये) माधवस्य जन्माभूत् ।

एवञ्च काव्यमालान्तर्गतप्राचीनलेखमालायां चतुश्चत्वारिंशे (४४) "लेखे विजय[1]भूपतिवीरबुक्कनृपतिपौत्र (१३३८ शके) (1416 A. D.) हम्पणार्याय चेट्टुपेटाख्यं नाम ग्रामं प्रददौ" इत्यर्थके विजयभूपतेः १३३८ शके स्थित्यवगमात् तत्पितामहस्य वीरबुक्कनृपतेः स्थितिसमयः त्रयोदश-शकाभ्यन्तरे सिद्ध्यति । अत एव तन्मन्त्रिणो माधवाचार्यस्यापि त्रयोदश-शकाभ्यन्तरे एव जन्मकालः सिद्ध्यति ।[2]

बुक्कणराजकुमारो विजयनगरस्य राज्यं[3] पञ्च वर्षाणि (ई. सन् १३६५–१३८०) चक्रे इति 'लेसन्' पण्डितकथनानुसारेण प्रतीयते । किन्तु पराशरस्मृति-व्याख्या - कालनिर्णय - जैमिनीय - न्यायमालाविस्तर-यजुर्वेदभाष्य-ऋग्वेदभाष्य - सामसंहिताभाष्यं - पञ्चविंशब्राह्मणभाष्य-षड्विंशब्राह्मणभाष्य - ग्रन्थेषु राज्ञो बुक्कस्य बुक्कणस्य वा स्वस्वामित्ववर्णनेन बुक्कणो 'पञ्चभ्यो वर्षेभ्योऽधिककालं कदाचिद्राज्यं कृतवानिति संभाव्यते ।

श्री माधवाचार्यस्य (विद्यारण्यस्य) चरितम्

श्री माधवाचार्यस्य चरितमुद्दिश्य स्तोकमपि वर्णनं साम्प्रतं प्रतिभाति । तच्चरितपर्यालोचनं कस्य नास्ति विस्मयकरं गौरवावहञ्च ।

क्व सा सततशास्त्राभ्यासव्यसनिता ज्ञानपरिपाकसहजा वेदमीमांसा-वेदान्त-व्याकरण-धर्मशास्थादियुता, क्व च सा लौकिकव्यवहारनिरीक्षणसमुत्पन्ना राज्यकार्यभारक्षमा राजनीतिनिपुणता !

माधवाचार्यस्योपदेशानामेवेदं परिणतं फलं यद् यवनाक्रमणैर्विनष्टे सकले दक्षिणभारतीयप्रजावर्गे महाराजहरिहरेण गोद्विजानां संरक्षणायाध्यात्मिकसभ्यतायारुत्थानाय भारतेतिहासे विजयनगरसाम्राज्यं प्रख्यातं प्रतिष्ठापितम् । पूर्वोत्तरमीमांसयोर्विस्ताराय धर्मशास्त्रस्य च प्रचुरप्रचाराय बहुग्रन्था रचिता माधवाचार्येण (विद्यारण्यमुनिना) ।

शृङ्गेरीपीठे जगद्गुरुशङ्कराचार्याणां पवित्रं सिंहासनमलङ्कुर्वन्तः साधुमण्डलेषु ज्ञानं प्रकाशयन्तः श्रीविद्यारण्यस्वामिनो वार्धक्यमपि परेण गौरवेणाऽतिवाहयाञ्चक्रुः ।

व्यवहार-परमार्थयोरेकाश्रयत्वं नाम नूनं जगति दुर्लभतरम् । परं माधवार्ये यादृशो परमार्थविषये जागरूकता नेत्रगोचरीक्रियते, तादृश्येव लौकिकव्यवहारेऽपि चेतश्चमत्कारिणी चतुरताऽपि चक्षुर्विषयीक्रियते । एवञ्च वेदभाष्यप्रणेतुः सायणाचार्यस्य

---

[1] १. १३३८ शके (A. D. 1416) विजयभूपतेः वर्तमानत्वेन ततः प्राक् पुरुषद्वय (५० वर्षव्यवहितो) बुक्कक्षितीशसमयः १२८८ (A. D. 1366) प्रतीयते ।

[2] २. जैमिनीन्यायमालाविस्तरस्य आनन्दाश्रमग्रन्थमालामुद्रितस्य भूमिकायां (४-५) पृष्ठे ।

[3] ३. इण्डियन ऐण्टीक्वेरी, सन् १८७७ ई., पृ० १९२ ।

ज्ञानगरिमा नूनं सहजा, परन्तु विपुलवाजिगजससंकुले समराङ्गणेऽपि अरातिव्रातविजयस्तस्य कस्य विस्मयावहो नास्ति ?

हरिहर-प्रथमस्य बुक्कस्य च विजयनगर-साम्राज्य-शासनकाले माधवाचार्यो मन्त्रिपदमलंकृतवान् । हरिहरद्वितीयस्य शासकाले च स विरक्तो भूत्वा संन्यासं जग्राह, शङ्कराचार्यपदवीञ्चालञ्चकार ।

श्री सायण-चरित्रम्

श्रीसायणश्च विजयनगरसाम्राज्यस्य पूर्वविभागे नेल्लोरेति नाम्ना ख्याते प्रदेशे शासनं कुर्वतो हरिहर-महाराजानुजस्य कम्पमहीपतेर मात्यपदमलमकार्षीत्। दिवंगते तस्मिन् राजनि तत्सूनुः सङ्गमभूपालो बालतयाऽनधिगतशास्त्रतया च राज्यकार्योद्वहने नितरामक्षमो बभूव। अतः सायणाचार्य एव सङ्गमभूपालस्य कृते निखिलं राज्यभारमुद्वोढुं स्वीचकार। अध्यापयामास च पितृविहीनं सङ्गमनरेन्द्रं राजनीत्युपयोगिनीः सकला विद्याः ।

विततमपि राज्यं सायणः सम्यक्तया अशासत् । समराङ्गणेऽपि स्वबाहुबलपराक्रमं वैरिणां शिरश्छेदैः प्रकटीचकार, प्रान्तस्थान् देशांश्च बहून् जिगाय। चम्पनामानं चोलराजं विजित्य दिक्षु स्वीयां शुभ्रां कीर्तिं विस्तारयामास। 'गरुडनगरा'भिधानं नगरं सङ्गमनरेन्द्रं समाक्रम्य तञ्च जित्वा स्वपादावनतमूर्धानं व्यदधात् सायणाचार्यं इत्यपि शिलालेखस्थप्रशस्तितोऽवगम्यते । सर्वमेतद् वृत्तान्तजातम् 'अलङ्काररसुधानिधि'-निरीक्षकाणां विदुषां सद्य एव स्फुरतीति मत्वा केचनावश्यकास्तत्रत्याः श्लोकाः प्रमाणतयाऽत्र समुद्ध्रियन्ते—

जगद्वीरस्य जागर्ति कृपाणः सायणप्रभोः।
किमित्येते वृथाटोपा गर्जन्ति परिपन्थिनः॥

× × ×

अमुं शमितशात्रवस्थिरभुजावलेपोदयं
समीक्ष्य युधि सायणं समधिको भवेद्विस्मयः।
नखाग्रहतवैरिणो नरहरे - हंरस्याथवा
नवाम्बुजदलोल्लसन् - नयनमात्रदग्धद्विषः ॥

× × ×

दिष्ट्या दैष्टिकभावसंभृतमहासम्पद्विशेषोदयं
जित्वा चम्पनरेन्द्रमूर्जितयशाः प्रत्यागतः सायणः।

सायणाचार्यविहित-सुशासनसंभूतस्य सार्वत्रिकस्य वैभवस्य निदर्शकोऽयं श्लोको नैव विस्मारणीयो विद्वज्जनैः—

सत्यं महीं भवति शासति सायणार्ये
सम्प्राप्तभोगसुखिनः सकलाश्च लोकाः।

अथ राज्यभारवहनक्षमे सङ्गमभूपतौ राज्यधुरं निपुणमारोप्य सायणो ज्येष्ठभ्रात्रा माधवाचार्येण सह बुक्कनरेन्द्रस्य मन्त्रिपदमधिकृतवान् । अनन्तरञ्च तत्प्रोत्साहनैः समुत्साहितो वेदानां भाष्याणि व्यरीरचत् । हरिहरनिदेशं प्राप्य अथर्ववेद-शतपथब्राह्मणादीनाञ्च व्याख्यानानि निबबन्ध । यत्र 'सायणाचार्यविरचिते माधवीये' इत्युक्तिः परिलक्ष्यते, तत्र माधवाचार्येण वेदभाष्यप्रणयनाय प्रोत्साहितः सायणः। सर्वैरितिहासकारैः श्रीविद्यारण्यमुनिनः पाण्डित्यं प्रशंसितम् ।

श्री विद्यारण्य-चरित्रम्

श्रीविद्यारण्यमुनिलिखिते 'देव्यपराधक्षमापनस्तोत्रे' पञ्चाशीतेरधिकमायुरस्य प्रतीयते । एतदनुसारं श्रीविद्यारण्यस्य नवतिवर्षकल्पमायुर्वक्तुं शक्यते । यथा—

परित्यक्त्वा देवान् विविधविधसेवाकुलतया
मया पञ्चाशीतेरधिकमुपनीते तु वयसि।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि! कं यामि शरणम् ॥

कवीश्वरः कविता च

सदसि चमत्कारकर - श्चतुरतरश्चित्रबाण - सन्धाने ।
कोशधरोऽप्यर्थपरो रसेश्वरो जगति जयति कविराजः ॥

भृशं दोषाहर्षं भजति न च निद्रां वितनुते
विधत्ते बालानां नवमुदमलङ्कार - रचनैः ।
प्रियो यः प्रौढानां नवरसनिबन्धैकनिपुणः
सदा श्लेषैस्तुष्टो जयति सुकविर्जारसदृशः ॥

अभ्युत्तिष्ठति यां प्रति द्रुततरं लोम्नां गणः सादरं
कर्णाविर्पर्यतः सुखासनमथो पाद्यादि - पूजाविधिम् ।
नेत्रे कल्पयतः स्तवीति वदनं यां साधुवादैर्मुहुः
सा साध्वी कविता जगत्सु विदिता मान्याऽतिधन्यात्मनाम् ॥

अनर्थपदपूरिता रुचिरवृत्तहीनाऽपि यां
श्रयन्ति किल कौरवा गुरुतिरस्कृता याऽनिशम् ।
सुयोधनमतिस्तथा कुकविता तयोरुत्तमा
मतिर्मम मता यतो भवति कर्णसन्तोषदा ॥

'सुश्लोक-लाघव'तः

—श्री विट्ठलपंत दफ्तरदार

अयञ्च माधवाचार्यो हरिहर-बुक्कादिमहाराजाधिराजानां कुलगुरुरासीदिति प्रसिद्धिस्तत्कृतं पराशरमाधवे दरीदृश्यते । यथा—

प्रत्यग्दृष्टिररुन्धतीसहचरो रामस्य पुण्यात्मनो
यद्वत् तस्य विभोरभूत् कुलगुरुर्मन्त्री तथा माधवः ।[1]

राज्यकार्यऽस्तव्यस्तोऽपि भूत्वा वेदशास्त्रार्थपरिचिन्तनेन दुरुहतमविषयाणां प्रतिपादनं निरतिशयं वैशिष्ट्यं माधवाचार्यस्य ।

१४२५ वैक्रमे संवत्सरे (१३६८ ईशवीये) तत्कालीनशिलालेखैर्ज्ञायते यत् बुक्कस्य शासनकालस्यान्तिमे भागे माधवाचार्येण संन्यासाश्रमो गृहीतः । १४२६ वैक्रमे संवत्सरे (१३७९ ईशवीये) बुक्कस्य मृत्युरभूत् । माधवाचार्यः स्वाश्रयदातरि दिवं गते तदीयामात्यपदं विहाय संन्यासाश्रममलञ्चकार । अतोऽनुमीयतेऽशीतिवर्षपर्यन्तं माधवाचार्यो मन्त्रिपदेऽध्यतिष्ठत । तदनन्तरं संन्यासं ग्रहीत्वा शृङ्गेरीमठशङ्कराचार्यस्य सिंहासनशोभामवर्धयत् ।[1]

१४४१ वैक्रमे (१३८४ ईशवीये) संवत्सरे तत्कालीनताम्रपत्रेलिखितमस्ति यद्विद्यारण्यानुग्रहात् हरिहरेण विपुलं ज्ञानं प्राप्तम् । १४४२ वैक्रमे (१३८५ ईशवीये) हरिहरद्वितीयस्य पुत्रश्चिक्कराय: (आरजस्य) शासको भूत्वा विद्यारण्यस्वामिने भूमिं ददौ । अग्रिमवर्षे १४४३ वैक्रमे संवत्सरे (१३८६ ईशवीये) विद्यारण्यस्वामी पाञ्चभौतिकं कलेवरं त्यक्त्वा ब्रह्मनिर्वाणपदं जगाम ।

माधवाचार्यस्य प्रसिद्धा रचनाः माधवीयधातुवृत्तिः, पराशरमाधवः, कालमाधवः, जैमिनीयन्यायमाला, सूतसंहिताटीका, सर्वदर्शनसङ्ग्रहः, शङ्करदिग्विजयश्च ।

विद्यारण्यस्याद्वैतपरकग्रन्थास्तु पञ्चदशी, विवरणप्रमेयसंग्रहः, जीवन्मुक्तिविवेकः, अनुभूतिप्रकाशः, अपरोक्षानुभूतिटीका, बृहदारण्यकवार्तिकसारः, ब्रह्मविदाशीर्वादपद्धतिः, उपनिषद्दीपिका चेति ।

---

[1] पाराशरमाधवस्य चतुर्थाध्यायीय-चतुर्थश्लोकोऽयम् ।

[1] डा० बलदेवोपाध्यायकृत 'आचार्य सायण और माधव', हिन्दी-भाषीयग्रन्थ, पृष्ठ १४९ ।

भारवेः अलङ्कारविन्यास-वैचित्र्यम्

— श्री सीतानाथ आचार्यः —

[एम० ए०, काव्य-व्याकरणतीर्थः]

सादृश्यमूलका अलङ्कारा यथा प्राधान्येन वस्तुस्वरूपं भावविशेषं वा सम्यक्तया प्रकाशयन्ति तथैव अर्थान्तरन्यासादयः समर्थ्य - समर्थक-भावोपजीव्या अलङ्कारा वक्तव्यं युक्तेः सुदृढभित्तिभूमौ संस्थापयन्ति। काव्ये यद्यपि कविहृदयस्य महनीयाभिव्यक्तिः लभते प्राधान्यम्, तथापि न सा युक्तिविरहिता। रसोत्तानिता हृदयावेगधारा स्वच्छन्दत एव युक्ति-परम्परापरिचुम्बिनी सती समाप्नोति आनन्दमयीमात्मगतिम्। अतः समर्थ्य-समर्थकभावमूलकाः कतिचन अलङ्कारा बुद्धि विद्योतयन्तः काव्यास्वादं हृद्यतरं कुर्वन्ति।

समर्थ्य-समर्थकभावश्च अलङ्कारशास्त्रे सामान्य-विशेषरूपतया कार्य-कारणभावतया च समुपलभ्यते। एवञ्च द्वैविध्यमर्थान्तरन्यासालङ्कारे परिव्याप्यते इति विश्वनाथस्य मतम्। तथाचोक्तं तेन—

सामान्यं वा विशेषेण विशेषस्तेन वा यदि।
कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते।
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः॥

काव्यप्रकाशकारमते तु केवलसामान्य-विशेषभाव एव अर्थान्तरन्यासोऽलङ्कारः; कार्यकारणभावे पुनः काव्यलिङ्गम्। उभयत्र अर्थान्तरन्यास-मुररीकुर्वता विश्वनाथेन अनयोः अलङ्कारयोः कार्य-कारणभावस्य पार्थक्यमेवं प्रकाशितम् :

> 'तथा हि, अत्र हेतुस्त्रिधा भवति—ज्ञापको निष्पादकः समर्थकश्चेति। तत्र ज्ञापकोऽर्थान्तरन्यासस्य विषयः, निष्पादकः काव्यलिङ्गस्य, समर्थकोऽर्थान्तरन्यासस्य इति पृथगेव कार्यकारणभावेऽर्थान्तरन्यासः काव्यलिङ्गात्।'

किन्तु कस्तावद् हेतुः समर्थकः, कश्च निष्पादकः इत्यस्मिन् विषये अन्तरान्तरा विदुषामपि मतानैक्यं परिदृश्यते। अतः प्रकाशकारमतमेव समीचीनतया प्रतिभाति। रसगङ्गाधरकृतापि एतदेव समर्थितम्। तथा चोक्तम्—

> सामान्येन विशेषस्य वा विशेषेण सामान्यस्य यत् समर्थनं तदर्थान्तरन्यासः।…… यत्तु कारणेन कार्यस्य कार्येण वा कारणस्य समर्थनमिति भेदद्वयमर्थान्तरन्यासस्य अलङ्कारसर्वस्वकारो व्यरूपयत्। तन्न; तस्य काव्यलिङ्गविषयत्वात्।'

साम्प्रतं भारवेः काव्यात् कतिचन उदाहरणानि समुल्लिख्य समालोच्यन्ते।

भारविप्रयुक्तेषु अलङ्कारेषु विशिष्टमेकं स्थानमधिकृत्य देदीप्यते अर्थान्तरन्यासः। एतदलङ्कारद्वारा कविः लीलया सामान्याद् विशेषं विशेषाद् वा सामान्यं गतागतीकरोति। वक्तव्यञ्च सुदृढायां युक्तिभूमौ प्रतिष्ठापयति। तद्यथा—दुर्योधनराज्यशासनपद्धतिं वर्णयता वनेचरेण युधिष्ठिराय एवमुच्यते—

प्रलीनभूपालमपि स्थिरायति
प्रशासदावारिधि मण्डलं भुवः।
स चिन्तयत्येव भियस्त्वदेष्यती-
रहो दुरन्ता बलवद्विरोधिता॥

अत्र दुर्योधनो युधिष्ठिराद् भयमाशङ्कते इत्यर्थो विशेषरूपः, दुर्योधन-रूपव्यक्तिविशेषगतत्वात्। स च प्रासङ्गिकत्वात् समर्थ्यः। सर्व एव बलवद्भिः विरुन्धाना भीतास्तिष्ठन्तीत्यर्थः सामान्यरूपः, सर्वजन-साधारणत्वात्। स चात्र समर्थकः। अनयोः विशेष-सामान्यार्थयोः समर्थ्य-समर्थकभावभित्तिक-सम्मिलने पूर्वार्धार्थः सौकर्यं साधयति। तथा हि, पूर्वार्धेन प्रतिपादिता दुर्योधनस्य समृद्धिः तस्य निर्भीकतामेव सूचयेदिति पाठकचित्तगता चिन्ता सहसा श्लोकस्य तृतीयपादार्थेन व्याहता जायते। ततः पाठकानां विस्मयजनयित्री दुर्योधनचरित्रगता भयाशङ्का चतुर्थ-चरणार्थेन सोपपत्तिका क्रियते। अतः इयमलङ्कार-सृष्टिः सर्वथा सार्थकतां भजते।

अपि च, शारदस्य गगनस्य सौन्दर्यं वर्णयता कविनोच्यते—

पतन्ति नास्मिन् विशदाः पतत्रिणो
धृतेन्द्रचापा न पयोदपङ्क्तयः।
तथापि पुष्णाति नभः श्रियं परां
न रम्यमाहार्यमपेक्षते गुणम्॥

कथं नाम बलाकानां तथा इन्द्रधनुःसमन्वित-मेघानां विरहेऽपि नभसस्तथा सौन्दर्यातिरेक इति वस्तुविशेषविषयणी जिज्ञासा कविना सम्पूरिता सुन्दरवस्तु-सामान्यस्वभावचित्रोपन्यासेन। तद्यथा—'न रम्यमाहार्यमपेक्षते गुणम्।' तथा हि, प्रकृत्या रम्यं वस्तु आत्मनैव रम्यतामातनोति। औपचारिकं सौन्दर्यसम्पादकं वस्त्वन्तरं तत्र निष्प्रयोजनमेव। अतोऽत्रापि सामान्यं विशेषस्य समर्थकम्।

वल्कलपरिहितायाः प्रकृत्या रम्याकृतेः शकुन्तलायाः शोभां समर्थयता कविवरेण कालिदासेनापि सदृशमेव सामान्यमुपन्यस्तम्—

किमिव हि मधुराणां मण्डनं नाकृतीनाम्।

विशेषेण सामान्यस्य समर्थनरूपेऽर्थान्तरन्यासेऽपि तुल्यमेव कृतित्वं कवेः प्रतिभाति। तथा च किरात-भूपतिना सह उपदिश्यमानं सख्यं निराकुर्वता तपस्यमानेन अर्जुनेन वनेचर एवमुक्तः—

वयं क्व वर्णाश्रमरक्षणोचिताः
क्व जातिहीना मृगजीवितच्छिदः।
सहापकृष्टैर्महतां न सङ्गतं
भवन्ति गोमायुसखा न दन्तिनः॥

हीनजातित्वात् किरातभूपतिः अर्जुनस्य सख्यं नार्हति, एतदेव मूलं वक्तव्यम्। अत्र तृतीयचरण-स्यार्थः सामान्यरूपः। प्राकरणिकत्वात् स एव समर्थ्यः। चतुर्थं चरणं शृगालहस्तिरूप-प्राणिविशेषविषयकम्। अत एतद् विशेषरूपम्। तदेवात्र समर्थकम्।

अवधिमनपेक्ष्य दुर्योधनः सपद्येव पराजेतव्य इति प्रतिपादयतो भीमसेनस्य उक्तिषु एकतमा—

मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्तयते स्वयं हतैः।
लघयन्खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः॥

अत्र द्वितीयार्धं सामान्यम्, सामान्येन सर्वेषां महतां व्यवहारस्य प्रतिपादनात्। तदेव च प्रासङ्गिकम्, यतः तादृशेषु महत्सु। एकतमो भीमो युधिष्ठिरो वा इति वक्तुराशयः। प्रथमार्धसमुपस्थापितं मृगराज-वृत्तं विशेषरूपम्। तदेव चात्र समर्थकम्। एवमत्र विशेषेण सामान्यस्य समर्थनं जातम्।

इदमत्रावधेयम्—आदौ समर्थ्यं समुपस्थाप्यते। ततश्च समर्थकमुपन्यस्यते। इयमेव साधारणी रीतिः। परन्तु अत्र आदौ समर्थकम्। ततः समर्थ्यम्। नानेन कापि सौन्दर्यस्य हानिः। तथाचोक्तं पण्डितराजेन जगन्नाथेन—

"अत्र हि प्रतिज्ञाहेत्ववयवयोरिवाकाङ्क्षा-क्रमप्राप्तं समर्थ्य-समर्थकवाक्ययोः पौर्वापर्यमिति न मन्तव्यम्। न ह्यत्र समर्थकं सामर्थ्यातुपपत्त्यु-

त्यापितायामाकाङ्क्षायां सत्यामेवाभिधीयते इत्यस्ति नियमः। अनुपपत्तेरभावेऽपि प्रतीति-वैशद्यार्थं कविभिस्तथाभिधानात्। एवञ्च वैपरीत्येऽपि न दोषः।"

सामान्येन विशेषार्थस्य समर्थनं किरातार्जुनीय-काव्ये भूम्ना समुपलभ्यते। ते च सामान्यभूता श्लोकांशाः सहृदयैः तथा समादरेण गृहीताः येन ते प्रवचनरूपतां गताः। तेषु जागतिकसत्यस्य सुमहान् प्रकाशः परिलक्ष्यते। तेषु कतिचन उदाहरणानि यथा—

विश्वासयत्याशु सतां हि योगः। (३.३१)

सुदुर्लभे नार्हति कोऽभिनन्दितुं प्रकर्षलक्ष्मीमनुरूपसङ्गमे।
(४.४)

न हीङ्गितज्ञोऽवसरेऽवसीदति। (४.२०)

अविज्ञातेऽपि बन्धौ हि बलात् प्रह्लादते मनः। (११.८)

न्यायाधारा हि साधवः। (११.३०)

सामान्य-विशेषभावौ मिथः सम्बद्धौ। तथा च **निर्विशेषं हि सामान्यं भवेच्छषविषाणवत्**। किञ्च सामान्ये हि सर्वेषां विशेषाणामन्तर्भावः। एवं मिथः सापेक्षयोः अनयोः सामान्यविशेषयोः समर्थ्य-समर्थक-भावेन अलङ्कारे उपस्थापनं काव्यसौन्दर्यं वर्धयति-तराम्। अपि च—काव्ये हि विशेषोऽर्थो भावो रसो वा कविना परिवेशितः स्वकीयं विशेषत्वं समुत्तीर्य सहृदयस्यापि व्यक्तिविशेषस्वरूपं विस्मारयन् सामान्यात्मना परिणमन् लोकोत्तरं चमत्कारं प्रयच्छति। अतः काव्यस्य सामग्रिकदृष्ट्या सामान्य-विशेषभावस्य विद्यते विलासगौरवम्। तस्यैव सखण्डो विलासः तादृशभावमूलकेषु अलङ्कारेषु वैचित्र्यं परं जनयति।

अस्यैव समर्थ्य-समर्थकभावस्य पुनरुन्मेषो दृष्टान्तालङ्कारे परिदृश्यन्ते। किन्तु तत्र न सामान्यविशेष-भावः। तत्र वाक्यद्वयं प्रायेण विशेषरूपेणैव प्रतिभासते। उक्तञ्चापि दर्पणकृता—

"अत्र समर्थ्यसमर्थकवाक्ययोः सामान्यविशेष-भावोऽर्थान्तरन्यासः, प्रतिवस्तूपमादृष्टान्तयोस्तु न तथेति भेदः" इति।

द्वितीये सर्गे भीमं सान्त्वयता युधिष्ठिरेणोक्तम्—

अणुरप्युपहन्ति विग्रहः प्रभुमन्तःप्रकृतिप्रकोपजः।
अखिलं हि हिनस्ति भूधरं तरुशाखान्तनिघर्षजोऽनलः॥

अस्यायमाशयः—ये किल राजानः स्वजनाश्च साम्प्रतं कौरवं दुर्योधनमनुसरन्ति, ते काले तस्यैव दुर्व्यवहारेण विचलिताः क्रुद्धा भविष्यन्ति। स च अन्तःप्रकृतिसम्भूतः कोपः सामान्यतमोऽपि शक्तिमन्तं दुर्योधनं विनाशयिष्यति। लघुरपि वृक्षाणां सङ्घर्षणेन जातः अग्निः समग्रमेव पर्वतं दहति। परार्धगतेन दृष्टान्तेन पूर्वार्धगतोऽर्थः समर्थ्यते। मल्लिनाथमते अत्र दृष्टान्तोऽलङ्कारः। यथोक्तं तेन—"अत्र उप-मानोपमेयसमानधर्माणां प्रतिबिम्बतया निर्देशेन दृष्टान्तालङ्कारः।"

केचिदत्र प्रतिवस्तूपमालङ्कारमाहुः। अनयोर्द्वयो-रलङ्कारयोः भेदनिर्देशः सत्यमेव दुष्करः। प्रतिवस्तूप-मायामेक एव धर्मः, दृष्टान्ते तु समान एव धर्मः। तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वं समानत्वम्। कुत्र समानत्वं कुत्र वा एकत्वमिति विचारो व्यक्तिभेदेन भिन्नः स्यात् चेत् नहि तद् विस्मयावहम्। यो वा को वा भवतु अलङ्कारः, सौन्दर्यं सर्वथा अव्याहत-मेवात्र। तच्च गम्यमौपम्यमुपजीव्यलब्धरूपम्।

ध्वनि-वैभवम्

—श्री रवीन्द्रकुमार सिद्धान्तशास्त्री—

(११)

सर्वेषामेव सुविदितेयं सुप्रसिद्धोक्तिः—

कालिदासस्य सर्वस्वमभिज्ञान - शाकुन्तलम् ।
तस्यापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ॥

समग्रं चतुर्थमङ्कं व्याप्य विराजते खलु काचित् अनिर्वचनया विरहव्यापारवर्णना । अस्य विरहव्यापारस्य नितरां चित्तविक्षेपकारित्वान् नाटकान्तरेषु चैवंविधस्य व्यापारस्य सुष्ठु विनिवेशाभावदर्शनात् शाकुन्तलीयोऽयं चतुर्थोऽङ्कः सर्वोत्तमतां याति। यः खलु विरहभावश्चतुर्थाङ्कस्य वैभवमुत्पादयति, स तु सहृदयजनमात्रसंवेद्यो नितरां चित्तविक्षेपकारी च । यद्यपि विविधवर्णनाप्रभवैर्विभिन्नैरनुभवैर्नानाविधैश्च स्मरणादिभिर्भवति भावस्यास्य सङ्घटना ; तथापि समुदयेन विद्यते भावस्यास्य तावदेकत्वमेव । एतस्यैव सुतरामेकीभूतस्य भावस्य विपुलं चित्तविक्षेपकारित्वमिति वस्तुतो ध्वनिरेवायम् । अतो वक्तुमर्हामो वयं यत् शाकुन्तले नाटके चतुर्थाङ्कगतो ध्वनिरेव तदङ्कस्य नाटकस्य च श्रेष्ठतामुत्पादयतीति ।

अस्मिन्नेव चतुर्थेऽङ्के विद्यते पुनः केचन श्लोका नितरां चित्तोन्मादकराः । तेषु च श्लोकचतुष्टयस्यैव सर्वोत्तमत्वं परिकल्प्यते विबुधधुरन्धरैः। यद्यपि श्लोकानामेषां गणनायां विद्यते कथञ्चिन्मतभेदः ; तथापि तादृशास्य मतभेदस्य ग्राहकजन-मनोभाव-पार्थक्यहेतु-मात्र-कारणत्वान्नास्ति तेन काव्यस्य कापि हानिः । चतुर्णां तेषां श्लोकानामन्यतमो यथा—

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः
पीडयन्ते गृहिणः कथन्नु तनयाविश्लेषदुःखैर्नवैः ॥

श्रुतिपथमायातेऽस्मिन् श्लोके सञ्जायते चेतसि सहृदय-जनानुभवनीयः कश्चन चित्तविक्षेपको भावः। जन्मतः प्रभृति पितुर्गृहे पाल्यते तनया । पितृगृहमेव सा स्वकीयमिति मन्यते तदानीम् । तत्रत्या वृक्षास्तडागादयो मनुष्याः पशवश्च सर्वे एव तस्याः स्वकीयतां यान्ति । भ्रातृभिर्भगिनीभिः सखीभिर्ज्ञातिभिश्च भवति सततमेव नितरामान्तरिकी हृद्यता तस्याः । तरलमतिरियं बाला न चिन्तयति कदापि, सर्वानेतान् विहाय परगृहस्य स्वीकरणाय यास्यति सा कदाचिद्दूरदेशमिति। माता, पिता, बन्धवश्च जानन्तोऽपि सत्यमेतत् स्नेहविमूढबुद्धयस्तस्यामेव बालिकायां नितरां स्निह्यन्ति। अथ प्राप्ते विवाहोचितवयसि यदा सा बाला परगृहं प्रेष्यते, कीदृशी समवस्था भवितुमर्हति तदा मातुः पितुर्बन्धुवर्गस्य च चेतसीति विभावनीयमेतत् सुधीभिः।

एतेषु च परिजनेषु तदानीं रोदिति कश्चिद् विरहवेदनया; अपरश्च व्यथामिमां सोढुमसमर्थः संज्ञामेव विजहाति । अपरे च नितरामश्रुभाराक्रान्तैर्लोचनैस्तामवेक्षन्ते । सापि बाला सर्वेषामेतेषां स्नेहानुरञ्जनं चिन्तयन्ती, तेषां विरहवेदनाञ्च सोढुमपारयन्ती क्वचिद् विलपति, क्वचिदश्रूणि मुञ्चति, क्वचिद् वा मूर्च्छां याति । सर्वथा सम्पर्करहितोऽपि कश्चिज्जनो व्यापारमिममवलोक्य नेत्रवारि निरोद्धुं न शक्नोति। परगृहे कीदृशं सुखं दुःखं वा भविष्यतीति चिन्ता पुनर्बालिकायास्तद्बन्धुवर्गस्य च विरहव्यथामिमां विपुली-

करोति । एष एव व्यापारो विघटते तावदद्य वा कालान्तरे वा प्रतिगृहम् । आबाल्यं तपोनिरतस्य विज्ञान-विधृतमनसो विषयवैराग्य-सुदृढचित्तवृत्तेरपि मुनेश्चित्तमेतादृश्या वेदनया व्याकुलीभवति । अहो ! कथन्नाम गृहस्थधर्मपरायणा इतरजनास्तत्र चित्तं धारयितुं शक्नुयुः ? चित्तविक्षेपकारितेयं श्लोकादिप्रतिपाद्ये ध्वन्यर्थं एव विराजत इति सत्यं तदङ्गीकर्तव्यमेव संवेदनशीलैर्भावुकैः ।

एवमेव शाकुन्तलीयश्चतुर्थाङ्कगतोऽपरः श्लोकः—

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रवृत्तिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥

अनेनापि श्लोकेन स्मार्यते काचिन्मनोऽभिरामा लोकातिशायिनी समवेदनापरम्परा । वृक्ष-शकुन्तला-व्यापारमासाद्य सर्वलोकसाधारणी काचिद् विरह-वेदना स्मृतिपटमारोहति श्रोतुः श्लोकस्यास्य वाच्यार्थ-ज्ञानादनन्तरमेव । सा च वेदना न खलु सर्वथा परकीया; यतो व्यथाक्लिष्टेऽस्मिन् जगति सर्व एव जनका एवंविधया वेदनया कथञ्चित् पीड्यन्ते । नापि इयमात्मगता; वृक्षशकुन्तला-संवादमुखेन तस्या वर्णनात् । अतस्तावदेतस्या अपि वेदनाया ज्ञानं भवति पूर्ववदेव । एवमनिर्वचनीय-वेदनापरम्परा-विज्ञानमेवात्र ध्वनिः । एतस्य चित्तविक्षेपकारिता तु सहृदयजनमात्रसंवेद्या । एवमन्यत्रापि ध्वनेः सुमहान् विभवस्तत्तद्व्यापार-कलापमवलम्ब्य विराजत इति भाव्यमेतत् सहृदयैः ।

अन्यश्च उत्तमः श्लोकस्तत्रैव यथा—

उग्गलिअ-दब्भकवला मिई परिच्चत्त णच्चणा मोरी ।
ओसरिअ-पण्डुपत्ता मुअन्ति अस्सूविअ लदाओ ॥

अस्य संस्कृतानुवादो यथा—

उद्गलितदर्भकवला मृगी परित्यक्तनर्तना मयूरी ।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः ॥

शकुन्तलायाः पतिगृहगमनकाले काचिद्धरिणी सख्यादिभिः परिवृतां तां सहसा समवलोक्य स्वभावत एव स्वकीयं वदनमुत्तोलयामास । झटिति वदनोत्तोलन-वशात्तदानीं वदनात्तस्या दर्भकवलं भूमौ पतितम् । महाकविर्मन्यते स्म—शकुन्तलाया विरहव्यथां सोढुमक्षमा हरिणी तस्या दर्भकवलं मुमोचेति । काचित् मयूरी च तदानीं निवृत्तनर्तनासीत् । कवेर्मते तु सापि शकुन्तलाविरहदुःखादेव नर्तनाद् विरराम । सहसा लताभ्यः शुष्काणि जीर्णानि च पत्राणि भूमौ निपेतुः । अत्रापि मन्यते स्म कविः—शकुन्तला-विरहदुःखेन भृशं व्यथितास्ता लताः अश्रुकल्पानि पत्राणि विमुच्य समवेदनामिव प्रकाशयामासुरिति ।

अत्र तावदितरजन्तूनां मृग्यादीनां पतत्रिणाञ्च मयूर्यादीनां तथैव सम्यगचेतनानां लतानामपि शकुन्तला-विरहदुःखेनैवं दुःखितत्वं झटिति समुत्पादयति सहृदयस्य चेतसि "नितरामसह्यमासीत्तदानीं शकुन्तलाया विरहदुःखमि"त्येवं ध्वन्यर्थम् । उदितमात्र एवास्मिन् ध्वन्यर्थे तत्समकालमेव तज्जनिता काचित् सहानुभूतिरपि द्रुतं तरलयति सहृदयस्य चित्तम् । एतावता च जायते समवेदनानुभवसम्भूतः कश्चन चमत्कारितातिशयः सहृदय-हृदये ध्वनेरेव वैभवादिति नास्ति सन्देहावकाशः । ध्वनिवशादेव च विज्ञेयः श्लोकस्यास्य नितरामुत्कर्षः ।

केचन वदन्ति—

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टि-परिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥

इति श्लोक एव श्लोकचतुष्टयमध्ये तृतीय इति ।

अस्यापि श्लोकस्य वाच्यार्थज्ञानादनन्तरमेव समुपजायते श्रोतृणाञ्चेतसि कश्चन मनोऽभिरामोऽर्थः येन नितरामभिभूयते चित्तम् । इतरजन्तुरपि मृगशिशु-

स्नेहपरायणां शकुन्तलां मातरमिव मन्यते स्म । तेन च शकुन्तलाया आश्रमपरित्यागसमये सोऽपि स्नेहातुर इव तस्या गमने बाधामुत्पादयितुं प्रवृत्तः । समग्रोऽयं व्यापारस्तावदेवार्थतामापद्य झटिति भासते यदा श्रोतुर्मनसपटे, तदा तु लोकातिशायिना चित्तचमत्कारातिशयेन सर्वाण्येव भावान्तराणि विदूरीभवन्ति तस्य चित्तात् । केवलं वत्सलमेव रसं विचिन्तयन् तद्भावभावितचेतास्तिष्ठति क्षणं स सहृदयस्तदानीम् । एवं सञ्जातोऽयं सम्मिलितोऽर्थः खलु ध्वनिरेव, नान्यः । पूर्वोल्लिखिते प्राकृतभाषामये श्लोके पशुपक्षिजडानां सर्वेषामेव भावान्तरवर्णना दृश्यते । अत्र श्लोके तु केवलं पशोः स्नेह इति पूर्वोक्त एव श्लोकः श्रेयानित्यस्माकं मतम् ।

तत्र च बहुभिः स्वीकृतश्चतुर्थः श्लोको यथा—

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने,
भर्त्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥

एष खलु श्लोको नितरामुत्तममुपदेशं वहतीति नास्ति सन्देहः । लोकातिशयचमत्कारात्मकस्तु कोऽप्यर्थो नात्र तावदवगम्यते मादृशैः । तेन च चमत्कारात्मकस्य ध्वन्यर्थस्याभावान्न खल्वस्माभिः श्लोकमिमं चतुःश्लोकीमध्ये गणयितुमिष्यते ।

ननु तर्हि कस्तावद् भवत्सम्मतश्चतुर्थः श्लोकः, इति चेदुच्यते—

यात्येकतोऽस्तशिखरं पतिरोषधीनाम्,
आविष्कृतोऽरुणपुरस्सर एकतोऽर्कः ।
तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां
लोको नियम्यत इवैष दशान्तरेषु ॥

इति चतुर्थाङ्कगतः श्लोक एवात्र चतुर्थश्लोकरूपेण पठनीयः । एतद्विस्तरस्तु पश्चात् वक्ष्यते ।

भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः ॥[1]

श्लोकस्यास्य चतुर्थचरणं व्यञ्जनावृत्त्या स्मारयति निखिलमतीतं क्लेशराशिं द्रुपदराजसुतायाः । यथा खलु सा दुर्योधनेन स्वकीयमूरुं प्रदर्श्य वृतं तस्या असह्यमपमानमित्येतत् सर्वं सहृदयस्य श्रोतुश्चित्तपटमारुह्य नितरामुद्वेजयति तम्, जायते च लोकातीता चित्तचमत्कारिता तदीये चेतसि । श्लोकप्रतिपाद्यो ध्वन्यर्थ एव चमत्कारिताया अस्या जनक इत्यहो वैभवं ध्वनेः ।

यदि त्रिलोकी गणनापरा स्यात्
तस्याः समाप्तिर्यदि नायुषः स्यात् ।
पारे परार्धं गणितं यदि स्याद्
गणेय-निःशेषगुणो हि स स्यात् ॥[2]

नैषधीयेऽस्मिन् श्लोके श्रुतिपथमायाते तस्य वाच्यार्थज्ञानादनन्तरमेव निषधराजस्याशेषगुणवत्तायाः काचन स्मृतिर्जायते सहृदयस्य श्रोतुश्चेतसि । तेन च परिपूर्यते तस्य चित्तं केनचिदनिर्वचनीयेन भावेन तत्सम्भूतेन च चमत्कारातिशयेन । श्लोकस्यास्य हृदयग्राहितासम्पादने तावदेतदेव कारणमिति ध्रुवमङ्गीकर्तव्यं लोकातीतसामर्थ्यं ध्वनेः ।

मदेकपुत्रा जननी जरातुरा इति श्लोकस्य वाच्यार्थज्ञानादनन्तरं जायते हंसपरिवारस्य चित्ररूपः कश्चन ध्वन्यर्थः । तेन च समुत्पद्यते सहानुभूतिसूचिका काचित्तरलता चित्तस्य । ध्वनिसम्भूतेयं तरलतैव नितरामार्द्रीकरोति सहृदय-मानसम् ।

(क्रमशः)

---

[1] किराताऽर्जुनीयम् १.२८ ।

[2] नैषधीयचरितम् ३.४० ।

प्राचीन-भारतीयाः क्रीडाः

— डॉ० नरेश झा शास्त्री —

(५)

मृगया-क्रीडा

आवैदिककालाद् भारते क्रीडेयं प्रचलति। इयम् 'आखेट'नाम्नाऽपि सुप्रथिता। यथोक्तं कथासरित्सागरे (३.२)—

एकस्मिन् दिवसे तस्मिन् राजन्याखेटकं गते।

शुक्लयजुर्वेदे **मृगयुभ्यश्च वो नमः**[1] अथर्ववेदे च **मृगः स मृगयुस्त्वम्**[2] इत्येताभ्यां निर्देशाभ्यामस्याः वैदिकत्वं सुस्पष्टम्। पाणिनेः **दक्षिणेर्मा लुब्धयोगे**[3] इति सूत्रेण सर्वसाधारणव्याधस्यापि मृगयुत्वं **पक्षिमत्स्यमृगान् हन्ति**[4] इत्यनेन च मृगातिरिक्तपक्षिमत्स्यघातिनोऽपि मृगयवः सिद्ध्यन्ति। एवमेव **सपत्रनिष्पत्रादतिव्यथने**[5] इति सूत्रेण मृगयायाः विशेषबाणोल्लेखः। सपत्रबाणस्य वेधे उपयोगः निष्पत्रस्य चान्यत्रापि वेधो भवेदित्याशया प्रयोगो जायते स्म। इमानि सूत्राणि विरच्य पाणिनिना तात्कालिकी मृगयापद्धतिः सूचिता।

स्मर्तव्यमत्र शतपथब्राह्मणम् (५.१.५.२), यत्र वैदिके काले पाशो जालं वा प्रसार्य पक्षिणः गृह्यन्ते स्म। वैदिकवाङ्मये लुब्धकस्य संज्ञा 'निधापतिः' आसीत्।[6]

मृगयालक्षणं च राज्ञा रुद्रदेवेन श्यैनिकशास्त्रे प्रोक्तं यथा—

आमिषाद्यर्थसंसिद्ध्यै नैकोपायैः सुखाय च।
हिंसनं प्राणिमात्रस्य मृगयेति प्रचक्षते॥[7]

पुरा क्षत्रियादिषु विशेषतो राजसु राजकुमारेषु चास्याः क्रीडायाः विशेषः प्रचार उपलभ्यते। तद्यथा वाल्मीकीये रामयणे (१.१८.२७)—

यदा हि हयमारूढो मृगयां याति राघवः।
अथैनं पृष्ठतोऽभ्यैति स धनुः परिपालयन्॥

तथैव अध्यात्मरामायणेऽपि (१.१.६३)—

अश्वारूढो वनं याति मृगयायै सलक्ष्मणः।
हत्वा दुष्टान् मृगान् सर्वान् पित्रे सर्वं न्यवेदयत्॥

उभयत्र अश्वमारुह्य मृगयार्थं गमनं सिद्ध्यति। अत्र 'दुष्टान् मृगान्' इति पदाभ्यां सिंहादेर्हिंसकपशूनां ग्रहणम्। विशेषतो 'मृग'शब्देन च चतुष्पादवन्यपशवो गृह्यन्ते। तथा च पद्मपुराणे सुदेवायाश्चरित्रवर्णनप्रसङ्गे (भूमि० ४२.८-९)—

गङ्गारण्यं समासाद्य मृगयां क्रीडते सदा।
सिंहान् हत्वा वराहांश्च गजांश्च महिषांस्तथा॥
क्रीडमानस्य तस्याग्रे वराहश्च समागतः।
बहु शूकरयूथेन पुत्रपौत्रैरलङ्कृतः॥

एतेन ज्ञायते यत् पुराणकाले मेध्या पशवः एव हन्यन्ते स्म, यथोक्तं श्रीमद्भागवते (४.२६.१०)—

शशान् वराहान् महिषान् गवयान् रुरुशल्यकान्।
मेध्यानन्यांश्च विविधान् विनिघ्नन् श्रममभ्यगात्॥

अत्र 'गवयान्' इति पदेन गौर्न ग्राह्या 'गोसदृशो गवयः' इति न्यायशास्त्रप्रसिद्धेः गवयो गवाकृतिविशेषो 'नील गाय' इति भाषायामुच्यते। तथैव 'श्रममभ्यगादि'त्यनेन मृगयाक्रीडया व्यायामोऽपि संसूचितः। रामायणेऽपि आखेटो व्यायामरूपेण स्वीकृतः। तदुक्तं वाल्मीकीये रामायणे (२.६३.२०-२१)

तस्मिन्नतिसुखे काले धनुष्मानिषुमान् रथी।
व्यायामकृतसङ्कल्पः सरयूमन्वगां नदीम्॥
निपाने महिषं रात्रौ गजं वाभ्यागतं मृगम्।
अन्यद् वा श्वापदं किञ्चिज्जिघांसुरजितेन्द्रियः॥

मृगयापद्धतिस्तु इयम्—आखेटको गूढपादो गोधाङ्गुलित्राणयुतो धनुरादिसहितः वने गत्वा कुत्रचिन्निलीनस्तिष्ठेत्। तत्रान्यैः सहवर्तिभिर्महता कोलाहलेन 'अयं मृगो याति, पलायते हन्तव्य एव' इति प्रतिबोधितः मृगादिपशून् दृष्ट्वा क्वचिद्धावमानः क्वचिदुत्पतन् तान् हन्ति मृगयुरिति। यथोक्तं पद्मपुराणोत्तरखण्डे (माघमा० १.१.१८)

---

[1] वा० सं० १६.१७। [2] अथर्व० १०.१.२६।
[3] अष्टाध्यायी० ५.४.१२६। [4] तत्रैव ४.४.३६।
[5] तत्रैव ५.४.६२। [6] ऋग्वेद ३.४५.१;९.८३.४।
[7] श्यैनिकशास्त्रम् ३.२।

दिलीपो भूभुजां श्रेष्ठो मृगयारसिको भृशम् ।
उपानद्गूढपादस्तु........................ ॥
बद्धगोधाङ्गुलित्राणो धनुष्पाणिः सरीसृपः ।
हन्यतां हन्यतामेषो मृगो वैषः पलायते ॥

क्वचिद्धावमानो यथा—

पुत्रो हिरण्यगुप्ताख्यो मृगयायै गतोऽभवत् ।
अश्ववेगात्प्रयातस्य कथंचिद् दूरमन्तरम् ॥[1]

क्वचिच्च श्वसहायेनापि क्रीडैषा प्रवर्तते—

श्वानः श्वभ्रे वने तस्मिंस्तस्य वर्त्मसु वागुराः ।
सा श्वायुधैकसिद्धेऽभूत्प्रक्रिया मृगयारसे ॥[2]

अपि च सुभाषितरत्नभाण्डागारे मृगयाचित्रणं यथा—

मार्गं देहि पदं निधेहि निभृतं तं शब्दमाकर्णय
श्वानं वारय कन्दलात् कलकलः कोऽयं सखे तावकः ।
इत्यन्योऽन्यमनेकधा मृगवधव्यापारपारङ्गमै-
र्व्याधैकोऽप्यधिकोरसः प्रतिपदं जल्पद्भिरुत्पाद्यते ॥[3]

श्यैनिकशास्त्रे तु अष्टविधा मृगया वर्णिता यथा—

आश्वीनान्या सजालान्या काल्यान्या यावशी परा ।
सापेक्षान्या पदप्रेक्षा तथा श्वगणिकापरा ।
श्येतपाताष्टमी चैताः क्रमेण परिकीर्तिताः ॥[4]

राज्ञा सोमेश्वरेण पुनः मानसोल्लासे 'मृगयाविनोद' इति शीर्षकमवलम्ब्य विशेषतो राज्ञां 'मृगयाविनोदो' वर्णितः । निम्नलिखिताः त्रिशद्विधा मृगया राजसम्मता मताः[1]—१. पानीयजा, २. चारजा, ३. क्षेत्रजा, ४. मार्गजा, ५. ऊषरजा, ६. दीपमृगया, ७. विष्टपाश्रया, ८. वध्रजा (जालवेत्रजा), ९. काण्डपटजा (वृक्षशाखाभिरास्तृत्य), १०. मञ्चजा, ११. भूमिगेहजा, १२. बलीवर्दतिरोधाना, १३. महिषरोहोद्भवा, १४. अश्वजा, १५. चित्रजा, १६. शारीरी, १७. स्तम्भनी, १८. वायुजा, १९. दमनोत्पन्ना, २०. गौरिजा, २१. कोपसम्भवा, २२. कामजा, २३. ध्वनिजाता, २४. मदविकारजा, २५. नीहारजा, २६. पाशजाता, २७. जालजा, २८. यन्त्रसंभवा, २९. व्याघ्रमोक्षणसम्भूता, ३०. कवलदानजा च । ततः परं मृगयोपयुक्तस्थानानि वर्णयन् स आह यत् 'तद्वनं वृक्षपरिपूर्णं निष्कण्टकं समतलभूभागं वापीतडागादिपूर्णं सुमधुरफलयुक्तपादपं दुष्टप्राणिशून्यं भवेत् ।[2] यथा च—

पर्वतैरुन्नतैर्युक्ता गह्वरैः कन्दरैर्युक्ता ।
मातङ्ग-सर्प-बहुला वर्जनीयाऽटवीन्नृपैः ॥[3]

एवमेव मृगयायामवस्थाविशेषे त्याज्यानां विवर्ज्यपशूनां विषयेऽपि च संसूचितं श्यैनिकशास्त्रे (७.२८.२९)—

निमज्जनाज्जलस्या-ऽन्तःप्रवेशाच्च बिलान्तरे ।
गवयस्याच्छभल्लस्य व्याघ्रस्य महिषस्य च ॥
खड्गस्य मृगयात्यर्थं प्रमादबहुला यतः ।
तस्मादेषा विवर्ज्या स्यात् धीमतां पृथिवीभुजाम् ॥

अपि च—

शिवा-जम्बुक-मार्जार-कोक-मूषिकसम्भवा ।
कुत्सिता मृगया भूपैर्वर्जनीया विनोदने ॥

अशोकसाम्राज्ये तु मृगयाक्रीडा पूर्णतः प्रतिबन्धिताऽऽसीदिति व्यायामप्रकरणे सूचितमेव । तदनन्तरञ्च हिंसकजन्तूनामेव वध इति संशोधनेन प्रचालिता क्रीडेयमद्यापि भारते जीवति । क्वचिच्च सा बलारोग्यप्रदायिका चोक्ता । भिन्न-भिन्न कालिककृतमृगयायाः गुणान् वर्णयन् तत्फलश्रुतिश्च वर्णयति श्रीरुद्रदेवः ।

युक्त्या शरदि सेवेत यथाच्छन्दं हिमागमे ।
वसन्ते तु प्रकर्षेण बलारोग्यमभीप्सुभिः ॥

अपि च—

धनुर्वेदाभ्यासः समविधिरनूनश्च लघुता,
गतेर्गात्रोत्साहः तुरगविहृतौ चातिपटुता ।
तथा नीतेर्योगे रसपरिचयश्चाप्यनुपमो
मृगव्यायां क्षात्रो गुणसमुदयोऽभ्यस्यत इव ॥

(क्रमशः)

---

[1] कथासरित्सागर प्र० लं०, पञ्चम तरङ्ग, ७९-८० ।

[2] तत्रैव ४.१.१५ ।

[3] सुभाषिरत्न० पुष्पाकरकवेः मृगयावर्णनम्, ३ ।

[4] श्यैनिकशास्त्रम् ३.१४-१६ ।

[1] मानसोल्लास ४.१५.१४४६—५० ।

[2] तत्रैव ४.१५.१४३६—४१ ।

[3] तत्रैव ४.१५.१४३३ ।

विक्रेयाणि बहुमूल्यानि पुस्तकरत्नानि

गृहं स्वर्गीकर्तुं मानवजीवनञ्च सफलयितुं वाणीपुस्तकमालातः महापरिषदः महामण्डलसंस्थानस्यच प्रकाशितानि निम्नलिखितपुस्तकानि विक्रयार्थं प्रस्तुतानि। विशेषविवरणाय सूचीपत्रं नियमाश्च पत्रप्रेषणेन समासादनीयाः।

१. भारतधर्म-समन्वय	...	१-५०	२७. तीर्थं और देवपूजन-प्रश्नोत्तरी	...	०-२५
२. परलोक-तत्त्व	...	२-५०	२८. स्मरणी	...	०-६२
३. कठोपनिषद्	...	३-००	२९. स्त्री-पुरुष-विज्ञान	...	०-३७
४. धर्मतत्त्व	...	२-५०	३०. श्राद्ध और परलोक-विचार	...	०-३७
५. वेदान्तदर्शन	...	१-५०	३१. धर्म-विज्ञान प्रथम, द्वितीय, तृतीय, ५) ४)		४-००
६. हिन्दूधर्मका स्वरूप	...	०-३७	३२. श्रीमद्भागवत, एकादश स्कन्ध	...	३-५०
७. तत्त्वबोध, सजिल्द	...	१-००	३३. सती धर्म और योगशक्ति	...	०-३७
बिना जिल्दका	...	०-७५	३४. अन्तःकरण-विज्ञान	...	०-७५
८. आदर्श देवियाँ प्रथम भाग	...	२-२५	३५. निर्मूल आक्षेपोंका उत्तर	...	०-३७
,, ,, द्वितीय भाग	...	२-५०	३६. परलोक-प्रश्नोत्तरी	...	०-२५
९. सती सदाचार	...	१-५०	३७. श्रीमद्भगवद्गीता प्रथम भाग	...	४-००
१०. कर्म-रहस्य	...	२-५०	,, ,, द्वितीय भाग	...	३-५०
११. केनोपनिषद्	...	१-५०	३८. मनुष्य-धर्म	...	०-३७
१२. ईशावास्योपनिषद्	...	१-००	३९. धर्मकल्पद्रुम प्रथम खण्ड	...	६-००
१३. सप्तशती (दुर्गा) गीता, सजिल्द	...	३-००	,, द्वितीय खण्ड	...	३-००
,, दफ्ती जिल्द	...	२-२५	,, तृतीय ,,	...	३-५०
१४. सदाचार-प्रश्नोत्तरी	...	०-३७	,, चतुर्थ ,,	...	५-००
१५. व्रतोत्सव-कौमुदी	...	१-३७	,, पञ्चम ,,	...	३-५०
१६. हिन्दू-संस्कृति-समीक्षा	...	०-५०	,, षष्ठ ,,	...	४-००
१७. धर्म-प्रवेशिका	...	०-७५	,, सप्तम ,,	...	३-५०
१८. पूजा-प्रार्थना	...	०-६२	,, अष्टम ,,	...	४-००
१९. गायत्रीमन्त्र-टीका	...	०-२५	४०. प्रवीण दृष्टिमें नवीन भारत (प्रथम खण्ड)		२-००
२०. आचार-चन्द्रिका	...	१-००	,, ,, (द्वितीय खण्ड)		२-००
२१. कन्या-शिक्षा-सोपान	...	०-२५	४१. नवीन दृष्टिमें प्रवीण भारत	...	१-२५
२२. गजेन्द्र-मोक्ष	...	०-३७	४२. साधन-चन्द्रिका	...	१-७५
२३. महिला-प्रश्नोत्तरी	...	०-५०	४३. शास्त्र-चन्द्रिका	...	१-७५
२४. व्रतोत्सव-चन्द्रिका	...	५-००	४४. धर्म-चन्द्रिका	...	१-६५
२५. धर्माधर्म-प्रश्नोत्तरी	...	०-२५	४५. पातञ्जल-योगदर्शन (हिन्दी भाष्य)	...	३-००
२६. सुलोचना	...	०-६२	४६. कर्ममीमांसा-दर्शन (सम्पूर्ण)	...	१२-००

व्यवस्थापक : वाणी-पुस्तकमाला, आर्यमहिला हितकारिणी महापरिषद्, जगतगंज, वाराणसी

पञ्जीकृत-संख्या—एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५ सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगतगंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४८

❀

अङ्कः ६

❀

सम्पादकः
गो० न० वैजापुरकरः

❀

जून
१९८२

❀

वार्षिक-मूल्यम्
५) रूप्यकाणि

❀

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

❀

ध्येयसाधना चिरं वर्धताम् !

●

जगदखिलं कुर्वती पावनम् ।
त्रस्तहृदय - माशा - परिपूर्णम् ।
भारतीय - संस्कृति - विज्ञानम् ।
गङ्गाधाराऽनिशं प्रवहताम् ॥ १ ॥

अनया संप्रेरितो जनोऽयम् ।
क्रियात् तनुमनोधनमिह हव्यम् ।
देशभक्तिसुव्रतं च भव्यम् ।
अगणितानाघातान् सहताम् ॥ २ ॥

भीतिरिमान् नो नैव स्पृशतु ।
स्वार्थलालसा न विचालयतु ।
विशुद्धहृदयं प्रगति - र्भवतु ।
जगद् धन्यवादान् सन्तनुताम् ॥ ४ ॥

जीवन-पुष्पं समर्प्य चरणे ।
मातृभूमितो वरमिमं वृणे ।
वैभवममृतं तवाऽस्तु भुवने ।
आस्तां देहोऽयं वा माऽऽस्ताम् ॥ ४ ॥

—कविवरः श्री० भा० वर्णेकरः

धार्मिकाध्यात्मिक संस्कृत-विद्यापीठ-परीक्षाणां कार्यक्रमः

वाराणसी । अखिलभारतीय-धार्मिकाध्यात्मिक-संस्कृत-विद्यापीठस्य परीक्षामन्त्री सूचयति यत् १९७२ वर्षीयाणां विद्यापीठ-परीक्षाणां कार्यक्रमो निम्नलिखितो विद्यते । सर्वाणि परीक्षाकेन्द्राणि तदनुसारमेव परीक्षाकार्यं सम्पादयन्तु । परीक्षानन्तरञ्च अचिरादेव उत्तरपुस्तकानि कार्यालये प्रेषयन्तु ।

समस्ताः परीक्षाः प्रातः ७ वादनतः १० वादनं यावत् भविष्यन्ति ।

दिनाङ्कः २८–७–'७२ ई०	:	प्रथमा, मध्यमा, शास्त्री, आचार्य-परीक्षाणां अनिवार्यं धार्मिक-पत्रम् ।
,, २९–७–'७२ ई०	:	सर्वासां परीक्षाणां द्वितीयम् अनिवार्यं पत्रम् ।
,, ३०–७–'७२ ई०	:	,, ,, तृतीयं पत्रम् ।
,, ३१–७–'७२ ई०	:	,, ,, चतुर्थं पत्रम् ।
,, १–८–'७२ ई०	:	शास्त्रीपरीक्षायाः आचार्यपरीक्षायाश्च पञ्चमं पत्रम् ।

●

अनुक्रमः

●

प्रधानकः	पत्रपुटम्	परिवेषकः
महानुभाव-शक्ति-स्तवः	१२१	श्रीमन्तः अमृतवाग्भवाचार्याः
श्रीज्ञानानन्द-चरितम्	१२२	श्री स्व० विन्ध्येश्वरीप्रसादशास्त्रिणः
समर्जिता राष्ट्रैक्यभावना कथं सुस्थिरा भवेत् ?	१२३	सम्पादकीयम्
(१) ईश्वरस्य वेदैकवेद्यत्वम्	१२५	श्री गङ्गेश्वरानन्द स्वामिपादाः
पाश्चात्त्य-संस्कृतविदुषां संस्कृतपद्यानि	१३३	श्री वे० राघवन् महाभागाः
भारवि-मान-मर्दनम् (एकाङ्किनाटकम्)	१३६	श्री देवीप्रसाद पन्तः
(१) ध्वनि-वैभवम्	१४२	श्री रवीन्द्रकुमार सिद्धान्तशास्त्री
जय जय मेघकवे !	१४३	श्री उमाशङ्करशर्मा त्रिपाठी
द्वे समस्ये	आवरणतृतीयपृष्ठे	श्री रामनारायणदत्त शास्त्री

●

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन् ।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः ॥

४७ वर्षे] वाराणसी, ज्येष्ठः २०२९ वै० : जून १९७२ ई० [५ अङ्कः

महानुभाव-शक्ति-स्तवः

प्राक् सर्गतोऽपि परतोऽपि च मध्यदेशे सांसर्गिकेऽत्र सकले परिपूर्णरूपा ।
नैसर्गिकी परशिवाकृतिबिन्दुबीजं वैसर्गिकी जयति शक्तिरनन्तवीर्या ॥ १ ॥
अस्मीतिमात्र - भरिताखिलविश्वभावा बोधाभिनन्दन-समुच्छलितात्मरूपा ।
शान्ताऽपि घोरतर - घोरतमस्वरूपैराभाति सङ्कलितपञ्चविधप्रपञ्चा ॥ २ ॥
यस्याः स्वतन्त्रकलनाकलिता विचित्रा ज्ञानावलीवलयमूलमतीव सूक्ष्मा ।
इच्छाभिधा हृदि झगित्यवभासमाना नित्या विराजतितरां शिवभूतिभूता ॥ ३ ॥
यावत्क्रियाप्रचयपुष्टि - निदानभूता ज्ञानाभिधा शिवतनुः श्रुतिशास्त्रमूलम् ।
इच्छाविकासफलितं हृदयं क्रियायाः सर्वत्र सा विजयतेऽवतु सा समस्तम् ॥ ४ ॥
आब्रह्म-कीट-हृदयेष्वनुभूयमाना सर्वेषु कार्य-करणेषु विराजमाना ।
शम्भोः प्रसिद्धतमवर्ष्मविकासभूमिः प्रीणातु सन्ततमियं सुभगा क्रियाख्या ॥ ५ ॥
चिदानन्दाशंसा विदिकृतिमयी भावसुभगा
कला धन्या कन्या जयकृतिरनन्या शिवगुरोः ।
दधानैन्द्रीं भूतिं हिमकिरणशौक्लीं तनुरुचि
प्रभां सौरीं सोमामृतकवलिनी पातु जयिनी ॥ ६ ॥

— श्रीमन्तः अमृतवाग्भवाचार्यपादाः —

पूर्वतोऽनुवृत्तम्

श्रीमहर्षि-ज्ञानानन्द-चरितं महाकाव्यम्

—स्वर्गीयाः श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः—

(अष्टादशे सर्ग)

६१. समुद्रयात्रा बहुभिर्महाजनै - रनुष्ठिताः सन्ति सदा पुरा युगे ।
स ईश्वरो दाशरथिः सरित्पतिं ललङ्घ मर्यादित - धर्मपालकः ॥
६२. तैः पाण्डुपुत्रैरपि धर्मरक्षकै - रटाप्यमानैर्भुवि चाऽर्जुनादिभिः ।
अन्यैरनेकै - र्निजधर्मभीरुभि - रुल्लङ्घितोऽसावसकृत् पयोनिधिः ॥
६३. महात्मभिः शाश्वतधर्मसेविभि - श्चिरन्तनैः सत्पुरुषैः प्रवर्तितम् ।
समाश्रयेन्मार्गमतन्द्रितः पुमान् महर्षयो धर्मकृतश्च मन्वते ॥
६४. स्वधर्मरक्षासु दृढव्रतैर्नरैः समुद्रपारं यदि गम्यते तदा ।
न दोष इत्यस्ति मतं विपश्चिता - मसङ्ख्यकानां परिदृश्यतेऽधुना ॥
६५. शास्त्राब्धिमन्थो विबुधो महामहोपाध्याय आज्ञापितवान् सदाशिवः ।
'कल्यापदो - धर्मसमस्व' - नामके ग्रन्थे महत्येष गतिं पयोनिधेः ॥
६६ ग्रन्थे तदीये परिशिष्टभागके प्रख्यात - विद्वद्वरनाम - मुद्रिता ।
आचार्यवर्यैरपि या समर्थिता व्यवस्थितिश्चाब्धिगमे विलोक्यते ॥
६७. श्रीराजनाथाभिध - भूसुरोत्तमो विद्वद्वरो मैथिलदेश - विश्रुतः ।
श्रुति - स्मृति - प्राज्ञवरो महामहोपाध्याय - विख्यातपदेन भूषितः ॥
६८. समुद्रयात्रां विधिवत् प्रकुर्वति, सुश्रोत्रिय - ब्राह्मणवंश - जन्मनि ।
श्रीमैथिलप्रान्त - महाजनेश्वरे विदेशयात्रा - विनिर्वर्तिते सति ॥
६९. प्रदाय शास्त्रीय - शुभव्यवस्थां स प्राज्ञराड् दोषविशोधनार्हाम् ।
चकार शुद्धिं मिथिलाधिपस्य तत्रत्यविज्ञैरपि चादृता सा ॥
७०. गङ्गाधरिः स तिलकोऽपि च मालवीय - श्चान्येऽप्यनेकविबुधा निजमातृभूमेः ।
कल्याणकारि-शुभवासनया महान्तो जग्मुः समुद्रमतिलङ्घ्य बहून् विदेशान् ॥

(क्रमशः)

सम्पादकीयम्

समर्जिता राष्ट्रैक्यभावना कथं सुस्थिरा भवेत् ?

'बङ्गला-देश'स्य स्वातन्त्र्याभियानावसरे जायमाने भारत-पाकिस्तानसङ्घर्षेऽस्माकं भारतराष्ट्रेण स्वकीयादर्शानुरूपो यादृशोऽभूतपूर्वो विजयः समासादितः, स सर्वेषां सुविदितचर एव। यतो हि स विजयोऽखिलेन राष्ट्रेण एकीभूय महता उत्साहेन, धैर्येण, पौरुषेण दूरदृष्ट्या सर्वस्वसमर्पणेन च समासादितः। अतः सोऽग्निदिव्यपूतः संवृत्त इति वक्तुं शक्यते। 'अग्निदिव्य'शब्दोऽयं भाषान्तरीयोऽपि अग्निपरीक्षापरिपूतार्थकत्वेन अस्माभिरत्र रूढ्या परिगृह्यतेः। एवञ्च अग्निपरीक्षया परिपूतयाः कस्या अपि व्यक्तेः राष्ट्रस्य वा पूर्वतनीयं सर्वमप्यागः शमितमिति मन्यते। भविष्यति च तेन केवलं प्रगतिशीलः सन्मार्ग एवावलम्ब्येत इत्यप्याकाङ्क्ष्यते। दृशाऽनया विचार्यमाणे नूनं कस्यापि राष्ट्रभक्तस्य चेत इदं निर्णेतुं समुत्सुकं स्याद् यदत्रान्तरे किमस्माकं राष्ट्रेण प्रशस्तेऽस्मिन् पथि द्वित्राः क्रमाः क्रान्ता न वेति ? अद्य वयमस्मिन्नेव विषये किमपि ताटस्थेन विचारयिष्यामः।

वस्तुतस्तस्मिन् युद्धकाले यथा एकैकस्य भारतमातुः पुत्रस्यान्तरं यादृशमेकात्मकं दृशोर्विषयमभवत्, नूनं तत् पञ्चविंशतिवर्षेभ्यः समासादितस्य स्वातन्त्र्यस्य पिण्डीभूतं सुकृतमेव उच्येत। यदि नाम तादृशमैकात्म्यं वर्षैकमपि युद्धोत्तरकाले सुस्थिरं स्यात्तदा राष्ट्रस्य तस्य प्रगतिशिखरं हस्तामलकायितमेव वक्तव्यं भवेत्। किन्तु दौर्भाग्यात् तादृशीं स्थितिं राष्ट्रेऽस्मिन् नावलोकयामः। प्रत्युत तद्विपरीतैव अवस्था यत्र तत्र दरीदृश्यते। सत्यमेतत् यद् राष्ट्रस्य विजयश्रेयः केन्द्रीयशासनम्, तदीयप्रधानमन्त्रिणञ्चैव समलङ्करोति। किन्तु तदर्जयिता राष्ट्रस्य प्रत्येको जन एव, न केवलं केन्द्रीयं शासनं प्रधानमन्त्री वा। अतस्तेन 'मयैवायं विजयः समासादितः, मदीयैकप्रज्ञाविजृम्भितम्, किंवा मदीयसङ्घटनस्यैवेदं पौरुषम्' एतादृशोऽवलेपः कथमपि न कार्यः। यथा चेदमभूतपूर्वं राष्ट्रैकात्म्यं मूर्ततां समासादितम्, तत्प्राणपणेन निरहङ्कारतया मुधा कस्यचन चेतोवैरस्यमजनयता स्वात्मनि च वास्तविकसमस्तराष्ट्रप्रतिनिधित्वं भावयता शासनेन परिरक्षणीयमिति हि राजनयिकी दूरदर्शिता।

अन्यच्च, अवसरेऽस्मिन् ये नाम प्रत्यक्षमप्रत्यक्षं वाऽस्माकं परिपन्थिनः स्फुटतां याताः, तैः सह तथैव व्यवहर्तव्यमित्यपि वर्तते राजनीतिविदः शासनसूत्रधारस्य कर्तव्यम्। समासत इदं वक्तुं शक्यं यदस्मन्नेतृभिः मित्रशत्रोर्यथावद् विवेकः करणीयः, संयमश्च विधेयः। यथा च राष्ट्रस्य आत्मनिर्भरता प्रसार्येत, तथा प्रयतितव्यम्। यथा च समस्तः प्रजाजनः सौलभ्येन अन्न-वस्त्र-निवास-चिकित्सा-शिक्षादिकं जीवनयात्रानिर्वाहकं वस्तुजातमासाद्येत, तथा दृढया निष्ठया प्रयतनीयम्।

किन्तु अस्माकं भारतशासनेन अत्रान्तरे किमपि एतेषु न क्रियते। राष्ट्रविजयस्य श्रेयः स्वस्मिन्नेव स्वकीये वा दले एव समाकृष्यते। विजयोऽयं तीव्रतया दर्परूपं बिभ्रत् दरीदृश्यते। सुस्थिरस्यापि राज्यशासनस्य स्वदलीयं नास्तीति कृत्वा नैकैः प्रत्यक्षैरप्रत्यक्षैर्वा प्रकारैः भञ्जनं लोकतान्त्रिकस्य कस्यापि

केन्द्रीयशासनसूत्रधारस्य कृते कथमपि शोभनं नोच्येत। भारते निवसद्भिः सर्वैः सह समानो व्यवहारः शासनस्य कर्तव्यम्। अल्पसंख्यकानां संरक्षणं शासनस्य कर्तव्यमेव। तथापि अल्पसंख्यका यदि अल्पसंख्यकत्वेन पाश्चात्यकूटनीतिज्ञप्रसारितया विषाक्तभावनया बहुसंख्यकानां न्याय्यहितकृन्तनस्य आग्रहिणः स्युश्चेत्स आग्रहः शासनेन कथमपि न परिपूरणीयः। पाश्चात्यकूटनीतिज्ञानामेव साम्प्रदायिकतादि-कूटशस्त्राण्यादाय राष्ट्ररक्षणाय सात्त्विकं बलमुपास्यमानानां रोधनं न जातु समुद्भूताया राष्ट्रैकताभावनायाः कृते हितकरम्। यद्यस्माकं केन्द्रीयशासनं तदीयाः प्रधानाश्च सर्वमेतद्विचार्य दर्पं दूरीकृत्य सर्वेषां हिताधाने प्रवर्तेरन्, तदा नूनमेषा ऐक्यभावना सुपुष्टा स्यात्।

वस्तुतोः युद्धकाले वस्तूनां यावती महर्घता नासीत्, ततोऽतितरां वर्धमानाऽद्य सा सर्वैरनुभूयते। गृहस्थस्य जीवनयापनं नितरां सङ्कटापन्नं संवृत्तम्। अद्य किलास्माकं राष्ट्रनेतारो वैदेशिकानां कल्पनाप्रसूतस्य 'समाजवाद'-नामकस्य तत्त्वस्यैव यत्र तत्र समुद्घोषणं कुर्वन्ति। भारतप्रसिद्ध-प्राड्विवाकेन श्री एन० ए० पालकीवाला महाभागेन अचिरादेव बैंगलोर-नगरे उक्तं यत् 'समाजस्य अहरहः प्रयोगेष स घृष्टरूप्यक इव स्वल्पमूल्यः संवृत्तः।' तैरुक्तम्—'समाजवादपथि सञ्चलनाय महती अवधानता विवेकश्च समपेक्ष्यते। स हि किमपि राष्ट्रमुन्नतेश्चरमशिखरं प्रस्थापयति, गर्ते वा निपातयति। येन किल समाजवादेन यूरोपराष्ट्राणि समुन्नतिपथं नीतानि, स एव 'हिन्दएशिया-ब्रह्मदेश'-प्रभृतिराष्ट्राणां कृते अवनतिहेतुरपि समभूदिति अस्माभिर्दृश्यत एव।'

तात्पर्यमेतद् यत्तादृश एव समाजवादोऽस्माकं कृते हितावहः स्यात् यः किल भारतीयादर्शानुकूलो भवेत्। केवलं पाश्चात्यानामन्धानुकरणं कृत्वा नैकेषां न्यायार्जितायाः सम्पत्तेः 'सीलिंग'दिमार्गैः स्वायत्तीकरणादिकं कथमपि राष्ट्रस्य कृते न हितावहम्। तथाकरणे अपरो महान् भ्रष्टाचारः प्रवर्तेत, जनतासु क्षोभस्तु समुत्पद्येत एव। अनेन यथा भारतराष्ट्रस्य तथाकथितसाम्यवादक्षेत्रे नयनमेकस्मिन् दिने भारतशासनस्य भारतीयजनानाञ्च कृतेऽभिशापायितमेव भवेत्।

श्रीमतां श्रीमत्त्वनिरासो न समाजवादस्य शोभनः पन्थाः। प्रत्युत दरिद्राणां दारिद्र्यनिरास एव प्रशस्ततरः समाजवादः। समाजवादस्य वास्तविकं परिणमनम् अपरिग्रहे एव निहितम्। यदा नाम सर्वे जनाः शासनञ्च परस्परस्य हिते दत्तचित्ताः स्युः, परस्परस्य सङ्कटे सहयोगिनः स्युः, आवश्यकताधिकमादातुं स्वयमेव विरता भवेयुः, आत्मवत् सर्वभूतानि पश्येयुस्तदैव वास्तविकः समाजवादो भारतीयसंस्कृत्यनुकूलो भवेत्। शासनबलेन, बहुमतबलेन, वैदेशिकमित्रराष्ट्रबलेन न्याय्यस्यापि अधिकारस्य धनस्य वा लुण्ठनं न जातुसमाजवादाभिधायकं भवेत्। तेन च केवलमन्ततः शासनाधीनमेव सर्वं भवेत्। तदा तथाकथित-साम्यवादेन सह समाजवादस्यास्य भेद एव विलुप्येत।

यदि भारतशासनमत्र विषये विचार्य पदं नादधाति, तदा नव्येन विजयेन समर्जितेयं बहुमुखीना राष्ट्रैक्यताभावना शीघ्रमेव सर्वतो विलयं गच्छेत्। तच्च शासनस्यापि कृते कियद् हितकरं भवेदिति पृथक् वक्तव्यं नावशिष्यते। वयं भगवन्तं प्रार्थयामो यत्सोऽस्माकं राष्ट्रनायकान् सद्बुद्ध्या योजयतु।

●

ईश्वरस्य वेदैकवेद्यत्वम् ?

वेददर्शनाचार्याः महामण्डलेश्वराः

— श्री गङ्गेश्वरानन्द स्वामिपादाः —

(१)

उत वात पितासि न उत भ्रातोत नः सखा । स नो जीवातवे कृधि ॥
(ऋ० १.१८६.२)

वेदं सभेदं प्रतिपद्य सारं संसारखेदं यततेऽपनेतुम् ।
कामादिजेतुं क्षमते च येन प्रख्यातकीर्तिं भुवि तं प्रपद्ये ॥ १ ॥

२. स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः । यदुपास्तिमसावत्र परमात्मा निरूपयेत् ॥[1]
३. निपुणो लोकनिर्माणे सर्वज्ञः सर्वशक्तिकः । भूतपञ्चकमादाय धर्माधर्मनिमित्तकः ॥
४. स्रष्टा भर्ताऽथ संहर्ता नियन्ता जगतां पतिः । तस्य वेदैकवेद्यत्वं प्राहुर्वेदान्तवेदिनः ॥
६. मुधा वाक्कलहो नायं चेतोविक्षेपकारकः । उपासनैव क्रियते प्रभोरेषा विचारणा ॥
७. न्यायचर्चेयमीशस्य मननव्यपदेशभाक् । उपासनैव क्रियते श्रवणानन्तराऽऽगता ॥[2]

न्यायकुसुमाञ्जलौ पञ्चभिः स्तबकैः पञ्चानां चार्वाक-मीमांसक-सौगत-जैन-साङ्ख्यानां पञ्च विप्रतिपत्तयः श्रीमदुदनाचार्येण क्रमशो निरस्ताः। ताश्च यथा—ईश्वरो नास्ति । १. अलौकिकस्य परलोकसाधनाभावात् । २. अन्यथाऽपि तदनुष्ठासम्भवात् । ३. तदभावावेदकप्रमाणसद्भावात् । ४. सत्त्वेऽपि तस्याप्रमाणत्वात् ५. तत्साधकप्रमाणाभावाच्चेति ।

अयमभिसन्धिः—तार्किकचक्रचूडामणिचुम्बितचरणो लब्धसपर्यः श्रीमदुयनाचार्यस्तामिमां भावुकभगवत्प्रणयरसास्वादविघातिनीं विशालां पञ्चतयीं विप्रतिपत्ति-विषलतां विततां सत्तर्कसहस्रधारेण निशितानुमान-कुठारेण समूलं चिच्छेदेति ।

प्रथम-विप्रतिपत्ति-निरसनम्

तथा हि—चार्वाको ब्रूते, प्रत्यक्षमेव प्रमाणमिति । तच्च ईश्वरसाधनाय न प्रक्रमते ; रूपादिहीनत्वात् । नाप्यसौ मनोवेद्यः ; सुखादिवत् मनो धर्मत्वाभावात् । नापि परलोकसाधनाऽदृष्टद्वारकस्तदभ्युपगमः ; अस्मन्नये प्रत्यक्षातिरिक्त-प्रमाणाऽनभ्युपगमेन अदृष्टस्य खपुष्पायितत्वात् । तस्मात् कुतः परलोकः ? कुतस्तरां धर्माऽधर्माख्यं तत्साधनमदृष्टम् ? कुतस्तमां वा अचेतनस्य तस्य चेतनाधिष्ठानपूर्वकत्वेन त्वदभिमतस्य ईश्वरस्य प्रतिपत्तिरित्येवंतात्पर्यकां प्रथमां विप्रतिपत्तिं निरस्यति—

सापेक्षत्वादनादित्वाद् वैचित्र्याद् विश्ववृत्तितः ।
प्रत्यात्मनियमाद् भुक्तेरस्ति हेतुरलौकिकः ॥
—कुसुमाञ्जलौ १.४

सापेक्षत्वादिति । अयमर्थः—अलौकिकः = अतीन्द्रियः । धर्माऽधर्मसंज्ञोऽपूर्वापरपर्यायो यागादिना स्वर्गादिफलजनने मध्ये कश्चिद् व्यापारोऽस्ति यम् 'अदृष्ट'नाम्ना व्यपदिशन्ति तैर्थिकाः । तत्र हेतून् दर्शयति—सापेक्षत्वात् = कादाचित्कत्वात् । 'कार्यं सकारणकं कादाचित्कत्वाद् भोजनजन्यतृप्तिवत्'

---

[1] कुसुमाञ्जलौ १. २. । [2] तत्रैव १.३ ।

इत्यनुमानं पर्यवस्यति । अनेन सापेक्षत्वेन कारणमात्रं कार्यस्य साधिकम् ।

ननु कार्यस्य घटादेः दण्डादिकारणं सदातनं कादाचित्कं वा ? नाद्यः ; तथा सति घटादेः सदोत्पाद-प्रसङ्गात् । नापि द्वितीयः ; कादाचित्कत्वे तत्कारण-परम्परा कादाचित्की अभ्युपेतव्या । तथा चाऽनवस्था स्यादित्याशङ्कां निराचष्टे–अनादित्वादिति । बीजाङ्कुर-न्यायेन प्रामाणिकी अनवस्था न दूषणमावहतीति तात्पर्यम् ।

ननु कारणाभ्युपगमेऽपि नापूर्वं कारणम् । किं तर्हि ? ब्रह्म प्रकृतिर्वा तथाऽस्तु, इत्याशङ्कां निराकरोति—वैचित्र्यादिति । तथा च 'कार्यं विचित्रकारण-वद् विचित्रकार्यत्वात् विचित्रतन्तु-निर्मित-विचित्र-पटवत्' इत्यनुमानम् । अनेनानुमानेन विचित्रजगद्धेतुः विचित्रकारणम् अपूर्वमेवास्थेयम् ।

ननु तर्हि दृष्टं यागादिकमेव स्वर्गादिहेतुरस्तु, किमजागलस्तनायमानेन अपूर्वेणेत्यनुशयं परिहरति—विश्ववृत्तित इति । विश्वेषां परलोकेच्छुनां यागादौ प्रवृत्तितः स्वर्गादिसाधनत्वज्ञानं यागादौ लोकप्रवृत्ति-कारणम्, इष्टसाधनत्वज्ञानस्य प्रवृत्तिहेतुत्वात् । यागादेश्च चिरविनष्टस्य तत्कालपर्यन्तावस्थायित्वं मध्यवर्तिनं कञ्चिदपूर्वव्यापारमन्तरा दुर्घटमिति यागादेः स्वर्गादिसाधकत्वासम्भवाद् अदृष्टं सिद्ध्यति । वक्ष्यति चाऽऽचार्यः—

चिरध्वस्तं फलायाऽलं न कर्माऽतिशयं विना । इति

—न्यायकु० १.९

अनुमानप्रयोगश्च—'यागः सव्यापारकः करण-त्वात् कुठारादिवदि'ति ।

ननु तदपि न भोगसमानाधिकरणम् । किं तर्हि ? भोगनिष्ठमेव अङ्गीकार्यम् । तथात्वे न काचित् क्षति-रिति संशयं निराचष्टे—प्रत्यात्मनियमाद्भुक्तेरिति । भुक्तिः = भोगः, सुख-दुखान्यतरसाक्षात्कारः । स च प्रत्यात्मनियतः । तस्मात् समवायेन भोगं प्रति समवायेन अदृष्टं कारणमिति कार्य-कारणभावाभ्यु-पगमेन यत्समवेतमदृष्टं तत्रैव समवायेन भोगनिष्पत्तिः, न सर्वत्र । अन्यथाऽतिप्रसङ्गो दुर्वारः स्यात्, सर्वान् प्रति भोग्यनिष्टत्वे तस्याऽविशेषात् ।

पुनः प्रत्यवतिष्ठते—अकस्माद् भवति, न किञ्चित् सापेक्षं कारणम् । आह च गौतमः—

अनिमित्ततो भावोत्पत्तिः कण्टक-तैक्ष्ण्यादिदर्शनात् ।

—न्याय द० ४.१.२

इति । तदेतत् परिहरति—

हेतुभूतिनिषेधोत्थ - स्वानुपाख्यविधिर्न च ।
स्वभाववर्णना नैवमवधेर्नियतत्वतः ॥

—कुसुमा० १.५

इदमैदंपर्यम्—'अकस्मात् भवति' इत्यस्य कोऽर्थः ? किं हेतुवाचिना किंशब्देन नञोऽन्वयात् हेतुभिन्नाद् अहेतोर्भवति ? इति, आहोस्वित् धात्वर्थे भवने नञोऽन्वयेन हेतोर्न भवतीति ? अथवा किंशब्दः स्वातिरिक्तहेतुवचनः ; तथा सति स्वातिरिक्तहेतोर्न भवति, स्वस्माद् भवति इति ? अथवा नञसंवलितः किंशब्दोऽलीकवाची । तथा च अलीकाद् भवतीति ? अथवा अकस्मादिति अखण्डमव्ययपदम् । स्वभावा-दिति तदर्थः । एवञ्च स्वभावाद् भवति ? इति । त एते पञ्च विकल्पाः । इमान् निराचिकीर्षुराह—हेतु-भूतिरिति ।

हेतुभूतिरिति विकल्पद्वयनिषेधः । स्वानुपाख्येति । स्वम् = कार्यम् । अनुपाख्यम् = अलीकम् । तस्माद् विधिः = कार्योत्पत्तिः । न च = नैव स्वस्मात् स्वोत्पत्ते-रभावात्, अलीकस्य तुच्छत्वेन अकिञ्चित्करत्वात् । अनेन द्वितीयपादेन अलीकहेतुकत्वेन पर्यवसन्नयोः तृतीय-चतुर्थविकल्पयोर्निषेधः । स्वभावेति तृतीय-चरणेन पञ्चमविकल्पनिरासः ।

एकहेलयैव सर्वान् विकल्पान् निराकर्तुं चतुर्थ-

चरणमारचयति—अवधेरिति । नियतत्वत इति । नियतावधिकत्वात् कार्यस्य, पूर्वोक्तेषु पञ्चसु कार्यस्यानुत्पादः, सदोत्पादो वा प्रसज्येत । मम तु नायं दोषः, कार्याव्यवहिपूर्वक्षणवर्ति - कारणकलापस्यैव स्वोत्तरकाले कार्यजननियमादिति निष्कर्षः ।

ननु ईश्वरस्य जगज्जनने अदृष्टस्य सहकारिकारणताऽङ्गीकारे शास्त्रविरोधः स्यात् । शास्त्रे हि कारणप्रस्तावे शक्ति - प्रकृति - मायाऽविद्यादिशब्दाः प्रयुक्ताः । ते च अदृष्टातिरिक्तां भगवतो दुर्घटघटनापटीयसीं दिव्यां मायाशक्तिमाचक्षन्ते । तत्राऽऽह—

इत्येषा सहकारिशक्तिरसमा माया दुरुन्नीतितो
मूलत्वात्प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता ।
देवोऽसौ विरतप्रपञ्चरचनाकल्लोलकोलाहलः
साक्षात्साक्षितया मनस्यभिरतिं बध्नातु शान्तो मम ॥
—कुसुमा० १.२०

इत्येषेति । यस्य ईश्वरस्य सहकारिशक्तिः = सहकारिकारणम् । एषा = माया, मायाशब्दलक्ष्यमदृष्टम्, सैव प्रकृतिः । मूलत्वात् = कारणत्वात् । प्रबोधभयतः, भयशब्देन विरोधसूचनेन तत्त्वज्ञानप्रतिबद्धत्वात् 'अविद्या' इति । उदिता = उक्ता । असौ देवः मममनसि साक्षादभिरतिम् = स्वविषयकसाक्षात्कारिज्ञानम् । बध्नातु = उत्पादयतु । तं विशिनष्टि—विरतेति । प्रपञ्चः = मिथ्याज्ञानादिः । तस्य रचनाकल्लोलः = तत्परम्परा, तस्य कोलाहलः = किंवदन्ती विरता यस्मात् स तथा । साक्षितया = साक्षीभूय, साक्षित्वं च निर्णायकत्वात् ।

अयमभिसन्धिः—**रूपं रूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं परि स्वाम्** (ऋ. ३.५३.८.) **इन्द्रो मायाभिः पुरुरूप ईयते** (ऋ. ६.४७.१८) **मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्** (श्वेताश्व० ४.१०), **प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।** (गीता ३.२७), **पराऽस्य शक्तिर्विविधैव श्रूयते** (श्वेताश्व० ६.८), **अविद्यायामन्तरे वर्तमानाः** (कठोप० २.७) इत्यादौ जगत्सहकारिकारणे प्रयुक्ताः मायादिशब्दाः 'सिंहो माणवकः' इतिवत् गौण्या वृत्त्या लाक्षणिकाः । तथा हि—भगवतः शक्तिरसमा = विचित्रा विचित्रगुणयोगात् । शक्तिशब्दोऽदृष्टे लाक्षणिकः । दुरुन्नेयत्वसादृश्यात् मायाशब्दः, तत्त्वज्ञानविरोधित्वाद् अविद्याशब्दः, प्रकर्षेण करोतीति कारणत्वसाम्यात् प्रकृतिशब्दश्च तथा । एवमन्यत्रापि ऊहनीयम् ।

द्वितीय-विप्रतिपत्ति-निरसनम्

प्रथमे स्तबके विंशतिकारिकाभिः अदृष्टाधिष्ठातृतया ईश्वरं संसाध्य प्रथमा विप्रतिपत्तिर्निरस्ता । सम्प्रति वेदस्य पौरुषेयत्वेन ईश्वरकर्तृकत्वं संसाध्य द्वितीयविप्रतिपत्तिनिरासाय उपक्रमते—

प्रमायाः परतन्त्रत्वात् सर्गप्रलयसम्भवात् ।
तदन्यस्मिन्न विश्वासान्न विधान्तरसम्भवः ॥
—कुसुमा० २.१

अयमभिप्रायः—**अत्र मीमांसकः** प्रत्यवतिष्ठते, अन्यथाऽपि ईश्वरं विनैव यागाद्यनुष्ठानं कर्तुं शक्यम्, तस्य वेदगम्यत्वात् । वेदस्य च प्रामाण्यं नित्यनिर्दोषत्वादेव, न तु ईश्वरप्रणीतत्वाद् येन वेदवक्तृतया ईश्वरः सिद्ध्येत् । न च वेदे स्वरूपसत् प्रामाण्यं न प्रवृत्तिकारणमिति वाच्यम्; महाजनपरिग्रहेणैव प्रामाण्यग्रहसम्भवादिति । तं निराकरोति—प्रमाया इति । परतन्त्रत्वात् = पराधीनत्वात् । तच्च ज्ञानसामान्यकारणातिरिक्त - कारणाधीनत्वम् - अनुमानप्रयोगश्च—'प्रमा ज्ञानसामान्यकारणातिरिक्त-कारणजन्या कार्यत्वे सति ज्ञानविशेषरूपत्वात्, अप्रमावत्' इति । शाब्दप्रमायां च ज्ञानसामान्यातिरिक्तं कारणं वक्तृयथार्थवाक्यार्थज्ञानलक्षणो गुण एव । स च गुणो गुणत्वात् क्वचित् समवेतः । यत्र समवेतः,

स एव भगवान् ईश्वरो वा। आह च न्यायमञ्जरीकारः[1]—

वेदस्य पुरुषः कर्ता नहि यादृशतादृशः।
किन्तु त्रैलोक्यनिर्माणनिपुणः परमेश्वरः॥
स देवः परमो ज्ञाता नित्यानन्दः कृपान्वितः।
क्लेश-कर्मविपाकादि - परामर्श-विवर्जितः॥ इति।

यदुक्तं महाजन-परिग्रहेण नित्यनिर्दोषिताऽऽहितवेदप्रामाण्यज्ञानं यागादिप्रवृत्तिकारणमिति। तदपि अपेशलमित्याह—सर्गप्रलयसम्भवादिति। अत्र सर्गशब्देन जन्यभावानां परिग्रहः। सृष्टौ समुत्पन्नानां जन्यभावानां सर्वथा प्रलयोपपत्तेरिति। अयं भावः—प्रलयानन्तरं सर्वेषु भावेषु विनष्टेषु महाजनपरिग्रहाऽसम्भवेन पुनः सर्गादौ लब्धात्मनि वेदे प्रामाण्याऽग्रहाद् यागादौ प्रवृत्तेरभावेन वैदिक-यागादिव्यवहारस्य विलोपापत्तेरिति।

ननु पूर्वसर्गाभ्यस्त-योगजधर्मानुभावात् लब्ध-सार्वज्ञादि-विद्वांसः कपिलादय एव वेदकर्तारः, किं परमेश्वरेण? इत्याशङ्कां निराचष्टे—तदन्यस्मिन्नविश्वासादिति। यः खलु मनःप्रत्ययं नादधति, तस्य कथं नाम ईश्वरातिरिक्ते कपिलादौ विश्वासः? अपि च, लाघवाद् एक एव वेदकर्ता भगवान् आस्थेयः। नानाकर्तृकल्पना तु गौरवपराहतेति भावः।

उपसंहरति—न विधान्तरेति। निर्दोषवेदद्वारकस्य योगधीसम्पादित-सार्वज्ञ-कपिलादिद्वारकत्वस्य च निराकरणात्, प्रकारान्तरस्य च असम्भाव्यत्वात् मीमांसको 'गले-पादुका' - न्यायेन वेदकर्तारं परमेश्वरमभ्युपगच्छेदेवेति।

अत ऊर्ध्वम्—

वर्षादिवद् भवोपाधिवृत्तिरोधः सुषुप्तिवत्।
उद्भिद्-वृश्चिकवद् वर्णा मायावत् समयादयः॥

—कुसुमा० २. २

इति द्वितीयकारिकया प्रलयबाधकं निरस्य—

जन्म-संस्कार-विद्यादेः शक्तेः स्वाध्यायकर्मणोः।
ह्रासदर्शनतो ह्रासः संप्रदायस्य मीयताम्॥

—कुसुमा० २. ३

इति तृतीयकारिकया 'वेदादिसम्प्रदायः अत्यन्तमुच्छिद्यते, ह्रासमानत्वात् प्रदीपवत्' इत्यनुमानप्रयोगं तत्साधकं प्रदर्शितवान् प्रलयसदसत्त्वाविभावना, वेदपौरुषेयत्वा - ऽपौरुषेयत्वविवेचना, प्रामाण्यस्वतस्त्वपरतस्त्ववर्णना च महद्भिस्तत्तद्दर्शनाचार्यैः आकारग्रन्थेषु सविस्तरं कृतैवेति तत एवाऽवसेया। विस्तरभयाद् विरम्यते।

द्वितीयस्तबकार्थमुपसंहरन् प्रार्थयते—

कारं कारमलौकिकाद्भुतमयं मायावशात् संहरन्
हारं हारमपीन्द्रजालमिव यः कुर्वन् जगत् क्रीडति।
तं देवं निरवग्रह - स्फुरदभिध्यानानुभावं भवं
विश्वासैकभुवं शिवं प्रति नमन् भूयांसमन्तेष्वपि॥

—कुसुमा० २. ४

तृतीय-विप्रतिपत्ति-निरसनम्

सौगतो विप्रतिपद्यते—यथा भूतले घटाभावोऽनुपलब्ध्या गृह्यते, तद्वदनुपलब्ध्या ईश्वराभावोऽपि गृह्यते। यदि च धर्माऽधर्मादि - विलयापत्तिभिया योग्यानुपलब्धेरेव अभावग्राहकत्वाद् ईश्वरस्यायोग्यत्वेन तया न तदभावप्रतिपत्तिरित्युच्यते; तदा शशशृङ्गस्यापि तदभावः कथं प्रतिपत्तव्य इति तं निराचष्टे—

योग्याऽदृष्टिः कुतोऽयोग्ये प्रतिबन्धिः कुतस्तराम्।
क्वाऽयोग्यं बाध्यते शृङ्गं क्वाऽनुमानमनाश्रयम्॥

—कुसुमा० ३. १

अयमभिसन्धिः—योग्यादृष्टिः = योग्यानुपलब्धिः, अयोग्ये परमात्मनि, कुतः = कथं भवेत्? न सम्भवतीत्यर्थः। शृङ्गं तु योग्यमेव, तस्य इन्द्रियग्राह्यत्वात्। यदि तत्स्यात्, नूनमुपलभ्येत। यतो नोपलभ्यते, अतस्तदभावः साधकाभावादेव प्रतिपद्यते। ईश्वरे तु

---

[1] १. न्यायमञ्जरी : जयन्तभट्टकृता, पृ० १९०।

न तथा ; बहुशः साधकप्रमाणानां पञ्चमस्तबके वक्ष्यमाणत्वात् ।

ननु 'ईश्वरो न कर्ता, शरीरप्रयोजनाभिसन्धानशून्यत्वात्' इत्यनुमानेन ईश्वराभावोऽनुमेय इत्याशङ्क्याह—क्वानुमानमिति । सत्यम् ; कर्तृत्वव्यापकप्रयोजनाभिसन्धानविरहेण कर्तृत्वविरहः परमेश्वरे शक्यानुमानः, व्यापकाभावेन व्याप्याभावस्य सर्वत्रानुमितिदर्शनात् । यथा धूमव्यापकवह्निविरहेण धूमाभावोऽनुमीयते । परं पृष्टो भवान् इदं व्याचष्टाम्, कर्तृत्वाभावानुमाने पक्षीकृतः परमेश्वरः सिद्धोऽसिद्धो वा? असिद्धश्चेत्तदा आश्रयासिद्धिः । द्वितीये धर्मिग्राहकमानेनैव कर्तृत्वाभावानुमानबाधः । तस्मात् तदनुमानमनाश्रयमसिद्धपक्षकं क्व कुत्र स्यात् ?

चतुर्थ-विप्रतिपत्ति-निरसनम्

दिगम्बरः पर्यनुयुङ्क्ते—प्रथमतस्तावद् ईश्वर एव नास्ति, प्रमाणागम्यत्वात्, 'प्रमेयसिद्धिः प्रमाणाद्धि' इति दार्शनिकानां समयात् । भवत्प्रसादनाय कथञ्चित् तदभ्युपगमेऽपि न तस्य प्रमाणत्वम् । प्रमा हि अगृहीतग्राहि ज्ञानम् । ईश्वरज्ञानं च अधिगतार्थगमकत्वात् न प्रमा । अत ईश्वरे न प्रमाकरणत्वम्, न वा तत्कर्तृकत्वम् । तस्माद् भवानेव ब्रूयाद् यदप्रमाणपुरुषस्य वचसि कः श्रद्दधीत ? फलतो वेदः ईश्वरवाक्यं श्रद्धास्पदमिति भवतां रिक्तं वचः । तत्राऽऽह—

> **अप्राप्तेरधिकप्राप्ते-रलक्षण-मपूर्वदृक् ।**
> **यथार्थोऽनुभवो मानमनपेक्षतयोच्यते ॥**
>
> —कुसुमा० ४.१

कारिकेयं विव्रियते—अपूर्वदृक् = अगृहीतग्राहि ज्ञानम् । अलक्षणम् = प्रमालक्षणं न भवति । अप्राप्तेः = धारावाहिकबुद्धावव्याप्तेः। तत्र हि द्वितीयादिप्रत्ययेषु गृहीतग्रहणमेव । भ्रमेऽतिव्याप्तिरपि इत्याह—अधिकप्राप्तेरिति । अतिव्याप्तेः, भ्रान्तिज्ञाने इति शेषः । तत्र अग्रहीतश्रुतिसकलादेर्धर्मितया अगृहीतरजतत्वादेश्च प्रकारतया भानात् स्वाभिमतं लक्षणमाह—यथार्थोऽनुभव इति । यथार्थानुभवो मानम् = प्रमा, उच्यते = अङ्गीक्रियते, स्मृतिवत् तस्य अन्यानपेक्षितत्वात् । स्मृतेः प्रामाण्यं हि स्वजनकानुभवसमानविषयतया अनुभवप्रामाण्याधीनम् । अनुभवस्तु न तथेति भावः ।

पञ्चम-विप्रतिपत्ति-निरसनम्

पञ्चमी विप्रतिपत्तिर्मुख्यतः साङ्ख्यानाम् । तत्राऽन्येऽपि समाना एव । यतः सर्वेऽपि ईश्वरानङ्गीकर्तारः साधकप्रमाणं न पश्याम इत्यातिष्ठन्ते । अतः सर्वेषाम् एकहेलयैव निरासाय पञ्चमस्तबके प्रथमकारिकया नवाऽनुमानानि सङ्गृह्णाति—

> **कार्या-ऽऽयोजन-धृत्यादेः पदात् प्रत्ययतः श्रुतेः ।**
> **वाक्यात्सङ्ख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥**
>
> —कुसुमा० ५.१

व्याख्यायते – कार्यम् = कार्यत्वलिङ्गकसकर्तृकत्वानुमानम् । आयोजनम् = सर्गाद्यकालीन - द्व्यणुकारम्भक - परमाणुद्वय - संयोगजनकं कर्म (क्रिया) । धृतिः = गुरुत्ववतां पतनाभावः । आदिपदेन विनाशसङ्ग्रहः । पदात् = घटादिपदप्रयोगात् । प्रत्ययतः = प्रामाण्यतः । श्रुतेः = वेदात् । वाक्यात् = वाक्यत्वात्, भावप्रधानो निर्देशः । सङ्ख्याविशेषात् = द्व्यणुकपरिमाणजनक - परमाणुनिष्ठ - द्वित्वसङ्ख्यातः । विश्वविदव्ययः = विशिष्टं साध्यम् । तेन नित्यसर्वविषयकज्ञानवान् सर्वज्ञः परमात्मा सिद्ध्यतीत्यर्थः ।

'सूची - कटाह' - न्यायेन प्रथममनुमानानि अष्टौ आयोजनादिशब्दसंसूचितानि लिख्यन्ते । पश्चाद् विशेषविचारार्हं प्रथमानुमानं वक्ष्यामः । तथा हि—

१. सर्गाद्यकालीन - द्व्यणुकारम्भक - परमाणुद्वय-संयोगजनकं कर्म चेतनप्रयत्नपूर्वकं कर्मत्वाद् अस्मदादिशरीरक्रियावत्

२. ब्रह्माण्डादि पतनप्रतिबन्धकीभूत - प्रयत्नवदधिष्ठितं धृतिमत्त्वाद् वियति विहङ्गमधृतकाष्ठवत् ।

३. ब्रह्माण्डादि प्रयत्नवद्विनाश्यं विनाशित्वात्, पाटचमानपटवत् ।

४. घटादिसम्प्रदायव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वाद् आधुनिकलिप्यादिव्यवहारवत् ।

५. वेदजन्यज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत् ।

६. वेदः पौरुषेयो वाक्यत्वाद् आयुर्वेदवत् ।

७. वेदवाक्यानि पौरुषेयाणि वाक्यत्वाद् अस्मादादिवाक्यवत् ।

८. द्व्यणुकपरिमाणं सङ्ख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात् तुल्यपरिमाणकपालद्वयारब्ध-घटपरिमाणवत्, प्रकृष्टतादृशकपालत्रयारब्धघटपरिमाणवत् । अणुपरिमाणं तु न कस्यापि परिमाणस्य जनकं नित्यपरिमाणत्वात्, अणुपरिमाणाद्वा । एवञ्च द्व्यणुकपरिमाणहेतु-परमाणुनिष्ठ - द्वित्वसङ्ख्या नास्ति अस्मदाद्यपेक्षाबुद्धिजन्या । अतस्तदानीन्तना अपेक्षाबुद्धिः ईश्वरस्यैवेति ।

सम्प्रति प्रधानतमं कार्यलिङ्गकमनुमानं समुपाहृत्य विशेषतो विवेचयामः—

९. क्षित्यादिकं कार्यं सकर्तृकं कार्यत्वाद् घटादिकार्यवदिति ।

अत्र विद्वन्मुकुटमणयो न्यायमञ्जरीकाराः[1] विविधविकल्पजालजटिलं भयङ्कर - कुतर्कनिकर - विषधरविजृम्भणसहायं विशालकायं भावुक - हार्दिक - दुस्सहदु:खदहन-दीपनदक्षं पूर्वपक्षं समुद्भाव्य तत्क्षणं तत्क्षपणक्षमं सत्तर्कपीयूषधारासहस्रवर्षकं भगवदाराधकमनोहर्षकं यथासंविधानं समाधानमाचचक्षिरे । सम्प्रति विचित्रं तदीय-वागाहवचित्रं किञ्चित् प्रस्तूयते ।

वादी प्रत्यवतिष्ठते—भवतां जगदीश्वरो जगत्कर्ता अशरीरः शरीरो वा ? सशरीरत्वेऽपि तदीयं शरीरं नित्यं कार्यं वा ? कार्यत्वेऽपि स्वकार्यं स्वातिरिक्तेश्वरकार्यं वा ? सर्वथाऽपि नोपपद्यते अशरीरत्वपक्ष ; कुत्रापि अशरीरस्य कार्यं प्रति कर्तृत्वादर्शनात् दृष्टविरोधेन सुतरां स प्रत्याख्यातः । शरीरत्वाऽङ्गीकारेऽपि तदीयशरीरस्य नित्यत्वं दुर्भणम् । 'ईश्वरदेहोऽनित्यः देहत्वात् चैत्रदेहवत्' इत्यनुमानेन विनाशित्वप्रतिपत्तेः । स्वस्य स्वकार्यत्वाभिधानं केवलं दुस्साहसम् । नहि पटुरपि नटबटुः स्वस्कन्धमारोढुं प्रभवति । ईश्वरान्तरकार्यत्वपक्षे तस्य तस्य शरीरस्य अन्यान्येश्वरकर्तृत्वं वाच्यम् । ततश्च ईश्वरानन्त्यमापद्येत । भवतु को दोषः? मानाभाव एव ।

अपि च—एकेश्वरस्य साधने पर्याकुलतामुपगतो भवान् कथमनन्तान् ईश्वरान् साधयितुं प्रभवेत्? इत्याद्यभिप्रायकेण वाक्यकदम्बकेनेति । तत्रैते पूर्वपक्षश्लोका भवन्ति—

अशरीरस्य कर्तृत्वं दृश्यते नहि कस्यचित् ।
देहोऽप्युत्पत्तिमानस्य देहत्वाच् चैत्रदेहवत् ॥
स्वयं निजशरीरस्य निर्माणमिति साहसम् ।
कर्त्रन्तरकृते तस्मिन् - नीश्वरानन्त्यमापतेत् ॥
व्यापारेण जगत्सृष्टिः कुतो युगशतैरपि ।
तदिच्छां चानुवर्तन्ते न जडाः परमाणवः ॥
अवाप्त - सर्वानन्दस्य रागादिरहितात्मनः ।
जगदारभमाणस्य न विद्मः किं प्रयोजनम् ॥
सर्गात् पूर्वं हि निःशेष-क्लेश-सम्पर्क वर्जिताः ।
नास्य मुक्ता इवात्मानो भवन्ति करुणास्पदम् ॥
करुणामृतसंसक्तहृदयो वा जगत् सृजन् ।
कथं सृजति दुर्वार - दुःखप्राग्भार - दारुणम् ॥
न च क्रीडाऽपि निश्शेषजनताऽऽतङ्ककारिणी ।
आयासबहुला चेयं कर्तुं युक्ता महात्मनः ॥
उद्भवाऽभिभवौ तेषां स्यातां चेदीश्वरेच्छया ।
तर्हि सैवाऽस्तु जगतां सर्ग - संहार - कारणम् ॥

---

[1] न्यायमञ्जरी, पृ० १९०—९४ ।

इत्यनन्तरगीतेन नयेनेश्वर - साधने ।
नहि तद् दृश्यते कार्यं तं विना सन्न सिद्ध्यति ॥
न च प्रसिद्धिमात्रेण युक्तमेतस्य कल्पनम् ।
निर्मूलत्वात् तथा चोक्तं प्रसिद्धिर्वटयक्षवत् ॥

अत एव निरीक्ष्य दुर्घटं
जगतो जन्म-विनाशडम्बरम् ।
न कदाचिदनीदृशं जगत्
कथितं नीतिरहस्यवेदिभिः ॥

इति प्राप्ते समादध्महे—

आस्ताम् अशरीरस्यैव कर्तृता ; न तत्र कश्चिद् दोषमनुभवामः । न च कस्यचित् कुत्रचिद् अशरीरस्य कर्तृत्वमदृष्टचरमिति वाच्यम् ; स्वशरीरप्रेरणे स्वात्मनः शरीरस्य कर्तृत्वदर्शनात् । न च कर्तृत्वे सव्यापारता स्यात्, नहि निर्व्यापारस्य कर्तृत्वं सम्भवतीति वाच्यम् ; व्यापारविरहेऽपि इच्छामात्रेण कर्तृत्वोपपत्तेः । ज्ञानेच्छाकृतिमत्त्वस्यैव कर्तृत्वाङ्गीकारेण तस्येश्वरेऽनपायात् ।

यद्यत्र भवान् ब्रूयात्—

कुलालवचने तस्य व्यापारो यदि कल्प्यते ।
कथं चाचेतनो भावस्तदिच्छामनुवर्तते ॥

तदाऽस्माभिरपि एतद् वक्तुं सुशकमेव—

यथा ह्यचेतनः काम आत्मेच्छामनुवर्तते ।
तदिच्छामनुवर्त्स्यन्ते तथैव परमाणवः ॥[1]

यस्तु प्रयोजनविकल्पः—किमर्थं सृजति जगन्ति भगवानिति । सोऽपि न पेशलः ; स्वभाव एवैष भगवतो यत् कदाचित् सृजति, कदाचिच्च संहरति विश्वम् ।

अथ पुनर्नियतकाल एषोऽस्य स्वभाव इति चेत् ? आदित्यं पश्यतु पण्डितम्मन्यो यो नियतकालमुदेति, अस्तमेति च । प्राणिकर्मसापेक्षमेतत् विवस्वतो रूपमिति चेद् ईश्वरेऽपि तुल्यः समाधिः । तथा चोक्तम्–

क्रीडार्थेऽपि जगत्सर्गे न हीयेत क्रियार्थता ।
प्रवर्तमाना दृश्यन्ते नहि क्रीडासु दुखिताः ॥ इति ।

अथवा–अनुकम्पयैव सर्ग-संहारौ आरभतामीश्वरः ।

ननु अनुकम्पया परमेश्वरो जगत्सृजतीति वदतस्तव न त्रपा ? दुःखबहुलां सृष्टिं सृजतः परमात्मनः का नाम अनुकम्पा ? अनुकम्पा चेत् सुखित एव सर्वान् जनान् स उत्पादयेत् । यदि वा विरमेदेव भाविनो दुःसह-दुःखदहनदह्यमानमानसो जनानालोच्य दयाद्रुतचेताः परमेश्वर इति चेन्न । कर्मसापेक्षत्वेन दत्तोत्तरत्वात् ।

तथा हि—शुभाशुभसंस्कारानुविद्धा एवाऽऽत्मानः । ते च धर्माधर्म-निगडसंवृतत्वाद् अपवर्गपुरद्वारप्रवेशमलभमानाः कथं नानुकम्प्याः ? अनुपभुक्तफलानां कर्मणां न प्रक्षयः । सर्गमन्तरेण च तत्फलभोगाय नरकादिसृष्टिमारभते दयालुरेव भगवान् । उपभोग-प्रबन्धेन परिश्रान्तानां जन्तूनामन्तराऽन्तरा विश्रान्तये भुवनोपसंहरणमपि करोतीति सर्वमेतत् कृपा-निबन्धनमेव ।

ननु च युगपदेव सकलजगत्प्रलयकरणमनुपपन्नम्, अविनाशिनां कर्मणां फलोपभोगप्रतिबन्धासम्भवादिति चोदितम् । न युक्तमेतत् ; ईश्वरेच्छाप्रतिबद्धानां कर्मणां स्तिमितशक्तिनामवस्थानात् तदिच्छाप्रेरितानि कर्माणि फलमादधति, तदिच्छाप्रतिबद्धानि च तत्रोदासते । कस्मादेवमिति चेद् ? अचेतनानां चेतनाधिष्ठितानां स्वकार्यकरणानुपलब्धेः ।

ननु तेषामेव कर्मणां कर्तार आत्मानश्चेतना अधिष्ठातारो भविष्यन्ति । यथाऽऽह भट्टः श्लोकवार्तिके सम्बन्धाक्षेपे (७५ श्लोके)—

कर्मभिः सर्वजीवानां तत्सिद्धेः सिद्धसाधनम् । इति ।

नैतदेवम् ; नैते अधिष्ठातारो भवितुमर्हन्ति, बहुत्वात्, विरुद्धाभिप्रायत्वाच्च । तथा हि—एक एव

---

[1] १. न्यायमञ्जरी, पृ० २०२ ।

कश्चित् स्थावरादिविशेषो राजादि विशेषो वा प्राणिकोटीनामनेकविध सुखदुःखोपभोगस्य हेतुः। स तैर्बहुभिरव्यवहिताभिप्रायैः कथमारभ्येत, तेषामेकत्र संभावनाभावात् प्राकृतपुरुषपरिषदोऽपि क्वचिदेव सकलसाधारणोपकारिणि कार्ये भवत्यैकमत्यम्, न सर्वत्र। महाप्रासादाद्यारम्भे बहूनां तक्षादीनामेक-स्थपत्यानुशयावर्तित्वं दृश्यते। पिपीलिकानामपि मृत्कूटकरणे तुल्यः कश्चिदुपकारः प्रवर्तकः, स्थपतिवदेकाशयानुवर्तित्वं वा कल्प्यम्। इह तु तत्स्थावरं शरीरं केषाञ्चिदुपकारकारणम्, इतरेषामपि भूयसामपकारकारणमिति। कथं तौ संभूय सृज्यते ? अनधिष्ठानां त्वचेतनानामारम्भकत्वमयुक्तमेव। तस्मादवश्यमेकस्तेषां कर्मणामधिष्ठाता कल्पनीयः।

यदिच्छामन्तरेण भवन्त्यपि कर्माणि न फलजनने प्रभवन्ति, अत एव एक ईश्वर इष्यते, न द्वौ नापि बहवो वा, भिन्नाभिप्रायतया लोकानुग्रहोपघातवैशसप्रसङ्गात्। इच्छाविसंवादसम्भवेन च ततः कस्यचित् सङ्कल्पविघातद्वारकानैश्वर्यप्रसङ्गादित्येक एव ईश्वरः। तदिच्छया कर्माणि कार्येषु प्रवर्तन्ते इत्युपपन्नः सर्गः। तदिच्छाप्रतिबन्धात् स्तिमितशक्तीनि कर्माण्युदासते इत्युपपन्नः प्रलयः। एवञ्च यदुक्तम्—

तस्माद्द्यवदेवात्र सर्गप्रलयकल्पना।
समस्तक्षयजन्मा''न सिद्ध्यत्यप्रमाणिके॥

इत्येतदपि न साम्प्रतम्।

तिष्ठतु वा सर्ग-प्रलयकालः। अद्यत्वेऽपि यथोक्तनयेन तदिच्छामन्तरेण प्राणिनां कर्मविपाकानुपपत्तेरवश्यमीश्वरोऽभ्युपगन्तव्यः। इतरथा सर्वव्यवहारविप्रलोपापत्तेः। तदुक्तम्—

अज्ञो जन्तुरनीशोऽयमात्मनः सुख-दुःखयोः।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वाश्वभ्रमेव वा॥ इति।

—महाभा०, वन०, ३०.२८

नन्वेवं तर्हि ईश्वरेच्छेव भवतु कर्त्री संहर्त्री च, कि कर्मभिरिति। मैवम्; कर्मभिर्विना जगद्वैचित्र्यानुपपत्तेः। कर्मनैरपेक्ष्यपक्षेऽपि त्रयो दोषाः प्रसक्ता एव—१. ईश्वरस्य निर्दयता, २. कर्मचोदनाऽनर्थक्यम्, ३. अतिमोक्षप्रसङ्गश्चेति। तस्मात् कर्मणामेव नियोजने स्वातन्त्र्यम् ईश्वरस्य, न निरपेक्षत्वम्। कि तादृशेश्वर्येण प्रयोजनमिति चेन्न; न प्रयोजनानुवर्ति प्रमाणं भवितुमर्हति। किं वा भगवतः कर्मापेक्षिणोऽपि भृत्यकर्मानुसारेण वेतन-पारितोषिकादिकं प्रयच्छतो भूपालस्यैव न क्षीयते प्रभुत्वमित्यलं कुतर्कलवलिप्तमुख-नास्तिकालापपरिमर्देन। अत्रैते श्लोका भवन्ति—

द्वेषो दुःखमधर्मश्च संस्कारश्चापि भावना।
नैते नित्यनिजानन्दे तिष्ठन्ति परमात्मनि॥
ज्ञानमिच्छा कृतिर्धर्मः सुखमात्यन्तिकं तथा।
नित्या नित्यनिजानन्दे वर्तन्ते परमेश्वरे॥
पुंसामसर्गविभ्वं हि रागादिमलबन्धनम्।
न च रागादिभिः स्पृष्टो भगवानिति सर्ववित्॥
इष्टानिष्टार्थसंभोगप्रभवाः खलु देहिनाम्।
रागादयः कथं ते स्युर्नित्यानन्दात्मके शिवे॥
तस्मात् कुतार्किकोद्गीत - दूषणाभासवारणात्।
सिद्धस्त्रैलोक्यनिर्माणनिपुणः परमेश्वरः॥
ये त्वीश्वरं निरपदाद्दृढप्रमाण-
सिद्धस्वरूपमपि नाभ्युपयन्ति मूढाः।
पापाय तैः सह कथाऽपि वितन्यमाना
जायेत नूनमिति युक्तमतो विरन्तुम्॥

(क्रमशः)

पाश्चात्त्य-संस्कृतविदुषां संस्कृत-पद्यानि

— डॉ० श्री वे० राघवन महोदयाः —

सप्तदशशतकमध्ये यूरोपीयानां विद्यारसिकानां संस्कृतभाषायाः संस्कृतसाहित्यस्य ज्ञानमुदियाय, यदविलम्बेन प्रतायते स्म । समन्तरे शतके उपनिषदां भगवद्गीतायाः अभिज्ञानशाकुन्तलस्य च अनुवादा यूरोपीयभाषासु अवतारिताः पाश्चात्त्यविद्वभिरेव। तदनन्तरे शतके यूरोपीयेषु विश्वविद्यालयेषु सर्वत्र संस्कृतविद्या अध्यापना-ध्ययनाभ्यां व्याख्या-प्रकाशनाभ्यां च सुप्रतिष्ठिता बभूव । अयं च संस्कृत-प्रचारः पाश्चात्त्यदेशेषु तथा समैधत, यथा तद्द्वारा संस्कृतमातृभूमौ भारतदेश एव तस्या भाषाया कोऽपि नवोन्मेष आविरासीत् ।

यद्यप्येतैः पाश्चात्त्यसंस्कृतविद्वद्भिः संस्कृतवाङ्मयस्य प्रचारणे महती सेवा कृता, तथापि तेषां संस्कृतभाषायां किं पर्याप्तं पाण्डित्यमभूदिति भारतीयाः पण्डिताः सर्वत्र संशेरते स्म । किं च ते पाश्चात्त्य-विपश्चितः विमर्शविचक्षणाः, सूचीसम्पादनेषु व्यग्राः, ग्रन्थ - तत्कर्तृ - कालपौर्वापर्यादिविचारेषु दक्षाः, ग्रन्थमध्ये प्रक्षेपनिर्णयेषु दत्तदृष्टयश्च; किन्तु संस्कृत-वाङ्मये यत्तत्त्वं दरीदृश्यते, यश्च रसः समुल्लसति, तयोरवगाहनेऽनुभवे वा न ते कुतूहलिन इति प्रायो भारतीयानां विदुषां कोऽप्याशयो वरीवर्ति ।

वस्तुतः तादृशी संभावना तु सुतरामतात्त्विकीति परिशीलनशालिनां स्फुटं भविष्यति । यावानभिनिवेश-स्तैः वेदे शास्त्रे च प्रदर्शितः, तावान् काव्ये नाटके च । बहुभिः तत्रत्यैः पण्डितैः कविभिश्च कालिदास-शूद्रकादिकृतानां काव्यनाटकादीनामनुवादा विरचिताः । बहुषु विद्यास्थानेषु च तत्तद्देशभाषासु शाकुन्तल-मृच्छकटिकादिकं रङ्गे प्रयुक्तम् । पूर्वयवन (ग्रीक)-साहित्यसमुपलम्भेन यूरोपीयानां यो मतिविकासः सम्बभूव, तादृशः कोऽपि नवोन्मेषः शाकुन्तलेन उपनिषद्भिः गीतया च तेषां शेमुषीणां समजनि ।

स्वीयानां भाषाणां ज्येष्ठां भगिनीमेनां संस्कृतभाषां न केवलं ते वाचा यथासम्भवं व्यवहर्तुं प्रायतन्त, किन्तु यथा भारतीयाः कवयः, तथा तेऽपि स्वयं तस्यां भाषायां पद्यानि निर्मातुं च समुद्यममकुर्वन् । यैतादृशी तेषा संस्कृतश्लोकविरचनव्यसनिता आसीत्, अस्ति च संप्रत्यपि, सा प्रायोऽत्रत्यानां न परिचिता । पाश्चात्त्यसंस्कृतरसिकानां संस्कृतव्याकरणाभिरुचिरिय-मनुन्मीलितचरी दिगिति कृत्वा संस्कृतप्रतिभास्वाद-निरतानां पुर इदमपूर्वं वस्तु प्रस्तोतुमभिलषामः ।

एतेषां पाश्चात्त्यसंस्कृतविरचनेषु किञ्चित् मुद्रितं किञ्चित् अप्रकाशितमपि तत्र तत्र हस्तलिखितेषु तदीयपुस्तकेष्वेव दृश्यमानम्, अन्यच्च किञ्चित् तत्सुहृद्भिः सह पत्रविनिमयसमयेषु तदा तदा लिखितं च । त्रिविधादप्यस्मात् पाश्चात्त्यसंस्कृतश्लोकबन्धात् किमप्युदाहरिष्यामः ।

प्राचीनभारतीय-विषयविमर्श-प्रवृत्तासु पत्रिकासु 'इण्डियन एण्टिक्वारि' नाम्नी पत्रिका सुविदिता । तत्र १९०३, १९०४, १९०५ तमवर्षेषु प्रकाशितासु सञ्चिकासु सुभाषितमालिकाः काश्चन प्रकाशिता दृश्यन्ते । एताश्च जर्मनदेशे जेना (Jena) नाम्नी नगरे विश्वविद्यालये यः संस्कृतचार्य आसीत् 'कापेल्लर'-नामा (Capeller), तेन सन्दृब्धाः । अत्र १९०३-सञ्चिकायां (३००-३०८; ३९९-४०९; ४७१-४७७ पत्रेषु) 'सुभाषित-मालिका' नाम्नी श्लोकमाला अनेन जर्मनीयसंस्कृतपण्डितेन कापेल्लर्-

नाम्ना विरचिता प्रकाशिता। अस्यां श्लोकावल्यां गेथे–षिल्लर–लेस्सिङ्–प्रभृतीनां जर्मनीय-कवीनां सुन्दराणि लोकानुभवमेदुराणि तत्त्वगर्भाणि सुभाषितानि सरलया शैल्या संस्कृतभाषायां अनूद्य दत्तानि। श्लोकरत्नेषु न केवलं संस्कृतसहभूः पक्वा शैली दृश्यते, किन्तु अनुष्टुभ् - आर्या - उपजाति - वसन्ततिलका-शिखरिणि - शार्दूलविक्रीडितादि विचित्रं वृत्तं च यत्यक्षरमात्राशुद्धं समुपयुक्तमालोक्यते।

एवमनेनैव कापल्लर् - महाशयेन 'यवनशतकम्' इति ग्रीक-कवीनां होमर् - पिण्डार् - ऐश्चेलस् - साफक्लीस् - प्रभृतीनां काव्यनाटकादिभ्यः शतं पद्यानि अनूदितानि १९०४-५ सञ्चिकयोः मुद्रितानि वर्तन्ते। कृतहस्तेन अनुवादकेनेह औपच्छन्दसिक-द्रुतविलम्बित-जलोद्धतगति - मन्दाक्रान्ता - पृथ्वी - स्रग्धराप्रमुखानि छन्दांसि च समुपयुक्तानि।

प्रसिद्धे 'केम्ब्रिज्' - विश्वविद्यालये संस्कृतहस्तलिखितमातृकाणां परीक्षणार्थं मया मासमेकमुषितम्। तदा तत्रस्थग्रन्थालये रक्षितानां संस्कृतमातृकाणां मध्ये व्यलोकयमहं किमप्याधुनिकं पुस्तकम् (नोट् बुक), यदुपरि च तत्रैव संस्कृताध्यापकपदमलङ्कृतवतः 'कोवल्' (Cowell) नामकस्य पण्डितस्य अभिधा अदृश्यत।

विमर्शमार्गे प्रसिद्धोऽयं 'कोवल्' संस्कृतभाषायां, भारतदेशे, संस्कृतविद्याकेन्द्रभूतेषु वाराणस्यादिषु क्षेत्रेषु च कियतीमिव आवेशमयीं प्रीतिमुवाहेति अस्मिन् पुस्तके तद्धस्तेनैव विलिखितेभ्यः श्लोकेभ्यः स्फुटीभवति। कोवल् - पण्डितस्य श्लोकविरचने लाघवं न बभूव, यतः प्रतिश्लोकं प्रथममनेन गुरु - लघु - गणादि अक्षरशो विन्यस्य तदधः पदबन्धो विलिखितो विलोक्यते। क्वचित् वृत्तभङ्गोऽपि भाति, व्याकरणदोषोऽपि। तथापि संस्कृतश्लोकग्रथने तस्य य आग्रह आसीत्, स सर्वानेवास्मान् आवर्जयिष्यति। अस्मात् पुस्तकादुद्धृताः केचन कोवल् - श्लोका उदाह्रियन्ते।

'सेण्ट् पीटर्सबर्ग संस्कृत–जर्मन–अभिधानकोशः' सर्वेषां परिचित एव, तथैव तत्संपादकयोरन्यतरः 'बोथ्लिङ्क्'-पण्डितश्च। अयं च कोशः पाश्चात्यसंस्कृतकार्यकलापस्य मूलाधारभूतः। कोशसम्पादनकार्ये पूर्णे बोथ्लिङ्क्-पण्डितस्य जन्मदिवसे एष श्लोकः तस्मै कोवल्-महाशयेन प्रेषितः—

यशः श्रमेणैव नरैरुपार्ज्यते
श्रमेण कोषोऽपि समाप्तिमाप्तवान्।
श्रमे व्यतीते वदते सरस्वती
ध्रुवं स (or स एष) कोषोऽप्यमरो भविष्यति॥

अत्र अमरशब्दे श्लेषं रसिकाः परिभावयन्तु।

'लेप्जिग्' - विश्वविद्यालयाद् 'डॉक्टर्'-विरुदम् अधिगतवतः सुप्रसिद्ध - संस्कृतविदुषो मैक्समुल्लर-नामकस्य पञ्चाशदब्दोत्सवाभिनन्दनसमये कोवल्-विदुषा पद्यमेतत् मैक्समुल्लर-सकाशं प्रेषितम्—

रयेण तुल्या व्यतियान्ति वत्सरा
जरावशं यौवनमाशु नश्यति।
अलं शुचा किं परिदेवनैर्गुरो
क्व देहराहुः क्व यशःसुधाकरः॥

श्रीप्रेमचन्द्रतर्कवागीशानां चरित्रप्रतिपादकं निबन्धं प्रेषितवते तदनुजाय रामाख्यपण्डिताय तदानीं स्वयं वृद्धतां गतेन कोवल्-पण्डितेन प्रेषितमिदं पद्यम्—

विद्यालयो निर्जरयौवनः क्व
काव्यं च नित्यामृतकामवर्षि।
क्वाहं च जीर्णो बल-धी-विहीन
निस्सारतां देहभृतां धिगेव॥

अत्रैव किमप्याङ्गलभाषापद्यमपि दत्तं, तस्य कोवल्-कृतः संस्कृतानुवादश्च—

Thou hidden love of God whose height,
Whose depth unfathomed no man knows,—
I see from far thy beauteous light,
Only I sigh for thy repose;

My soul is sick. nor can it be
At rest till it finds rest in thee.

यस्योच्चत्वमगाधतां च न जनो
वेदामितां दूरतो
ज्योतिः सुन्दरमस्य गूढभगवत्-
स्नेहोऽहमीक्षे तव।
शान्त्यै तेऽन्तरहं विनिश्वसिमि हा
खिन्नो ममात्मा त्वयं
शान्तिं लब्धुमलं न यावदयतां
नो शान्तिमेष त्वयि ॥

'आक्सफोर्ड्'-नगरे प्रख्यातं संस्कृतविद्यास्थानं वर्तते। संस्कृताध्यापनार्थं तत्र 'इण्डियन इन्स्टीटयूट्' (Indian Institute) इति विशालं गृहं वर्तते, यस्य निर्माणार्थमपेक्षितं धनं प्रायः भारतदेशादेव स्वीकृतम्। गृहस्यास्य १८८३ तमे वर्षे वेल्स्-युवराजेन उद्घाटनावसरे स्मरणार्थं द्वारदेशे निहिते शिलापट्टे द्वौ श्लोकौ उट्टङ्कितौ, ययोर्द्वितीय एवमाशास्ते—

ईशानुकम्पया नित्यमार्यविद्या महीयताम्।
आर्यावर्ताङ्ग्लभूम्योश्च मिथो मैत्री विवर्धताम् ॥

कतिपयवर्षेभ्यः पूर्वम् आक्सफोर्ड-विश्वविद्यालयाधिकारिभिः एतस्माद् भारतीयधनसाहाय्येन प्रतिष्ठापिताद् गृहात् संस्कृतशिक्षाविभागो बहिष्कर्तव्यः, स्वीयानिर्वाहकार्यविभागात स आलयः स्वीकर्तव्य इति अध्यवसाय ऊरीकृतः। बहुभिः प्राच्यविद्यानुरागिभिः प्रतिषेधघोषे कृतेऽपि प्रतिनिविष्टचित्तैः स निर्णयो न त्यक्तः। ततस्तत्र संप्रति संस्कृताचार्यपदमलङ्कुर्वता 'बरो' (Burrow) नामकेन संस्कृतविदुषा एते श्लोका विरच्य मह्यं प्रेषिता —

ततः षष्ठितमे वर्षे दुर्नयग्रस्तबुद्धिभिः।
विद्यालयमहामात्रैः आर्यधर्मपराङ्मुखैः ॥
सरस्वतीं लघूकृत्य पाण्डित्यमवमान्य च।
तयोर्भूम्योस्तिरस्कृत्य मैत्रीमनर्थकामिव ॥
कायस्थ-राक्षसानां च परस्वादानगृद्धिनाम्।
गणकानां च हस्तेषु प्रापिता स्वार्थसिद्धये ॥
विद्याविहीना शालैषा परैर्नीता पराभवम्।
अयोध्याप्रोषिते रामे नष्टश्रीरिव शोचति ॥

हालेण्ड्-देशे लेय्डन-नगरे 'केर्ण इन्स्टीयूट्' (Kern Insitutte) नाम्नि प्राच्यविद्याविमर्शालये 'केल्डर'-नामकः (Kelder) डाक्टर-पदवीप्राप्त्यर्थमुद्युञ्जानो युवा संस्कृताधीती मया दृष्टः। स मह्यं पश्चात् लेखमेकं प्रेषयन्, तत्र स्वेन पूर्वनिबद्धं श्रृङ्गारश्लोकमेकं मन्दाक्रान्तावृत्तबद्धं प्राहिणोत्। स चैष श्लोकः—

पुष्पापूर्णे तरुणतरले गीयते कोकिलेन
पुण्याशोके तरु-नत-तले शोकहर्षाकुलेन।
कारुण्येन प्रतिरववतोरावयोः श्रृण्वतोर्यत्
कामेनार्तौ (ऽ) मरणमनसौ वाशितापुङ्गवौ स्वः ॥

रूसदेशे 'लेनिनग्राड'-नगरे संस्कृतविद्वान् कलियानोव् (Kalyanow) नामास्ति, य आत्मानं कल्याणमित्रमभिदधाति। स वर्षद्वयात्प्राक् भारतमागतः तत्तन्नगरं द्रष्टव्यमन्यच्च दृष्ट्वा स्वदेशं प्रति प्रस्थितो भारतीयमित्रेभ्यः संस्कृतश्लोकाञ्जलिं समर्पयामास। तत्र यद्यपि भावः, शब्दशुद्धिश्च प्रायः समीचीनं प्रकाशेते, तथापि बह्वीषु पङ्क्तिषु छन्दसि प्रमादोऽस्ति। साध्वीः काश्चित् पङ्क्तीरत्र मनाक् संशोध्य उदाहरिष्यामः—

सर्वत्र भारते खण्डे कृतज्ञात्मा स्मराम्यहम्।
बहून् देशान् दृष्टवन्तः चारुप्रकृतिविस्मिताः ॥
दृष्टपूर्वा न चास्माभिः कदाचन तथाविधाः ॥
कलकत्तानगरीं गत्वा विमानेन विहायसा।
दृष्ट्वा तांस्तांश्च विषयान् पाटलीपुत्रमागताः ॥

× × ×

इतो गता वयं शीघ्रं बङ्गलोरपुरं प्रति।
यत्र प्रियः शीतवातो नित्यं वहति दक्षिणः ॥
ततो मद्रासनगरं यत्र स्नाता महार्णवे।
महानटीं सुलोचनां श्रीवदायतलोचनाम्।
सस्नेहमभिनन्दामि तेजसास्याश्च मोहितः ॥

× × ×

बहुराष्ट्राण्यतिक्रम्य विमानेन विहायसा।
पुराणीं सुन्दरीं भूमिं भवतां वयमागताः ॥
युष्मान् वयं सूचयामः स्निग्धानस्मत्सुहृज्जनान्।
अस्मद्भूम्योः पूर्वकालादासीन्मैत्र्यं सनातनम्।
एतद्विवर्धनार्थं च वयं सर्वे यतामहे ॥
अविभेद्यमिदं मैत्र्यं प्रजानामावयोर्महत्।
सर्वत्र जनताभूत्यै जीवतात् शाश्वतीः समाः ॥●

एकाङ्किरूपकम्

भारवि-मान-मर्दनम्

— श्री देवीप्रसाद पन्तः, साहित्याचार्यः, एम० ए० —

[श्रीबदरीनाथ-वेदवेदाङ्ग-महाविद्यालयः, ज्योतिर्मठः, चमोली]

प्रथमदृश्यम्

स्थानम्—दक्षिणभारतस्य अचलपुरनगरम्

(नेपथ्ये सहगानध्वनिः श्रूयते)

वन्दे भारतम्, वन्दे भारतम् ॥
हिमगिरिकटितटपटपरिधानम्,
ललितहरितकर्बुरितवितानम्,
जलनिधिजलसुक्षालितचरणम्,
मातरम्, वन्दे मातरम्, वन्दे भारतम् ।
कालिदासकलकण्ठनिनादम्,
बाणकणादसुपूजितपादम्,
मम्मटकैय्यटकोटिवितानम्,
मारतम्, वन्दे मातरम्, वन्दे भारतम् ।

(नान्द्यन्ते, ततः प्रविशति सूत्रधारः)

सूत्रधारः—भो भो सुरभारतीसमुपासकाः, अभिनयकलादिदृक्षवः सरसाः सामाजिकाः सम्प्रति तत्रभवतां मनोविनोदाय भारतीयसंस्कृतेः प्रचाराय च मधुरमधुरायां संस्कृतभाषायां श्री देवीप्रसादपन्त-प्रणीतं भारविमानमर्दनं नाम रूपकमभिनीयते । अतः सावधानाः भवन्तु भवन्तः ।

(नेपथ्ये)

भो भो निष्क्रान्तोऽयं, पलायितोऽयम् ।

सूत्रधारः—(कर्णं दत्त्वा) भवतु विज्ञातं पित्रा कृतं सभायां यद् भारवेः मानमर्दनम् । अतः पलायितः सोऽयं संभ्रान्तः खिन्नमानसः । भवतु । पश्यामि तावत् । (निष्क्रान्तः) ।

(प्रस्तावना)

(ततः प्रविशति चिन्तामग्नो भारविः)

भारविः—अहो ! आश्चर्यमेतद् यो हि भारविः संस्कृतसाहित्यकृतावगाहानां पण्डितपुरन्दराणां मूर्धाभिषिक्तः सन् विद्वत्सभायां सर्वश्रेष्ठं स्थानं प्राप्नोति सर्वदा, स एवाद्य पितृकृतावमानेन विदुषामग्रे नम्रमुखो भवन् व्यामोहं गतः । वारत्रयं मम पित्रा श्रीनारायणेन तिरस्कारितोऽहं विद्वत्सभायाम् । (प्रकुप्य) अतो वै तेजोपकर्षंकारिणं पितरं हत्वैव सुखानिद्रामनुभवामि । (कृपाणं निष्कास्य) अनेन चाचक्यमानेन चन्द्रहासेन सुनिश्चप्रचमद्य गलविच्छेदं करिष्यामि । अन्यथा न मदीया स्थितिः समादरश्च भविता विद्वत्-समाजे । (परिक्रम्य) क्व खलु पितरौ, सम्भाव्येते शयनकक्षे तिष्ठतः तावत् । तत्रैव गत्वा कार्यं साधयामि ।

(एकतः भारविर्गच्छति, अन्यतः लक्ष्मीः समागच्छति)

लक्ष्मीः—(उन्मादमुद्रायां) भारवे, भारवे ! क्व नु खलु गतोऽसि त्वं वत्स ! कथं न भणसि ? किं विस्मृतोऽसि ? भारवे-३ ।

(नारायणस्य प्रवेशः)

नारायणः—अयि लक्ष्मि ! कथं प्रमत्तेव प्रजल्पसि ? कोऽयं तव व्यामोहः ? वारं वारं 'भारवे

भारवे' इत्युक्त्या किमर्थं व्यथमात्मानं खेदयसि देवि ? प्रिये ! नास्ति तव भारविः साम्प्रतमेतस्मिन् 'अचलपुरे ।'

(भारविः प्रविश्य तत्र कर्णं ददाति)

भारविः—(स्वगतम्) साधु, अत्रैव पितरौ मामकीन-वार्तासक्तौ वर्तेते । तावदात्मानं संगोप्य प्रतिपालयामि समुचितमवसरम् ।

(करस्थकृपाणं संगोप्य स्थितो भवति)

लक्ष्मीः—किमुक्तम् ? नास्ति मदीयो भारविरस्मिन् अचलपुरे ?

नारायणः—एवमेव ।

लक्ष्मीः—स्वामिन् ! दिनत्रयं जातम् । भारविं विना नाहं क्षणमपि प्राणान् धारयितुं शक्ता । तर्हि सत्यं वदन्तु भवन्तः, कुत्र गतो महाकविः ? भवद्भिः किमुक्तञ्च तस्मै ?

नारायणः—लक्ष्मि ! परह्यः पण्डितसभायां मया तव 'भारवेः मानमर्दनम्' कृतम् । कारणञ्चात्र स सम्प्रति स्वविद्यावैदुष्येण अहङ्कारशीलो दुर्वृत्तश्च सञ्जातः ।

लक्ष्मीः—अहो ! अत्याहितम् । भवतो वचनवाणविद्धो मदीयो भारविः नागमिष्यति गृहम् । हे देव ! रक्ष मदीयमवलम्बनं जीवनधनञ्च ।

नारायणः—लक्ष्मि ! धैर्यं धारय । अहमपि त्वादृशमेव प्राणेभ्योऽप्यधिकं प्रियतरं मन्ये भारविम् । जानाम्यहं भारविः चतुर्षु वेदेषु, पदवाक्यप्रमाणेषु, राजनयधर्मशास्त्रेषु काव्येषु नाटयेषु च परमं कौशलमवाप्य सम्प्रति भारतस्य कोणे कोणे ख्यातिमधिगतो वर्तते । परञ्च वैदुष्यदर्पेण सभासु विदूषां तिरस्कारेऽपि स सन्नद्धो दृश्यते, यच्च न तदनुरूपम् ।

लक्ष्मीः—प्रियतम ! विद्वद्गोष्ठिषु यदि भारविर्विजयते तत्र का हानिः ? एतत्तु भूषणमेव, न च दूषणम् ।

नारायणः—लक्ष्मि ! त्वमतिसरलाऽसि । वाञ्छाम्यहं मम पुत्रो लोकविश्रुतो महाकविः महापण्डितश्च भवेत् । उक्तञ्च—

सर्वतो जयमन्विच्छेत् पुत्रादिच्छेत् पराजयम् ।

लक्ष्मीः—परञ्च स्वामिन् । यूनः पुत्रस्य तिरस्कारो न कदापि शोभनः संलक्ष्यते । उक्तञ्च—

लालयेत् पञ्च वर्षाणि दशवर्षाणि ताडयेत् ।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत् ॥

नारायणः—अयि सरले ! कृपणाऽसि । वाग्भिर्गुरूणां परुषाक्षराभिः तिरस्कृताः यान्ति नरा महत्त्वम्, इत्यभिप्रायेणैवाहं भारविं ताडयामि । अयि भामिनि ! युवावस्थायामुन्मुक्ता भवति मानवप्रकृतिः । उन्माद एव ह्रासस्य मूलनिदानम् । एष एव प्रगतेरुन्नतेश्चावरोधकः । उक्तञ्च—

यौवनं धन-सम्पत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥

सम्प्रति भारविरपि रोगेणानेन आक्रान्तो वर्तते ।

लक्ष्मीः—परञ्च भवतां वचनमन्यथा मत्त्वैव भारविः सम्प्रति इतः पलायितः ।

(नेपथ्ये—साधनायाः कलकाकली श्रूयते)

भुवने परिगीयते च यद्
वचनं तन्मधुरं कथं न स्यात् ।
न सुधा परिहीयते जनैः
गरलं चापि न पीयते तथा ॥

नारायणः—अहो ! साधनायाः कलकाकली समयानुरूपमेव वदति । भवतु, प्रिये ! सम्प्रति विश्रामं कुर्वः । श्वः प्रातरेव भारवेरन्वेषणाय गमिष्यामि, नात्र चिन्ता विधेया ।

(निष्क्रान्तौ) ।

(भारवेः प्रवेशः)

भारविः—अहो ! अनर्थपरम्परा । क्व मदीया पापमयी धारणा, क्व च पित्रोः स्नेहः ! (विचार्य)

वात्सल्यतामनुगतेन पुरः सभायां,
पित्रा महोषधिसमा कटुवाक् प्रयुक्ता।
मत्वा सदोषवचनं सुविचारमूढः,
क्षिप्रं कृपाण गलकर्तनतत्परोऽहम्॥

(कृपाणं परित्यजति)

(विचार्य) इदानीं किं कर्तव्यम् (स्मृत्वा) शोभनम्। एतस्य महापातकस्य परिमार्जनार्थमुत्तराखण्डे गत्वा तपश्चरितव्यम्। अथवा किं तपसा? अनेन कृपाणेनैव कथं न शान्तिमधिगच्छसि। रे मूढ! आत्मघातिनो नैव गतिः। तर्हि? शोभनः कालोऽयम्। सुप्ताः समस्ता जनाः! साधु, गच्छामि एषः। तत्रैव यथेष्टमुपायं साधयिष्यामि। (निष्क्रान्तः)

— पटाक्षेपः —

द्वितीयं दृश्यम्

स्थानम्—गढदेशस्य श्रीनगरनामकं नगरम्।

(नेपथ्ये गीतध्वनिः श्रूयते)

स्थानं सुरम्यं परमं पवित्रं
रत्नौषधीनां विमलं निधानम्।
नगाधिराजं सुगुणानुरूपं
लब्ध्वा जनाः यान्ति सदा महत्त्वम्॥
कर्तव्यदीक्षाकविकाव्यमार्गे
विज्ञानगङ्गा वहतीति यस्मात्।
हिमालयोऽयं हिमराजिताङ्गो
विराजते भारतभूमिभाले॥

(भारवेः प्रवेशः)

भारविः—न तपश्चर्यायां न कवित्वे न चान्यस्मिन् कार्येऽपि मदीया चित्तवृत्तिः संलग्ना भवति। धिक्-धिक्, त्वामधन्यं पितृघातिनम्!

धिग् जीवनं भुवनभारवहं त्वदीयं
धिग् धिग् तथा जनकपापरतं विचारम्।
हे चन्द्रहास परिमार्जय तीक्ष्णपातै-
र्दर्पान्धकारबहुलं कलुषं शरीरम्॥

ॐ शान्तं पापम्! (इति प्रहर्तुमिच्छति। सहसा तत्रैको राजपुरुषः समागच्छति।)

राजपुरुषः—(हस्तं प्रगृह्य) रे मूढ! कोऽसि त्वं यो हि आत्मानं हन्तुमिच्छसि? न हि जानासि रे! अत्र राजपुरुषा अहर्निशं सञ्चरन्ते? इह राजमार्गे कुतः समायातः?

भारविः—हे पुरुषव्याघ्र! पितृघाती महापापी चाहम्। गर्हितमेनं जीवनं नाहं धर्तुंकामोऽस्मि। अहो भाग्यं मदीयं यद् भवादृशस्य पुरुषस्य दर्शनं जातम्। दयालुश्चेद् अनेन कृपाणेनैव कृपां विधेहि।

राजपुरुषः—रे वाचाल! कथं प्रमत्त इव व्यर्थं प्रजल्पसि? किं ते श्रुतिपथं गढदेशाधिपतेश्चन्द्रकीर्तेः नाम नाधुनाऽपि समागतम्? चल, तत्रैव गत्वा स्वकुकृत्यस्य फलमनुभव। (स तं निगडेन बध्नाति)

(नेपथ्ये गीतध्वनिः)

मनसा सुविचिन्त्य यत् क्रिया
क्रियते साद्य फलान्विता सदा।
सहसा न कदापि लभ्यते
चिरकालान्नु फलं वचोन्वितम्॥

– पटाक्षेपः –

तृतीयं दृश्यम्

स्थानम्—गढदेशाधिपतेश्चन्द्रकीर्तेः राजसभा।

(उद्घोषकः डिण्डिमघोषं कृत्वा प्रविशति सभायाम्)

उद्घोषकः—भोः भोः नानादिग्देशादागताः विद्वांसः! शृण्वन्तु तत्रभवन्तः। गढदेशाधिपतेः श्रीचन्द्रकीर्तिमहाराजाधिराजस्य आदेशोऽयं कश्चिदपि यो जनः चन्द्रकलां शास्त्रार्थे जेष्यति, तेन सह तस्याः पाणिग्रहणसंस्कारो भविष्यति। अत समागत्य स्ववैदुष्यपरिचयं ददतु सन्तस्तत्र भवन्तः।

(एकैकशः विदुषां समागमः)

चन्द्रकीर्तिः—(विचारमुद्रायां समुत्थाय)—

पुत्रीति पित्रोः पुरतोऽतिचिन्ता
साकं तया याति सुयौवनत्वम्।
कृते विवाहेऽपि सुखं न वेति
भूयोऽपि चिन्ता न जहाति चित्तम्॥

आश्चर्यमेतद्। द्वित्रा दिवसा व्यतिक्रान्ताः, परञ्च न केऽपि पण्डिताः चन्द्रकलया सह शास्त्रार्थाय समुद्यता भवन्ति। तर्हि परिणयः कथं भविष्यति? हे भगवन्! कीदृशी ते भवितव्यता-निर्मितिः।

मन्त्री—राजन्! नात्र चिन्ता विधेया। अद्य काश्मीरादारभ्य कन्याकुमारीपर्यन्तं पूर्वार्णवतः पश्चिमार्णवं यावत् प्रसृतस्य भारतस्य समग्रा लब्धप्रतिष्ठा विद्वांसः समागताः सन्त्यत्र।

(रङ्गस्थलाद् राजपुरुषेण सह भारवेः प्रवेशः)

राजपुरुष—रे मूढ! इतः, इतः। (विलोक्य) अरे सम्भाव्यते। अत्र राजपुत्र्या सह शास्त्रार्थः प्रचलति विदुषाम्। तर्हि यावन्न समाप्यते सभाक्रमः, तावदत्रैव तिष्ठ।

भारविः—अत्र किं शास्त्रार्थः प्रचलति? भद्र! नाहं विदुषामग्रे गन्तुं समर्थः। कृपालो! मुञ्च माम्।

राजपुरुषः—अलमलम्! मौनमाकलय। नो चेद् लगुडेन ताडयिष्यामि।

चन्द्रकीर्तिः—मन्त्रिन्! तर्हि समेषां विदुषामग्रे पुत्र्याः चन्द्रकलायाः प्रतिज्ञां श्रावय।

मन्त्री—यदाज्ञापयन्ति श्रीमन्तः। (विदुषः प्रति) भोः भोः विद्वन्मण्डलमौलिमणयो मान्या वदान्याः विद्वांसः! सुविदितमेवैतत् तत्र श्रीमतः सकलराजन्यचक्रपूजितस्य गढदेशाधिपस्य श्रीचन्द्रकीर्तिमहाराजाधिराजस्य परमविदुष्याः कन्यायाः चन्द्रकलायाः प्रतिज्ञेयम्—

यो मां जयति वैदुष्ये स मे भर्ता भविष्यति।

अतो वै राजपुत्र्या सह शास्त्रार्थाय सन्नद्धाः भवन्तु तत्र भवन्तः।

सर्वे पण्डिताः—अहं पूर्वमहं पूर्वम्।

चन्द्रकीर्तिः—पुत्रि! चन्द्रकले! श्रावय शास्त्रार्थविषयम्।

चन्द्रकला—(अभिवादनपूर्वकम्)—

प्रश्नोऽयं मम सावधानमनसा शृण्वन्तु विद्वद्वराः
शास्त्राभ्यासरताः पुराणकवयो नान्तं विदुः सर्वथा।
ध्यात्वा यच्च वियोगिनोऽपि मतयो लब्धा न पारं तथा
तत्त्वं किं तदलौकिकं जगति यद्वाचाऽपि नो वर्ण्यते॥

(प्रश्नमाकलय्य सर्वत्र शान्तिः दृश्यते)

चन्द्रकीर्तिः—कथं न कोऽपि प्रत्युत्तरे समर्थः? अहो! किमिदानीं भारतवर्षं कस्याप्येकस्य विषयस्य पण्डिता एव न सन्ति।

(विचार्य)

पण्डिताः निरताः सन्तः
पण्डिताः खण्डिताः पुनः।
अहो रूपमहो भाग्यं
विधेः कीदृग् विडम्बनम्॥

मन्त्री—राजन्! धैर्यं धारयन्तु (विदुषः प्रति) भो विद्वांसः कथं न कोऽपि प्रत्युत्तरं ददाति?

धूर्तपण्डितः—राजन्? नात्र अस्माकं दोषः। उक्तञ्च—राजा कालस्य कारणम्।

पण्डिताः—असमर्था वयम्, असमर्था वयम्।

चन्द्रकीर्तिः—(परिकुप्य) रे रे भारतीयसंस्कृतिप्रतीकभूताः, मिथ्याभिमानशीलाः, पण्डितवेशधारिणः, प्रतारणकुशला विद्वांसः! गच्छन्तु भवन्तः इतः।

(सर्वे नम्रमुखा भवन्ति)

भारविः (स्वगतम्) —

किं जन्मना च तपसा किमु जीवितेन
किं तेन शास्त्रपठितेन किमु श्रमेण।
किं वा मदीमकवितारचनाविलासैः
हंहो न याति समये कुलगौरवाय॥

(प्रकाशम्)—राजन्! आज्ञा चेदहं भवतःकन्यया

सह यस्मिन् कस्मिन्नपि विषये शास्त्रार्थाय समुद्यतोऽस्मि।

चन्द्रकीर्तिः—अरे ! कस्त्वम् ? कथं निगडबन्धनम् ? कुतश्च समायासि ?

राजपुरुषः—देव ! दक्षिणभारतस्य अचलपुरवास्तव्योऽयं भारविनामको जनः। परह्यः राजमार्गे क्षुभितमेनमात्मघातं कुर्वन्तं दृष्ट्वा बद्ध्वाऽऽनीतः श्रीमतां तत्रभवतां चरणसमीपे। अग्रे तत्र भवन्त एव प्रमाणम्।

चन्द्रकीर्तिः—किं भो। सत्यमेतत् ?

भारविः—यदुक्तं तत् सत्यमेव।

चन्द्रकीर्तिः—तर्हि किं वाञ्छसि ?

भारविः—दयालो ! भवद्भिः स्वकीयैः वाक्प्रहारैः समस्तेयं विद्वन्मण्डली तिरस्कृता। अतो वै पूर्वमहमेतेषां प्रतिनिधित्वेन भवतः कन्यया सह शास्त्रार्थं कर्तुं समुद्यतोऽस्मि। ततो यथा भवते रोचते, तद्भवतु।

चन्द्रकीर्तिः—(आत्मगतम्) जाने दैवदुर्विपाकात् पीडितोऽयं कश्चिद् पण्डितः। (प्रकाशम्) तथास्तु। राजपुरुष ! मोचय निगडबन्धनम्।

राजपुरुषः—यदाज्ञापयन्ति श्रीमन्तः। (तथा करोति)

भारविः—(प्रसन्नो भूत्वा)—

विविधविबुधसेव्ये श्रीविलासे निवासे
सुफलमनुगतोऽयं भारविर्नामकोऽहम्।
सुनयनिगमकीर्तिश्चन्द्रकीर्तिः स्वराज्ये,
जयतु जयतु नित्यं पूर्णमैश्वर्यलाभात्॥

चन्द्रकीर्तिः—साधु, साधु। पुत्रि रसिके ! सम्पादय स्वमनोरथम्।

चन्द्रकला—(अभिवादनपूर्वकम्)—

प्रश्नोऽयं मम सावधानमनसा शृण्वन्तु विद्वद्वराः
शास्त्राभ्यासरताः पुराणकवयः नान्तं विदुः सर्वथा।
ध्यात्वा यच्च वियोगिनोऽपि मतयो लब्धा न पारं तथा
तत्त्वं किं तदलौकिकं जगति यद् वाचाऽपि नो वर्ण्यते॥

भारविः—

जानेऽहं तव चातुरीं सुरसिके तत्त्वे वि-योगे रतिः,
मीमांसानवभाष्यकारमुनिनां शास्त्रे न यस्मिन् गतिः।
आस्वाद्ये परमानुभूतिसकला योगे वियोगे यतिः,
किं वा ब्रह्मणि काव्यराससुरसे प्रश्ने त्वदीया मतिः॥

चन्द्रकला—

चक्षुर्भ्यां न हि दृश्यते न च तथा संश्रूयते कर्णतः,
त्वग्भिर्यो न समेति तद्विषयतां नो वेत्ति यं नासिका।
ज्ञाप्यो नैव न कार्यकालकरणं नित्यानुमेयो च नो
लोके चास्ति न लौकिकस्तदपि सः प्रश्नो विशेषाशयः॥

भारविः—

प्रत्यक्षं नहि गोचरं व्रजति यः
साध्यः प्रमाणैः कथम्,
कार्यो नैव समूहलम्बनतया
ज्ञाप्यो न सत्तां विना।
हेत्वाभासतया - ऽनुमेयविषयो,
युक्तो न नित्योऽपि सः,
ब्रह्मास्वादसहोदरश्च कथितः
नाम्ना 'रसो वै श्रुतिः'॥

अयि रसिके ! तन्महत्त्वमपि श्रूयताम्—

विद्याभूषणभूषिता हि विबुधा
यत्प्राप्य सौख्यान्विताः,
लब्धुं तत्प्रभवन्ति काव्यरसिकाः
साहित्य - सारस्वतम्।
आस्वाद्य स्वयमेव ब्रह्मसदृशं
लोकोत्तरं यत्सुखं,
साहित्यार्णवगाहिभिर्वदतु भो
प्राप्तं न किं तद् धनम्॥

चन्द्रकला—

धन्या वाक्पटुता सुखण्डनविधि-
र्धन्यो गुणाढ्यो भवान्,
कामं काव्यकलासु यन्मधुरिमा
नास्वाद्यते तत्क्वचित्।

सत्यं चाद्य पराजिताऽथ भवता
सद्युक्तिसारैरियम्,
विद्वन् ! स्वीकुरुतामिमां सुरसिकां
मालां मदीयार्पिताम् ॥

(सा पुष्पमालां भारवेः कण्ठे क्षिपति,
सभायां करतलध्वनिः जायते)

धूर्तपण्डितः—(उत्थाय)—राजन् ! एष भारविः पितृघाती वर्तते । कथं परिणयो भविष्यति ? विषयेऽस्मिन् ? अवश्यमेवाहं जेष्यामि । पुनः शास्त्रार्थो भवतु ।

नारायणः—कथं भोः !

पण्डितः पण्डितं दृष्ट्वा श्वानवद् घुर्घुरायते ।

राजन् ! अयं मिथ्या वदति, जीवितोऽहं भारवेः पिता ।

भारविः—पितः ! प्रणमति भवतां चरणचञ्चरीको भारविः ।

नारायणः—हे पुत्र ! प्रख्यातयशस्को भव ।

(आश्चर्यचकिता भवन्ति सर्वे विद्वांसः)

नारायणः—भो भो विद्वांसः !

राकायां यदि ते मनो न रमते
चन्द्रस्य किं तर्जनम्,
साहित्ये न रसानुभूतिमधुरा
किं वा कवेर्दूषणम् ।
शास्त्रार्थे सति भारविर्विजयते
ते किंवदती वृथा,
किं लब्ध्वा विमलं वसन्तसमयं
चिल्लोऽपि हंसायते ॥

चन्द्रकीर्तिः—भवतु ! विज्ञातम् (शिरः प्रकम्प्य) सत्यमिदम् ।

(विद्वांसस्तत एकैकशो निःसरन्ति)

मन्त्री—भो भो विद्वांसः ! तिष्ठन्तु तावत् यावदत्र समाप्यते स्वयंवरमहोत्सवः ।

(धूर्तपण्डितः सङ्केतेन विदुषः कथयति)

धूर्तपण्डितः—भो भोः ! मिष्ठान्नेनैव सन्तोषमनुभवामः । (सर्वे उपविशन्ति)

चन्द्रकीर्तिः—भो भो विद्वांसः ! अद्य मदीयो मनोरथः प्रियपुत्र्याः चन्द्रकलायाः प्रतिज्ञा च सफला जाता । सर्वमेतद् रहस्यमपि सम्यग् रूपेणावगतम् । भवद्भिः ज्ञातमेव सम्प्रति महाकवि - भारविसदृशः सर्वविद्याधुरन्धरो विद्वान् नास्ति कोऽप्यन्यः इह भारतवर्षे । भवतु, मन्त्रिन् ! क्षिप्रमेव वैदिकसंस्कारविधिना पाणिग्रहस्य व्यवस्था कार्या ।

मन्त्री—यदाज्ञापयन्ति श्रीमन्तः ।

(निष्क्रान्तः)

चन्द्रकीर्तिः—भोः ! गीर्वाणवाणीप्रणयिनो विद्वांसः ! पूर्वं मया कोपावेशवशात् भवद्भिः समं यदभद्रं व्यवहृतम्, तदर्थं क्षमां याचे । (भारविं प्रति) महाकवे ! भूयः किमिष्टं सम्पादयामि भवतः ?

भारविः—राजन् ! इतोऽप्यधिकं किमिष्टं प्रियं वा भवितुं शक्नोति ? तथाप्यस्तु भरतवाक्यमिदम्—

क्षेत्रेषु कृषका भवन्तु सुभटा
युद्धे च वीरा नृपाः,
स्वे कार्ये सुरतां प्रयान्तु वनिता
राष्ट्रस्य संरक्षणे ।
विश्वे सन्तु सुसम्पदः सुफलदाः
सम्मानिताः स्युर्बुधाः,
सेयं श्रीसुरभारती - विजयतां
शान्तिर्भवेद् भूतले ॥

— पटाक्षेपः —

ध्वनि-वैभवम्

— श्री रवीन्द्रकुमार सिद्धान्तशास्त्री —

[पञ्चतीर्थः, एम्० ए०, पी० आर० एस्०]

[श्री रवीन्द्रकुमार सिद्धान्तशास्त्रिणो वङ्गदेशे सुप्रथिताः काव्यशास्त्रमर्मज्ञाः । 'ध्वनि-वैभवे'ऽस्मिन् निबन्धे ध्वनेः सर्वाङ्गीणं विवेचनं तत्तद्ग्रन्थसङ्गमनपूर्वकं कुर्वद्भिरेतैः स्वीया अपि बहवो निर्णयाः प्रस्तोतिताः । निबन्धोऽयं कलिकाता-विश्वविद्यालयीय-'मौयाठ'-स्वर्णपदकेन समलङ्कृतश्च । वयमेतं निबन्धं क्रमशोऽत्र प्रकाशयामः, निबन्धकांश्च साफल्याय समुपश्लोकयामः । —सम्पादकः]

(१)

महाकविविरचितेषु ग्रन्थेषु विदग्धजन-भाषितेषु च विद्यन्ते कानिचिद् वाक्यानि, यैरुत्पाद्यते नितरां चमत्कारातिशयः सहृदयानां चेतसि । कीदृशोऽयं चमत्कारातिशय इति प्रख्यापयितुं प्रवृत्तास्तत्रभवन्त आनन्दवर्धनाचार्यपादा आहुः—

'प्रतीयमानं पुनरन्यदेव
वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत्प्रसिद्धावयवातिरिक्तं
विभाति लावण्यमिवाङ्गनानाम् ॥'[1] इति ।

प्रतीयमानार्थः

अयमभिप्रायः—महाकवि-विरचितेषु काव्यग्रन्थेषु दृश्यते तावदन्तरान्तरा वाक्यानां द्विविधोऽर्थः । एकः खलु वाच्यः, अपरस्तु प्रतीयमानः । तत्र वाच्यार्थस्तावदभिधानेन वा व्याकरण-विधानबलेन वा निरूप्यते । प्रतीयमानार्थस्य निरूपणे तु कारणतां याति व्यञ्जनाभिधाना वृत्तिः । न खल्वयं प्रतीयमानोऽर्थः पदार्थान्वयमात्रबोध्यः । पाणिपादादिभिः विभिन्नैरवयवैर्यथा विरच्यते कश्चन प्राणिदेहः, तथैव रच्यते वाक्यमवयवसदृशैः विभिन्नैः पदैः । तानि च पदान्याश्रित्य विराजते वाच्योऽर्थः । प्रतीयमानार्थस्तु व्यतिरिक्त एव तस्मात् । यथा खलु ललनादेहे विद्यते लावण्यं तथैवाऽस्ति विदग्धजनभाषिते प्रतीयमान एषः अर्थः ।

लावण्यम्

अथ किं तल्लावण्यमित्यपेक्षायां शास्त्रकारैरभिहितम्—

'मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा ।
प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥'[1] इति ।

यथा खलु कस्मिंश्चित् निर्मले मुक्ताफले प्रतिफलितं मनुष्यस्य रूपं लोकातीतैश्चाकचिक्यैर्भूषितमवलोक्यते, तथैव निसर्गमनोहरं किमपि चाकचिक्यमयं तारल्यं दृश्यते ललनादेहे विराजितं समवायतः । ललनादेहस्थितमेतदेव रूपतारल्यं लावण्यमिति निगद्यते । एतत्तु लावण्यमवयवसंस्थानातिरिक्तं केवलमवयवानाश्रित्य विराजते । यथा खलु क्षितौ गन्धः, सलिले शैत्यम्, उष्णता च तेजसि, तथैव विराजितमिदं लावण्यमङ्गनादेहे समवाय-सम्बन्धेन ।

इदन्तु लावण्यं न खलु वाक्यैः प्रकाशितुं शक्यते ।

---

[1] ध्वन्यालोकः, १.४ ।

[1] उज्ज्वलनीलमणिः; उद्दीपनविभावप्रकरणम्; २६ का० ।

वाक्यार्थप्रकाशादनन्तरमाविर्भवति । यदा काचिदनुभूतिः सहृदयस्य चेतसि, तदैव तदनुभूतिबलादवगन्तुमर्हति स लावण्यमेतत् । प्रतीयमानार्थोऽपि अनेनैव प्रकारेण वाच्यार्थबोधादनन्तरं केवलं सहृदयैरेवावगन्तुं शक्यते । उक्तञ्च तत्रभवद्भिरानन्दवर्धनाचार्यैः—

> 'यथा ह्यङ्गनासु लावण्यं पृथङ् निर्वर्ण्यमानं निखिलावयव - व्यतिरेकि किमप्यन्यदेव सहृदय - लोचनामृतं तत्त्वान्तरं तद्वदेव सोऽर्थः[1] इति ।

ध्वनि-लावण्ययोर्भेदः

एवंस्थितेऽपि ध्वनि-लावण्ययोरन्योन्यसादृश्ये विद्यते अनयोः कश्चित् सुमहान् प्रभेदः । लावण्यं खलु येन केनापि दृष्टिवता जनेन सम्यगवलोकयितुं शक्यते । तथा हि—यो द्रष्टुं शक्नोति कस्याश्चिदङ्गनाया अङ्गानि, स एव द्रष्टुमर्हति तस्याः लावण्यमपि । ध्वनिग्रहणव्यापारे तु विद्यते पार्थक्यमेतस्मात् । यद्यप्येकस्मिन्नेव वाक्ये विद्येते ध्वनिवाच्यार्थौ, तथापि वाच्यार्थग्रहणे दृश्यते सामर्थ्यं सर्वेषामेव नराणां भाषामात्रञ्चेद् विज्ञायेत तैः । ध्वन्यर्थस्योपादाने तु विद्यते नितरामपरिहार्यं प्रयोजनं सहृदयताया अपि तेषाम् । दृश्यते च—व्याकरणशास्त्रे प्रभूतं ज्ञानमाहृत्यापि कश्चन सहृदयतारहितो जनो ध्वन्यर्थमुपलब्धुं न पारयतीति । एवं सहृदयतामात्रसंवेद्यत्वमस्य ध्वनेः प्रकाशयितुं प्रवृत्तैस्तत्रभवद्भिर्ध्वनिकारैरुक्तम्—

'योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः ।
वाच्य-प्रतीयमानाख्यौ तस्य भेदावुभौ स्थितौ ॥'[2]

सहृदयता

ननु केयं सहृदयता, कुत्र च सा विद्यते ? इत्येतदपि तावद् वक्तव्यमस्माभिः । व्याकरण-साहायकेन चेदर्थो निर्णीयते, तदा व्याख्यानमेवं भवेत्—'सह हृदयेन वर्तते' इति सहृदयः, तस्य भावः सहृदयता ।' 'हृदय'शब्दस्तु चित्तपर्यायः । स च 'चिति संज्ञाने' इति धातोः क्तप्रत्ययेन निष्पन्नः । तेन हि हृदयशब्दोऽयं मननशीलतायाः समपर्यायतां याति । मननशीलता च मनुष्यमात्रस्य स्वाभाविको धर्मः । हृदयञ्च प्राणिनां वक्षोऽभ्यन्तरसंस्थितो देहयन्त्रविशेषः । तच्च हृदयं सर्वेषामेव प्राणिनां देहे विराजते । अतः सञ्जा-

जय जय मेघकवे !

१. जय जय मेघकवे !
ऋतुसंहारविधौ कलयसि नवगीतम् ।
जडमपि जगदनुभावपरीतम् ।
सरसीकृतनीरसर्ग ! जय-जय...

२. शिवसौन्दर्ययुगे प्रथयसि रसधारम् ।
सम्भावयसि कुमारमुदारम् ।
संहतहठतारकबन्ध ! जय-जय...

३. हठमनुरागवशो विपदीकृतसन्धम् ।
पौरवमुनितनयापरिरम्भम् ।
दुर्वहविरहेण पुनासि ! जय-जय...

४. हृदयरमादर्शे शठशापदुरापे ।
मुखरितभुवनविरहपरितापे ।
दूतीकृतरसमय मेघ ! जय-जय...

५. लोकादर्शजुषं पौरुषसम्भारम् ।
प्रणयसि रघुकुलनृपमिषुसारम् ।
भारतगौरववरदूत ! जय-जय...

६. विनयदुमाशङ्करकृतनवरसरम्या ।
हरतु मनः पञ्चपदी धन्या ।
वागियमभितो मुदमेतु ! जय-जय...

—श्री उमाशङ्करशर्मा त्रिपाठी
[प्राध्यापकः—काशीविद्यापीठस्य]

---

[1] ध्वन्यालोकः ; उद्द्योतः१ ।
[2] ध्वन्यालोकः, प्रथमोद्योतः ।

यते प्रश्नः—कथं सर्वैरेव मनुष्यैर्ध्वनिरुपलब्धुं न शक्यते इति ? अत्र वदामः ; यद्यपि प्राणिदेहमात्रे एव विद्यते सत्ता हृदयस्य, तथापि यस्य विशेषेणोल्लेखो विज्ञापयति, काचिदसामान्या मनोरमा मननशीलता, सैवेह सहृदयताशब्देनः अवगन्तव्येति ।

ध्वनेः काव्यप्राणत्वम्

एवं विशेष-मानसिकशक्तिमद्भिः योऽवगम्यते प्रकाश्यते च, स खलु सर्वेषामेव सहृदयानां चेतस्सु सम्यगुत्पादयति कञ्चन मनोऽभिराममानन्दपारावारम् । एष एव ध्वन्यर्थः काव्यस्य प्राणस्वरूपमि इति निगदितं तत्रभवद्भिरानन्दवर्धनाचार्यैः—'काव्यस्य हि ललितोचित - सन्निवेशचारुणः शरीरस्येवात्मा साररूपतया स्थितः सहृदयश्लाघ्यो योऽर्थस्तस्य वाच्यः प्रतीयमानश्चेति द्वौ भेदौ'[1] इति ।

ध्वने प्रसिद्धिः

ननु उल्लिखितवाक्यादनन्तरमेव तत्रभवद्भिर्ध्वनिकारैरुक्तम्—'तत्र वाच्यः प्रसिद्धो यः प्रकारैरुपमादिभिः' इति । तदनन्तरञ्च 'प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्' इति । अपि नाम तर्हि वाच्यार्थमात्रस्यैव प्रसिद्धत्वं ध्वनेस्त्वप्रसिद्धत्वं ध्वनिकाराणामभिमतमासीदिति बोद्धव्यम् ? अत्रोच्यते—वाच्यार्थस्य भाषामात्रज्ञानवद्भिरितरजनैरपि संवेद्यत्वं विज्ञापयितुमेव तस्य प्रसिद्धत्वमुद्घोषितमाचार्यपादैः । ध्वनिस्तु सहृदयजनमात्रबोध्य इति न तस्य सार्वत्रिकी सत्ता, इत्येतावन्मात्रं विघोषयितुं ध्वनेः प्रसिद्धत्वं विशेषणं न प्रयुक्तम् । परमार्थतस्तु सहृदयसमाजे विद्यते ध्वन्यर्थस्य सर्वथा प्रसिद्धिः । केवलमितरजनसविध एव विद्यते तस्याप्रसिद्धत्वम् ।

ध्वनेर्द्वैविध्यम्

काव्यत्मभूतस्य ध्वनेर्द्वैविध्यमुक्तं तत्रभवद्भिर्ध्वनिकारैः । विभक्तश्चासौ वाच्य-प्रतीयमानरूपाभ्यामर्थाभ्याम् । एतद्विलोक्य तत्रभवद्भिर्दर्पणकारैरुल्लिखिते ध्वनिकारवचने दोषं प्रख्यापयितुं काचन युक्तिः प्रदर्शिता । तदुक्तं दर्पणे प्रथमपरिच्छेदे—"तत्र वाच्यस्यात्मत्वं 'काव्यस्यात्मा ध्वनि'रिति स्ववचनविरोधादेवापास्तम्" इति । वस्तुतस्तु ध्वनिकाराणामभिप्राय एव तत्रभवद्भिः दर्पणकारैर्नोपलब्ध इति मन्यते तावदस्माभिः ।

ध्वनिः खलु वाच्यार्थमवलम्ब्यैव स्थातुमर्हति । यत्र वाच्यार्थो नास्ति, तत्र ध्वनेः सत्तैव स्थातुं नार्हत् । ननु तर्हि भवतु ध्वनिरेव काव्यस्यात्मा, वाच्यार्थश्च तच्छरीरमित्येतदपि वक्तुं न शक्यते ; शब्दराशेरेव काव्यस्वरूपरूपेण विद्यमानतायाः प्रत्यक्षीभूतत्वात्, पूर्वाचार्यैः स्वीकृतत्वाच्च । तदुक्तं दण्डिना—

'शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली'[1] इति ।

न खलु शरीरस्य किमपि शरीरान्तरं स्थातुमर्हति । इत्येतद् विचिन्त्यैव निगदितमानन्दवर्धनपादैर्वाच्य-प्रतीयमानरूपेण विद्येते ध्वन्यर्थस्य द्वौ भेदाविति । यथा खलु मनुष्यदेहे जीवात्मा परमात्मा चेत्यात्मनो द्वौ भेदौ सर्ववादिसम्मतौ भवतः, तथैव ध्वनिकारमते ध्वन्यर्थस्य वाच्य-प्रतीयमानरूपं भेदद्वयं स्थातुमर्हति । यथा च परमात्मनः सम्यक् परिशीलने न विद्यते जीवात्मनः किमपि परिशीलनप्रयोजनं तथैव ध्वनितत्त्वपरिशीलनपरैरपि वाच्यार्थो न गण्यत इति नायं दोषः ।

(क्रमशः)

---

[1] ध्वन्यालोकः ; प्रथमोद्द्योतः ।

[1] काव्यादर्शः, प्रथमपरिच्छेदः, श्लो० १० ।

द्वे समस्ये

१. माधुरी :

वसेन्मनसि मन्दिरे मम सदेन्दिरासंस्तुता
सुरेन्द्रमुनिदुर्लभा विबुधसुन्दरीवन्दिता ।
मुरारिचपलेक्षण - द्वय - चकोरकाम्यानिशं
सुकीर्तिकुलनन्दिनी - वदनचन्द्रिका माधुरी ॥
निपीय हृदयेन यां त्यजति कच्छपीं शारदा
जहाति महतीमहो चकितचेतसा नारदः ।
द्रुतोत्थितफणः फणी तरलितान्तरस्तुम्बुरु-
हरेर्जयति सा सदा मुरलिकाध्वने-र्माधुरी ॥

२. धीमहि :

व्याप्तं पादविभूतितोऽनवरतं दृश्यप्रपञ्चेऽखिले
यत् पादत्रयवैभवेन परमव्योमास्पदं राजते ।
आहुर्ब्रह्म परं यदेव सुधियः सर्वात्मना भाति यत्
तत् सान्द्रं हृदि नन्दनन्दनमहो ध्येयं परं धीमहि ॥

—श्री रामनारायणदत्त शास्त्री पाण्डेयः—

पञ्जीकृत-संख्या—एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५ सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४९

❀

अङ्कः ७

❀

सम्पादकः
गो० न० वैजापुरकरः

❀

जुलाई
१९७२

❀

वार्षिक-मूल्यम्
५) रूप्यकाणि

❀

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

❀

धन्येयं भरतावनिः !

●

१. धन्येयं भरतावनिः श्रुतिशिखापीयूषधाराधरा
धाराभिर्धरणीं सुधारसमयीं कुर्वन्ति कालाद्बहोः ।
यस्मादत्र वसिष्ठमुख्यमुनयः प्रादुर्बभूवुः पुरा
सद्योऽपि प्रभवन्ति पुण्यपुरुषाः संख्यासहस्राधिकाः ॥

२. श्रीमन्माघवनी वनीवदवनी या भारतीया चिरं
श्रीभोजादिमहीभुजाह्व - सुमनोभूजप्रसूनोद्भवम् ।
बिभ्राणा सुपरीमलं कविवर-श्रीकालिदासादिकान्
चक्रे श्राव्यकवित्वगानरसिकानिन्दिन्दिरानादरात् ॥

३. शब्दब्रह्मविदः पुराणकवयः सारस्वतोपासका
ब्रह्मर्षिप्रवरा अबोभवुरहो श्रीभारते भासुराः ।
तद्वत्पूज्यपतिव्रताः प्रभविताः सीताऽनसूयादिका
एतद् भारतभागधेयमखिलं स्मृत्वा मनः खेलति ॥

४. भरत - वसुमतीका ब्रह्मविद्या - नदीष्णा
उभयकुल - पवित्राः सन्ति ये धर्मदाराः ।
निरतमपि पयोदा धेनवो निर्झरिण्यः
प्रणतिशतमहं तान् तांश्च नित्यं करोमि ॥

—डॉ० डी० अर्कसोमयाजी

अनुक्रमः

प्रपानकः	पत्रपुटम्	परिवेषकः
मुरलिका-रवः	१४५	श्री महाकविः कर्णपूरः
श्रीमहर्षि-ज्ञानानन्द-चरितम्	१४६	श्री स्व० विन्ध्येश्वरीप्रसाद शास्त्रिणः
विश्वविद्यालयीयस्य अध्यादेशस्य समीक्षा	१४७	सम्पादकीयम्
वाराणसेय-संस्कृत-विश्वविद्यालयस्य कृते पृथक् अध्यादेशस्यावश्यकता	१५०	श्री 'अङ्गारः'
गृह्यसूत्राणां रचना-कालः	१५३	श्री नन्दकिशोर पाण्डेयः
संस्कृतभाषाया वैज्ञानिकं वैशिष्ट्यम्	१५५	श्री शोभित मिश्रः
(८) प्राचीन-भारतीयाः क्रीडाः	१६०	श्री डॉ० नरेश झा
रथो रथारूढो वामनश्च	१६४	श्री दुर्गाप्रसन्न विद्याभूषणः
संस्कृतभाषाया लोकोपयोगित्वं कथं स्यात् ?	१६७	श्री ब्रह्मानन्द त्रिपाठी

●

सूचना : मईमासाङ्के ९७ पृष्ठस्य 'तनो तु मम शं तनोः…' लेखस्य लेखकनाम मुद्राराक्षसानां कृपया अशुद्धं मुद्रितमभूत् अनुक्रमे। तल्लेखकाः पण्डितराजाः श्री जगन्नाथपादाः सन्तीति पाठकः कृपया संशोध्य पठनीयम्।—**सम्पादकः**

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४९ वर्ष] वाराणसी, आषाढः, २०३० वै० : जुलाई १९७३ ई० [७ अङ्कः

मुरलिका-रवः !

●

धन्यासि भो मुरलि ! यत्परिपीयमाणा श्यामेन तद्दशनचन्द्रिकयाऽसि दिग्धा।
स्निग्धा सती मणितवत्कलकूजितानि संतन्वती भुवनमुत्तरलीकरोषि॥ १॥
वृन्दावनस्य महिमा नहि मादृशीनां गम्यो यदत्र मुरभिन्मुरलीरवेण।
स्वान्तं विलास्य मृदुलास्यमगुर्मयूराः स्पन्दं जहुस्तरुलता मरुताहताश्च॥ २॥
किं दुश्चरं चरितमालि ! तपो मृगीभिः पश्यन्ति याः समुरलीकलमास्यमस्य।
अक्ष्णोः प्रकामकमनीयगुणत्वमासां मा साम्प्रतं भवति संप्रति संप्रतीह॥ ३॥
सौभाग्यभागियमहो सखि ! कृष्णसारी सारीकरोति नयने सह कृष्णसारा।
वंशीनिनादमकरन्दभरं दधानं कृष्णास्यपङ्कजमशङ्कित - मापिबन्ती॥ ४॥
अर्धावलीढ - यवसाङ्कुरशोभिदन्ताः सोत्कण्ठमुन्मिषितनेत्र - मुदीर्णकर्णम्।
चित्रार्पिता इव पतन्तमिवामृतौघं वेणुध्वनिं श्रुतिपुटे गमयन्ति गावः॥ ५॥
[illegible]ोकलं कलयतोऽस्य निपीय दृग्भ्यां रूपामृतं पुनरमुष्य रसानुभूत्या।
पद्धतेरा[illegible]यन्ति मीलितदृशः सखि ! बद्धमौना बद्धासनं मुनय एव पतत्रिणोऽमी॥ ६॥
[illegible]ते - रथाङ्गकलहंस - विचित्रचेले प्रव्यक्त - सैकतनितम्ब - मुदीर्णफेनम्।
आवर्तवर्तित - घनभ्रमिभिः समीयेऽपस्मार एव मुरलीनिनदैर्नदीभिः॥ ७॥
वीचीकरैः सरसिजाञ्जलिमर्पयन्तः कृष्णाङ्घ्रिपङ्कजयुगं बहु मानयन्त्यः।
सच्छीकरैः शिशिरयन्ति रसेन वंशीनादप्रहृष्टमनसः सखि ! शैवलिन्यः॥ ८॥

—महाकविः श्री 'कर्णपूरः'

पूर्वतोऽनुवृत्तम्

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

-- स्वर्गीयाः श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः --

(अथ एकोनविंशे सर्ग)

१. अथैकदाऽभूदिह काशिकायां सम्मेलनं रम्यमभूतपूर्वम् ।
समस्त - भूखण्डवरैशियायाः शिक्षाविदां विद्वदपश्चिमानाम् ॥
२. कामाख्यदेवी - निकटस्थ - हिन्दूविद्यानिकेत - प्रसरे वरेण्ये ।
ख्रैस्ते वियद्वह्निनवेन्दुवर्षे (१९३०) दिसम्बरस्या-ऽन्तिमसप्तके च ॥
३. जापान - चीना - ऽरब - काबुलेभ्यः काम्बोज - काकेशय - सिंहलेभ्यः ।
जावा - सुमात्रा - वर - वाह्लिकेभ्यः पारस्य - बर्मा - नयपालकेभ्यः ॥
४. अस्यार्यदेशस्य च भारतस्य मद्रा-ऽन्ध्र-सौराष्ट्र-कलिङ्गकेभ्यः ।
पाञ्चाल-शाल्वा-ऽङ्गक-वङ्गकेभ्यः प्रान्तेभ्य एभ्योऽपि तथाऽन्यतोऽपि ॥
५. पौरस्त्य - पाश्चात्त्यविभिन्नशिक्षा - प्राविण्यभाजां बुधपुङ्गवानाम् ।
सहस्रशः शिक्षणवित्तमानां सम्मर्द आसीत् समुपस्थितोऽत्र ॥
६. विज्ञान - सद्दर्शन - शिल्पशास्त्रमर्मज्ञ - दोषज्ञवरा ह्यनेके ।
सर्वत्र ये ये प्रथिताः सुधीन्द्राः शिक्षाविधिज्ञा उपतस्थिवांसः ॥
७. पाश्चात्त्यदेशेभ्य इहाप्यनेके शिक्षाविशेषज्ञतया प्रसिद्धाः ।
मनीषिणः शिक्षणविश्रुतास्तेऽपीयुर्विशिष्टेन निमन्त्रणेन ॥
८. एतेषु केचित् सुधियोऽस्य साधोर्यशः समाकर्ण्य विमुग्धचित्ताः ।
जिज्ञासवः शिक्षणलक्ष्यमर्ह्यं डुढौकिरे तच्चरणारविन्दम् ॥
९. पप्रच्छुरेते विनयेन योगिन् ! भवांस्तु तत्त्वज्ञवरः श्रुतो नः ।
किमस्ति लक्ष्यं किल शिक्षणस्य प्रसद्य नो व्याहरतु प्रपन्नान् ॥
१०. सभाजयंस्तान् निजसाधुवादैः सुस्वागताद्यापचितिं प्रयुज्य ।
यत्नात् प्रतिष्ठाय वरासनेषु तदुत्तरं दातुमसौ प्रवृत्तः ॥

(क्रमशः)

विश्वविद्यालयीयस्य अध्यादेशस्य समीक्षा

प्राचीन-भारतीयेतिहासे शिक्षा किल सर्वथा शासनप्रभावनिर्मुक्ताऽऽसीत्। नैतावदेव, शासकानामुपर्येव शिक्षाविदां प्रभाव आसीत्। समग्रे प्राचीनभारतीये वाङ्मये भूयांस्यस्य निदर्शनान्यासादयितुं शक्यानि। अनेनैव महत्त्वपूर्णेनाभ्युपगमेन सनातनी भारतीया संस्कृतिस्तत्तत्कालीन-शासनविशेषस्य प्रभावेणाऽसंपृक्ता स्वीयं वास्तविकं स्वरूपं गोपायितुं क्षमाऽभवत्। किन्तु आंग्लदासताभिशापतो लार्ड कर्जनस्य काले एव सर्वोच्चशिक्षासंस्थायां विश्वविद्यालये राजकीय-हस्तक्षेपो महत्त्वपूर्णतां गतो येन विश्वविद्यालयीया स्वायत्तता ह्रासं गता। ततः परं 'सैण्डलर-आयोग'स्य प्रस्तावानुसारं विश्वविद्यालय-शासनप्रारूपं जनतान्त्रिकं विधातुं निर्वाचनपद्धत्या विश्वविद्यालयीय-प्रशासन-व्यवस्थासमितीनां निर्माणस्य प्राविधानं कार्यरूपतां गतम्। किन्तु कियत्कालानन्तरं 'राधाकृष्णन्-आयोग'स्य प्रतिवेदनेन पुनरपि विश्वविद्यालयस्वरूपं सङ्कुचितमभवत्। ततः परं चिरात् श्रूयते यत् केन्द्रीयशिक्षामन्त्रालयो विश्वविद्यालयानां कृते आदर्शसंविधानं निर्मिमीते यद्धि विश्वविद्यालयानां पुनस्सङ्घटनम्, प्रशासनम्, सञ्चालनं शैक्षणिकस्तरञ्च सुदृढं स्वच्छञ्च विधास्यतीति। किन्तु अद्यावधि तदादर्शसंविधानं गर्भावस्थामेव समनुभवतीति महत् क्षोभावहं वस्तु।

वस्तुतो देशस्य स्वातन्त्र्यलाभेन सहैव शिक्षापद्धतेरामूलचूलं वैज्ञानिकं सांस्कृतिकं परिवर्तनं कर्तव्यमासीत्। महद्भिस्त्याग-बलिदान-कष्टादिभिः समर्जितायाः स्वतन्त्रतायाः स्थैर्यस्य तन्महत्तरं प्रयोजकमास्ते। परमस्माकं नेतृवरा राजनैतिकेषु नैकेषु क्षुद्रतमेषु सामाजिकविषयेषु क्षुद्रदलीय-जातीयस्वार्थेषु वा एतादृशा निमग्ना आसन्, सर्वतोऽधिकमात्मनो देशस्य धर्मस्य वा गौरवमपि अनादृत्य वैदेशिकेभ्यः शुष्कप्रतिष्ठार्जने एव व्यापृता आसन्। फलतः शिक्षाक्षेत्रं सर्वथा निरुपप्लवं तेषां कृते दयादानपात्रायितमेवाभवत्। क्षेत्रतोऽस्मात् उत्तरोत्तरं प्रमाणपत्रीय-योग्यतामात्रधनाः भूयांसः शिक्षिताः प्रादुर्भवन्त आसन्। क्षेत्रस्यास्य शासनोपेक्षितत्वेन वैयक्तिकस्वार्थसाधकानां व्यक्तीनां दलानामुत्पातकारिणाञ्च अत्रामर्यादं प्रसरोऽभूत्। तथाकथितशिक्षितानां कृते पुनः शासनतः समुचितजीवनयात्रानिर्वाहसाधनानामसंयोजनेन तेषु अकर्मण्यताकृतः क्षोभोऽपि वर्धमान आसीत्। अस्यैव सर्वस्य प्रमादजातस्य दुष्परिणतिः साम्प्रतिकेषु विश्वविद्यालयेषु अहरहो दृश्यमाना अभूतपूर्वा उपद्रवाः, महाभियानानि, अग्निकाण्डादीनि। शासनमेतेषां निरोधाय बाह्यान् सेना-गुलिकाप्रहारादीन् उपायानेव प्रयुञ्जते। मूलभूते देश-संस्कृति-समुन्नायक-जीवननिर्वाहकयोग्यतानुसारि-शिक्षाव्यवस्थासञ्चालनविधायके उपाये तत्सर्वथा उपेक्षाभावमेव भजते।

राष्ट्रव्यापिनोऽस्य रोगस्य संक्रमणम् उत्तरप्रदेशराज्येऽतितरां विकृतरूपतां परिणतं सदस्माकं पुरतो लक्ष्मणपुर (लखनऊ)-विश्वविद्यालयीया-ऽग्निकाण्डेन-सैनिकविद्रोहादिरूपैश्च समुपस्थितम्। दुरवस्थायामस्यां राज्यशासनस्य ध्यानमाकृष्टम्, यस्य मूर्तं रूपम् 'उत्तरप्रदेश-विश्वविद्यालय-विधेयकम् १९७३' इतिरूपेण विधानसभायां प्रस्तावितं तेन शासनेन। राज्यविधानपरिषदा एतत् पारितमपि। किन्तु विधानसभा-सत्रावसानेन विधेयकेऽस्मिन् तनुमोदनं नाभवत्। तत्पूर्वमेव राज्यमन्त्रिमण्डलं भङ्क्त्वा राष्ट्रपतिशासनं प्रारभत जूनमासस्य ११ दिनाङ्के। राष्ट्रपति-शासनेऽस्मिन् ये किल अध्यादेशाः कार्यान्वयो-

कृतास्तेषु सर्वाधिक - चर्चाविषय उत्तरप्रदेश - विश्वविद्यालयाध्यादेशो नाम। अध्यादेशोऽयं स्वतन्त्रताप्राप्तेः पञ्चविंशतिवर्षान्तरं विश्वविद्यालयानां प्रशासकीयप्रकारे एकरूपतापादकः सम्भवतः कस्यापि राज्यशासनस्य सर्वप्रथम उपक्रमः किल।

अद्यावधि राज्यस्तरीय-विश्वविद्यालयानां कुलपतिः राज्यपालः, केन्द्रस्तरीय-विश्वविद्यालयानाञ्च कुलपतिः (विजिटर) राष्ट्रपतिर्भवति। विश्वविद्यालयस्य सर्वोच्चशासक उपकुलपतिर्भवति, यो हि प्रबन्धकारिणी-समितेः (एक्जीक्यूटिव कौन्सिल) शिष्टपरिषदश्च (एकेडेमिक कौन्सिल, फैकल्टी तथा बोर्ड आफ स्टडीज) साहाय्येन आन्तरिकप्रबन्धस्य उत्तरदायी भवति। विश्वविद्यालयानुदानायोग एतेभ्य आर्थिकसाहाय्यं प्रददाति।

किन्तु दीर्घकालतः प्रचलितया एतादृशव्यवस्थया विश्वविद्यालय-प्रशासनं नितरां जर्जरं भ्रष्टञ्च सञ्जातमास्ते। संस्थासु शिक्षकाणां विभागाध्यक्षाणां नियुक्तिः पुष्टिकरण-पृथक्करणादिकं च भ्रष्टप्रबन्धसमितेः स्वेच्छायाम्, पक्षपातपूर्णभावनायाम्, उपकुलपतेश्च अधिनायकप्रवृत्तौ निर्भरं भवति। प्रायोऽद्य विश्वविद्यालयेषु दृश्यमाणायाः दुर्दशायाः सर्वस्या मूलमेताः समितय एव याः किल पक्षपात-वैयक्तिकवैमनस्यैः आर्थिकभ्रष्टाचार-भावनाभिश्च अभिप्रेरिता भवन्ति।

अत एव अध्यादेशोऽयं समागतः। एतेन वर्तमाना कार्यसमितिः कोर्टश्च निरस्तः, तत्र च क्रमशः प्रशासकीय-समितिः कोर्ट-कार्यकारिणी - परिषदः शैक्षिक-समितिश्च विश्वविद्यालयीय-शिक्षापरिषदः कार्यं सम्पादयिष्यति। प्रशासने शुद्धता-स्थायिता-गतिशीलतामाधातुं चापि महत्त्वपूर्णानि परिवर्तनान्यस्मिन् अध्यादेशे कृतानि। तेषु संक्षेपतः समुल्लेख्यानि इत्थम्—कुलसचिवस्य, अकुलसचिवस्य सहायककुलसचिवस्य वेतनक्रम-निर्धारणेन स्थानान्तरणव्यवस्था, प्रवेशार्थिभ्योऽधिकृतशुल्कतोऽतिरिक्तं सहायतादानादेः सर्वथा प्रतिबन्धः, विश्वविद्यालयप्रशासने विद्यार्थिनां प्रवेशः, उपकुलपतेः सहायकस्याधिकारिणः (प्रो-वाइस चान्सलर) नियुक्तिः, दानदातॄणां प्रतिनिधित्वाभावः पूर्णकालिक-वित्ताधिकारिणो नियुक्तिः, विभागाध्यक्षाणां क्रमिकपरिवर्तनव्यवस्था, परीक्षणेन कार्यसमितिकार्येभ्यः सन्तोषाभावे, उपकुलेस्तस्याः भङ्गकरणाधिकारः, इत्यादि।

अध्यादेशेनानेन उत्तरप्रदेशगताः दश राज्यस्तरीणा विश्वविद्यालया प्रभाविता भविष्यन्ति। अस्य कार्यान्वयने सति वाराणसेय-संस्कृत-विश्वविद्यालयस्य नाम 'संपूर्णानन्द-संस्कृत-विश्वविद्यालयः' भवेत्। भूतपूर्वकाशीनरेशाः डाक्टर विभूतिनारायणसिंह महोदया विश्वविद्यालयस्य आजीवनं प्रतिकुलपतिपदमलङ्करिष्यन्ति। एवमेव विश्वविद्यालयस्यास्य अधिकारसीमाक्षेत्रं प्रदेशादस्माद् बहिरपि भारतीयेषु विभिन्नप्रदेशेषु विदेशेषु च व्यापि भवेत्। अध्यादेशोऽयं राजकीयसूचनापत्रके (गजट) समग्रं मुद्रितः। विशेषविवरणाय तदेव द्रष्टव्यम्।

सामान्यतोऽध्यादेशस्यास्य दर्शनेनेदं प्रतिभाति यदयं राज्यशासनस्य पदक्रमः सद्भावनापूर्णः परिष्करणसमर्थश्चास्ते। व्यक्तिगतरूपेण परीक्षाप्रदानस्य द्वारमुद्घाट्य अध्यादेशेनानेन विश्वविद्यालय-महाविद्यालयेषु प्रदेशकालीन-सम्मर्दनिवारणस्य स्तुत्यः प्रयासः कृतः। पत्रव्यवहारद्वारा शिक्षामधिगत्य विश्वविद्यालयाधिकारक्षेत्रबहिर्भूतस्यापि छात्रस्य कृते परीक्षाप्रदानानुमत्या उच्चशिक्षाया वर्धमानाया कामनायाः प्रपूरणस्य व्यावहारिक उपायश्च स्वीकृतः। एवमेव संस्थागत-शिक्षकातिरिक्तेभ्यो विभिन्नकार्यकर्तृभ्योऽपि व्यक्तिगतरूपेण परीक्षावसरं दत्वा तेषां योग्यतावृद्धिदिशि प्रशंसनीय उपक्रमः कृतः।

सत्यप्येवमस्मिन् अध्यादेशे विश्वविद्यालयप्रशासने केषाञ्चिद्वर्गाणां प्रतिनिधित्वस्य निवारणविषयकः, चयनविषयकश्च प्रकारो नूनं चिन्तनीयः। केषाञ्चिद् विश्वविद्यालयानां शिष्टपरिषदि सम्बद्ध - महाविद्यालयानां प्राचार्याः पदेन सदस्या जायन्ते स्म। अध्यादेशेन साधीयान् प्रकारोऽयं खण्डितः, तत्र च विश्वविद्यालयीय - विभागाध्यक्षाणां प्राध्यापकानाञ्च नियोजनं कथं नाम न्याय-लोकतन्त्रानुसारी वक्तव्यं भवेत् ?

विश्वविद्यालयप्रबन्धे छात्राणां प्रतिनिधित्वव्यवस्था अध्यादेशस्य सर्वाधिका विशेषता वक्तुं शक्यते। तदनुसारमितः परं प्रत्येकसंकायस्य (फैकल्टी) ते छात्रास्तद्विश्वविद्यालयीय-शिष्टपरिषदः सदस्या भवितुमर्हन्ति, ये कस्यापि विश्वविद्यालयस्य पूर्ववर्तिनि उपाधिपरीक्षायामुच्चतमाङ्कभाजो भवन्ति, यदि ते स्नातकोत्तरोपाधिशिक्षायाः, विधिशिक्षायाः मेडिकलशिक्षायाः इञ्जीनियरिंग-उपाधिशिक्षायाश्च पाठ्यक्रममधीयन्ते। अपरत्र एकाधिक-विश्वविद्यालयस्य शिष्टपरिषदः पञ्जीकृत-स्नातकत्वे निबन्धं विधाय शिष्टपरिषदः सदस्यत्वं न केवलं शोभायै, प्रत्युत कार्यकारिण्युपादेयताधृतं विधातुं प्रयतितमास्ते। कार्यकारिणीपरिषदः कृते तस्य नाम कदापि निर्वाचितं निर्दिष्टं वा न भवेत् यः स्नातको न स्यात्। सर्वस्यास्य विधानस्य इदमेव तात्पर्यं लक्ष्यते यद्विश्वविद्यालयस्य सर्वो भारः शिक्षितेभ्य एव मिलतु। केवलं राजनीतिकाधारेण तदीये प्रशासने क्रमशः प्रवेशो निरुद्ध्येतेति।

इत्थं नैकविधैरुपायैः विश्वविद्यालय - प्रशासन-शिक्षण - व्यवस्थायाः परिष्कारस्य अध्यादेशेऽस्मिन् प्रयासः कृतः। तथापि तेन छात्रैः क्रियमाणानि अभियान-महाभियानानि कथं निरुद्ध्येरन्निति तु संशयापन्नमेव। यतो हि उपायेष्वेतेषु कुत्रापि मौलिक्याः सांस्कृतिक नैतिकभावनायाः प्रचार-प्रसारविषये किमपि न विचारितम्, यच्च तस्य व्याधे रामबाणायित उपायः।

अन्यच्च—अध्यादेशेनानेन उपकुलपतेः अधिकारा अत्यधिकं व्यापकीकृताः। यदि नाम समुचितः कुलपतिः स्यात्तदा तु शासनस्य समुद्दिष्टोऽयं सर्वोऽपि परिष्कारः कार्यरूपतां परिणतो भवेत्। अन्यथा यदि स मनस्वी स्वच्छन्दकारी वा स्यात्तदा तु अध्यादेशेनानेन सुप्रबल उपकुलपतिस्तद् विश्वविद्यालयं रसातलं नयेदित्यपि शङ्क्यते। सामान्यत एतस्य कृते निम्नलिखिता उपायाः समनुष्ठेयाः—१. विश्वविद्यालये जनतान्त्रिकप्रकारस्य कार्यान्वयनम्। २. मन्त्रिमण्डलीयस्य राजकीयस्य वा हस्तक्षेपस्य सीमितीकरणम्। ३. कुलपतीनां नियुक्ति विचारकाणां लोकसेवकानां विदुषाञ्च वर्गत एव भवेत्। ४. प्रबन्धसमितेश्चयनं सावहितुं विधेयं यत्र सर्वाधिकाः सदस्याः वरिष्ठा विद्वांसोऽध्यापका अवश्यं स्युः। ५. विश्वविद्यालय - प्रशासन-शिक्षणयोस्तत्परतायाः शुद्धेश्वाधानाय प्रयतनीयम्। ६. 'कोर्ट'स्य स्वायत्ततायारक्षणमावश्यकम् ७. नियुक्तिषु पक्षपातपूर्णनीतेः दलगतभावनायाः सर्वथा परिहारो भाव्यः। ८. तीव्रानुशासनात्मक - प्रतिबन्धनापेक्षया मृदुभावात्मकमनुबन्धनं भाव्यम्। यद्येते उपायास्तत्त्वतः कार्यान्विता भवेयुस्तदा अध्यादेशोऽयं वरदानायितः स्यादित्यस्माकं मतम्।

●

वाराणसेय-संस्कृत-विश्वविद्यालयस्य कृते पृथक् अध्यादेशावश्यकता

— श्री 'अङ्गारः' —

नवोद्घोषितस्य विश्वविद्यालयाध्यादेशस्य विषये शिक्षाविदैः नैकविधैरद्य पत्रेषु विचार्यंते। वयं संस्कृतज्ञाः पुनः वाराणसेय-संस्कृत-विश्वविद्यालयोपजीविनः। अतोऽस्माभिः अध्यादेशस्यास्य सन्दर्भे वाराणसेय-संस्कृत-विश्वविद्यालयमेवाधिकृत्य किञ्चिदत्र विचार्यंते। अध्यादेशेऽपि अस्माकं विश्वविद्यालयस्य कृते विषयत्रयं विशेषतो विचार्यास्य इतर-विश्वविद्यालयेभ्यो वैशिष्ट्यं प्रकटीकृतम्। तेषु विषयेषु एकम्—अध्यादेशकार्यान्वितेः परं सपद्येव विश्वविद्यालयमिदं 'सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः' भविष्यतीति। अपरम्—डॉ० विभूतिनारायण सिंहदेवाः भूतपूर्व-काशिराजाः अस्य आजन्म प्रतिकुलपतयो भविष्यन्ति इति। तृतीयम्—अस्य अधिकारसीमाक्षेत्रं निखिलं भारतम्, किं बहुना, पाश्चात्त्यदेशा अपि भवेयुरिति।

अत्रेदं विचार्यंते—वाराणसेयसंस्कृतविश्वविद्यालयोऽयं कामं वैधानिकदृष्ट्या १९५८ ईशवीये वर्षे निर्मितः स्यात्। किन्तु तदाधारभूतः काशिक-राजकीय-संस्कृत-महाविद्यालयः किल प्रायः शतोत्तरपञ्चाशद्वर्षदेशीय आसीत्, यो हि अनभिषिक्तोऽपि विश्वविद्यालयपदे कस्यापि महत्तरस्याद्यतनीयस्य विश्वविद्यालयस्य कृते स्पृहणीय एव स्यात्। अनेन महाविद्यालयेन अखिलभारतीये क्षेत्रे, किं बहुना, विदेशेष्वपि यादृशं शिक्षाप्रसारकार्यं समाचरितम्, तस्यैकं दृश्यमपि अस्मिन् वाराणसेय-संस्कृत-विश्वविद्यालये न दृश्यते।

महाविद्यालयस्यास्य एतादृशं महत्त्वमेवास्मै विश्वविद्यालयरूपतां नेतुं स्वर्गीय डॉ० सम्पूर्णानन्द महोदयेभ्यो (भूतपूर्वोत्तरप्रदेश - मुख्यमन्त्रिभ्यः) बलात्प्रैरयत्। परमया सद्भावनया तैरयं महाविद्यालयः स्वीये शासने विश्वविद्यालयरूपतां प्रापितः। किन्तु विश्वविद्यालय-प्रशासनेन स्वीय सर्वविधाऽव्यवस्था-प्रमाद-सङ्कुचितता-जातिवाद-क्षुद्रस्वार्थभावनाभिस्तादृशीं विकृतिं नीतो यदस्य विश्वविद्यालयस्य जनक एव स महात्मा सम्पूर्णानन्दः सार्वजनिकसभायां महता कष्टेन वक्तुं विवशो बभूव यत् 'मम जीवनस्य महत्तरः प्रमादो नाम मत्कृतं वाराणसेय-संस्कृत-विश्वविद्यालयस्थापनम्' इति। सहृदया एव विचारयन्तु यदस्माकं वाङ्मये 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्' इति नीतिवचः। सत्येवं महात्मनोऽस्य एतादृशं वचनं विश्वविद्यालयस्यास्य व्याधेर्दुश्चिकित्स्यत्वमेव समाशंसते। विश्वविद्यालयाध्यादेशेनानेन ज्ञायते यदस्य कार्यान्वयनेन सहैव 'वाराणसेय' इत्यस्य स्थाने 'सम्पूर्णानन्द' इति पदं संयोज्य शासनं तां व्याधिं दूरीकर्तुमात्मनः कार्तार्थ्यं मनुते। यैः शासनाय प्रस्तावोऽयं प्रदत्तः स्यात्ते नूनमभिनन्दनीयाः! किं 'मृदङ्गवत् मुखलेपेन...' स्वर्गताः डॉ० सम्पूर्णानन्दा अनेन 'वाराणसेय'-स्थाने स्वनामस्थापनेन स्वीयामुपर्युक्ताम् एतद्विषयिणीं भावनां दूरीकरिष्यन्ति?

तथ्यं त्विदं यत्संस्कृतविद्याया मातृगृहं काशी। अत एव विश्वविद्यालयात् पूर्वमयं 'काशिक-राजकीय-संस्कृत-महाविद्यालय'-नाम्ना ख्यातिं गतः। सम्पूर्णानन्द महाभागैः स्वशासने काश्याः सांस्कृतिकं नाम 'वाराणसी' इति कृतम्। अत एव 'काशिक' इत्यस्य स्थाने 'वाराणसेय' इति परिवर्तनमभवत्। तदा श्री पन्तादिनाम्नः सम्पूर्णानन्दनाम्नश्चापि चर्चा

समभवत् । परं विश्वविद्यालयस्यास्य संस्थापकेन तेन महात्मना व्यक्त्यपेक्षया मातृ-गृहस्यास्य नामैवानुमतम् । भारतीयेषु काशी वाराणसी वा विद्यायाः पर्याय इव चिरात्संवृत्ता । तत्परिवर्तनेन अध्यादेशेन किं साध्येत, इत्येव न जानीमः । अतो वयं महामहिम-राजपाल-महोदयं सविनयं प्रार्थयामो यद्विशेषादेशेन विश्वविद्यालयस्यास्य 'वाराणसेय-संस्कृत-विश्वविद्यालयः' इत्येव पूर्ववर्तिनाम संगोप्य भारतीयानां सर्वेषां भावनानां समादरः कार्यं इति ।

वस्तुतो विचार्यमाणे वाराणसेय-संस्कृत-विश्वविद्यालयस्य कृते राज्यपाल-महाभागैरभिनवोऽन्यः अध्यादेशः समुद्घोष्यः । विश्वविद्यालयाध्यादेशेन पूर्वोक्तेन अस्मिन् विश्वविद्यालये संक्रान्तो व्याधिः कथमपि न दूरीभवेत् । नूतनेनादेशेन सर्वोऽपि विश्वविद्यालयः शासनेन स्वहस्ते करणीयः । ततः परं स्वीय-शासनयन्त्रतः कश्चित्संस्कृतज्ञः संस्कृतोन्नयन-प्रणयी शासनकुशलो निष्पक्षपाती च प्रशासकस्तत्र स्थापनीयः । महता दुःखेन वक्तव्यं भवति यदद्य विश्वविद्यालयस्यास्य ये कुलपतयस्ते न संस्कृतभाषां जानन्ति, न वा संस्कृतस्य गौरवेणापि परिचिताः । स्वपीठे स्थित्वाऽपि ते संस्कृत-विश्वविद्यालयं तत्रस्थांश्च विदुषः निन्दन्ति । कतिपयपरामर्शदातॄन् स्वार्थसाधकान् सङ्कलय्य स्वमत्या यत्किमपि कुर्वन्ति । अस्य निदर्शनाय अचिरादेव वाराणसेय-संस्कृत-विश्वविद्यालयस्य नैकैः विभागाध्यक्षैः प्राध्यापकैश्च मिलित्वा राज्यपालमहोदयेभ्यः प्रहितः प्रस्ताव एव पर्याप्तो भवेत्, यत्र उपकुलपतेर्मनस्विता स्वच्छन्दता च सुस्पष्टं वर्णिता । एवमेव 'टण्डन-आयोगे'न स्वीकृतस्य 'शिक्षके'भ्यो 'व्याख्यातृ'प्रद-प्रदानस्य प्रस्तावोऽपि दत्ताभिनिविष्टैरेभिः कुलपतिभिस्तदनुयायिभिश्च तिरस्कृतो विरोधितश्च ।

वाराणसेय-संस्कृत-विद्यालयेऽद्य प्रमादस्य कीदृशम् नग्नताण्डवं प्रचलति, प्रतिष्ठितानामपि तटस्थानामुदाराशयवतां कार्यकर्तॄणां विदुषां कीदृशो गलग्रहो विधीयते, तत्कष्टं तु स एव जानन्ति । प्रदेशाय शुद्धशासनदानाय कृतसङ्कल्पैः राष्ट्रपतिप्रतिनिधिभूतैः राज्यपालमहाभागैरत्र शीघ्रतरं हस्तक्षेपं कृत्वा तपस्विनां विदुषां तपस्विन्याः संस्कृतभाषायाश्च रक्षा विधेया । यतो हि दौर्भाग्यात् डॉ० सम्पूर्णानन्द महोदयानामनन्तरं ये ये प्रमुखशासका अभवन्, तेषु केचन अमुं विश्वविद्यालयं समापयितुमेव प्रयतितवन्तः । कैश्चित् समुपेक्षितोऽयम् । कैश्चित् पुनः स्व-स्वबन्धुबान्धवानां योगक्षेमस्य स्रोतोरूपतामेव नीतः । केनापि अञ्जसा संस्कृतस्य समुन्नयनाय विश्वविद्यालयस्य प्रतिष्ठावर्धनाय वा न जातु प्रयतितम् । राज्यपालमहाभागैरिदं सत्कर्म क्रियेत, तदा तेषामितिहासे स्वर्णाक्षरैर्नामोल्लेखः स्यात् ।

अन्यच्च, वाराणसेय-संस्कृत-विश्वविद्यालये प्रायः शतमिता अध्यापकाः, पञ्चशतमिताश्च छात्राः स्युः । एतेषामेव कृते यदि नाम राज्यशासनं प्रायो विंशतिलक्षमितं धनं प्रतिवर्षं व्ययीकरोति चेत्स सुस्पष्टमपव्यय एव उच्येत । किन्तु वस्तुस्थितिरन्या । प्रदेशगताः एकसहस्रमिताः विद्यालय-महाविद्यालयाः, प्रायः पञ्चसहस्रमितास्तत्र पाठयन्तोऽध्यापकाः प्रायश्चतुर्विंशति - सहस्रमिताः पठन्तश्च छात्राः विश्वविद्यालयममुं तत्त्वतः सार्थकनामानं विदधति । अस्य विश्वविद्यालयस्य स्नातकत्वं स्वीकृत्य प्रतिवर्षं तत्रस्थैश्चतुर्विंशतिसहस्रसंख्यकैश्छात्रैरस्य परीक्षाः दीयन्ते । सत्येवमेतेषां सहस्रपाठशाला-पञ्चसहस्रशिक्षक-चतुर्विंशतसहस्रछात्राणां हितं विश्वविद्यालयो न विचारयेत्तदा तस्य विश्वविद्यालयत्वमेव कथमुच्येत ? प्रादेशिक - संस्कृत - विद्यालयाध्यापक-समितेः अध्यक्षाः, महामन्त्रिणश्च वर्तमानकुलपतीनां समक्षं गतवर्षे गतवन्तो, प्रार्थितवन्तो च 'अस्मकं

विद्यालयाध्यापकानां कृते समुचित-समानवेतनक्रमस्य लाभत्रयोयोजनायाश्च लाभाय शासनं प्रार्थनीयं भवद्भिरि'ति। किन्तु एतैः उपकुलपतिमहाभागैः सुस्पष्टमुक्तं यदहमेतदर्थं शासनं न प्रार्थयिष्यामि। मद्दृष्ट्या व्यर्था एते विद्यालयाः। न कोऽप्येतैर्मे सम्बन्ध' इति। प्रसङ्गेऽस्मिन् एतैः उपकुलपतिमहाभागैः स्वीयविश्वविद्यालयाध्यापकानां कृतेऽपि यादृशा अभद्रा विचाराः प्रकटीकृतास्तेषु मौनमेव वरम्। एतेन इदमपि स्फुटीभवति यदेते शासकाः, विश्वविद्यालयवत् प्रदेशीय-संस्कृत-पाठशालानामपि हितसाधनाय न प्रसरिष्यन्तीति। सत्येवमेतादृशशासकनियुक्तिः नियोजयितॄणामपि विवेकं कथमपि न प्रकटयति। अतः प्रादेशिक-संस्कृत-पाठशालाध्यापका अपि एतान् स्वप्नेऽपि स्वहितं कलयितुमनिच्छुकान् कथमपि न वाञ्छन्ति।

एभिर्महाशयैः उपकुलपतिभिः स्वीयपरामर्शदातॄणां संस्कृतवाङ्मयपाण्डित्य - गौरवानभिज्ञानां दुरभिसन्धिग्रहग्रहिलैः ग्रीष्मावकाशे संस्कृतपरीक्षापाठ्यक्रमविषये एका प्रश्नावली प्राकाश्यं नीता प्रस्तोतृहस्ताक्षरेण, यत्र संस्कृतपाण्डित्यप्रतीपभूतानां सर्वेषामाधुनिकविषयाणां पाठ्यक्रमे समावेशो जीविकानिर्वाहप्रश्नं पुरस्कृत्य प्रस्तावितः, तत्र च विदुषां मतान्यामन्त्रितानि। केषां सविधे प्रश्नावलीयं प्रेषितेत्यस्माभिर्न ज्ञायते, चतुर्विंशतिसहस्र - परीक्षार्थिपाठयितॄणां संस्कृतविद्यालयाध्यापकानां प्रातिनिधिकसंस्थायाः प्रमुखाधिकारिभिरपि नासादितेयम्। श्रूयते, कैश्चित् तदीयमतसमर्थकैः उत्तराण्यपि प्रेषितानि। ततः परं विदुषां गोष्ठ्याश्च नाटकं संवृत्तम्। तत्र च स्वाभीप्सितानामेतेषां पाठ्यक्रमपरिवर्तनानां स्वीकृतिरप्य भवत्। तदनन्तरं श्रूयते यत् तत्सर्वं राज्यपालमहोदयानां सविधे स्वीकृत्यर्थं प्रहितमपीति।

अत्र विषये वयं सुस्पष्टं सविनयञ्च महामहिमराज्यपालमहोदयान् सूचयामो यत् यावत्पर्यन्तमस्माकं सर्वैः प्रादेशिक - संस्कृतविद्यालयाध्यापकैः पाठ्यक्रमपरिवर्तनं नानुमोद्यते, तावद् भवद्भिः कथमपि तन्न स्वीकार्यम्। विचारणीयमेतत् यत् जीविकानिर्वाहप्रश्नं पुरस्कृत्य अद्यावधि नव-नवाधुनिक-विषयसन्निवेशेन संस्कृत-शिक्षा-पाठ्यक्रमः स्वीयशिक्षा-सुलभ-पाण्डित्यलाभतः पञ्चाशदङ्कैर्दारिद्र्यं नीतः। इतः परं तथैव परिवर्तनं विधाय किमेते संस्कृतस्य सर्वथा पाण्डित्यं रसातलं नेतुं वाञ्छन्ति? उत संस्कृतक्षेत्राण्यपि आधुनिकशिक्षादीक्षितानां कृते उन्मुक्तमुद्घाटयितुमभिलषन्ति? किं वा साम्प्रतिक-नव्यविषयाध्यापनमपि महता कष्टेन सम्पादयतां प्रादेशिक-संस्कृत-विद्यालयानां पुरतो नव्यामेकां समस्यां जनयितुं कामयन्ते? यस्य फलश्रुतिरेतेषां विद्यालयानां भूयसा मृतिरेव भवेत्। यतो हि शासनेन आचार्य-शास्त्रिपरीक्षे बी. ए. एम. ए. समकक्षतया घोषिते। तथापि तत्पाठ्यक्रममध्यापयद्भ्यो विद्यालयेभ्यो वेतनक्रमो महति उरःस्फोटे कृते कथञ्चिद् उच्चतरमाध्यमिकविद्यालयस्तरीणो घोषितः स्वीये प्रतिवेदने वेतनायोगेन। अवश्यमेव तत्कालीनशासनेन लाभत्रयो-योजनापूर्वकं स स्वीकृतः, तथापि अद्यापि तद्विषये राजाज्ञा नैव प्रचारिता। तथा सति कथं कथमपि अध्यापकेभ्यः ७९) मासिकभृतिदानक्षमैर्विद्यालयैः भाषाविज्ञानादिसदृशोच्चतराणां परिवर्तित - विषयाणां पाठनं स्वीयपाठशालासु कथं कर्तुं शक्येत? अशक्तौ च गतास्तेषां मान्यता! मान्यताभावे शासकीयानुदानमपि गतम्। एवञ्च मरणमेव शरणं तेषाम्! इत्येव समालोच्य सप्रश्रयं राष्ट्रपतिशासनप्रतिनिधीन् राज्यपालमहोदयान् प्रार्थयामो यद् भवद्भिरविलम्बं विश्वविद्यालयाध्यादेशः १९७३ वत् वाराणसेय - संस्कृत - विश्वविद्यालयस्य कृतेऽपि नूतनमध्यादेशं प्रस्तूय सर्वं शासनं संस्कृतप्रणयिनस्तटस्थशासनकुशलस्य जनस्य हस्ते समर्प्य संस्कृतं संस्कृतज्ञाश्च पुनरुज्जीवनीयाः!

गृह्यसूत्राणां रचना-कालः

—डॉ० नन्दकिशोर पाण्डेय, एम० ए० वेदाचार्यः—

[व्याख्याता—रानी चन्द्रावती श्यामा-महाविद्यालयस्य, वाराणसी]

गृह्यसूत्राणां प्रयोजनम्

गृह्याः सर्वे संस्कारा अनुष्ठानादयश्च वेदस्मृत्युक्तेन विधिना चिरादेव स्वतन्त्ररूपेण प्रचलन्ति स्म। किन्तु कालक्रमेण एतादृशः समय आयातो यदा देशभेदात्, गोत्रभेदाच्च बहुत्र विभिन्नता प्रादुरभूत्। तत्र च जनानामाग्रहो निष्ठाश्रद्धासमादरोऽपि वर्धमान आसीत्। अतस्तत्तद्देशे गोत्रे समाजे प्रचलित-प्रथाया अस्तित्व-संरक्षण मत्यावश्यकमभूत्। फलतस्तत्तत्प्रथानां विविध-विधिविधानस्य च तत्तच्छाखीय-विभिन्नाचार्यैः सङ्ग्रहः कृतः। स एव 'गृह्य-सूत्रमि'ति नाम्ना आख्यायते।

'सूत्र'शब्दव्युत्पत्तिर्यथा—सूत्र्यते संक्षेपेण कथ्यते विपुलोऽर्थो यत्र तत् सूत्रम्।' तथा चोक्तम्—

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥

एतल्लक्षणकाण्येव सर्वाणि गृह्यसूत्राणि भवन्ति।

अत्र 'गृह्य'-शब्दो योगरूढः गृहाय गृहस्थाश्रम-धर्माय हितं गृह्यम् इति यौगिकः। रूढस्तु खादिर-गृह्यसूत्रे (१.५.१)—

यस्मिन्नग्नौ पाणिं गृह्णीयात् स गृह्यः।

अथवा—**यस्मिनन्त्यासमिधमादध्यात्** इति लक्षण-लक्षितः।

गृह्यम्, उपासनम्, आवसथश्चेति सूत्रोक्ता गृहपर्यायाः शब्दाः मानवगृह्यसूत्रीयेषु 'स्वान् गृहान्व्रजेत्'(१.२.१८), 'रथादध्योपासनात्' (१.१४.१५), 'आवसथ्यं प्रतिपद्यते' (१.४.६) इति सूत्रेषु समनुगृहीताः। ततश्च उक्तव्युत्पत्त्या स्मार्ताग्नेः गृह्यः, औपासनम्, आवसथ्यश्चेति तिस्रः संज्ञा भवन्ति। तत्र क्रियमाणानां कर्मणामपि गृह-दारादिसम्बद्धत्वादनेकविधत्वम्। 'गृहाय हितं गृह्यम्', गृह्यशब्दश्च दम्पत्योर्वर्तते, तस्मिन्नित्यावसथ्ये। अतश्च यानि दम्पत्योर्हितानि कर्माणि शान्तिक-पौष्टिक-व्रताङ्गहोमादिकानि स्मार्तानि कर्माणि यत्र सूत्रितानि तत् 'गृह्यसूत्रम्' इति पर्यवसितोऽर्थः।

गृह्यसूत्राणां रचनाकालः

गृह्यसूत्राणां रचनाकालः प्रायः कलेरारम्भ एव सम्भाव्यते। यतो हि गृह्यसूत्रकाराः स्व-वेदशाखा-मन्त्रान् प्रतीकरूपेण परशाखामन्त्रान् समग्रांश्च दर्शयन्ति। गृह्यसूत्राणि वेद-शाखावलम्बीनि, शाखाश्च वेदत्रिभागोत्तरमभूवन्। वेदविभागश्च व्यासदेवेन कृतः। व्यासदेवास्तु द्वापरान्ते बभूवुः।[1] तेषां चिरजीविता तु सुप्रसिद्धैव—

अश्वत्थामा बलिर्व्यासो हनूमाँश्च विभीषणः।
कृपः परशुरामश्च सप्तैते चिरजीविनः॥

स भगवान् व्यासो भारतं युद्धं कुरु-पाण्डवानां वर्णितवान्। कुरु-पाण्डवानां सम्भवः—

---

[1] द्वापरे समनुप्राप्ते तृतीययुगपर्यये।
जातः पराशराद् योगी वासव्यां कलया हरेः॥
(भाग० १.४.१४)

चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकम्।
व्यदधात् यज्ञ सन्तत्यै वेदमेकं चतुर्विधम्॥
(भाग० १.४.१९)

शतेषु षट्सु सार्धेषु त्र्यधिकेषु च भूतले ।
कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः ॥[1]

इति राजतरङ्गिण्यादिवचनानुसन्धानेन ६५३ कलेः वर्षेष्वतीतेषु ज्ञायते । किन्तु—

विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवं गतः ।
तदाविशत् कलिर्लोकं पापे यद् रमते जनः ॥
यावत् स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः ।
तावत् कलिर्वै पृथिवीं पराक्रान्तुं न चाशकत् ॥

इति भागवत-वचनेन (१२.२.२९-३०) महाभारत-युद्धोत्तरं भगवतः कृष्णस्य स्वधामगमने सति कलियुगस्य प्रारम्भो जातः ।

व्याकरण-भाष्यकारेण पतञ्जलिना 'अरुणद्यवनः साकेतम्' 'अरुणद्यवनो माध्यमिकाम्' इत्युदाहरणद्वयं दत्तम् । तेनेदं स्फुटीभवति यद्यवनकृतः साकेतावरोधो माध्यमिकावरोधश्च यद्यपि पतञ्जलिना स्वयं न दृष्टः, तथापि पतञ्जलिसमसामयिकत्वाद् दर्शनयोग्यो लोकप्रसिद्धश्चेति । यतो हि तेन तत्र लङ्लकारप्रयोगोदाहरणं दत्तम् ।[2]

अथायं साकेतावरोधः माध्यमिकावरोधश्च यवनकृतः कदा बभूवेति ऐतिहासिकैः सुस्पष्टमेव निर्णीतम् । ऐतिहासिकदृष्ट्या ख्रिष्टाब्दात् ३२७ वर्षेभ्यः पूर्वम् 'अलेग्जेण्डरस्य' आक्रमणम्, तदनन्तरं चन्द्रगुप्तराज्यकाले 'सेल्यूकस'नामा यवनो भारतमाचक्राम । चन्द्रगुप्तेन पराजितश्च स स्वकन्यां[3] तस्मै दत्त्वा गत इति सुप्रसिद्धा घटना । तस्यैव सिल्युकस-नाम्नो यवनस्य उत्तराधिकारी 'मीनाण्डर' नामाऽन्यो यवनः १६० वर्षेभ्योऽनन्तरं पुष्यमित्र-राज्यकाले पुनर्भारतमाचक्राम । स स्वयं यद्यपि मथुरापर्यन्तमेवायातः, परं तत्सेनानायकैरयोध्यां विजित्य ततोऽपि पूर्वस्यां दिशि बहुदूरपर्यन्तमाक्रमणं कृतम् । अनन्तरं तेऽपि तत्रावस्थातुमशक्ताः परावृत्ताः । सोऽयं साकेतावरोधः ।

एतत् सहचारिण्यैव च सैन्यपङ्क्तिरेका चित्तौड-प्रान्ते गता । तत्र चित्तौड-समीपवर्तिनी माध्यमिका-नगर्यपि तया क्रान्तेति साधितमैतिहासिकैः । अस्याक्रमणस्य वृत्तं गर्गसंहितायामपि प्राप्यते ।

तत्र गर्गसंहितायां 'मेनन्द्र' इति मीनाण्डरस्य नाम निर्दिष्टम् । संस्कृतीकृत्यैव तन्नाम भारतीयैः परिचितमिति ऐतिहासिकाः मन्यन्ते । अत एव 'मेनन्द्र'नाम्नैव 'खरोष्ट्री'लिप्यां तन्मुद्रा अपि मथुराप्रान्ते समुपलभ्यन्ते । एतेन सुस्पष्टं यत् पुष्यमित्रराज्यकाल एव यवनस्य साकेतावरोधो माध्यमिकावरोधश्च समभवत् । स च ख्रिस्ताब्दात् सप्ताशीत्युत्तरचतुःशतवर्षेभ्यः (४८७) पूर्वमभवदिति ऐतिहासिकदृष्ट्या सिद्ध्यति ।

पुष्यमित्रस्य कालविषये विचार्यमाणे वायुपुराणे महाभारतयुद्धोत्तरं पञ्चाशद्राज्ञां नामानि प्रदत्तानि सन्ति, येषु अन्तिमो नरपतिः पुष्यमित्रो बभूव । तेषां सर्वेषां भुक्तराज्यवर्षाणि आहृत्य वियद्विषुवेदनेत्रमितानि (२४५०) सम्पद्यन्ते ।[1]

एवञ्च पुष्यमित्रः ख्रिस्ताब्दात् ४८७ वर्षेभ्यः पूर्वमभवत्, कलेरारम्भाच्च २४५० वर्षेभ्यः पश्चात् । उभयोर्योगे सति २४५०+४८७=२९३७ वर्षेभ्यः ख्रिस्ताब्दात् पूर्वं कलियुगारम्भ इति ऐतिहासिकानां प्रमाणविचारेणावगम्यते ।

---

१. राजतरङ्गिणी १.५१ ।

२. परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये लङ्वक्तव्यः। अरुणद्यवनः साकेतम् । अरुणद्यवनो माध्यमिकाम् । पा० सू० ३.२.१११ भाष्ये, पृ० २४६-४७ ।

३. चन्द्रगुप्तस्तस्य सुतः पौरसाधिपतेः सुताम् ।
सुलूकस्य तथोद्वाह्य यावनीं बौद्धतत्परः ॥

भविष्यपुराणस्य वचनमिदं प्रमाणत्वेन 'वैदिक सम्पत्ति'नामके ग्रन्थे पं० रघुनन्दनशर्मणा समुद्धृतम्, पृ० ४७३ ।

१. गुरुमण्डल-ग्रन्थमाला कलिकत्तानगरात् श्रीमद्-मनसुखरायमोर-महोदयेन प्रकाशिते वायुपुराणे ९९ अध्यायस्य २९५ श्लोकतः ३३७ श्लोकं यावत् ।

संस्कृत-भाषाया वैज्ञानिकं वैशिष्ट्यम्

--आचार्य श्री शोभित मिश्राः--

[व्याकरण-प्राध्यापकाः—वटोदर-संस्कृत-महाविद्यालयस्य]

आधुनिकाः खलु पाश्चात्त्यसंस्कृतिप्रभाविताः भाषावैज्ञानिकाः समुद्घोषयन्ति यत् संस्कृतभाषायां किमपि भाषाविज्ञानं नास्ति। किन्तु आपातरमणीया नूनं तेषामियमुद्घोषणा। यतः संस्कृतभाषायां यादृशं खलु मौलिकं भाषाविज्ञानरहस्यं वरीवर्ति, न तादृशं विज्ञानरहस्यमन्यस्यां कस्यामपि भाषायां सम्भवि। तथा हि—निरुक्तम्, शिक्षा, प्रतिशाख्यम्, व्याकरणञ्चेति चतुष्टयमपि अभूतपूर्वं भाषाविज्ञानमवगाहते। तत्र भवता भगवता यास्कमुनिना मौलिकभाषातत्त्वपारावारीणेन निरुक्ते तावत् शब्दानामर्थानुरूपं निर्वचनं कृतम्, तदङ्गतया च वर्णागम-वर्णलोप-वर्णविकाराणां निदर्शनमनुसृतम्। तत्रापि 'निघण्टु'-नामकस्य वैदिककोषस्य सरणिमनुसृत्य निगमयिता = निगन्तुः—निघण्टुरिति व्युत्पत्त्या क्रमशः प्रत्यक्ष-परोक्षाऽतिपरोक्षवृत्तितया शब्दान् अन्वर्थतया निर्वक्तुं **सर्वं नाम घातुजमाह** इति शाकटायनसिद्धान्तञ्च परिशील्य 'दूरे हिता दुहिता, अपतनाद् अपत्यम्, अन्नमेतत्प्राप्य आस्यन्दते इति आस्यम्, अस्यन्ति वाऽनेन वर्णानिति आस्यमि'त्यादिरीत्या भाषावैज्ञानिक-पद्धतिमनुसृत्य नामाख्यातोपसर्गनिपातरूपाणि चत्वारि पदजातानि सोपपत्तिकं निरुक्तानि। तदुक्तमृग्वेदे—

चत्वारि शृङ्गास्त्रयो अस्य पादा
द्वे शीर्षे सप्तहस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्यान् आविवेश॥

महर्षेर्यास्कादपि प्राक् कौत्स-गार्ग्य-शाकटायन-

ज्योतिष-शास्त्रस्य सम्मानितविदुषः पं० बालकृष्णभट्टस्य मतेन वर्तमानकलेरारम्भे सूर्यादयः सप्तग्रहाः एकस्मिन्नेव स्थाने आसन्।[1]

एतदेव यूरोपदेशस्य प्रसिद्ध-ज्योतिर्विद्भि 'वेली'-महोदयैश्चापि साधितम्। तद्गणनया कलेरारम्भः ख्रैस्ताब्दात् ३१०२ वर्षेभ्यः पूर्वं फरवरीमासस्य २० दिनाङ्के २ वादने २७ मिनटे ३० सेकेण्ड-समये अभवत्। तदा सर्वे ग्रहा एकस्मिन्नेव स्थाने आसन्निति।

१८३६ ख्रिस्ताब्देऽपि यदा कलेः ५००० वर्षाणि पूर्णतां गतानि आसन्, तदा भारतीयगण्यमानैः विद्वद्भिः ज्योतिषसिद्धान्तानुसारेण उद्घोषितं यत् कलियुगारम्भे सप्तग्रहाणामेकत्र स्थितिर्भवति।

अनेन कलियुगारम्भः ख्रैष्टात् प्रायः सहस्रत्रयवर्षेभ्यः पूर्वमभवदिति निश्चितम्। अतस्तदैव सर्वाणि इमानि गृह्यसूत्राणि प्रायश एकस्मिन्नेव द्वित्रिशतवत्सरपरिमिते काले रचितानीत्यनुमीयते। वेदशाखाविभाजनं द्वापरान्ते एव बभूव, तदनन्तरञ्च कलियुगारम्भे गृह्यसूत्राणां रचनारम्भो जातः।

उपर्युक्तप्रमाणैः कलियुगारम्भ इतो ५००० पञ्चसहस्रेभ्यः शताधिकपञ्चसहस्रेभ्यः (५१००) वर्षेभ्यो वा पूर्वं जातः। अतः सर्वेषां गृह्यसूत्राणां रचना शतद्वयवर्षाभ्यन्तरे तस्मिन्नेव काले बभूवेति सिद्ध्यति।

---

[1] भारतीय ज्योतिषशास्त्र का इतिहास, पृष्ठ १८०।

प्रभृतयो महर्षयो भाषातत्त्वपारदृश्वानो बभूवुः । तेषांश्च 'किं सर्वाणि नामानि धातुजानि ? किं वा कानिचिदेव ? एवमेव उपसर्गा निपाताश्चार्थस्य द्योतका वाचका वा स्युः ? इत्येवं भाषाविषयकाणि बहुविधानि मतानि सम्यक् पर्यालोच्य शब्दतत्त्वं विश्लेषणात्मकपद्धत्या विवेचितम् ।

किञ्च-सम्प्रति भाषाविज्ञानस्य प्रधानं तावदङ्गमर्थविज्ञानं मन्यते । अत एव साम्प्रतिका भाषावैज्ञानिका अर्थसापेक्षमेव भाषातत्त्वान्वेषणं कुर्वन्ति । किन्तु निरुक्ते महर्षिणा यास्केन बहुकालं प्रागेव अर्थविषयकं विज्ञानमधिकृत्य भाषाया महद् वैज्ञानिकविवेचनं कृतम् । तत्र 'दक्षिण'शब्दं समुपन्यस्य 'एक एव शब्दः सम्बन्धविशेषवशादर्थान्तरे कथं प्रवृत्तः' इत्यर्थविज्ञानं समुद्भावितम् । तथा हि–उत्साहार्थको 'दक्ष'धातुः संस्कृते वर्तते । कस्यापि कार्यस्य हस्तेन सम्पादने यथा उत्साहशीलत्वात् सव्येतरबाहुः प्रवृत्तो भवति, न तथा सव्यबाहुः । अतः सव्येतरबाहौ 'दक्षिण'शब्दः प्रवृत्तः । ततश्च प्रातः सूर्याभिमुखं तिष्ठतः पुरुषस्य दक्षिणहस्तो यस्यां दिशि भवति, सा दिगपि तत्सम्बन्धेन 'दक्षिणा दिगि'त्युच्यते । परिभ्रमतः पुरुषस्य यदा स्वदक्षिणं हस्तमेव उपास्यदेवदिशि गच्छति, सा 'प्रदक्षिणा' भवति । प्रदक्षिणक्रमेण ऋत्विजामागमनात् तत्सम्बन्धेन ऋत्विग्भ्यो वितीर्यमाणं द्रव्यमपि 'दक्षिणा'शब्दाभिधेयं भवति । इत्थं शब्दा दूरतरं गत्वा तेषु तेषु चार्थेषु प्रतिनियता बभूवुरिति महद् भाषाविज्ञानं खलु निरुक्तशास्त्रमिति निश्चप्रचं वक्तुं शक्यते । तथा च नायं स्थाणोरपराधो यदेनमन्धो न पश्यति इति न्यायेन तेषामेव भौतिकस्थूलदृष्ट्यवलम्बिनां प्रज्ञाऽपराधः, न तु अध्यात्मसूक्ष्मशब्दतत्त्वदृष्टिमवलम्ब्य शब्दान् निर्वक्तुं प्रवृत्तस्य निरुक्तशास्त्रस्य ।

एवमेव शिक्षाशास्त्रमपि ध्वनि-वर्ण-स्वर-मात्रादीनामुत्पत्तिस्थान-संख्यादिविवेचनं विज्ञानपूर्णं करोति । तथा हि—शब्दानां ध्वनिः, पदम्, वाक्यम्, अर्थश्चेति चत्वारि स्वाङ्गानि सन्ति । अत्र ध्वनिविज्ञानं ध्वनिविमर्शो वा शिक्षाग्रन्थेषु प्रातिशाख्येषु च समुपलभ्यते । तत्र कथं तावद् ध्वनिः खलु वर्णरूपं प्राप्नोति, तेषां च वर्णानां कानि तावदभिव्यञ्जकस्थानानि, कियती च वर्णानां संख्या, कथञ्च वर्णानां वर्गीकरणमित्येवमनेकविधं विवेचनं शिक्षासु समुपलभ्यते । तथा हि, वर्णस्थानं तावद् द्विविधं वर्तते—सवनस्थानं मुखस्थानञ्च । तत्र सवनस्थानं त्रिविधं प्रतिपादितम्—उरः, कण्ठः, शिरश्चेति भेदात् । अत एव नारदीयशिक्षायामुक्तम्—

उरः कण्ठः शिरश्चैव स्थानानि त्रीणि वाङ्मये ।
सवनान्याहुरेतानि सन्ति चाप्यधरोत्तरे ॥

एवञ्चात्र उदात्ता-ऽनुदात्त-स्वरितानां सम्बन्धः सवनस्थानैरेव वर्तते, न तु मुखस्थानैः ; पाणिनि-कात्यायन-पतञ्जलिमुनित्रयस्य तथैवाभिमतत्वात् । तत्र भगवान् पाणिनिः शिक्षायामाह—

अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः ।
स्वरितो वर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥
(पा. शि. ४८)

किञ्च—

मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ।
प्रातः सवनयोगं तं छन्दो गायत्रमाश्रितम् ॥
कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् ।
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥

भगवता वार्तिककृताऽप्युक्तम्—सवनक्रमेणोरःकण्ठभ्रूमध्यानि, आयासमार्दवाभिघाता, उच्चनीचविशेषः (वा० प्राति० १,३०,३२) इति ।

भगवान् पतञ्जलिरप्याह—सिद्धमेतत् । कथम् ? समानप्रक्रमवचनात्, समाने प्रक्रम इति वक्तव्यम् । कः पुनः प्रक्रमः ? उरः कण्ठः शिरः ('उच्चैरुदात्तः' महा० १.२.२९) इति । तत्र प्रक्रमशब्दार्थं उपक्रमः ।

तथा च वक्तुः शब्दोच्चारणकालं यावन्नाभेर्मूलाधाराद् वा समुत्थितो वायुरुरसि कण्ठे शिरसि वा स्वीयं केन्द्रं प्रकल्पयतीति सवनस्थानानि भवन्ति। एवञ्च उदात्तानुदात्तस्वरितानां सम्बन्धः, उरःकण्ठशिरोरूपसवनस्थानैरेवात्र विवक्षितः, न तु ताल्वादिस्थानानां सभागत्वकल्पनं भट्टोजिदीक्षितप्रभृति - महाभागानां समुचितमिति समवधेयम्।

वर्णसमीक्षायाञ्च नवधा स्वरः कथितः— (१) श्वासलक्षणः, (२) नादलक्षणः, (३) विवारलक्षणः, (४) स्थानलक्षणः, (५) व्यक्तिलक्षणः, (६) गेह्यलक्षणः, (७) श्रुतिलक्षणः, (८) सवनलक्षणः, (९) भागलक्षणश्चेति। तत्रान्तःप्राणरूपः श्वासलक्षणः स्वरः। नादविवारलक्षणस्वरौ तु प्रयत्नविशेषौ बोध्यौ। अ इ उ इति स्थानलक्षणस्वरः। व्यक्तिलक्षणस्वरस्तु 'इदमाह्वानं चैत्रस्य, इदमाह्वानं मैत्रस्ये'त्येवं स्वरभेदे कल्पनीयः। सामिकस्वरस्तु गेह्यलक्षणस्वरो बोध्यः। श्रुतिलक्षणस्वरस्तु सङ्गीते प्रसिद्धः। तत्र सप्त शुद्धाः स्वराः, विकृताश्च द्वादश स्वराः। तत्र षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादभेदेन सप्त स्वराः सरिगमपधनिरूपाः। सवनभागलक्षणौ स्वरौ तूक्तावेव।

वर्णोत्पत्तिप्रकारश्चेत्थं पाणिनीयशिक्षायाम्—

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः।
वर्णान् जनयते तेषां विभागः पञ्चधा मतः॥
स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः॥
—इत्यादि।

एतावता आत्मनो मनसः कायाग्नेः मारुतस्य चेति चतुर्णामप्यवस्थानां पारं कृत्वैव स्वरस्य (नादस्य) उत्पत्तिः संभवति। अत एव ऋग्वेदे प्रोक्तम्—

यज्ञेन वाचः पदवीमायन्
तामन्वविन्दन् ऋषिषु प्रविष्टाम्।
तामाभृत्या व्यदधुः पुरुत्रा
तां सप्तरेभा अभि संनवन्ते॥
(ऋ. १०.७.३)

भर्तृहरिण्याह—

वितर्कितः पुरा बुद्ध्या क्वचिदर्थे निवेशितः।
कारणेभ्यो विवृत्तेन ध्वनिना सोऽनुगृह्यते॥
(वाक्य० १.४७)

तस्याः खलु वाचश्चतस्रोऽवस्था वेदादौ विशदीकृताः—परा, पश्यन्ती, मध्यमा, वैखरी चेति। तथा हि,

चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति॥
उत त्वः पश्यन्न ददर्श वाचम्
उत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे
जायेव पत्ये उशती सुवासाः॥
(ऋ. १.१६४.४९)

तत्र भाषा-पाश्चात्त्यवैज्ञानिका केवलं वैखरीरूपां वाचमधिकृत्यैव यत् किमपि विवेचनं विश्लेषणं वा कृतवन्तः कुर्वन्ति च, न तु परा-पश्यन्ती-मध्यमाविषये तेषां बुद्धिः प्रसरति, अपि तु तासु कुण्ठितैव भवति! भौतिकवादिनः खल्वाधुनिकभाषावैज्ञानिकाः कथमाध्यात्मिकीं परां पश्यन्तीं मध्यमां वा स्फोटाख्यां वाचं जानीयुः।

किञ्च—ऋग्वेदप्रातिशाख्येऽपि वर्णोत्पत्तिप्रकारो वैज्ञानिकपद्धत्या नैकैः सूत्रैः सम्यक्तया प्रदर्शितः। यथा—वायुः प्राणः कोष्ठ्यमनुप्रदानं कण्ठस्य खे विवृते संवृते चापद्यते श्वासतां नादतां वक्त्रीहायाम्। (ऋ. प्रा. ३१.१)

एतावता यदा कश्चित् किमपि वक्तुमिच्छति, तदा तदात्मना प्रेरितं सत् मनः कायाग्निमाहत्य तद्द्वारा वायुमुत्थापयति, उत्थितश्च वायुरतिर्यक् सस्वरमद्वारकं मूर्धानं गच्छति, तत्र च संघट्टनाद् नादरूपता भवति। ततः स एव नादः कण्ठताल्वादिरूपस्थाता (साँचा) प्रदेशं प्राप्य 'अ-क-च-ट-त-पादि-वर्णरूपेण विवर्तते इति फलितम्।

तत्र 'वायवीयाः शब्दाः' इति शिक्षाकार-प्रातिशाख्यका मतम्। 'पौद्गलिकाः शब्दाः' इति जैनाचार्यमतम्। परमाणवः पुद्गला उच्यन्ते। 'बुद्धिपरिणामाः खलु शब्दाः' इति पतञ्जलिप्रभृतिशाब्दिकानां मतम्। परमार्थतस्तु—

वागेव विश्वा भुवनानि जज्ञे।
अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्॥
स्वरूपज्योतिरेवान्तः परा वागनपायिनी।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते॥

इत्यादिवचनप्रामाण्येन नित्यं खलु वागात्मतत्त्वं चिच्छक्तिरूपं विज्ञेयं यस्यैव किल एते भाषाविकाराः समुद्रस्य आवर्त-बुद्बुद तरङ्गादिवद् विवर्तन्ते।

तदेवं वागात्मतत्त्वस्वरूपं वैज्ञानिकपद्धत्या विज्ञापयितुमैन्द्रादिव्याकरणानि प्रवृत्तानि। तत्र पाणिनीयव्याकरणं सर्वाण्यतिशय्य विजृम्भते, यत्र भगवान् पाणिनिरतीव सूक्ष्मेक्षिकया भाषातत्त्ववैज्ञानिकपद्धतिमनुसृत्य अनन्तानपि वैदिक-लौकिकोभयशब्दराशीन् लघूपायेन संग्रहीतुम् अलौकिक्या 'अइउण्'…… इत्यादिचतुर्दशसूत्र्या 'अण् - अक्' - इत्यादि - एकचत्वारिंशन्मात्रप्रत्याहाराश्रयणेन चतुःसहस्रपरिमितसूत्रैरष्टाध्यायीं परमवैज्ञानिकसरण्या विरचय्य दिव्यभाषाज्योतिराविश्चकार। तत्र 'अइउण्' इत्यादिचतुर्दशसूत्र्यामेव प्रथमं तावत् पूर्वापरीभावेन तत्तद्वर्णानां सन्निवेशक्रमे कियद् भाषातत्त्वविज्ञानं वर्तते इति नैव वक्तुं पार्यते, यत्रैकस्यापि वर्णनस्य व्यत्यासेन सन्निवेशेऽनेके दोषा आपतन्तीति शब्दतत्त्वमर्मज्ञा जानन्त्येव। अष्टाध्याय्या विरचनेऽपि षत्व - णत्वादि - तत्तत्प्रकरणानां पूर्वापरीभावेन व्यवस्थापने महती खलु भाषातत्त्वसूक्ष्मेक्षिका भगवतः खलु पाणिनेराचार्यस्येति अष्टाध्यायीतत्त्वज्ञा विदन्त्येव। अत एव **सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्** इत्युक्तम्। तस्यैवोपोद्बलकतया भगवता कात्यायनेन पतञ्जलिना च वार्तिकानि महाभाष्यञ्च विरचय्य स्वस्वप्रातिभं नावीन्यमप्याविष्कृतम्। अत एव त्रिमुनि-व्याकरणमिति नाम्ना प्रथितम्। एतन्मूलकमेव प्रथमे हि विद्वांसो वैयाकरणाः वै देवाः, देवानां खलु इयं संस्कृतभाषा 'देववाणी'त्युच्यते।

संस्कृतभाषाया वैशिष्ट्यम्

वस्तुतोऽस्माकं संस्कृतभाषायामेव इतरभाषावैलक्षण्येन अन्वर्थत्वं विलसति, नान्यस्यां कस्यामपि भाषायाम्। तथा हि—'सर्वं नाम धातुजमाह' इति नैरुक्तसिद्धान्तानुसारेण सर्वे संस्कृतशब्दा अन्वर्था भवन्ति। यथा—' सरतीति सरः; सरसि जायते इति सरोजं सरसिजम्; काम्यते इति कं जलम्, 'कमु कान्तौ', कान्तिरिच्छा, इष्यमाणत्वात्; कं जलं व्यपदिश्यते तत्र जातं कञ्जं कमलम्; कं जलमलङ्करोति भूषयतीति कमलम्; पीयते इति पयो जलम्; पयसि जायते इति पयोजम्; पयो ददातीति पयोदः; 'अम्भ पूरणे' अम्भयति पूरयतीति अम्भो जलम्, तस्मिन् जायते इति अम्भोजं कमलम्; कीलं स्तम्भम् अलति वारयति पूररूपेण त्रोटयतीति कीलालं जलम्; जीवयति प्राणयतीति जीवनं जलम्।

अहो वैशिष्ट्यं संस्कृतभाषायाः! **नहि कस्तूरिकामोदः शपथेन विभाव्यते** इति भाषामर्मविदो नाविदितम्। अत एवैतेषामेव यौगिकानां योगरूढानां वा संस्कृतशब्दानामर्थैः सह इतरेतराध्यासमूलकं भेदाभेदघटितलक्षणं तादात्म्यं सङ्घटते। तत्र अभेदस्तयो-

सङ्घशक्तेः स्वरूपम् :

नवसरसङ्घचालकाः श्री बाळासाहेब देवरसाः

अस्माकम् सङ्घकार्यं न खलु लघुवृत्ति, सांप्रदायिकं वा । अयं पुरातनो भारतदेशः । अत्रत्यो हिन्दुसमाजो राष्ट्ररूपः । यतो हि अत्र हिन्दुजीवनप्रवाहो मुख्यः, यस्य सन्ति कतिपये विशेषाः—मानवजीवनस्य साफल्यविषये दृष्टिः, परस्परं व्यवहारः, सदाचरणस्य मानदण्डाः, अन्यधर्मविषये उदारा दृष्टिः, स्त्रीपुरुष-सम्बन्धविचार इति । कालवशतः ये अन्ये जीवनप्रवाहाः अत्र प्राप्ताः, तैः अनेन जीवनप्रवाहेण अनुगुणैःभंवितव्मूय ।

सङ्घो यवनानां विरोधी नास्ति । स्वीयम् उपासनासम्प्रदायं रक्षन्तोऽपि ते भारतस्य आधारभूते जीवनप्रवाहे विलीना भवितुमर्हन्ति इति तस्य मतम् । भारतीयाः यवनाः देशान्तरेषु वर्तमानानां यवनबान्धवानां विचारे, व्यवहारदृष्टौ जातानि परिवर्तनानि न पश्यन्ति । स्वीयपार्थक्यमेव रक्षितुम् अनुचितं यतन्ते । अन्ये च निर्वाचनेषु तन्मतभिक्षां कामयमानाः तेषामज्ञानं तथैव पुष्णन्ति । तेन यवनबान्धवानाम् अहितमेव संपद्यते । इदं सर्वं राष्ट्रहितविरोधीति सङ्घः विद्यते ।

सङ्घो न विज्ञानविरोधी । विज्ञान-प्रयोगेण मनुष्यस्य अभ्युदयः स्यात् । विज्ञानं यथा मानवहिताय स्यात् तथा प्रयोक्तव्यमिति तस्य मतम् । स यथास्थितिवादो अपि नास्ति । समाजे स्थितान् दोषान् अपसार्य गुणाः आत्मसात् कर्तव्याः, अस्माकमाचारे व्यवहारे च स्थितमनिष्टं परिश्रमेण दूरीकर्तव्यमिति स हृदयेन वाञ्छति ।

इदानीं सङ्घकार्यं लोकानां दृष्टिनं विरोधिनी । तेषामपेक्षाः वृद्धिं गताः । सामाजिकेषु कार्येषु देशकल्याणाय सङ्घशक्तिः देशे, काले, पात्रे च नियोक्तव्या । अनेन सङ्घशक्तिः नैव क्षीयात् । 'व्यये कृते वर्धत एव नित्यम्' इति सङ्घशक्तेः स्वरूपं भवति ।

सङ्घसंस्थापकानां पुण्यश्लोकानां डॉ. हेडगेवाराणां पूजनीय गुरुजी गोळवलकराणाम् अपेक्षया गुणसंपत्तिः यद्यपि मयि नास्ति, तथापि तैः स्वजीवनसमर्पणेन समारचिता सानुभवानां सङ्घकार्यधुरन्धराणां स्वयंसेवकानां 'देवदुर्लभा' चमूः मत्सविधे अस्ति । अतः सङ्घकार्यं स्वलक्ष्यसंपादनं निःसंशयं विधास्यति । ४.७.७३ दिनाङ्के प्रथमभाषणतः

राध्यासिकः, भेदस्तु वास्तविको बोध्यः । तेन नाग्निशब्दोच्चारणे मुखे दाहः, गुडशब्दोच्चारणे वा माधुर्यम् ।

वस्तुतस्तु बौद्धयोरेव शब्दार्थयोस्तादात्म्यम् । न तु बाह्यशब्दार्थयोरिति नोक्तदोषलेशोऽपि । बौद्धशब्दार्थसद्भावे प्रमाणं तु **शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः** इति पातञ्जलयोगे विकल्पसूत्रमवगन्तव्यम् । बौद्धानमेव शब्दार्थज्ञानानां तादात्म्यं युक्तम्, तदभिन्नाभिन्नस्य तदभिन्नत्वनियमात् । विवक्षितो ह्यर्थो बुद्धिविषयीभूतः सन् भावनात्मकज्ञानरूपेण परिणमते । तच्च ज्ञानं शब्दरूपेण परिणमते इति रीत्या बौद्धयोः शब्दार्थयोरभिन्नत्वं सिद्ध्यति ।

किञ्च, नहि किमपि कारणं यत्किञ्चित् कार्यं प्रति येन केनापि सम्बन्धेन कारणं भवति, अपि तु कारणतावच्छेदकसम्बन्धेनैव दाहं प्रति वह्नेः संयोगसम्बन्धेनैव कारणत्वम्, न तु तदन्यसम्बन्धेन । तथा च दाहकारणतावच्छेदकसंयोगसम्बन्धेन मुखे वह्न्यभावान्न दाहापत्तिः ; नापि मुखे माधुर्याद्यापत्तिरित्यवधेयम् ।

एतेन सर्वे भाषावैज्ञानिकप्रश्नाः वैज्ञानिकपद्धत्यैव समाहिता भवन्ति । चिदात्मतत्त्वमेव वाक्तत्त्वमिति च व्यवस्थितं भवति । तेन न वायवीयाः शब्दाः, नापि पौद्गलिकाः वा शब्दाः सम्भवन्ति । यदि वायवीयाः शब्दाः स्युस्तदा यस्मिन्नेव क्षणे यूरोपे अन्यत्र वा कुत्रापि बहुदूरेऽपि 'रेडियो' द्वारा शब्द उच्चार्यंते, तस्मिन्नेव क्षणे भारतेऽपि स शब्दो न श्रूयेत, वायोस्तथाविधगत्यभावेन एकस्मिन्नेव क्षणे एतावद्दूरदेशगमनासम्भवात् । एवमेव यदि पौद्गलिकाः शब्दाः स्युस्तदा उपर्युक्तदोष आपतेत्, पुद्गलानामपि परमाणूनाम् एकस्मिन्नेव क्षणे तादृशगतिप्रसरासंभवात् । तस्मात् कश्चिद् विलक्षण एव चिदात्मरूप आन्तरः शब्दो नित्यो व्यापकोऽक्रमोऽखण्डो नामरूपात्मकस्य जगतो मूलहेतुरिति विज्ञेयम् ।

अत एव व्याप्तिमत्त्वात्तु शब्दस्य इति नैरुक्तसिद्धान्तोऽपि सङ्गच्छते । तदाह भर्तृहरिः (वाक्य० १.११२)—

अथायमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥

तदेवं निरुक्तं शिक्षा प्रातिशाख्यं व्याकरणमिति चतुष्टयं भाषाया वैज्ञानिकरहस्यं नितान्तमवगाहत इति सिद्धम् ।

प्राचीन-भारतीयाः क्रीडाः

-- डॉ० नरेश झा शास्त्री —

(७)

वीटा-क्रीडा

वीटा-क्रीडा (वि+इट् गतौ+क+टाप्) हिन्दी-भाषायां 'गुल्ली-दण्डा' इत्युच्यते । अस्याः क्रीडायाः प्रचारो महाभारतकाले आसीत् । बृहत्तर - भारते इयं क्रीडाऽधुनापि विभिन्नै रूपैः प्रचलिता वर्तते । मुख्यस्वरूपमस्या महाभारत-टीकाकर्तुः नीलकण्ठमतेन यथा—यत्रार्धवितस्तिमात्रां (प्रादेशमात्रामिति यावत्) यवाकृतिं वीटां (काष्ठखण्डम्) हस्तमात्र-दण्डेन प्रताड्य तां व्योमगां कृत्वा पृथिव्यां पतनात्पूर्वमेव पुनस्तेनैव दण्डेन सन्ताड्य यावद्दूरं प्रक्षिप्य वीटापतनस्थानात् गणयित्वा ततो गणनाविक्य-न्यूनत्वसंख्यया जय-पराजयोऽवधार्यते, सा 'वीटा-क्रीडा' । एतद्विवेचितमाचार्येण 'फड़के' महोदयेन ।[1]

इयं क्रीडा वीराः कुमाराः पाण्डवाः मुदा आचरन्ति स्म । यथोक्तं महाभारते—

क्रीडन्तो वीटयस्तत्र वीराः पर्यचरन्मुदा ।
पपात कूपे सा वीटा तेषां वै क्रीडतां तदा ॥[2]

अत्र 'वीराः पर्यचरन्' इति बहुवचनान्तप्रयोगेण अनेकानां कुमाराणां युगपत् क्रीडासक्तिः सूच्यते ।

कालक्रमेणास्यां क्रीडायां परिष्कारो यथा—आदौ भूमिं किञ्चिद् खनित्वा तस्यां यवाकृतिमर्धवितस्ति-(प्रादेश) मात्रां वीटां निधाय (येन वीटार्धभागः भूमौ निलीनः स्यादर्धभागश्च बहिरुन्मुखो भवेत्), दक्षिणहस्तधृतेन सपादहस्त-मात्रदण्डेन तां सन्ताडयेत् । तदा अपरो बालकः उत्प्लुत्य वीटामुपरिभागत एव हस्तगतां करोति । तथा कृते विजयः । अथवा वीटायाः भूमौ पतितायामन्यस्तामेव वीटाम् उत्खनितभूमिस्थाने निक्षिपति । तत्र यदि निकटे एव पतति, तदा प्रक्षेप्तुर्विजयः, दूरे पतति सति पराजयः, पुनश्च पूर्ववत् क्रीडा प्रचलति ।

क्वचिच्च—वितस्तिमात्रा 'वीटा' हस्तद्वयदण्डेन ताडयते । प्रताडिता बीटा यत्र पर्यन्तं गच्छति, तत्र यावत् प्रक्षेपककाष्ठेन नववारं गणयति । ततः पर्यायपूर्तौ सत्यां पुनरन्यो वीटां प्रक्षिपति । यद्युत्खनित-भूमिपार्श्वे वीटा आयाति, तदा जयो जायते, अन्यथा पुनः दण्डेन प्रक्षेपः ।

'महाभारतकालीन समाज' - ग्रन्थे तल्लेखकेन 'वीटा'शब्दस्यार्थो यवाकृति चतुरङ्गुलकाष्ठखण्डमिति कृतः । तत्रैव संसूचितं यत् केचन 'वीटा' इत्यनेन लोहखण्डं (गिलिकाम्) कुर्वन्ति ।[1]

इयं क्रीडाऽधुनापि बालका शारीरिकश्रमप्राप्त्यर्थं मनोविनोदार्थञ्च व्यायामरूपेण कुर्वन्ति ।

कनकशृङ्गकोश-क्रीडा

इयं क्रीडा 'शृङ्गकोश-क्रीडा' 'शृङ्गक्रीडा' चेति नामभ्यां व्यज्यते । 'कनक'-विशेषणमस्यां क्रीडायां प्राचीन - कविप्रयुक्तत्वादाधुनिकाचार्यस्वीकृतत्वाच्च ग्राह्यम् । प्राचीनकविप्रयोगो यथा रघुवंशे—

---

[1] सरस्वती-भवन स्टडीज्, भाग १०, १९३८ ई० 'संस्कृत साहित्ये वर्णिता क्रीडाः' शीर्षके लेखे ।

[2] महाभारत, आदि० १३१.१७ ।

[1] महाभारतकालीन समाज, प्रकीर्ण-व्यवहार ।

वर्णोदकैः काञ्चनशृङ्गमुक्तै-
स्तमायताक्ष्यः प्रणयादसिञ्चन् ।[1]

शृङ्गं (पिचकारीति भाषायाम्) सामान्यतया सर्वसाधारणेभ्यो वंशनिर्मितं भवति । राजप्रासादेषु समृद्धमन्दिरेषु (उपासना-स्थानेषु) धनवताञ्च गेहेषु स्वर्णरजतधातुविनिर्मितानि शृङ्गाण्युपलभ्यन्ते । अतो राज्ञां वर्णने धातुनिर्मितशृङ्गकोशस्यैव वर्णनं विशेषतो दृश्यते।

भिन्नसंज्ञया प्रतिपादिता एतद्रूपिका क्रीडा कामसूत्रे समस्याक्रीडाभेदद्वयमध्ये मध्यदेश्यां क्रीडायाम् 'उदकक्ष्वेडिके'ति प्रसिद्धा । सा च उदकपूर्णा क्ष्वेडा यस्यां क्रीडायामित्युदकक्ष्वेडिका क्रीडा । क्ष्वेडा तु 'क्ष्वेडा वंशशलाकापि' । वंशनाडी स्मृता क्ष्वेडा सिंहनादश्च कथ्यते[2] इति । तथा च क्ष्वेडा वंश[3] (बांस इति भाषायाम्) इति कथ्यते । एतस्याः 'शृङ्गक्रीडे'ति (होली) देशप्रसिद्धं नाम । अपि च—तत्रैव 'होलाकायां'[4] फाल्गुनपूर्णिमायां शृङ्गकादिमुक्तेन किंशुकादिकुसुमरागाम्भसा परस्परोक्षणं मिथः पटवासप्रक्षेपश्चेति कामसूत्रे[4] स्पष्टम् ।

अन्यत्र चास्याः अपरं नाम 'शृङ्गक्रीडा' । अत्र हेतुश्च शृङ्गे (वंशखण्डे) जलं प्रपूर्य सिंहनाद इव जलशब्दनिस्सारणम् । लङ्कायाः सिगिरिया-गुहाभित्तौ ईदृशमेकं चित्रमप्युपलभ्यते ।[5] तस्मादुदकक्ष्वेडिकाक्रीडावत् कनकशृङ्गकोश-क्रीडा । तत्रानेकसुगन्धिद्रव्यमिश्रितं जलमनेकवर्णयुक्तं च कृत्वा कनकशृङ्गकोशैः स्त्री-पुरुषैः बालिकाभिर्बालकैर्वा परस्परं प्रक्षिप्यते । लोकप्रसिद्धैषा क्रीडा बाणरचिते कादम्बरीग्रन्थे तारापीडक्रीडा-वर्णनप्रसङ्गे रूपान्तरेण यथा—

कामिनीकरपुटविनिर्गताभिः कुङ्कुमजलधाराभिः पिञ्जरीक्रियमाणकायो लाक्षाजलच्छटाप्रहारपटलीकृतदुकूलो मृगमदजलबिन्दुशबलचन्दनस्थः ।[1]

महाराजेन सोमेश्वरेण तु मानसोल्लासे किञ्चिद् भिन्नस्वरूपेण 'सेचन-क्रीडा'नामिकाऽभिनवा क्रीडा निरूपिता । सा च—

वसन्तस्योत्सवे वाद्यविवाहाद्युत्सवेषु च ।
जये चासेचनक्रीडां कुर्याद्राजा मुदान्वितः ॥[2]

अत्र 'राजा कुर्यादि'त्यनेनैव साधारणेभ्यो निषेधात्मकं वचनम् । परञ्च श्रीमद्भागवते तु सार्वजनिकं स्वरूपमस्याः क्रीडायाः । उक्तं च तत्र—

गोपाः परस्परं हृष्टाः दधिक्षीरघृताम्बुभिः ।
आसिञ्चन्तो विलिपन्तो नवनीतैश्च चिक्षिपुः ॥[3]

इत्यनेन सर्वजनक्रियमाणेयं क्रीडा प्रतिपादिता । इयं स्नानाङ्गभूता एव । विशेषावसरे तु विशेषरूपेणेत्येव विमर्शः । अद्यत्वेऽपि इयं क्रीडा प्रचलत्येव ।

हल्लीस (श)-क्रीडा

हल्लीशः हल्+क्विप् लस् श्लेषणक्रीडनयोः+अच् पृषो० ईत्वम् । हल्लीसकेत्यपि वा पाठः । इयं क्रीडा रासक्रीडायामेव अन्तर्भवितुमर्हति । तथापि किञ्चिद् वैशिष्ट्येन पृथग् प्रतिपादनमेवोचितम् । रासक्रीडायां कन्यकामन्तरा बालकः, तमन्तरा च कन्यका भवति । परमत्र मध्ये एक एव बालकस्तिष्ठति । तमभितो मण्डलाकारं विधाय गायन्त्यो नृत्यन्त्यो बालिकाः परिभ्रमन्ति । यथोक्तं कामसूत्रे—

हल्लीसक-क्रीडनकैर्गायनैर्नाट्यरासकैः ।[4]

श्लोकस्यास्य जयमङ्गला-टीकायाम्—

मण्डलेन च यत्स्त्रीणां नृत्तं हल्लीसकं तु तत् ।
नतस्तत्र भवेदेको गोपस्त्रीणां यथा हरिः ॥

---

१. रघुवंशम् १६. ७० ।
२. अमरकोश ३.३.४३ ।
३. संस्कृत हिन्दी कोश : आप्टे, पृ० ३२१ ।
४. कामसूत्रम्, जयमङ्गलाटीकायाम् ।
५. प्राचीन-भारतीय-मनोरञ्जनम्, पृ० १९२ ।

---

१. कादम्बरी, तारापीडवर्णनम् ।
२. मानसोल्लासः ५.४.२०१-२०२ ।
३. श्रीमद्भागवतम् १०.५.१४ ।
४. कामसूत्रम् २.१०.२५ ।

एतेनापि सूच्यते यत् हलवत् नतत्वादियं 'हल्लीसक'क्रीडेति। 'गोपस्त्रीणां यथा हरिरि'त्यस्य निदर्शनं हरिवंशपुराणे यथा—

तास्तु पङ्क्तीकृताः सर्वा रमयन्ति मनोरमम्।
गायन्त्यः कृष्णचरितं द्वन्द्वशो गोपकन्यकाः॥
कृष्णलीलानुकारिण्यः कृष्णप्राणिहितेक्षणाः।
कृष्णस्य गतिगामिन्यस्तरुण्यस्ताः वराङ्गनाः॥[1]

इत्थमयं नृत्यभेदो 'हल्लीसक्रीडा' इति संज्ञया बोध्यते। आचार्येण विश्वनाथेन तु साहित्यदर्पणे अष्टादशोपरूपकेषु 'हल्लीसं' सप्तदशमुपरूपकं निरूपितम्। तद्यथा—

दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च।[2]

एतद्विवरणे प्रतिपादितमस्ति यदत्र प्रधानतया गायन-नृत्ये भवतः। एवञ्चास्यां क्रीडायामेकः पुरुषः सप्त अष्टौ वा नर्तक्यो भवन्ति। अस्याः पद्धत्याः प्रयोगात्मकं स्वरूपं भासरचिते बाल-चरितनाटके उपलभ्यते।

नौ-क्रीडा

नेयं नौकाविहार-क्रीडा, अपि तु गुहतुल्यासु नौकासु क्रीडैषा प्रवर्तते। अस्याञ्च अन्ना पानाद्यनेकवस्तुयुता उद्यान - कृत्रिमपर्वत - जलाशयादिसहिताश्च महत्यो नौका निर्मीयन्ते स्म। तत्र अन्नपानादिभक्षणपूर्विका नैकविधाः नृत्यादिकाः क्रीडाः प्रचलन्ति स्म। तदुक्तं हरिवंशे—

नौभिर्गृहप्रकाराभि - श्चिक्रीडुरपराजिताः।
....॥
उद्यानानि सभावृक्षा दीर्घिकाः स्यन्दनानि च।
निवेशितानि शिल्पानि तादृशान्येव सर्वथा॥[3]

एषा क्रीडा साधनसम्पन्नेभ्यो धनवद्भ्य एव सुलभा। अधुनाऽपि धनवतां यानपात्र-प्रासादः ('जहाजकोठी' इति भाषायां) अवलोक्यते।

आमलकमुष्ट्यादि-क्रीडा

यत्र हस्ते कान्यपि आमलकादिफलानि तिन्तडीबीजानि लोष्टगुटिका वा धृत्वा मुष्टिं बद्ध्वा कश्चित् पृच्छति—'कथय कति फलानि, कति बीजानि कति वा गुटिकाः?' इति। यदि कश्चित् यथासंख्यक्रम् उत्तरयति तदा हस्तमुष्टिस्थितानि सर्वाणि फलानि बीजानि सर्वाः गुटिका वा तस्मै सत्यवक्त्रे विजेत्रे दीयन्ते। यदि च मिथ्या स्यात्तदा प्रतियुग्ममेकं फलं पराजेता मिथ्यावादी प्रश्नकर्त्रे ददाति। एवंविधा या क्रीडा सा सा यथोक्तनामा भाण्यते।

श्रीकृष्णादि - गोपबालकैराचर्यमाणेयं क्रीडा श्रीमद्भागवते[1] मूलत्वेनोपनिबद्धा। यथा—क्व चामलकमुष्टिभिः। वीरराघवाचार्येण भागवतचन्द्रिकाटीकायाम् 'आमलकैः=शुक्तिभिः कालिन्दीपुलिनगतमुक्तास्फोटैश्चे'त्यर्थः कृतः। तदनुसारं शुक्तीः मुष्टौ कृत्वाऽत्र क्रीडन्ति स्म। वराटिकाभिरपि क्रीडेयं सम्पाद्यते। क्वचिच्च टीकाकर्तुराशयः आमलकफलानां मुष्टिना प्रक्षेप इत्यपि दृश्यते।

जैन-साहित्ये 'चउप्पन महापुरिसचरियं' ग्रन्थे इमां क्रीडां 'आमलखेड्डं' इति संज्ञया प्रतिपाद्य तत् स्वरूपमपि वर्णितम्। तद्यथा—

> 'तओ जम्मदिणप्पहुइ सविसेस सपल्लरिद्धिपवड्ढमाणत्तणओ कयबद्धमाण णामधेयो बड्ढिउं पयत्तो। अइक्कंतो बात्तणाओ। पत्तो कुमारभावं। कीलिउं पयत्तो सह कुमारेहिं। कीलंतो य णिग्गओ णयरवाहिं। पारद्धं च एक्कम्मि (स्स) तरुणो हेट्ठम्मि आमलयखेड्डं।'[2]

---

[1] हरिवंश, विष्णु० २०.२५-२६।

[2] साहित्यदर्पणम् २७६।

[3] हरिवंशः २.८८.५७,६६।

[1] श्रीमद्भागवतम् १०.१८.१४।

[2] चउप्पनमहापुरिसचरियं।

एवमियं क्रीडा प्राचीनकालेऽपि सुसिद्धाऽऽसीदित्यत्र नास्ति सन्देहलवः ।

दर्दुरप्लाव-क्रीडा

दर्दुरप्लाव-क्रीडा (दर्दुर+प्लु+घञ्+क्रीडा) । दर्दुरवत्=मण्डूकवत् उत्प्लुत्य उत्प्लुत्य विधीयमाना दर्दुरप्लाव-क्रीडा । अत्र दर्दुरग्रहणमुपलक्षणम् । वस्तुतः देशभेदैः शशक-कुक्कुटादीनामपि ग्रहणम् । 'हरिणा-क्रीडन'-क्रीडायास्तु पृथङ्निर्देशः कृतः । किन्त्वन्यासामेतादृशीनां क्रीडानां दर्दुरप्लावक्रीडायामेवान्तर्भावः । अतः क्रीडेयं देशभेदैरनेकविधा भवति ।

तत्र दर्दुरप्लावक्रीडायां सर्वे बालकाः सर्वाः बालिका वा कस्मिंश्चिदेकस्मिन् स्थाने दर्दुरवच्छरीराकृतिं निर्माय उपविश्य निश्चितावधिस्थानपर्यन्तं सर्वे दर्दुरवत् उत्प्लुत्योत्प्लुत्य युगपदेव गच्छन्ति । तेषु यः प्रथमतो निश्चितस्थानं प्राप्नोति, तस्य जयो भवति ।

शशकवत् उत्प्लुत्य क्रीडायाः प्रचारः पूर्वीयप्रदेशे ।

दक्षिणे महाराष्ट्रदेशे तु बालिकाः कुक्कुटवत्सर्वाः शरीराकृतिं निर्माय निश्चितावधि (स्थान) पर्यन्तं युगपद् गच्छन्ति । नाम च तस्य खेलस्य महाराष्ट्रदेशे तद्भाषीयं 'कोंबडा' इति प्रसिद्धमिति आचार्य फड़के महोदयाः ।[1]

दर्दुर-शशक-कुक्कुटवत् उत्प्लुत्या सर्वाङ्गव्यायामः शरीरारोग्याय जायते । अस्याः क्रीडाया निर्देशः श्रीमद्भागवते क्वचिच्च दर्दुरप्लावैर्विविधैरुपहासकैः[2] इत्यत्रावलभ्यते । एवमेव जैनानाम् आदिपुराणेऽप्येतस्याः क्रीडायाश्चर्चा विहिता । अतः प्राचीनेयं क्रीडा ।

नाट्य-क्रीडा

देवी-देवानां स्त्री-पुरुषाणां वाऽनुकरणात्मकं चित्रणं यस्यां क्रीडायां क्रीडायां भवति सा नाट्यक्रीडा । अर्थात् किमपि चरित्रमुद्दिश्य तदनुकारिभिरनुकार्यपुरुषादिवत् समाजेऽनुष्ठीयते विशेषतोऽभिनयः आङ्गिक-वाचिका-ऽऽहार्य-सात्त्विकादिभिः । प्रायो रामकृष्णलीलाः पूर्वं प्रचलन्ति स्म । श्रीमद्भागवतेऽपि अभिनय उपलभ्यते । तद्यथा—

गायन्ननुस्मरन् कर्म जन्म चाभिनयन् मुहुः ।[1]

अतो यत्र बालकाः बालिका वा स्त्री-पुरुषाणामनेकप्रकारकं वेषं धृत्वा खेलन्ति सा नाट्यक्रीडेति । उक्तञ्च स्वरूपपरिचयाय गर्गसंहितायां यथा—

पुंवेषनायिकाः काश्चिन्मौलिकुण्डलमण्डिताः ।
नृत्यन्तः कृष्णपुरतः श्रीकृष्ण इव मैथिल ।
राधावेषधरा गोप्यः शतचन्द्राननप्रभाः ॥[2]

अत्र काश्चिन्नायिकाः पुंवेषधारिण्यः मौलिकुण्डलमण्डिता अभूवन् । काश्चिद् गोप्यश्च शतचन्द्राननप्रभा राधावेषधराः सञ्जाताः । अतोऽयं खेलः परस्परसन्तोषार्थं मनोविनोदार्थं लघुव्यायामार्थञ्च केवलम्, न तु समाजे लोकप्रदर्शनार्थमिति ।

अलातकचक्र-क्रीडा

वेदान्तादिग्रन्थेषु भ्रमनिदर्शनार्थं प्रयुक्तालातकचक्रप्रयोगस्य चर्चा[3] भवतु नाम । अत्र तु अर्धज्वलितोल्मुकमधिकृत्येयं क्रीडा प्रवर्तते । 'अलात'-शब्दस्य अर्धज्वलिते काष्ठे प्रयोगः कालिदासेन कुमारसंभवे महाकाव्ये कृतो यथा—

(शेषांशः १६६ पृष्ठे)

---

[1] सरस्वती-भवन स्टडीज्, भाग १०, १९३८ ई० ।

[2] श्रीमद्भागवतम् १०.१८.१५ ।

---

[1] श्रीमद्भागवतम् ११.११.२३ ।

[2] गर्गसंहिता २.२५.२२–२३ ।

[3] अलातचक्रमिव स्फुरन्तम् । मैत्र्युप० ६.२४ । तथा च ब्रह्मसूत्रशांकरभाष्ये भामत्याम्—'एतेन द्विचन्द्रदिङ्मोहालातचक्र-गन्धर्वनगर-वंशोरगादिविभ्रमेष्वपि (१.१.१) ।

रथो रथरूढो वामनश्च कः ?

--श्री दुर्गाप्रसन्न विद्याभूषणः--

सर्वविदितमेतद् यदविदितकालादिह भारते परमपुण्यतीर्थे पुरीक्षेत्रे क्षेत्राधिपस्य पुरुषोत्तमस्य जगन्नाथदेवस्य प्रत्यब्दं सम्पद्यते रथयात्रा। तत्र च विषमविषयाशीविष-जर्जरकलेवरा रोगिणो भोगिनो योगिनो वियोगिनश्च मानवा विषवैद्यमिव रथस्थं पुरुषोत्तमं देवं द्रष्टुकामा विहाय गेहं परित्यज्य विषयमोहमविभाव्य शरीरक्लेशं विधूत्य च विनयवेशं पुरीधामनि गच्छन्ति। प्रत्यावर्तन्ते च भगवद्दर्शनादात्मानं कृतकृत्यं मन्यमाना विषविमुक्तविग्रहा इव स्वस्थाः सहस्रशो गणशश्च सानन्दं भारतीयाः। यतः शास्त्रप्रमाणो भारतीयजनसमाजः। शास्त्रञ्च वर्तते—

रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते।

एतच्छास्त्रवचनप्रत्ययादेव त्रितापदग्धा विदग्धा अपि भारतीया अद्यापि साग्रहाः प्रवर्तन्ते रथस्थस्य दारुमूर्तेः जगन्नाथस्य दर्शनार्थम्। तेषां पुनर्जन्मनिवृत्तिरेव सकलक्लेशस्वीकारे प्रवर्तिका दृश्यते। जातस्यैव दुःखं, जननिवृत्तौ तु कस्यापि न स्थास्यति दुःखं किञ्चिदिति। ते तावन्मन्यन्ते—न तावद् भविष्यत्यस्माकं पुनर्जननम्, न च भाव्यस्माकमीदृशो विषमस्त्रितापदाहो यस्माद् बीभत्समाना वयं परमशान्तिनिदानं जगन्नाथदेवं दृष्टवन्तः।

इत्थं पुनर्जन्मवृत्तये रथगत-जगन्नाथदर्शनार्थं गणनातीताः समानाकूतयो बालबृद्ध-युवयुवतयो गणशः श्रीक्षेत्रे भवन्ति सम्मिलिताः, येन प्रत्यब्दमेव भवति महान् जनसम्मर्दः। सर्वा एव बालवृद्ध-वनितास्तरुणाः प्रौढाश्च स्त्रीपुंसा अनपेक्षितशरीराः कलरवबधिरीकृतश्रवणविवरा अवधीरितान्यकृत्या अधीरं धावन्ति पुरतो रथस्थं देवं जगन्नाथं द्रष्टुम्। तदात्वे च समुद्रतीरे प्रवर्तते द्वितीयो जनसमुद्रः। उत्तालास्तरङ्गा इव सारावं चलन्ति श्रेणीशो गणशश्च मानवाः। दुर्बला बलवच्चरणतलदलिता वनिता गलितोत्तरीया अश्रुतानादृतसहगामिजनाह्वाना आविष्टा इव निष्पिष्टा जनैः 'जय जगन्नाथ!' इति ध्वनिमुखरा भगवद्दर्शनव्याकुलमनसोऽधीरं धावन्ति, तदा न वीक्षन्ते दुर्बलान्, नापेक्षन्ते जनान्, न दयन्ते बालवृद्धान्। केवलमहमहमिकया धावन्ति।

केचिद् वा रथरज्ज्वाकर्षणक्षमा धन्यं मन्यन्ते स्वात्मानम्। ये तावत् पुरतो गन्तुमक्षमास्ते धरणीतललुण्ठिता नयनजलप्लावितवक्षसो "देव दयामय! दयस्व मे" इति ब्रुवाणा निमीलितनयना एव प्रणमन्ति पृष्ठतो देवम्। ये तावद् दृष्टवन्तो रथस्थं देवं ते मन्यन्ते—धन्या वयं भगवद्दर्शनेन, संवृताऽस्माकं जन्मान्तरनिवृत्तिः।

किन्त्वत्र तान् पुनर्जन्मनिवृत्तिसम्भावनानन्दविह्वलानवलोक्य केचिदेवमाहुः—नृत्यन्तु नाम मन्दमतयः स्वात्मानं कृतकृत्यं मन्यमाना रथस्थदारुब्रह्मदर्शनानन्दसन्दोहेन! न खलु सम्पत्स्यते दारुब्रह्मदर्शनादेषां पुनरुत्पत्तिनिवृत्तिः।

यदि नाम रथस्थ जगन्नाथदर्शनेनैव निवृत्तिरभविष्यत् पुनर्भवस्य, तर्हि भारतेऽस्मिन्नेतावता कालेन नाजनिष्यदेतादृशो जनव्रातः, प्रत्युत जगन्नाथदर्शनमहिम्नैव जनजनशून्येयमभविष्यद् भारतभूमिः। नाभविष्यद् भारते काचिज् जन्मनिरोधव्यवस्था, नाकरिष्यन्नारीजनोऽस्त्रोपचारद्वारेण सन्ताननजनननिरोधम्। नासेविष्यत कापि रमणी जनननिवारक-

भेषजविशेषम्। नाकल्पयिष्यच्च कश्चित् परिवार-नियोजनकल्पनाम् ?

अथ यदि केचिदेवं ब्रुवते—यत् रथस्थजगन्नाथ-दर्शनेन भारतीयानां पुनर्जन्मनिवृत्तिर्भवत्येव। न तावद् वितथं शास्त्रवचनं भवितुमर्हति। ये तावदभियोक्तृभिर्जायमाना दृश्यन्ते, ते खल्वभारतीया एव। तदपि न समीचीनम्; आजन्मनो भारतीयसंस्कारवत्तादर्शनात्तेषाम्। ये यज्जातीयास्तेषां तज्जातीयः संस्कार इति भूयोदर्शनात्। अभारतीयानामेव जन्मग्रहणे तादृशदृढतरप्रमाणाभावाच्च। अतो भारतीया जायन्ते म्रियन्ते च इति स्वकीयेच्छाविरहेऽपि स्वीकर्तव्यम्।

एतदेव परमपूज्यपाद-शङ्कराचार्येण तारस्वरेण घोषितम्—

पुनरपि जननं पुनरपि मरणं,
पुनरपि जननीजठरे शयनम्।
इत्यादि।

गीतायामपि भगवताभिहितम्—

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।

तर्हि "रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते" इत्येतच्छास्त्रवचनं किं वितथमुच्यते भवद्भिरिति चेत्? नो वितथमिति ब्रूमः। शास्त्रवचनमवितथमेव। वयं तु शास्त्रार्थानभिज्ञाः, शास्त्रवचने सम्यगास्थावन्त एव भारतीयाः। भारतस्य वैशिष्ट्यं शास्त्रद्वारेणैव। शास्त्रे श्रद्धारहितानां 'भारतीया वयमिति परिचयोऽपि व्रीडामुपजनयति भारतीयानाम्।

अथ तर्हि 'रथस्थमि'त्यादिवचनस्य कीदृशोऽर्थो भवतामभिमतः? इति चेदुच्यते। 'रथस्थमि'त्यादिवचने योऽयं 'रथ'शब्दः स रथो न दारवः, न चायसः, न च रजत-काञ्चनादिनिर्मितः। अपि तु शरीरमेव रथः, **शरीरं रथमेव तु** इति श्रुतेः।

न केवलं श्रुतावेव शरीरस्य रथत्वकथनम्। पुरा वर्षीयसां मुखादपि शरीरस्य रथत्वव्यवहारोऽस्माभिराकर्णितः। तद् यथा—'न मे साम्प्रतं चलति रथः, रथो न चलतीति मया गृहमध्युष्यते, अचलरथस्य जीवनं विडम्बनमेव भवती'त्यादिः। काममिदानीं तादृग् व्यवहारो नाकर्ण्यते।

अतो रथस्थं शरीरस्थं=वामनम् अर्थात् अङ्गुष्ठमात्रं पुरुषमित्यर्थः, **अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति, अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः, सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनञ्च, ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥ शरीरस्थोऽपि कौन्तेय कर्मभिर्न स बध्यते** इत्यादिश्रुति-स्मृतिवचनेभ्यस्तथावगमात्। अङ्गुष्ठशब्दोऽयमणुपरिमाणपरः, **अणुरेव आत्मा** इति श्रुतेः। एवं भूतं वामनं दृष्ट्वा=विलोक्य (स्थितस्य जनस्य) पुनर्जन्म पुनरुत्पत्तिर्न विद्यते न भवतीत्यर्थः, **न स पुनरावर्तते** इति श्रुतेः।

एतस्यैव रथस्थवामनस्य दर्शनोपदेशः श्रुतौ दृश्यते—आत्मा वा अरे द्रष्टव्यः इति। एतदात्मदर्शनार्थञ्च श्रवण-मनन-निदिध्यासनानि कर्तव्यानि। तथा च श्रुतिः—श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च इति। श्रवणमनननिदिध्यासनानि कथं कर्तव्यानीत्याह—

श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।
मत्वा च सततं ध्येयमेते दर्शनहेतवः॥

न ह्येतदात्मदर्शनमन्तरेण जननान्तरनिवृत्तेः अपरोऽस्ति कश्चिदुपायः। तदेवाह श्रुतिः—**नान्यः पन्था विद्यतेऽयनाय** इति।

दर्शनोपायाश्च प्रागुदीरिताः। **मनसैवानुद्रष्टव्यम्** इति श्रुतिश्च तानेवोपायान् समर्थयति।

तत्कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः। न स पुनरावर्तते।

आत्मानं चेद् विजानीयादयमस्मीति पूरुषः ।
किमर्थं कस्य कामाय शरीरमनु संज्वरेत् ॥

इत्यादिश्रुतिभ्यः । एतदेवोक्तं भगवताऽर्जुनं प्रति—

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मां प्राप्य न निवर्तन्ते मृत्युसंसारवर्त्मनि ॥
मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥

तद्दर्शनं तु विषयकलुषचक्षुषा नैव भवति । तदेवाचष्टे स्म भगवानर्जुनम्—

न च मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥

विना च दिव्यदृष्टिं तद्दर्शनं कथमपि न घटते । तद्दिव्यदृष्टिलाभायैव योगिभिरनुष्ठीयते योगः । आसाद्य च दिव्यदृष्टिं प्रत्यक्षीक्रियते स आत्मा । पश्यन्ति यद् यतयो वीतरागाः इति गीता-स्मरणात् ।

न च योगिनोऽपि सर्वं एव द्रष्टुं क्षमन्ते । तथोक्तं भगवता—

मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥

यदि नाम तद्दर्शनं सर्वैरेव सुशकं भवेत् तर्हि योगिनां बह्वायाससाध्यैर्धारणाध्यानसमाधिभिः किम् ?

अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् ।
इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत् ॥

एवं सति रथस्थजगन्नाथदर्शनेन पुनर्जन्मनिवृत्तिः कल्पयितुमपि न शक्यते । नान्यः पान्था विद्यतेऽयनाय इति श्रुत्याऽन्यपथो निषेवात् ।

तर्हि श्रीक्षेत्रे रथस्थजगन्नाथदर्शिभिः किमेतावन्तं कालं निष्फलः प्रयासो विहितः, विधीयते वा ? नो निष्फल इत्याचक्ष्महे—

न हि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति ।

इति भगवदुक्तेः दुर्गतिनिवृत्तिर्भवत्येव । अपि च—

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥

इत्यादिस्मृत्या फलान्तरलाभोऽपि भवत्येव । न च पुनर्जन्मनिवृत्तिरिति भूयोऽप्यावेदयामः, केवलात्मदर्शनसाध्यत्वात्तस्याः । अत एवोक्तम्—

अयं हि परमो धर्मो यद् योगेनात्मदर्शनम् ।

आत्मदर्शनस्य परमधर्मत्वमात्मनो दर्शनादेव । योगेन आत्मदर्शनमेव रथस्थ-वामनदर्शनम् । तेनैव भवति जननान्तरनिवृत्तिः, न स पुनरावर्तते इति श्रुतेः । त्रितापदाहभयनिरसनादानन्दाधिगतेश्च । आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन, तेषां शान्तिः शाश्वती नेतरेषाम् इत्यादिश्रुतिभ्यः ।

एषैव रथयात्रा । एष एव रथोत्सवः—

असारे संसारे विषमविषयास्वादनरतो
न वन्दे गोविन्दं कथमपि च मन्दः क्षणमपि ।
कृतान्ते मत्प्रान्ते सहचरगणैरेष्यति तदा
जगन्नाथो नाथो भवतु मम पाथोधितरणे ॥

(१६३ पृष्ठस्य शेषांशः)

कुरुतेऽस्मिन्नमोघेऽपि निर्वातालातलाघवम् ।[1]

अलातं ज्वलदुल्मुकं चक्रवत् परिभ्राम्य या क्रीडा विधीयते सा अलातचक्र-क्रीडा कथ्यते । विशेषरूपेणेयं क्रीडा कार्तिककृष्णामायां दीपमालिकोत्सवे रात्रौ भवति । बालकाः अन्ये वा क्रीडकाः सतैलयुतकर्पटकेनेउभयतो बद्धां यष्टिमग्निना प्रज्वाल्य सज्वालां तां मण्डलाकारं चालयन्ति । तेन यदग्निचक्रं निर्मितं भवति, तदेव 'अलातचक्र'पदेन गीयते ।

मिथिलायामियं क्रीडा दीपमालिकायां निशामुखे प्रायः सर्वैः लघुबालकैः क्रीड्यते । तत्र केचन वंशशाखासु तत्त्वचः पत्राणि च ग्रन्थयन्ति, सायङ्काले च 'हुक्कालोली! हुक्कालोलो!!' इति पुनः पुनरुद्घोषयन्तः चक्रवत् परिभ्रामयन् क्रीडन्ति । युवानः वृद्धाश्च तृणान्याकलय्य दण्डाकारं विधायाग्निना संयोज्य च चतुर्दिक्षु भ्रामयन् दारिद्र्य-निस्सारणं कुर्वन्ति, स्वस्य कृते च बाहुव्यायामं सम्पादयन्त्यनायासम् । परम्परया प्रचलितेयं व्यायामशिक्षा ।

इत्थमनेन विस्तृतेन निबन्धेन प्रायः ३४ संख्यकानां प्राचीनभारतीयानां क्रीडानां संक्षेपतः कृतमिदं निरूपणं यदि सहृदयानां चेतःप्रसादकरं भवेत्तदाऽयं जनः स्वीयश्रमसाफल्यं मन्येतेति शम् ।

---

[1] कुमारसंभवम् २.२३ ।

संस्कृतभाषाया लोकोपयोगित्वं कथं स्यात् ?

—श्री ब्रह्मानन्द त्रिपाठी, एम. ए., साहित्यायुर्वेदाचार्यः—

[प्राध्यापकः—डी० ए० वी० कालेज, वाराणसी]

सुविदितमेव समेषाम् ऐतिहासिकानां विदुषां यद् यदा यदा यस्य यस्य शासनं प्रावर्तत, तदा तदा तस्य तस्य भाषा राज्यभाषात्वेन प्रतिष्ठापिताऽभूत्। इदमेव तेषां राज्यस्य सुदृढताया रहस्यमासीत्। हंहो ! इदानीं भारतीया वयं केवलं नामत एव स्वतन्त्राः; यतो हि नात्र अस्माकं भाषा स्वतन्त्रा। न च वेशभूषादिकं स्वतन्त्रम्। तत् कथम् अस्माकं विचाराः स्वतन्त्रा भारतीयतापोषकाश्च भवेयुः ? एवमादिप्रलापैः संस्कृतज्ञानां भारतीयानाम् अभीष्टसिद्धिः खपुष्पायिता प्रतीयते। एतदर्थम् अस्माभिर्जागरूकैर्भवितव्यम्। सर्वप्रथमं तावत् छात्राणां संस्कृताध्ययनं प्रति प्रारम्भिकम् औदासीन्यं समेषामेव सुर वाणी-सेवकानां चेतांसि दुनोति। एतस्य औदासीन्यस्य हेतुस्तेषां संस्कृतज्ञानाम् आर्थिकी दुरवस्था सामाजिकी उपेक्षा च वर्तते। अत एव पराङ्मुखं भाग्यविधातारं विशेषतः शासनधुरन्धरं प्रति भारती कथयति—

धवलोऽसि यद्यपि सुन्दर !
मम हृदये निहितोऽपि न रञ्जितो भवसि।

अपि च—

ये ये गुणिनो ये ये त्यागिनो ये च विदग्धविज्ञानाः।
दारिद्र्य रे विचक्षण ! तेषां त्वं सानुरागोऽसि॥

संस्कृतशिक्षणसंस्था अपि प्रायशः उपेक्षिता एव। ये च संस्कृताध्ययनं प्रति निजामभिरुचिम् आवहन्ति, नास्ति तेषां क्वापि तादृशी सुव्यवस्था, यया तेषां सम्यग् अध्ययनं जीवनयात्रा च भवेत्। अतो यदि नाम संस्कृतस्य प्रचार-प्रसारो वाञ्छितो, तदा एतस्या विपन्नस्थितेः परिहारो नूनं विधेयः। कस्या अपि भाषायाः समुत्थानाय संवर्धनाय च इदमावश्यकं भवति यत् तदध्येतॄणां सम्मानं लोकाः कुर्युः। अधुना तु लोका भौतिकोन्नतिव्याकृतचेतसो नादधति संस्कृतभाषायां श्रद्धाम्।

किन्तु साम्प्रतिकस्थितावपि केचिदीदृशाः सन्ति विषया यैरियमाशा समुदेति यत् कालान्तरे कश्चिदेतादृश आधारः प्राप्यते, यत्र मानवीया भौतिकी भावनाः संस्कृतभाषयैव प्रकाशमेष्यन्तीति। विज्ञानविद्याविस्तरस्तु सौन्दर्यरसास्वादे साहाय्यमेव विधास्यति, न तु व्यवधानम्, यदीदानीं विद्वद्भिः नवीनमेकं विश्वदर्शनं कल्प्यते चेत् नूनं तस्य मूलं भारतीयविचारेषु विहितं भविष्यति इति सविश्वासं वक्तुं शक्यते। तच्च दर्शनं सुगमतया संस्कृतभाषायामेव प्रकाशयितुं शक्यते, यस्य विषये श्रीमान् आल्डुअस हक्सली महोदयो ब्रूते—"संस्कृते विश्वस्य सुन्दरतमानि शाश्वतिकानि दर्शनानि सुसमाहितानि विराजन्ते।' इत्येतद् विचारजातं मीमांस्यम्, अतः परं कामपि प्रयोगिकीं वार्तां प्रारभे।

तत्र प्रथमं संस्कृतभाषायाः प्रायोगिकानि काठिन्यानि सरलीकर्तुं कांश्चित् परिष्कारान् (सुधार) प्रस्तोतुमभिलाषामि—अद्य यदिमां संस्कृतभाषाम् अभिनवैः परिष्कारैर्युगानुरूपां क्रियते, तर्हि सर्वत्रैतस्या आदरः स्वाभाविक एव। तत्र कठिनानां प्रयोगाणां दूरीकरणाय सरलप्रयोगाणां परिवर्धनाय च प्रयासा विधेयाः। संस्कृतभाषायाः प्रौढिस्तु सुतरां सुरक्ष्या, किन्तु लोकोपयोगिव्यवहाराय व्याकरणप्रयुक्तानां नियमानां यथासम्भवं शिथिलीकरणमावश्यकम्। लोकप्रयुक्तानाम् अन्यासां भाषाणां शब्दाः निःसङ्कोचं ग्राह्याः स्युः। सत्याम् आवश्यकतायां नवनवाः शब्दाः निर्मेयाश्च भवेयुः।

अद्य संस्कृतभाषां प्रति काठिन्यस्य जनापवादः सुतरां प्ररूढः, येन तस्या जिज्ञासवोऽपि नितरां कान्दिशीकतां यान्ति,

का कथा इतरेषाम् ? अत एव तमःवादं दूरीकर्तुं प्रयत्नाः समाचरणीयाः । परस्मैपदवताम् आत्मनेपदवतां च धातूनां सार्थकः (परेभ्यः परस्मैपदम्, आत्मभ्य आत्मनेपदम्) प्रयोगो लोके क्वापि दृष्टिपथं नायाति । अत एषमो गुरुतरो भारः सर्वथा बहिष्कार्यः । शब्दानां लिङ्गनिर्धारणेऽपि न सर्वत्र साम्यं दृश्यते। वैदिके पौराणिके काव्यनाटकादिसाहित्ये च कामं स्वातन्त्र्यं तत्-तत्-कर्तृभिः समाचरितम् । तत् कथं पाणिनीयेषु नियमेषु एकान्ततो दुराग्रहः भाराय स्वीक्रियते ? प्रयोगदृष्ट्या प्रत्येकधातूनां दशसु लकारेषु विभाजनं भाराय एव कल्पते। वर्तमानकालस्तु एक एव, भूते भविष्यति च कतिकति विकल्पाः पाणिनिना निर्दिष्टाः। शान्तेन चेतसा विचारयन्तु विद्वत्तल्लजाः ! किं परोक्षे लिटः एव प्रयोगः, अनद्यतने लङः एव प्रयोगो बोभवीति ? नो चेत् सामान्यविधिना भूत-भविष्यत्-कालप्रयुक्तेषु कस्याप्येकतमस्य लकारस्योपयोगः सुकरः स्यात् । इत्थमेव कर्तृवाच्य-कर्मवाच्यप्रयोगयोरपि निर्देशो मनांसि खेदयति प्रारिप्सूणाम् ।

पुरा बहवो व्याकरणशास्त्रप्रणेतारः समभूवन्, तेषां प्रक्रियाग्रन्थान् अवलोक्य स्फुटीभवति यत् तेषु विषयविधौ सत्यामपि समानविचारधारायां भूयांसि वैषम्यानि पठतां पुरः स्फुरन्ति । यदि नाम वयं सरलताकराणि कतिपयपरिवर्तनानि विधाय प्रत्यग्रैः शब्दैः तेषां संयोजनप्रकारैश्च असंस्कृतज्ञान् संस्कृतजिज्ञासूश्च अधिकाधिकसंख्यायां संस्कृतज्ञान् विधातुं समर्थाः स्याम तर्हि नास्ति कापि हानिः ।

काव्यादिषु प्रसिद्धानाम् एव पर्यायवाचकशब्दानां प्रयोगाः प्रायो लभ्यन्ते, न तु समेषां शब्दानां प्रयोगाः । 'नवसर्गगते माघे नवशब्दो न विद्यते' इति प्रायोवादः । अतः बालानां वाक्यप्रयोगेष्वपि सरलसरलानां द्वित्राणाम् एव शब्दानां प्रयोगाः शिक्षणीयाः । यथा—विष्णोर्नामसु विष्णुः, नारायणः कृष्णः, केशवः, हरिः, प्रसिद्धाः, अत एव सुज्ञेयाः भवेयुः । इयं प्राचां सरणिः ।

कारकाणां प्रयोगेषु विशेषनियमान् तावत्कालमपहाय प्रारम्भिकनियमानुसरणम् एव छात्राणां सुखाय भविष्यति। पश्चाद् विकसितायां विवेकशक्तौ विद्वान् बुभूषुः स्वयमेव तेषामन्वेषणपरो भविता । लिङ्गविवेकः शुद्धलेखने भाषणे च बृहस्पतिमपि सन्देहपथातिथीकरोति, तत्र काऽन्येषां गतिः ? एतदर्थं स्त्रीलिङ्ग-पुल्लिङ्गशब्दानां निर्णयस्तु सुकरः। तत्रापि अजन्तशब्दाः हलन्तेभ्योऽधिका सरलतराः । पुंनपुंसकयोर्भेदाः अनन्ताः । ते च प्रसिद्धिवशात् क्वचन बुद्धिगम्याः, अपरे भ्रामकाः । केचन उभयलिङ्गात्मकाः । तेषां प्रयोगे प्रसिद्धाऽप्रसिद्धचिन्ता पुरः समायति । यथा—'वा पुंसि पद्मं,' सत्यामपि शास्त्रदेशनायाम् पद्मशब्दस्य पुंसि प्रयोगः प्रेक्षावद्भ्यो न रोचते। किं बहुना, व्याकरणस्य सर्वाभ्यः शाखाभ्यः सरलतायाः दृष्ट्या तत्-तद्-अंशानां चयनं शेषाणाम् उपेक्षणम् अवशिष्टानां प्रपूरणम् अस्मद्विधानां परमं पवित्रं कर्तव्यं वरीवर्ति ।

भाषायाः ग्रन्थिविश्लेषणार्थं संस्कृतज्ञविदुषाम् एका परिषत् स्थापिता स्यात् । सा एवंविधविचारनिकरैः भारत्याः अभिनवभण्डार-भरणे बद्धपरिकरा भवेत्, तदा संस्कृतशिक्षणमार्गः निष्कण्टकः तत्पथानुयायिनां गतिः च सुदृढा भवेत्। तदैव संस्कृतवाङ्मयं सर्वजनोपयोगि सम्भवेत् । अद्य अस्माभिः संस्कृतज्ञैः तथा प्रयतनीयं येन संस्कृतोपनिबद्धानि प्राक्तनशास्त्राणीव साम्प्रतिकानां नवनवानां सर्वा उपलब्धयो गद्य-पद्यरूपेण उल्लिखिताः शोभिताः स्युः । आशास्यते संस्कृतज्ञा विद्वांसः एतस्यां दिशि प्रयतिष्यन्ति । किमधिकम्, तथापीदमस्तु—

भारतेऽथ विदेशेषु ज्ञानविज्ञानपुष्कला ।
जने जने प्रसृता स्याद् भव्या गीर्वाणभारती ॥

●

विक्रेयाणि बहुमूल्यानि पुस्तकरत्नानि

गृहं स्वर्गीकर्तुं मानवजीवनञ्च सफलयितुं वाणीपुस्तकमालातः महापरिषदः महामण्डलसंस्थानतश्च प्रकाशितानि निम्नलिखितपुस्तकानि विक्रयार्थं प्रस्तुतानि। विशेषविवरणाय सूचीपत्रं नियमाश्च पत्रप्रेषणेन समासादनीयाः।

१. भारतधर्म-समन्वय	१-५०
२. परलोक-तत्त्व	२-५०
३. कठोपनिषद्	३-००
४. धर्मतत्त्व	२-५०
५. वेदान्तदर्शन	१-५०
६. हिन्दूधर्मका स्वरूप	०-३७
७. तत्त्वबोध, सजिल्द	१-००
बिना जिल्दका	०-७५
८. आदर्श देवियाँ प्रथम भाग	२-२५
,, ,, द्वितीय भाग	२-५०
९. सती सदाचार	१-५०
१०. कर्म-रहस्य	२-५०
११. केनोपनिषद्	१-५०
१२. ईशावास्योपनिषद्	१-००
१३. सप्तशती (दुर्गा) गीता, सजिल्द	३-००
,, दफ्ती जिल्द	२-२५
१४. सदाचार-प्रश्नोत्तरी	०-३७
१५. व्रतोत्सव-कौमुदी	१-३७
१६. हिन्दू-संस्कृति-समीक्षा	०-५०
१७. धर्म-प्रवेशिका	०-७५
१८. पूजा-प्रार्थना	०-६२
१९. गायत्रीमन्त्र-टीका	०-२५
२०. आचार-चन्द्रिका	१-००
२१. कन्या-शिक्षा-सोपान	०-२५
२२. गजेन्द्र-मोक्ष	०-३७
२३. महिला-प्रश्नोत्तरी	०-५०
२४. व्रतोत्सव-चन्द्रिका	५-००
२५. धर्माधर्म-प्रश्नोत्तरी	०-२५
२६. सुलोचना	०-६२
२७. तीर्थ और देवपूजन-प्रश्नोत्तरी	०-२५
२८. स्मरणी	०-६२
२९. स्त्री-पुरुष-विज्ञान	०-३७
३०. श्राद्ध और परलोक-विचार	०-३७
३१. धर्म-विज्ञान प्रथम, द्वितीय, तृतीय, ५) ४)	४-००
३२. श्रीमद्भागवत, एकादश स्कन्ध	३-५०
३३. सती धर्म और योगशक्ति	०-३७
३४. अन्तःकरण-विज्ञान	०-७५
३५. निर्मूल आक्षेपोंका उत्तर	०-३७
३६. परलोक-प्रश्नोत्तरी	०-२५
३७. श्रीमद्भगवद्गीता प्रथम भाग	४-००
,, ,, द्वितीय भाग	३-५०
३८. मनुष्य-धर्म	०-३७
३९. धर्मकल्पद्रुम प्रथम खण्ड	६-००
,, द्वितीय खण्ड	३-००
,, तृतीय ,,	३-५०
,, चतुर्थ ,,	५-००
,, पञ्चम ,,	३-५०
,, षष्ठ ,,	४-००
,, सप्तम ,,	३-५०
,, अष्टम ,,	४-००
४०. प्रवीण दृष्टिमें नवीन भारत (प्रथम खण्ड)	२-००
,, ,, (द्वितीय खण्ड)	२-००
४१. नवीन दृष्टिमें प्रवीण भारत	१-२५
४२. साधन-चन्द्रिका	१-७५
४३. शास्त्र-चन्द्रिका	१-७५
४४. धर्म-चन्द्रिका	१-६५
४५ पातञ्जल-योगदर्शन (हिन्दी भाष्य)	३-००
४६. कर्ममीमांसा-दर्शन (सम्पूर्ण)	१२-००

व्यवस्थापक : **वाणी-पुस्तकमाला, आर्यमहिला हितकारिणी महापरिषद्, जगतगंज, वाराणसी**

पञ्जीकृत-संख्या—एल० १८९७

महामण्डल-वृत्तम्

गुरुपूर्णिमा-महोत्सवे

श्री गुरुदेव-ज्ञानानन्दस्वामिपादानां समाराधनम्

वाराणसी। भारतधर्ममहामण्डलस्य प्राङ्गणे भगवत्याः पराम्बायाः गायत्रीदेव्या मन्दिरे आषाढशुक्ल-पौर्णिमास्यां रविवासरे १५-७-७३ दिनाङ्के प्रातः गुरुदेवानां श्रीमहर्षि-ज्ञानानन्दस्वामिपादानां प्रस्तरविग्रहस्य सभक्तिसमर्चनं महामण्डलसञ्चालिकाभिः पूज्यश्री विद्यादेवीमहोदयाभिः कृतम्। महापूजनादेः पौरोहित्यं वैदिकमूर्धन्यैः श्री रामनाथजी सारस्वत महाभागैः सम्पादितम्। पूजनोत्तरं काशीस्थ-प्रमुखवैदिकप्रवराणां वसन्तपूजनं सम्पन्नम्। वेदघोषेण समग्रः परिसरः गुञ्जितोऽभवत्।

सायंकाले कविराजानां श्री व्रजमोहन दीक्षितानामाध्यक्षे विराट्सभायाः समायोजनमभवत्, यत्र विशिष्टातिथीनां श्री वी० पी० सक्सेना (डिविजनल आयुर्वेदिक-अधिकारी, वाराणसी) महोदयानां मुख्यं प्रवचनमभूत्। अखिलभारतीय-धार्मिकाध्यात्मिक-संस्कृतविद्यापीठ-परीक्षामन्त्रिभिः डॉ० परमहंस मिश्रैः (संस्कृतविभागाध्यक्ष, आर्यमहिला डिग्री कालेज, वाराणसी) शास्त्रीयदृष्ट्या गुरुतत्त्वं निरूपितम्। अध्यक्ष-महोदयैः भारतीय-वाङ्मये गुरुतत्त्वस्य स्वरूपं वर्णितम्। गुरुदेवचरणेषु श्रद्धाञ्जलिं समर्पयद्भिः पूज्य श्री विद्यादेवी महोदयाभिरुक्तं यत् साम्प्रतं सर्वत्र छात्रेषु प्रसृताया अनुशासनहीनतायाः निवारणस्य एकमात्र उपायस्तेषु गुरुभक्तेः प्रचार एवास्ति। अस्मिन्नवसरे मन्दिरे विद्युद्दीपानां प्रकाश अत्याकर्षक आसीत्।

१६ दिनाङ्के मध्याह्ने ब्राह्मणसन्तर्पणं भक्तेभ्यः प्रसादवितरणञ्च समभूत्।

•

सुन्दरनगरे 'संस्कृत-दिवस'-समारोहः

ज्ञायते यदस्मिन् वर्षे श्रावणपूर्णिमायां १४ अगस्तदिनाङ्के हिमाचलप्रदेशीय-मण्डीमण्डलान्तर्गते सुन्दरनगर-स्थाने अखिलभारतीयः 'संस्कृत-दिवस'-समारोहः समायोजितोऽस्ति। तत्र विविधाः प्रतियोगिताः, कविसम्मेलनम्, विद्वद्-भाषणानि, संस्कृतनाटकम्, संस्कृत-ग्रन्थप्रदर्शनी, शोधप्रबन्ध-पाठादयः कार्यक्रमा निर्धारिता वर्तन्ते।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२, वाराणसी।

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४९

❀

अङ्कः ८

❀

सम्पादकः
गो० न० वैजापुरकरः

❀

अगस्त
१९७२

❀

वार्षिक-मूल्यम्
५) रूप्यकाणि

❀

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

❀

जय जय भारतमातः !

•

जय जय भारतमातः !
जय जय भारतमात-र्जय हे ! जय जय भारतमातः !

१. क्षालयन्ति सदा सुधासलिलैर्गङ्गाद्याः शुभनद्यः,
पावनावलोकनै-स्त्वदीयैः पापं यास्यति सद्यः,
पूतस्तव मृदुवातः !

२. मङ्गलमयि जय जननि कृपामयि विमले त्वं हि भवानी,
सुमधुरहासिनि कलयति जगति रससान्द्रा तव वाणी,
तव महिमात्यवदातः !

३. राम - कृष्ण - शङ्कर - प्रभृतयो भवशमसाधनशीलाः,
विपिन - तिलक - खुदिराममुख्याः कृतदेशोत्तरलीलाः,
(तव) क्रोडे केलितवन्तः !

४. रवीन्द्रनाथ - विद्यासागरा-ऽऽशुतोषप्रभृतयो मुख्याः,
गान्धी - नेताजी - देशबन्धुप्रमुखाः पुत्रा वीराः,
सम्यक् प्रकटितवन्तः !

५. षट्पञ्चाशत् - कोटिपरिमिता-स्तनया जयिनो वीराः,
वज्रबाहुधृत-खरकरवालाः साहसिनो रणधीराः,
कस्त्वां जेतुं शक्तः ?

६. सकलकलुषकुलनाशिनि मातस्त्वमसि सदा कल्याणी,
तव शुभमहिमा भुवने ख्यातस्त्वं वत्सला शिवानी,
तुभ्यं मे प्रणिपातः !

— श्री नीरदवरण भट्टाचार्यः
बी० ए० (आनर्स), काव्यतीर्थः

महामण्डले श्रीकृष्णजन्माष्टमीमहोत्सवः, गुरुदेवजयन्ती च

अनन्तश्री करपात्रस्वामिपादानां प्रवचनम्

वाराणसी। भारतधर्ममहामण्डलीये पराम्बायाः श्रीगायत्रादेव्या मन्दिरे विगते २१-८-७३ दिनाङ्के रात्रौ ८॥वाद नतोः भगवतः श्रीकृष्णस्य जन्माष्टमी-महोत्सवो गुरुदेव श्रीज्ञानानन्दस्वामिजयन्ती महोत्सवश्च महता समारोहेण सम्पन्नः। समारोहस्य सभापतिपदेन अनन्तश्री पूज्य करपात्रस्वामिपादैः श्रीकृष्णस्य परमात्मनः स्वरूपवर्णना-ऽवतारग्रहणविष महत्त्वपूर्णं भावभरितं प्रवचनं कृतम्। महामण्डलप्रधानमन्त्रिभिः श्रीशिवनन्दनलाल दर महोदयैः, कविराज श्रीव्रजमोह दीक्षित महाभागैः, श्री वी० पी० सक्सेना महोदयैश्च भगवते श्रद्धाञ्जलयः समर्पिताः महामण्डलसञ्चालकाभि पूज्यश्री विद्यादेवी महोदयाभिः श्रद्धाञ्जलिं समर्प्य निवेदितं यदयमपि कालो भगवदवतारस्य समुपस्थितः। भगवानेव साम्प्रति विपदं निहन्तुं प्रभवति। भगवतो जन्ममहोत्सवोन्तरं प्रसादवितरणादिकमपि सम्पन्नम्।

अनुक्रमः

प्रपानकः	पत्रपुटम्	परिवेषकः
जगति विजयते रजत-जयन्ती!	१६९	श्री शिवजी उपाध्यायः
श्रीमहर्षि-ज्ञानानन्द-चरितम्	१७०	श्री स्व० विन्ध्येश्वरीप्रसाद शास्त्रिणः
स्वतन्त्रता-दिवसीयम् आत्म-समीक्षणम्	१७१	सम्पादकीयम्
देववाणी-गौरवम्	१७३	श्री स्व० म० म० हरनारायण गोस्वामी
वेदेषु गृहस्थाश्रमः	१७५	श्री जयशङ्कर ब० शुक्लः
अहो नव्य-भारत-दशा	१७८	श्री बटुकनाथ भट्टाचार्यः
राष्ट्रिय-जीवने संस्कृतभाषाया महत्त्वम्	१७९	श्री अशोकचन्द्र शास्त्री
अभिनवा चिरप्रत्ना च निद्रोपनिषद्	१८४	श्री माणिक मुरलीधर देशपाण्डे
भगवान् श्रीकृष्णः-यत्र षोडशकलाः सर्वांशतो विकसिताः!	१८५	श्री गोविन्द नरहरि वैजापुरकरः
कालिदास-काव्येषु कुलपतयः	१८८	श्री चन्द्रदेव रायः
विन्ध्यवासा शिवा स्तात्	आवरण तृतीय पृष्ठे	श्री स्व० रामानन्द त्रिपाठिपादाः

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४९ वर्षे] वाराणसी, श्रावणः, २०३० वैं० : अगस्त १९७३ ई० [८ अ :

जगति विजयते रजत-जयन्ती !

जगति विजयते रजत-जयन्ती !
स्वतन्त्रता साम्प्रतिक-भारते जन्मसिद्धिसफला विभारते।
जनगणमन इति हासपावनी रासरङ्गभुवि नटति हसन्ती॥ १॥

तिलक-लाजपत-मालवीयगुरु-गान्धि-जवाहर-लालबहादुर-
वीरपटेल-सुभाष-भासिनी संप्रतीन्दिरा हृदि विकसन्ती॥ २॥

शिमलाशान्तिसन्धि-सुपुनीता पाकविहित-रणविजय-पीता।
वंगबन्धु - धरणीप्रकाशिनी भरतभूमिभगिनीव लसन्ती॥ ३॥

पञ्चदशी तारिका तारिका हिमगिरितः कन्याकुमारिका।
भारतीह जननी निवासिनी भुक्ति-मुक्तिफलमिव वितरन्ती॥ ४॥

—श्री शिवजी उपाध्यायः

पूर्वतोऽनुवृत्तम्

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— स्वर्गीयाः श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः —

(विंशो सर्गः)

११. शक्तेर्न भिन्नो निजदाहिकाया वह्निश्च गाता निजगानशक्तेः ।
तथैव तद्ब्रह्म तदीयशक्त्या न भिद्यते चेति मतं श्रुतीनाम् ॥
१२. चैतन्यतच्छक्ति - विभिन्नतायाः प्रतीति - राहित्य - विवेक एव ।
अद्वैतसिद्धेः स हि बीजमन्त्रो यः प्राणिनां जीवनलक्ष्यमास्ते ॥
१३. जीवप्रवाहोऽयमनन्तशक्तौ चिदम्बुधौ सर्वनिदानभूते ।
धावन्नबाधः प्रभवेद् विलीनः शिक्षाविधेर्लक्ष्यमिदं वरेण्यम् ॥
१४. द्विधा विभज्यैव निजं स्वरूपं सा ब्रह्मशक्तिर्भुवि बन्ध-मोक्षौ ।
ददात्युभौ जागतिकासुभृद्भ्यः सिद्धान्त एषोऽखिल-शास्त्रसिद्धः ॥
१५. तस्यास्तु विद्या च तथाप्यविद्या भेदद्वयं चेति मतं श्रुतीनाम् ।
आद्या तु निर्वाणपदं प्रदत्ते बन्धस्य हेतुर्गदिता द्वितीया ॥
१६. अन्तर्जगद्रूप - मनन्तपारं तद् ब्रह्मराज्यं ह्यनुभूतिगम्यम् ।
दुरूहमादर्शयतेतरां या निजाश्रिताऽन्तेवसतः सदैव ॥
१७. सर्वापदां संशमनी प्रपन्ना समान् . समानन्दयते प्रसन्ना ।
ज्ञानस्य चैका जननी नमस्या सत्त्वात्मिका सर्वसुखैकहेतुः ॥
१८. विज्ञानिनो भक्तवरान् स्वकीयान् स्वरूपसंदर्शनपूर्वकं हि ।
आनन्दरूपाम्बुनिधावपारे निमज्जयन्ती च निमज्जिता च ॥
१९. आत्मोन्मुखाञ् जीवगणान् विधत्ते तेभ्यो द्रुतं मुक्तिपदं प्रदत्ते ।
चक्षूंषि चोन्मीलयते जनानां विद्याऽस्ति सा मोक्षनिदानभूता ॥
२०. अज्ञानजालं परिसारयन्ती जीवान् प्लवङ्गानिव नर्तयन्ती ।
मायामयेऽशान्तिद-दुःखपाशे ह्यज्ञानिनो हन्त निपातयन्ती ॥

(क्रमशः)

सम्पादकीयम्

स्वतन्त्रता-दिवसीयम् आत्म-समीक्षणम्

तैत्तिरीयोपनिषदि अन्नस्य माहात्म्यं वर्णयन्त्या भगवत्या श्रुत्या उक्तम्—अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभि संविशन्तीति (३.२.१)। अत एव तत्रैवाग्रे अन्नस्य निन्दनं निषिद्ध्य तन्निन्दाकरणाभावं व्रतत्वेन समुल्लिख्य शरीरं प्राणञ्च अन्नब्रह्मत्वेन व्यवस्थाप्य तदुपासनाया फलमप्याह वेदमाता—अन्नं न निन्द्यात्। तद् व्रतम्। प्राणो वा अन्नम्। शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणः प्रतिष्ठितः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या (३.७.१)। अन्नत्यागमपि निषिद्ध्य तत्त्यागाभावो व्रतत्वेनाख्यातस्तत्रैव श्रुत्या—अन्नं न परिचक्षीत। तद्व्रतम् इत्यादि (३.८.१)। ततोऽग्रे एव अन्नस्य वर्धनं व्रतत्वेन निर्देश्य तस्यावश्यकर्तव्यत्वं साधितम्—अन्नं बहु कुर्वीत। तद्व्रतम् इत्यादि (३.९.१)। अस्यामेवोपनिषदि द्वितीयवल्यामप्युक्तम्—अन्नाद्वै प्रजाः प्रजायन्ते। या काश्च पृथिवीं श्रिताः अथो अन्नेनैव जीवन्ति इत्यादि (२.२.१)। इत्थम् आनन्दमय-पञ्चमकोषतो विनिर्मुक्तस्य ततः परतरस्य शुद्धतमस्य परब्रह्मणः साक्षात्काराय प्रथमकोषतया अन्नस्य वैशिष्ट्यं भारतीयदर्शनदृष्ट्या सर्वथाऽनुपेक्ष्यं सिद्ध्यति। कालदृशाऽपि विचार्यमाणे अन्येषु युगेषु अस्थ्यादिगतत्वेन प्राणवर्णनेऽपि साम्प्रतिके युगे प्राणानां स्थितिः अन्ने एव निर्भरेति शास्त्रकृद्भिरपि जोघुष्यते—कलावन्नगताः प्राणाः इति। एवञ्च रागप्राप्तस्याप्यन्नस्य उत्पादन-रक्षण-सर्वसाधारणसुलभीकरणादिविषये शास्त्रकृतां भूयानाग्रहो दृश्यते।

वस्तुतो विचार्यमाणे व्यवहारपथि अन्नमिदं सर्वथा देश-कालसीमातीतमेव विजृम्भते। अतो यदि कोऽप्येनं वैयक्तिक-राजनैतिका-ऽऽर्थिकादि-स्वार्थसाधनाय समुपयुज्येत, तदा तस्य दृढतरः प्रतिरोधः प्रत्येकस्य मानवस्य कर्तव्यं भवति। साम्प्रतमस्माकं स्वतन्त्रे राष्ट्रे भारते इदमेव अखिलभारतीय-संक्रामकव्याधिरूपं बिभ्रद् दरीदृश्यते। जीवनोपयोगि-वस्तुमात्रविषये कस्याप्येतादृशस्वार्थसाधनं सर्वथा निन्द्यं परिहार्यञ्च। तथापि अन्नविषये तु तदतितरां गर्ह्यमुच्येत। अनेनैव सर्वविधस्वार्थसाधनेनाद्य भारतीयसामान्यप्रजानां निम्नप्रजाजनानाञ्च जीवनं कीदृग् सङ्कटापन्नं सञ्जातमिति पृथक् वक्तव्यं नावशिष्यते। भुक्तभोगिनी प्रायो बहुसंख्यका भारतीयजनताऽस्य। वृत्तपत्रेषु एतद्विषये नैकाः समीक्षारहरहः प्रकाशयन्ते। विभिन्नराजनैतिकपक्षावलम्बिनः परस्परं दूषयितुं कटिबद्धाश्च दृश्यन्ते। परं सर्वैरेभिरुपायैः मूलभूतसमस्याया लेशतोऽपि समाधानं न जायते। उत्पादनस्य न्यूनता, अवर्षणाऽतिवर्षणादि दैव्य आपदा अपि अस्या विपदः कारणरूपेण समुपस्थाप्यन्ते। राष्ट्रियं शासनं संग्रहकारिणामेव दोषं समुद्भावयति। तदर्थञ्च गोधूमस्य अधिग्रहणं कृत्वा इतः परं तण्डुलस्याप्यधिग्रहणाय तत् कटिबद्धं दृश्यते। परमेकस्य अन्नस्य अधिग्रहणेन देशे भीषणाकालस्य यादृशी स्थितिः समुपस्थिता, तां दृष्ट्वाऽपि

तस्यैव पथोऽनुसरणं कथमपि विवेकानुप्राणितं वक्तुं न शक्येत। आश्चर्यं तु तदैव भवति यदा प्रधानमन्त्रि-सदृशा अपि स्वतन्त्रतादिवसीय-राष्ट्रियसन्देशे आदित आन्तं गोधूमचर्चां कृत्वाऽपि इदमेव वदन्ति यदस्माभिर्यदधिग्रहणं कृतम्, तस्यैव सुफलं यद् गोधूमस्य दृश्यमानोऽप्यंशो जनतया समासाद्यते। श्रुत्वेदमिदमेव वक्तव्यं भवति यत् प्रधानमन्त्रिणोऽस्माकमेतादृशाः सर्वसमर्था दैवादस्माभिरुपलब्धाः ये अन्नब्रह्मापि करामलकायितं कर्तुं प्रभवन्ति! तटस्थाः पुनरिदमपि वक्तुं समभिलषन्ति यद्भारतीया प्रजा एतावतो स्वभावतः सहनशीला यत्प्राणसङ्कटेऽपि शासनस्य सम्प्रतिष्ठां संरक्षितुमप्रमदितैव तिष्ठति। तस्या रक्तकणेषु राष्ट्रप्रेम, राष्ट्रस्वातन्त्ररक्षणभावा अद्यापि प्रवहन्ति। अन्यथा साम्प्रतिकस्थितौ राष्ट्रव्यापिनीमुग्रतरां क्रान्तिं समाश्रित्य ये केऽपि किल प्राणभृतः प्राणभूतेन अन्नेन सह क्रीडन्ति, अविशेषेण तेषां सर्वेषामेव शुद्धिकरणाय भारतातिरिक्तं किमपि प्रबुद्धं राष्ट्रं सचेष्टं दृष्टं स्यात्। अन्नोत्पादने प्रमादकर्तारः, तद्रक्षणोपेक्षिणः, तत्सङ्ग्रहेण मूल्याधिक्यार्जनलोलुपा अर्थपिशाचाः, स्वीययन्त्रस्य पदे पदे प्रमदितत्वमनुभूयापि तदधिग्रहणाय प्रवृत्ताश्च शासकाः सर्वेऽपि निरीहभारतीय-प्रजाजनस्य जीवनेन क्रीडन्तोऽस्य सङ्कटस्य उत्तरदायित्वतः कथमपि मुक्ताः न भवेयुः।

ताटस्थ्येन विचार्यमाणेऽस्माकं राष्ट्रस्य एतद्विषयिणी समग्रा नीतिदेव दोषग्रस्ता। स्वातन्त्र्योत्तरं वयं स्वकीयां नीतिं परित्यज्य वैदेशिकानां नीतेरनुसरणायैव स्पर्धमाना इव संवृत्ताः। वैयक्तिक-सामाजिक-राजनैतिकाऽऽर्थिकादिषु सर्वेष्वपि क्षेत्रेषु अयं दोषः संक्रान्तो वर्तते। शासनं विचारयति यदन्यवैदेशिकराष्ट्रवत् अत्रापि सर्वेषां पदार्थानां राष्ट्रीकरणमेव प्रजाकल्याणस्य बीजम्। अत एव तेन बैंक-बीमा-प्रस्तरेन्धन (पत्थर-कोयला)-प्रभृतीनामपि राष्ट्रीकरणं कृतम्। गोधूमस्य राष्ट्रीकरणमपि परिस्थितिविशेषानुगमपि अस्या एव नीतेः पथानुगामी। अचिराद्भावि तण्डुलराष्ट्रीकरणमपि तथैव। किं बहुना, शिक्षाया अपि राष्ट्रीकरणं शासनस्य चिकीर्षितम्। किन्तु येषामपि अद्यावधि राष्ट्रीकरणमभवत्, तेषु राष्ट्रीकरणपूर्वतः कियती प्रगतिरभूदिति विचार्यमाणे सुस्पष्टं पूर्वस्थितितोऽपि ह्रास एव प्रतिफलति। सत्येवमयं राष्ट्रीकरणव्यामोहोऽस्माकं देशस्य कृते महानभिशापो यथा न भवेत्, तथैव सर्वविवेकिभिः प्रयतनीयम्। कस्यचन वस्तुनः राष्ट्रीकरणे कोऽपि तत्सञ्चालका वयमेव। शासनस्य दण्डोऽस्माकमुपरि तेन वर्तेत इति सत्यम्, परं ततो रक्षणमपि कर्तुं नैके उपाया आविष्कृताः स्युः, आविष्क्रियन्ते चापि। व्यक्तेरभिक्रमस्तु सर्वथा विलोपं गच्छन्ति। तस्य दायित्वमपि लोकतन्त्रनाम्ना तस्मिन् बलात् स्थापयन्तु। परं मनसि तस्य तन्मनागपि पदं न धत्ते! अतः भारतस्य कृते सर्वथाऽनिवार्येषु कतिपयेष्वेव धूमशकटि-पत्रालय-सेना-मूलद्रव्यनिध्यादिषु राष्ट्रीकरणस्य समर्थनार्हत्वेऽपि सामान्यतोऽधिकाधिकविषयेषु विकेन्द्रीकरणमेव वरदानायितं भवेदित्यस्माकं निर्विचिकित्सितं मतम्। विकेन्द्रीकरणेन प्रत्येकस्मिन् तत्तद्विषयकमुत्तरदायित्वं प्रत्यक्षतः समायाति। तस्य निर्वाहे च प्रमादे कृते निकटवर्ती तत्सम्बन्धी एव तनुशासनं कर्तुं प्रभवति। कश्चिदपि स्वीयं प्रमादमन्यस्मिन् समारोपयितुं सहसा न प्रभवति। विषयोऽयं स्वतन्त्रविवेचनमपेक्षते। तथापि समासतोऽत्र इदमेव वक्तव्यं यद् भारतशासनेन राष्ट्रीकरणस्य व्यामोहो यथाशीघ्रमशेषतः परित्याज्यः, विकेन्द्रीकरणपथि च उत्तरोत्तरं प्रगताः क्रमा विधेयाः। नान्दीरूपेण च अन्नस्य अधिग्रहणं सर्वप्रथमं सर्वथा त्याज्यम्। अन्यथाऽस्य दुष्परिणामो न केवलं शासकैरेव समुपभुज्येत, भारतीया प्रजा अपि तादृशं दुष्परिणामं भोक्ष्यति, येन तदीयस्वातन्त्र्यमपि सङ्कटापन्नं स्यात्।

देववाणी-गौरवम्

——स्वर्गीयाः म० म० हरनारायण गोस्वामिपादाः——

१. पूर्वं दैवी सृष्टिः प्रतीयते स्वरविभागेन।
पश्चाद् व्यञ्जनवर्णैं - लौकिकसृष्ट्युद्भवो भाति॥

२. स्वरशब्दव्युत्पत्त्या व्यञ्जनशब्दस्य चार्थेन।
जीवात्मदेहयोः किं प्रतीयते नेह सम्बन्धः॥

३. त्यक्त्वा स्वरसाहाय्यं कथमपि न व्यञ्जनस्थितिर्भवति।
एवं हि जीवसत्तां विना न देहव्यवस्थितिः क्वापि॥

अस्माकमस्मिन् हितोपदेशे कश्चिदुच्येत यर्त्तहि ये तथा पापं समाचरन्ति, तेषां निरोधः कथं क्रियेत ? इति। किन्तु अयमपि समाधेयः प्रश्नः। अस्माकं शास्त्रकाराणामिदमपि मतं यत्प्रत्यक्षपापानां दण्डधरो राजा भवति, परमप्रत्यक्षपापानां दण्डनाय अथ **प्रच्छन्नपापानां शास्ता वैवस्वतो यमः** इत्यप्युक्तम्। अर्थात् यमापरपर्यायस्य धर्मराजस्य भयं दण्डभयादपि सविशेषं प्रभावकरं भवति। दौर्भाग्यात् स्वातन्त्र्यकालारम्भत एव क्रमशोऽस्माकं देशे बाह्यदण्डधराणामेव प्रेरणया अपरोक्षस्य दण्डधरस्य धर्मराजस्य भयं सुनियोजितं दूरीक्रियते नैकैर्धर्मसंस्कृतिविरुद्धैर्विधानैः तदेव सर्वमद्य एतादृशं भस्मासुरकल्पतां गतं यत् शासनमपि तस्य चपेटकायां समापतितमस्ति। शासनमद्यतनीयानां राष्ट्र-संस्कृति-समाजध्वंसकानां नैकेषां प्रमादानां परिमार्जनाय कामं विविधविधानायोजनादिकं करोतु, मूलतस्तन्नियन्त्रणं धर्म-परलोकेश्वरादिभावनासुदृढीकरणेनैव प्रभवितुं शक्नुयात्। अतः शासनेन एकत्र भारतीय-प्राचीननीत्यनुसारीणि विकेन्द्रीकरण-स्वावलम्बन-निराडम्बरतादीनि विधानानि अविलम्बं योजनापूर्वकं कार्यान्वितानि विधेयानि चेत्, अपरत्र भारतीयजनतासु व्यापकरूपेण अहिंसा-सत्यास्तेयादि - सर्वसामान्यधर्मभावनानां परलोकभावनानाम् ईश्वरभावनानाञ्च संक्रमणस्य पृथक् नियोजनं विधेयम्। राष्ट्रियचारित्र्यसंहारिका परिवार-नियोजना यदि भारतीयभावना-नियोजनायां परावर्तिता स्यात्तदा चारित्र्यरक्षणेन सदैव राष्ट्रस्य चारित्र्योन्नयनमपि नूनं भवेत्। समुन्नतचरित्रे राष्ट्रे अद्य प्रवर्तमाना जनसाधारण - जीवनहरण - विषया अन्नब्रह्म - विडम्बनादिसदृश्यः समस्याः कथमपि पदमादधातुं न शक्नुयुः। किमस्माकं राष्ट्रनायकास्ताटस्थ्येन प्रस्तोतितेऽस्मिन् स्वतन्त्रता - दिवसीये आत्म-समीक्षणे क्षणमवधास्यन्ति ?

४. सृष्टौ लये च हेतुर्वियतो बीजं हकार उद्दिष्टः ।
अत एव द्विरुपात्तः सूत्रेष्वस्यां हकारोऽयम् ॥

५. माहेश्वरेषु सूत्रेष्वस्ति जगत्सृष्टि - लय - रचना ।
सूक्ष्मदृशैव विपश्चित् कश्चित् पश्यति परिश्रमोपेतः ॥

६. बहुभिर्वैयाकरणैः स्वग्रन्थेषु क्वचित् प्रोक्तम् ।
इह रचनावैचित्र्यं यत्तन्नान्यासु भाषासु ॥

७. संयुक्ताक्षररचितं प्रथमत उच्चारणमन्यासु ।
वर्णानामिति चित्रं कथमाद्यास्ता विनिर्दिष्टाः ॥

८. प्रथमाक्षररचनातः पूर्वं नान्योऽस्ति वर्णोऽयम् ।
कथय कथं संयुक्तः प्रथमोच्चारणविधौ वर्णः ॥

९. दोषोऽयं सुरवाण्यां क्वचिदपि नैवास्ति शुद्धवर्णायाम् ।
अन्यासु वज्रलेपो दोषोऽयं वर्णमालासु ॥

१०. प्रारम्भ एव तासां दोषो यद्यस्ति वर्णमालायाः ।
कः साहसी तु तासामाद्यत्वं मन्यते लोके ॥

११. गैर्वाणी वाणीयं सृष्टेः पूर्वं स्वयंभूता ।
अत एव दोषविधुरा ब्रह्ममयीत्येव सिद्धान्तः ॥

१२. वैदेशिक - विदुषामपि निज - निज - भाषाग्रह - ग्रस्ते ।
गैर्वाणी - वाणीकृत - रचना चेतसि चमत्कृतिं तनुते ॥

१३. उच्चारणानुकूलो ध्वनिरपि यत्रास्ति वर्णानाम् ।
लिपिरपि तद्वच्छुद्धा त्रयमप्येतत् समं शुद्धम् ॥

१४. नैतत्त्रयमनुरूपं भाषास्वन्यासु दृश्यते साम्यम् ।
सर्वासु ध्वनिरन्यो लिपिरन्योच्चारणं चान्यत् ॥

१५. वेदान्त-न्याय-योगाः कपिलमुनिमतं ज्यौतिषं मन्त्रशास्त्रम्,
नीतिस्तन्त्रं चिकित्सा प्रवहणगमनं वास्तुविद्याऽथ शिल्पम् ।
वाणिज्यं गानविद्ये कृषि-गणित-कला युद्धविद्या स सर्वे
सन्त्यस्यामेव पद्ये क्वचिदपि नहि तेऽन्यासु भाषासु तस्मिन् ॥

●

वेदेषु गृहस्थाश्रमः

—श्री जयशङ्कर बहेचरलाल शुक्लः—

[कर्मकाण्डाध्यापकः—वटोदर-संस्कृत-महाविद्यालयस्य]

[आश्रमाश्चत्वारः । चतुर्ष्वपि आश्रमेषु गृहस्थाश्रमस्यैव श्रेष्ठत्वं शास्त्रेषु प्रतिपादितं विद्यते । गृहस्थाश्रमिणा कथं भाव्यम्, कथञ्चान्यैः सह वर्तितव्यम् ? गृहस्थेन जनतायामेव जनार्दनो द्रष्टव्यः । एवं जनसेवयैव जनार्दनस्य सेवा सिद्धा भविष्यति । गृहस्थाश्रमगौरवविषये वेदेषु किं किं विचारितमस्ति, सर्वमेतदस्मिन् लेखे प्रतिपाद्यते । —सम्पादकः]

मनुष्यस्य मनसि निम्नदर्शिताः सप्तेच्छाः सदा प्रवर्तन्ते—(१) दीर्घजीवनेच्छा, (२) कामेच्छा, (३) धनेच्छा, (४) मानेच्छा, (५) ज्ञानेच्छा, (६) न्यायेच्छा, (७) मोक्षेच्छा च। अस्मिन्विषये वेदेषु किं किं विचारितमस्ति, तत्प्रदर्श्यते ।

अथर्ववेदे गायत्रीमाहात्म्यं वर्णितम्—

स्तुता मया वरदा वेदमाता
प्रचोदयन्तां पावमानी द्विजानाम् ।
आयुः प्राणं प्रजां पशुं कीर्तिं द्रविणं
ब्रह्मवर्चसं मह्यं दत्त्वा व्रजत ब्रह्मलोकम् ॥
—(अथर्व० १९.१७.१)

द्विजान् पावयन्तीं प्रचोदयात्पदान्तां वेदमातरं भगवतीं गायत्रीं देवीमहं स्तौमि ; स्तुत्या प्रसन्ना सा मह्यं (१) आयुः, (२) प्राणम् (बलम्), (३) प्रजाम्, (४) पशुम्, (५) कीर्तिम्, (६) द्रविणम्, (७) ब्रह्मविद्याञ्च दत्त्वा मोक्षपदं यच्छतु। इत्थं ज्ञायते यन्मनुष्यस्य हृदीमाः सप्तेच्छाः स्वाभाविक्यो भवन्ति ।

अत्र प्रथमेच्छा दीर्घजीवनेच्छा । अस्मिन्विषये वेदे लिखितम्—

शतमिन्नु शरदो अन्ति देवा
यत्रानश्चक्रा जरसन्तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति
मा नो मध्यारीरिषतायुर्गन्तोः ॥
—(शु० य० २५.२२)

शतं वर्षाणि वयं जीवम । तथा—

पश्येम शरदः शतम् । जीवेम शरदः शतम् ।
शृणुयाम शरदः शतम् । प्रब्रवाम शरदः शतम् ।
अदीनाः स्याम शरदः शतम् । भूयश्च शरदः शतात् ।
—(शु० य० ३६.२४)

मनुजस्य द्वितीयेच्छा कामेच्छा । अत्र विषये वर्णनमुपलभ्यते यत्—

कामस्तदग्रे समवर्तत मनसो
रेतः प्रथमं यदासीत् ।
स कामकामेन बृहता स
योनी रायस्पोषं यजमानाय धेहि ॥
—(अथर्व० १९.५२.१)

काम एव मनसि बीजरूपेण वर्तते। हे काम! त्वयैव मम मनसि रतिसुखेच्छा विस्तारिता। अतो मह्यं धनं प्रयच्छ।

प्रियो देवानां भूयासं प्रियः प्रजानां भूयासम्।
प्रियः पशूनां भूयासं प्रियः समानानां भूयासम् ॥
—(अथर्व० १७.१.२)

अर्थादहं देवानां, प्रजानां पशूनां, सामाजिका-

नाञ्च प्रियो भूयासम् इत्येवं पुत्र-पौत्रादीनां पश्वादीनाञ्चेच्छा प्रदर्शिता ।

अतोऽग्रे तृतीया धनेच्छा । मानवस्य धनेच्छा कीदृशो वर्तते, तस्याः प्रतिपादनमेवं कृतं यत्—

एकपाद् भूयो द्विपदो विचक्रमे
द्विपात् त्रिपादमभ्येति पश्चात् ।
चतुष्पादेति द्विपदामभिस्वरे
सम्पश्यन् पङ्क्तीरुपतिष्ठमानः ॥
—(ऋ० १०.११७.८)

अर्थात् मानवा धनवतो जनान् दृष्ट्वा परस्परं स्पर्धन्ते । अन्येभ्यश्च धनिकेभ्योऽधिकाधिकधनप्राप्त्यर्थञ्च प्रतयन्ते ।

धनेच्छापरिपूर्त्यनन्तरं मनुजस्य हृदि मानेच्छा उत्पद्यते । चतुर्थी मानेच्छा वेदेष्वित्थं वर्णिता—

यथा सूर्यो अतिभाति यथास्मिन् तेज आहितम् ।
एवा मे वरणो मणिः कीर्तिं भूतिं नियच्छतु ॥
तेजसा मा समुक्षतु यशसा समनक्तु मा ॥
—(अथर्व० १०.३.१७)

यथा सूर्यो यशसा तेजसा च विभाति तथा अहमपि तेजसा यशसा च युतो भवेयमिति मानप्राप्त्यर्थं प्रार्थनाऽत्र कृता ।

अतोऽग्रे पञ्चमी ज्ञानेच्छा । तस्या वर्णनमपीत्थं कृतं विद्यते—

यां मेधां देवगणाः पितरश्चोपासते ।
तया मामद्य मेधयाऽग्ने मेधाविनं कुरु ॥
मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे ॥
—(शु० य० ३२.१४-१५) अथर्ववेदेऽप्युक्तम्—

मनसे चेतसे धिय आकूतय उत चित्तये ।
मत्यै श्रुताय चक्षसे विधेम हविषा वयम् ॥
—(अथर्व० ६.४१.१)

अर्थात् मनोऽन्तःकरण-बुद्धिविचारज्ञानमतिश्रवणदृष्ट्यादिशक्तीनामुन्नत्यै वयं सर्वे यज्ञकर्म कुर्म इति ।

षष्ठ न्यायेच्छा । ज्ञानेच्छानन्तरं वेदेषु न्यायेच्छावर्णनमप्युपलक्ष्यते । यथा—

देहि मे ददामि ते नि मे धेहि नि ते दधे ।
निहारं च हरासि मे निहारं नि हराणि ते ॥
—(शु० य० ३.५०)

त्वं मह्यं यच्छ, तुभ्यञ्चाहं यच्छानि । इदमहं गृह्णामि, त्वं चेदं गृहाण । अर्थादावयोर्व्यवहारो न्याययुक्तो भवतु । कीदृशोऽयं रमणीयो न्यायादर्शः प्रदर्शितः !

अतोऽग्रे सप्तमी मोक्षेच्छा । तस्याश्च वर्णनमित्थं दृष्टिगोचरं भवति—

वेदाहमेतं पुरुषं महान्त-
मादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाऽतिमृत्युमेति
नान्यः पन्था विद्यतेऽयनाय ॥
—(शु० य० ३१.१८)

मनुजस्तं परमात्मानं ज्ञात्वैवामृतत्वं प्राप्नोति । अयनाय नान्यः कश्चन मार्गो विद्यते । अन्यच्च—

यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ।
कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधि ॥
—(ऋ० ९.११३.११)

हे परमात्मन् यत्र आनन्द एवास्ति, यत्र सर्वाः कामनाः परिपूर्णा भवन्ति तन्मोक्षाख्यं स्थानं प्रति मां नय ।

इत्थं मनुष्यस्य स्वाभाविकेच्छाप्रदर्शका नैके मन्त्रा वेदेषु वर्तन्ते । किन्त्विमा इच्छा मनुजो विना गृहस्थाश्रमं प्राप्तुं न शक्नोति । अतो वेदेषु गृहस्थाश्रमवर्णनमधिकृत्य ये ये विचाराः प्रदर्शिताः, तान्प्रति दृष्टिपातः क्रियते ।

गृहस्थाश्रमे तिष्ठता नरेण प्रतिदिनं चिन्तनीयं यदहं कीदृशं कर्म कुर्याम्, येन पुत्रपौत्रकलत्रैः स्वदेश-

वासिभिरन्यैश्च जनैः सह सुखी भवेयम्। अत्र वेदा अस्मान् किमुपदिशन्ति तदेव विचार्यते।

वेदाश्चत्वारः—ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति। तत्र वेदेषु गृहस्थाश्रमस्य पर्याप्तं वर्णनमुपलभ्यते। तत्र गृहस्थेन कथं भाव्यं तद्विषये लिखितं यत्—

इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम्।
क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे॥
—(ऋ० १०.८५.४२)

अर्थात् न केनचित्सह गृहस्थेन विरोधः कार्यः। गृहस्थाश्रम एव स्थित्वा पूर्णायुः प्रापणीयम्। पुत्रैः पौत्रैश्च सह गृह एवोषित्वा आदर्शरूपं जीवनं यापयितव्यम्।

पति-पत्न्योः पारस्परिकः सम्बन्ध ईदृग्वर्णितः—

समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ।
सम्मातरिश्वा सन्धाता समुदेष्ट्री दधातु नौ॥
—(ऋ० १०.८५.४७)

विश्वस्य समस्ताः विद्वांसश्च नौ जानन्तु। आवयोर्हृदयानि जलस्येव शान्तानि भवन्तु। आवयोः प्राणशक्ति-धारणाशक्ति-रुपदेशशक्तिश्च आवयोः कल्याणकर्त्र्यो भवन्तु। वैदिकगृहेषु देवर्षिपितृणां तृप्तये घृतदुग्धफलानां विशालमायोजनं दृग्गोचरं भवति—

ऊर्जं वहन्तीरमृतं घृतम्पयः कीलालं परिस्रुतम्।
स्वधास्थ तर्पयत मे पितॄन्॥
—(शु० य० २.३४)

हे स्वधास्थ पितरः, अत्रास्माकं गृहेषु बलकारकस्य जलस्य, पुष्टिकारकस्य दुग्धस्य, रसयुक्तस्य तुष्टिकारकस्य अन्नस्य पक्वफलानाञ्च धारा वहन्ति। भवन्तस्तृप्यन्तु। अतोऽधिकं वैदिकगृहस्थाः स्वेष्टमित्राण्यतिथीन् क्षुधार्तांश्च जनान् स्वाद्वन्नेन जलेन सेवया च कया रीत्या आह्वयन्ति तदपि पश्येम—

ऊर्जं बिभ्रद् वसुवनिः सुमेधा
अघोरेण चक्षुषा मित्रियेण।
गृहानैमि सुमना वन्दमानो
रमध्वं मा बिभीतमत्॥
—(अथर्वं० ७.६० १)

हे वीर्यधननसम्पत्तिमेधासुहृद्भावयुक्ताः शुद्धान्तःकरणयुता जनाः! प्रेमपूर्वकमागच्छन्त्वत्र। भवन्तोऽलङ्कुर्वन्तु चास्माकं गृहाणि, मा बिभीत।

उपहूता भूरिधनाः सखायः स्वादु संमुदः।
अक्षुध्या अतृष्यास्त गृहा मा स्मद बिभीतन॥
—(अथर्वं० ७.६०.४)

हे मित्राणि, इमानि गृहाणि भूरिधनानि क्षुत्तृड्हराणि च सन्ति। अत आगच्छन्तु, मा बिभीत।

उपहूता इह गाव उपहूता अजावयः।
अथो अन्नस्य कीलाल उपहूतो गृहेषु नः॥
सूनृतावन्तः सुभगा इरावन्तो हसामुदाः।
अतृष्या अक्षुध्यास्त गृहा मास्मद् बिभीतन॥
—(अथर्वं० ७.६०.५-६)

भो मित्राणि! अस्माकं गृहाणि गोभिरजाभिर्विविधरसयुक्तैरन्नैश्च परिपूर्णानि सन्ति। एषु गृहेषु सत्यवादिन; पुण्यवन्तो धनादियुक्ताः क्षुत्तृड्रहिताश्च नरा निवसन्ति, अयत आगच्छन्तु, मा बिभीत।

इहैव स्त मानु गात विश्वारूपाणि पुष्यत।
एष्यामि भद्रेणा सह भूयांसो भवता मया॥
—(अथर्वं० ७.६०.७)

श्रान्ताः पथिकाः य इमानि गृहाणि स्मरन्ति, तानीमानि गृहाणि स्वसमीपमाह्वयन्ति। अतो मा कुत्रचिद् गच्छत, अत्रैव वासं कुरुत। इमानि भवनान्यनेकैः प्रकारैर्जनान् पुष्यन्ति। अतो वयमप्यत्रैव निवसामः। एवमुपर्युक्तेषु मन्त्रेषु गृहस्थाश्रमस्य कीदृग्भव्यं वर्णनं कृतमस्तीत्यस्य समासतः परिचय उपन्यस्तः।

अहो नव्य-भारत-दशा !

श्री बटुकनाथ भट्टाचार्यः

१. आयातः समयो यदास्तिक-जनाः कायेन वाचा धिया पूर्वैः संस्तुत-सद्गुणान् शम-दया-त्यागानहिंसां क्षमाम्।
नित्यं स्वे चरितेऽनुसृत्य विशदं कुर्युः प्रमाणं तथा धर्मं लोकहितक्षमं च नियतं प्रेम्णो जयं शाश्वतम्॥
२. देवानां प्रथिते प्रियेऽत्र निलये तन्मन्दिरैरास्तृते देशे भारतवर्षनाममहिते प्राज्ञैः श्रिते तापसैः।
नित्यं भागवती कथा श्रुति-स्मृति-पुराणावृत्ति-संनादिते देवो विप्र-सुरावतार-पुरुषेषूज्जृम्भतेऽहो कथम्॥
३. प्रश्नोऽयं मुखरीभवत्यनुदिनं प्रोन्मथ्य चेतः सतां पाश्चात्त्यानुचिकीर्षया हतधियो हिंसापरा मानवाः।
अध्यात्मे कुशलां मतिं जनुभुवि श्रद्धारतिं विस्मृता जाता विप्लववादिनः कथमहो चित्रं किमस्मात् परम्॥
४. काश्मीरात् सेतुबन्धं मणिपुरमभितो द्वारकायाः प्रशस्ते देशे नानाप्रथानां सहवसतिमथो भूयसः सम्प्रदायान्।
स्मारं स्मारमपूर्व-विश्वगुरुतां द्वीपस्य प्रत्नां कथां विद्वांसो मिलिता महाजनगृहेऽत्रालोचयन्त्वञ्जसा॥
५. ब्रह्मण्ये स्थिरलक्ष्यतामपि तदधिगमेऽश्रान्तयत्नां तपस्यां संरक्षायां प्रचेष्टामतुलितविभवस्यार्यसंस्कारराशेः।
धन्यानां चेह पुंसां प्रतियुगमभितो जातिवर्णानपेक्षं निर्व्याजं विमृशन्तु संहतिकरीं लोकस्य सद्पद्धतिम्॥
६. वर्तेते मनुजेषु संहतिकरे वृत्ती द्वे आकल्पतो निष्टानिष्टसमादृते कृतिचये तत्त्वे परोक्षे तथा।
काले नित्यचलेऽग्रगामिनि सदा नानापदामास्पदे सामञ्जस्यविधिः समाजविधृतौ प्राज्ञैर्व्यवस्थापितः॥
७. राष्ट्रं धर्मानपेक्षं चरितमननयोः श्लाघ्यते पारतन्त्र्यं मर्यादा या समाजस्थितिमिह विदधे प्रत्यहं हीयते सा।
सृष्टिस्थित्यन्तकारी विभुरपि गणनामेति न स्वे प्रपञ्चे धत्ते नाम्नैव हन्त प्रथितपरिचयं भारतं वर्षमेतत्॥
८. किं श्रेयःसरणिश्च का कलिहते कालेऽधुना कोविदाः को वा लोकहिताय शास्ति मनुजान् धर्मस्य तत्त्वं स्थिरम्।
श्रद्धासङ्कटकीर्ण-लोकनिवहेऽप्यत्याहितोपद्रुते श्रद्धा सा व्यपयातु लोकहितकृद्धर्मे ध्रुवास्तां मतिः॥
९. प्रतीची - पन्थानं दिशति मनुजा भूमिवलये प्रयान्त्यन्धप्रायास्तमनु पुरुषार्थे हतधियः।
स्मरन्तः पूर्वेषां सुचरितविधौ लोकगुरुतां सतां मार्गं त्वार्या निशितमपि नैव प्रजहति॥
१०. ब्रह्मज्ञैरथ धर्मतत्त्वनिपुणे राजर्षिभिः कल्पितं राष्ट्रं विश्वजिदश्वमेध-मखकृद्-भूपैः पुरा भारतम्।
स्वातन्त्र्यं समवाप्य साम्प्रतमहो धर्मानपेक्षं स्थितं भूयः स्वं महिमानमेतु भगवान् धर्मस्तपोयोगतः॥
११. प्रेयोऽन्वेषिणि मानवे कलियुगे नित्यं विरोधाग्रहे आदर्शं श्रुतशीलसान्त्वतपसां सन्धारयन्तोऽधुना।
पुण्यं कर्मसु वाचि सान्त्वमनिशं ध्येयञ्च तत्त्वं परं तेषां ज्ञानमयं तपः शुभकृते लोकस्थितौ कल्पते॥
१२. मर्यादा मुनिभिः समाजविधृतौ श्रेयस्करी निर्मिता वैवाहो नियमस्तथा नवनवैरुल्लङ्घ्यते शासनैः।
माता गौर्नहि लोकपालनिवहै-र्धर्मानपेक्षाधिया संरक्ष्येति च गण्यतेऽहह विधे केयं दशोपस्थिता॥
१३. ग्रहर्क्षैराकीर्णं निरवधिनभो यन्त्रनिपुणा विमानैर्गाहन्ते दिवि परमधामानधिगताः।
न सन्तं मन्यन्ते तमखिलनिधानं तु यमितो हृदिस्थं वीक्षन्ते भजनशरणाः कीर्तनरताः॥
१४. सर्वं वस्तु चराचरे चलमिहाक्षय्यस्तु धर्मः परो मूलं तस्य महाद्रुमस्य भगवान् कृष्णोऽखिलात्मा स्वयम्।
ब्रह्माप्यक्षरमद्वयं गुणकलातीतं वचोऽगोचरं विप्रा विश्वहिताशयाः शमपरा विद्यैकवित्तास्तथा॥
१५. जीवन् मूलफलेन चीरवसनः पर्णोटजस्थो वशी विश्वामित्रमपास्तदर्पमकरोद् यः साधना-सम्पदा।
विश्वे मित्रधियाऽनुवर्तनपरा वृन्तस्य तस्याधुना नानोपप्लवसङ्कटे शुभमतिं वर्षन्तु ते भूसुराः॥

राष्ट्रियजीवने संस्कृतभाषाया महत्त्वम्

— श्री अशोकचन्द्र शास्त्री —

[शोधच्छात्रः—वाराणसेय-संस्कृत-विश्वविद्यालयस्य]

'संस्कृतशिक्षा'शब्दोऽयमर्थद्वयं प्रकाशयति—प्रथमः 'संस्कृतभाषाशिक्षा', द्वितीयश्च 'उत्तमा शिक्षा'। तत्र विचारणीयं यत्काचिदपि शिक्षा कस्या अपि अपि भाषाया माध्यमेनैव भवितुमर्हति। सत्येवं यदि कयाचन अन्यया भाषया उत्तमा शिक्षा लब्धुं शक्यते चेत्, संस्कृतभाषयैव उत्तमशिक्षाया आग्रहः कथमिति प्रश्नः पुरः परिस्फुरति। अस्य उत्तरान्वेषणेन ज्ञायते यत् जगतः सर्वासां भाषाणां प्राचीनतमा संस्कृतभाषैव। अत एव उत्तमा शिक्षा अप्यस्यामेव सर्वप्राचीना सुसमृद्धा च। भाषाविज्ञानदृष्टया संस्कृतभाषैव पूर्णा वैज्ञानिकीति सिद्धा। भाषायामस्यां वयं जगतः सर्वानपि ध्वनीन् व्यक्तीकर्तुं पारयामः। भाषाविज्ञाननुसन्धानेभ्य इदमपि जायते यत्संसारस्य सर्वाः भाषाः संस्कृतादेव निस्सृताः। भाषाविज्ञानपण्डितवर्येण डा० मैक्समूलरेण स्वकीये 'कम्परेटिव स्टडी आफ लैंग्वेजेज' (Comparative Study of languages) इति नामधेये ग्रन्थे उक्तम् :

The sanskrit language is the mother of the all languages of the world.

अर्थात् 'संस्कृतभाषा संसारस्यास्य सर्वासां भाषाणां जननी अस्ती'ति। सर्वतः प्राचीनाः ग्रन्थाः सन्त्यस्माकं चत्वारो वेदाः। अस्यामवस्थायामिदं स्पष्टं यदस्माभिरनितरसाधारणी संस्कृता शिक्षा संस्कृतभाषयैव लब्धुं शक्यते।

राष्ट्रियैकतादृष्ट्या संस्कृतशिक्षाया उपयोगिता :

राष्ट्रियैकतायै भारतवर्षे मुख्यरूपेण संस्कृतभाषैव माध्यमस्वरूपा भवितुमर्हति। यतो हि विभिन्नेषु प्रान्तेषु विभिन्नासु भाषासु सतीष्वपि संस्कृतभाषाया अद्वितीयं स्थानमनादिकालादेव तत्र निर्मितमस्ति। धर्मशास्त्र-दर्शन-वेद-शिल्प-सङ्गीताऽऽयुर्वेद-ज्योतिष-साहित्य-तन्त्रादिविषयाणामध्ययनार्थं संस्कृतभाषाया एव माध्यमः स्वीक्रियते। काचिदपि लिपिः स्याद्, परं भाषा संस्कृतैव भवति। यतो हि भाषायामस्यामेतावन्त्यः सामग्र्यः सन्ति यदस्याः प्रतिनिधित्वं काचिदपि भाषा कर्तुं नैव प्रभवति।

वेदेषु प्रथमः 'राष्ट्र'शब्दस्य प्रयोगो दृश्यते। किन्नाम राष्ट्रत्वमिति जिज्ञासायां वयं वक्तुं पारयामो यत् प्राकृतिकभागेभ्यः संस्कृतिभ्यश्च अपरेभ्यो देशेभ्यो भिन्नो देशो राष्ट्रमिति।' अनया दृष्ट्या भारतवर्षमेकं राष्ट्रमस्ति। तदुत्तरस्यां दिशि हिमालयात्, दक्षिणस्यां प्राच्यां पश्चिमायाञ्च दिशि समुद्रेभ्यः परिवेष्टितमस्ति। अस्मिश्च वैदिकसंस्कृतेः मूलधारा नानारूपेषु विस्तृता। क्वचित् सा वैष्णवानां, क्वचित् शैवानां क्वचिच्च जैनधर्मावलम्बिनानां बौद्धानाञ्च रूपेष्ववलोक्यते। देशेऽस्मिन् यावन्त्यपि विविधानि मतमतान्तराणि सन्ति तेषु सर्वेष्वपि वैदिकसंस्कृतेर्धारा यस्मिन् कस्मिंश्चिदपि रूपेऽन्तर्निहिताऽस्ति। दक्षिणभारते यत्र द्राविडभाषाः उच्यन्ते, तत्राऽपि सर्वे संस्काराः धार्मिकाणि कार्याणि च संस्कृतभाषाया एव माध्यमेन क्रियन्ते। अत एवेदं स्पष्टं यद्राष्ट्रियैकतायै संस्कृतभाषाया माध्यमेनैव संस्कृत-शिक्षा उपयोगिनी भवितुमर्हति। संस्कृतभाषाया उत्तमेन प्रचारेण यदा संस्कृता शिक्षा सम्पूर्णेऽपि राष्ट्रे विस्तृता भविष्यति, तदा लोकेषु विचाराणामैक्यं सम्पत्स्यते। यदा सम्पूर्णेऽपि राष्ट्रे विचाराणामैक्यं भविष्यति तदा

सम्पूर्णमपि राष्ट्रमेतेषां वेदमन्त्राणां सस्वरं गानं करिष्यति—

सं समिद्युवसे वर्षन्नग्ने विश्वान्यर्य आ।
ईडस्पदे समिध्यसे स नो वसून्याभर ॥ १ ॥
सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सञ्जानाना उपासते ॥ २ ॥
समानो मन्त्रः समितिः समानी
समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमभिमन्त्रये वः
समानेन वो हविषा जुहोमि ॥ ३ ॥
समानो व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति ॥ ४ ॥

(ऋग्वेदे: १०मण्डले १९१ सूक्तम्)

हे समस्तसुखानां वृष्टिकारक ज्ञानस्वरूप परमात्मन्! भवानेव संसारस्य सर्वानपि पदार्थान् यथाक्रमेण परस्परं योजयति, खण्डयति च (जगतः सृष्टिकर्ता, पालकः, संहारकश्चाऽस्ति)। संसारेऽस्मिन् भवान् स्वमहिम्ना प्रकाशितोऽस्ति। भवान् सर्वप्रकारेण अस्मान् सुखमैश्वर्यञ्च ददातु ॥ १ ॥

भोः भोः सुखैश्वर्याभिलाषिणो मनुष्याः! युष्माभिरेकस्मिन्नेव सुनिश्चिते मार्गे परस्परं मिलित्वैव गन्तव्यम्। परस्परं प्रेम्णा वक्तव्यम्। युष्माकं मनांसि परस्परं समानानि भूत्वा सहयोगेन ज्ञानावाप्तिङ्कुर्वन्ति। यथा श्रेष्ठा विद्वांसश्च पुरुषाः परस्परसहयोगेन ज्ञानं लब्ध्वा परमैश्वर्यानन्दावाप्नुतः, तथैव युष्माभिरपि कर्तव्यम् ॥ २ ॥

भोः भोः सुखैश्वर्येच्छुका मनुष्याः! युष्माकं विचाराः सभाः समितयश्च समाना भवन्तु, चित्तञ्च समानं भवेत्। ममोपदेशस्वरूपं वेदज्ञानं युष्माकं कृते समानरूपेणैवाऽस्ति। अहं युष्मभ्यं जीवनसामग्रीं समानरूपेण ददामि ॥ ३ ॥

भोः भोः सुखैश्वर्याभिलाषिणो मनुष्याः! युष्माकं हृदयानि सङ्कल्पाश्च समानानि भवेयुः, मनश्च परस्परं समानं भवेत् येन युष्मभ्यं परस्परसहयोगद्वारा ऐश्वर्यानन्दावाप्तिर्भवितुं शक्येत ॥ ४ ॥

चित्तसंस्कारदृष्ट्या

संस्कृतशिक्षाया उपयोगिता :

चित्तसंस्कारसाधनाय अस्माभिरिदं ज्ञातव्यं यत् किन्नाम चित्तत्वमिति। समस्त-प्राणिनामभ्यन्तरे अन्तःकरणचतुष्टयं (आभ्यन्तरसाधनचतुष्टयम्) भवति। यथा पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि चास्माकं दश बाह्यसाधनानि सन्ति, तथैवाभ्यन्तराण्यपि साधनानि यैर्जीवः स्वीयसमस्तं जीवनव्यापारं सञ्चालयति। तानि साधनानि त्विमानि—(१) मनः, (२) बुद्धिः, (३) चित्तम्, (४) अहङ्कारश्चेति।

एषु चतुर्षु चित्तस्य संस्कारः संस्कृतात् कथं भविष्यतीत्यत्र विचारणीयम्। यदि स्थूलरूपेण विचार्येत चेदेतत् कथयितुं शक्यते यदन्तःकरणशुद्ध्यर्थं संस्कृतशिक्षया केन प्रकारेण साहाय्यं मिलिष्यतीति।

विषयेऽस्मिन् संस्कृतभाषायामनन्तसामग्रीपरिपूर्णाः कोषा वर्तन्ते। यदि कोऽपि जिज्ञासुरन्तःकरणशुद्ध्यर्थं तेषां प्रयोगङ्कर्तुमिच्छेत् तर्ह्यनन्तवर्षाणि प्रयुज्यमानेष्वपि न कदापि तेषां समाप्तिर्भवेत्। एतदर्थं संस्कृतभाषायां वेदाः, ब्राह्मणग्रन्थाः, दर्शनानि, उपनिषदः, स्मृतयः नीतिशास्त्रेतिहास-कथासाहित्यादयः सर्वे ग्रन्थाः नानासंस्काररत्नैः परिपूर्णाः सन्ति। महर्षिपतञ्जलिविरचितेन योगदर्शनेन वयं चित्तसंस्काराय योगशिक्षां प्राप्नुयामः। अधोलिखिते श्लोके योगेन चित्तस्य शुद्धेः संकेतः प्राप्नोति—

योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत्तं प्रवरं मुनीनां
पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥

मनुस्मृतावपि भगवता मनुना उक्तम्—

अद्भिर्गात्राणि शुद्ध्यन्ति मनः सत्येन शुद्ध्यति ।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति ॥

अर्थात् जलेन शरीरस्य शुद्धिः, मनसश्चः सत्येन शुद्धिर्भवति । अथ च आत्मा विद्यातपोभ्याम्, बुद्धिश्च ज्ञानेन संस्कृता भवति ।

अधुनाऽस्माभिर्विचारणीयं यत् किन्नाम विद्यात्वम्, किन्नाम च तपो याभ्यां चित्तस्य संस्कारो भवति ? प्रथमं वयं विद्याविषयमधिकृत्य विचारयामः ।

विद्या—आपृथिव्या ईश्वरपर्यन्तानां पदार्थानां ज्ञानं यया भवति, सा विद्या इति कथ्यते ।

तपः—कर्तव्यपालने समागतानां कष्टानां सहनकरणमेव तप इति ।

विद्यायाः क्षेत्रे चतुर्दश विद्याः, चतुष्षष्टिकलाः, अनन्तशिल्पक्रियाश्च यान्ति । तपस्याक्षेत्रे नानाप्रकाराणां दैहिक - दैविक - भौतिककष्टानां सहनकरणम्, ब्रह्मचर्यपालनम्, वेदाध्ययनादिकञ्चानेके कर्तव्यविशेषाः समायान्ति । अधुनेदं स्पष्टं यत् विद्यायाः प्रचुरसामग्र्यः संस्कृतभाषायां सन्ति । समस्ता सत्यविद्याः कलाश्च वेदेभ्य एव निःसृताः । न्याय-राजनीति-धर्मशास्त्र-ज्यौतिषशास्त्र-यन्त्रकला-भूगर्भ - पश्वायुर्वेद-वृक्षायुर्वेद-मनुष्यायुर्वेदाद्याः सर्वा विद्याः कलाश्च संस्कृतभाषायां वर्तन्ते । ताभिश्च उत्तमप्रकारेण चित्तसंस्कारो भवितुमर्हति ।

विश्वबन्धुत्वदृष्ट्या संस्कृतशिक्षाया उपयोगिता :

संसारेऽस्मिन् सर्वत्र विषमता विस्तृताऽस्ति । क्वचिद् वर्णभेदः, क्वचिज्जातिभेदः क्वचिद्वा राष्ट्रभेदोऽस्ति । अस्मादेव कारणात् सर्वत्र भीषणसङ्ग्रामो भवति । समये समये अनेके महात्मानः पृथिव्यां जन्म गृहीत्वा अस्याः विषमतायाः दूरीकरणाय समुद्यता बभूवुः, परन्त्वद्यावधि न सा दूरीभूता दृश्यते ।

वेदा अस्मभ्यं विश्वबन्धुत्वस्य विशुद्धां शिक्षां ददति । पश्यत, किमुक्तम् ऋग्वेदे—

अज्येष्ठासोऽकनिष्ठास एते
सम्भ्रातरो वावृधुः सौभगाय ।
युवा पिता स्वपा रुद्र एषा
सुदुघा पृश्निः सुदिना मरुद्भ्यः ॥

(ऋग्वेदे ५.६०.५)

अर्थात् संसारेऽस्मिन् कोऽपि ज्येष्ठः कनिष्ठो वा नाऽस्ति, सर्व एव मनुष्याः मिलित्वा सुखपूर्वकं जीवनयापनस्य यत्नङ्कुर्वन्तु । सर्वेषां मनुष्याणां परमेश्वरः पिता प्रकृतिश्चास्ति माता । ऋग्वेदे मानवमात्रस्य-अमृतपुत्रत्वमुक्तम्—

शृण्वन्तु सर्वे अमृतस्य पुत्राः ।

(ऋग्वेदे १०.१३.१)

अथ च—

मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा ।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ॥

(अथर्ववेदे)

अर्थात् भ्रातरः भ्रातृभिः सह द्वेषं न कुर्युः, भगिन्यश्च भगिनीभिः सह द्वेषन्न कुर्युः ; अथ च सर्वैरपि सव्रता अर्थात् समानव्रतशालिभिर्भूत्वा कल्याणकारिणी वाणी-वक्तव्या ।

संस्कृतवाङ्मये विश्वबन्धुत्वविषये प्रचुरमात्रायां सन्ति सामग्र्यः । तदुक्तं केनचिदाभाणकेन—

अयन्निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

वेदेषु सम्पूर्णाऽपि पृथ्वी 'माता' इत्युक्ताऽस्ति । ये जनाः केवलं स्वीयजन्मस्थानमेव मातृभूमिं मत्वा तामाराधयन्ति, अन्यांश्च भूभागान् आत्मनो भिन्नान् मन्यन्ते, ते न सन्ति मातृभूमेर्वास्तविकोपासकाः । पारस्परिका कलहा अस्या एव दुर्भावनायाः कारणानि भवन्ति । यदि विश्वस्य जनता सम्पूर्णामपि पृथिवीं

मातरं मत्वा परस्पर-भ्रातृभावं समाचरेत् तदा न केवलं भारतवर्षस्य, अपितु समस्तस्याऽपि विश्वस्य कल्याणं भवितुमर्हति। तदुक्तं वेदे—

जनं बिभ्रती बहुधा विवाचसं
नाना धर्माणं पृथिवीं यथौकसम्।
सहस्रं धारा द्रविणस्य मे दुहां
ध्रुवेव धेनुरनपस्फुरन्ती॥
यत्ते मध्यं पृथिवी यच्च नभ्यं
यास्त ऊर्जस्तन्वः सम्बभूवुः।
तासु नो धेह्यभि नः पवस्व
माता भूमिः पुत्रोऽहं पृथिव्याः॥
(अथर्ववेदे १२.१.१०-१४)

अर्थात् विविधभाषाणां वक्तारः, नानाधर्माणां पालकाः ये जनसमूहास्तान् देशानुसारेण निवासस्थानानुसारेण वा भिन्नभिन्नप्रकारैः परिपालयन्ती पृथ्वीमाता गोवत् निश्चला भूत्वा धनस्यैश्वर्यस्य च सहस्राः धाराः ददातु।

हे मातृभूमे! यस्ते मध्यभागोऽस्ति, यश्च ते नाभिभागोऽस्ति, तथा येऽन्नादिबलकारकाः पदार्थास्तव शरीरादुत्पद्यन्ते तेभ्यस्त्वमस्मान् प्रतिष्ठितं पवित्रञ्च कुरु। सर्वेषामुत्पादकस्वरूपत्वात्। त्वमस्माकं माताऽसि, वयञ्च समस्तव पुत्राः। समस्तरसानां प्रदाता मेघः सर्वेषां पिताऽस्ति, सोऽप्यस्मान् पालयेदिति।

एतेषु विश्वबन्धुत्वदृष्ट्या सम्पूर्णाऽपि पृथिवी मातृरूपेण समाराधिताऽस्ति। अनेन प्रकारेण संस्कृतवाङ्मयस्य सारभूताया विश्वबन्धुत्वबोधिकाया अस्या सूक्त्याः समुल्लेखमुचितं मत्वेह गीयते—

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्॥

भाषासंस्कारदृष्ट्या

संस्कृतशिक्षाया उपयोगिता :

भाषा मानवसमाजस्य विचाराणां भावनानाञ्च व्यक्तीकरणार्थमस्ति परमं साधनम्। यदि भाषा पूर्णरूपेण सुसंस्कृता स्यात्, तर्हि तया वयं स्वीयविचारान् भावनाश्च पूर्णरूपेण सम्यक्तया च व्यञ्जयितुं पारयामः। अनया दृष्ट्या संस्कृतभाषायाः समता विश्वस्मिन् संसारे काचिदपि भाषा कर्तुन्नैव प्रभवति।

कस्याश्चिदपि भाषाया वैशिष्ट्यमस्मिन् तथ्ये निर्भरमस्ति यत्तस्यां ध्वनीनां सूक्ष्मतमाया ऐकिक्याः कियद् ग्रहणसामर्थ्यमस्ति? संस्कृतभाषां परित्यज्य संसारेऽस्मिन् नैतादृशी काऽपि भाषाऽस्ति यस्यां ध्वनीनां विशुद्धाया ऐकिक्याः ग्रहणसामर्थ्यं भवेत्। संस्कृतभाषायां यावन्तोऽपि वर्णाः सन्ति ते सर्वेऽपि सम्भावितानां ध्वनीनामैकिक्यः। अथ च तैः सर्वासामपि ध्वनीनां ग्रहणं भवितुमर्हति। उदाहरणार्थमिह ते निर्दिश्यन्ते—

स्वराः—

अ आ इ ई उ ऊ ऋ ए ऐ ओ औ (अं अः)

व्यञ्जनानि—

कवर्गः—क ख ग घ ङ। चवर्गः—च छ ज झ ञ।
टवर्गः—ट ठ ड ढ ण। तवर्ग—त थ द ध न।
पवर्गः—प फ ब भ म। अन्त स्थाः—य र ल व।
ऊष्माणः—श ष स ह

अनेन प्रकारेण वैज्ञानिकीनामैकिकीनां निरूपणं संसारस्य कस्यामपि भाषायां नाऽस्ति। रोमन-अरबी-फारसी-रशियन-स्लाव-ग्रीक-लैटिन-चीन-प्रभृतिषु वर्णमालासु अनेकेषां ध्वनीनामैकिक्यः सम्मिलिताः सन्ति। एतासु भाषासु कोऽप्येतादृशो वर्णो नाऽस्ति यः कस्याऽपि ध्वनेरैकिकीं व्यञ्जयितुं प्रभवेत्। कण्ठ-तालु-मूर्धा-दन्तोष्ठ-नासिकाप्रभृतिभ्यो ये सम्भाविता ध्वनय उत्पत्तिमर्हन्ति, ते संस्कृतभाषायाः वर्णेषु निबद्धाः। एतादृशी वैज्ञानिकी योजना संसारस्य अन्यस्यां भाषायां नाऽस्ति।

वर्णानां योगेन पदानि पदानाञ्च योगेन वाक्यानि

निर्मीयन्ते। वाक्यद्वारा विचाराणां भावनानाञ्च व्यक्तीकरणं भवति। समस्तपदानां वर्गीकरणं बोधयितुं महर्षिपतञ्जलिना स्वकीय-व्याकरणमहाभाष्ये निम्न-वेदमन्त्रो लिखितो व्याख्यातः—

चत्वारि शृङ्गास्त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्यामा विवेश॥

"चत्वारि शृङ्गाणि चत्वारि पदजातानि—नामाख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादाः—त्रयः कालाः भूतभविष्यद्वर्तमानाः। सप्त हस्तासो अस्य–सप्त विभक्तयः। त्रिधा बद्धः–त्रिषु स्थानेषु बद्धः, उरसि कण्ठे शिरसीति। वृषभः–वर्षणात्। रोरवीति–शब्दङ्करोति। कुत एतत्? रौतिः शब्दकर्मा। महो देवो मर्त्याम् आविवेशेति। महान् देवः–शब्दः। मर्त्याम्–मरणधर्माणो मनुष्यास्तान् आविवेश।"

(महाभाष्ये १. १. १)

चतुःशृङ्गयुक्तस्य त्रिस्थानेषु बद्धस्य त्रिपादयुक्तस्य वृषभस्य शब्देन रूपकं कुर्वन्नाह पतञ्जलिर्महाभाष्ये पस्पशाह्निके—

शब्दरूपिणो वृषभस्य चत्वारि शृङ्गाणीव चत्वारि पदानि नामाख्यातोपसर्गनिपाताश्च सन्ति! पादत्रयमिव भूतभविष्यद्वर्तमाना इत्येते त्रयः कालाः सन्ति। अथ च सप्तहस्तासः सप्तहस्तवत् सप्त विभक्तयः प्रथमा, द्वितीयादयः। शिरोद्वयमिव नित्यानित्यभेदेन शब्दो द्विविधः। स उरसि कण्ठे शिरसीत्येषु त्रिषु स्थानेषु बद्धोऽस्ति। अर्थात् एतेभ्य एव स्थानेभ्यो वर्णा उच्चार्यन्ते। सः शब्दं करोति। स महान् देवः शब्दो मरणशीलानां मनुष्यां मध्य आगतः अर्थात् मनुष्याः शब्दानां प्रयोगमारभन्ते।

अनेन प्रकारेण पतञ्जलिना वृषभस्य रूपकेण शब्दविज्ञानं प्रकाशितम्। भाषायाः संस्कारार्थं संस्कृतभाषाया वैदिककालादेव व्याकरणस्य मौलिकसिद्धान्ताः प्रयुक्ता वर्तन्ते। नामभिः सप्तविभक्तीनामाख्यातेन भूतभविष्यद्वर्तमानानां त्रयाणां कालानां धातुभिरुपसर्गाणां निपातानाञ्च सर्वत्र निर्बाधप्रयोगाणां भाषायाः संस्कारविषये स्वीयं मौलिकं स्थानं विद्यते।

अस्यैव व्याख्यानार्थमिन्द्रः सर्वप्रथमं व्याकरणशास्त्रं रचयाम्बभूव। तदनन्तरमनेके आचार्यास्तस्मिन् क्षेत्रेऽनुसन्धानङ्कुर्वन्तो ग्रन्थानरचयन्। अद्यावधि प्रायश्चतुःषष्ठिवैयाकरणा बभूवुरिति सम्प्रति विज्ञायते। एतेष्वन्तिमो मुनिः 'पाणिनिः' सर्वश्रेष्ठो बभूव। तेन स्वीयव्याकरणशास्त्रग्रन्थे "अष्टाध्यायी"त्यभिधेये दश वैयाकरणानामुल्लेखो विहितः। संस्कृतवाङ्मये वैदिककालादद्यावधि भाषासंस्कारविषये जागृतपरम्परा दरीदृश्यते। संसारस्याऽन्याभ्यो भाषाभ्यः तत्तद्देशीया विद्वांसः संस्कृतव्याकरणात् पर्याप्तं साहाय्यं गृहीतवन्तः। संसारे संस्कृतभाषैव एतादृशी या भाषायाः समस्तसंस्कारेभ्यः परिपूर्णा।

संस्कृतभाषायाः व्याकरणपद्धतिमाश्रित्यैव संसारस्य सर्वासामप्याधुनिकभाषाणां संस्कारो जातः। भविष्यति कालेऽप्येतादृशी पद्धतिरेव प्रचलिष्यति। संसारस्य ताः भाषाः यासां व्याकरणस्य किञ्चिदपि स्वरूपमद्यावधि न निर्धारितमस्ति, यस्याश्च काचिदपि लिपिर्न निर्मिताऽस्ति, ताभ्यश्च संस्कृतभाषायाः व्याकरणस्य साहाय्यमत्यधिकं श्रेयस्करं भविष्यति। उदाहरणाय भारते पर्वतीयप्रदेशानां पर्यटकजनानां भाषाः नागालैण्डस्य भीलवाडा-प्रदेशस्य चानेका भाषाः किरातानाम्, आस्ट्रेलियास्थादिवासिनाम्, अमेरिकानिवासि - रेडइण्डियन - लोकानाम् औदीच्यध्रुवस्य एस्किमोजातिजनानाम्, रूसौदीच्यध्रुवयोर्मध्ये स्थितानां स्टेप्स-टैगा-प्रभृतिक्षेत्राणां पर्यटकानां भाषाः संस्कृतभाषायाः व्याकरणस्य लिपीनाञ्च साहाय्येनैव सुसंस्कृता भवितुमर्हन्ति।

अभिनवा चिरप्रत्ना च निद्रोपनिषद्

— श्री माणिक मुरलीधर देशपाण्डे —

शौनको वै महाछात्रः अङ्गिरसं विधिवदुपसन्नः पप्रच्छ। अङ्गिरसेति होवाच। यदि सर्वं निद्रया आप्तम्, सर्वं निद्रया वशीकृतम्, तद् केन निद्रायाः प्राप्तिः? तद् ब्रूहीति। अङ्गिरसः प्रोवाच—यथा वत्स एकेन मृत्पिण्डेन विज्ञातेन सर्वं विज्ञातं भवति, एवं एकया निद्रया ज्ञातया सर्वं विज्ञेयं विज्ञातं भवति।

यदा सर्वाणि मुच्यन्ते भयानि हृदये स्थिता-
न्यथ छात्रोऽमृतो भवति अत्र निद्रां समश्नुते ॥ १ ॥
अन्धं तमः प्रविशन्ति सर्वे ये निद्रां समुपासते।
ततोऽपि भूयिष्ठतरं तमः त ये अनिद्रायां रताः ॥ २ ॥
तामेव धीरो विज्ञाय निद्रां कुर्वीत स्नातकः।
नानुध्यायाद्बहूञ्छब्दान् वाचां विग्लापनं हि तत् ॥ ३ ॥
अतिभोग्यां हां मन्यन्ते निद्रां छात्रप्रियां सदा।
अनुभूय च तां भूयः तामाहुः परमां गतिम् ॥ ४ ॥
स्वप्नान्तं जागरितान्तं चोभौ यो अनुपश्यति।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥ ५ ॥
अन्यदेवाहुर्निद्रया अन्यदाहुरनिद्रया।
अनिद्रया पाठस्तरितव्यः निद्रयाऽमृतमश्नुते ॥ ६ ॥
निद्रया सखिना युक्तो व्याख्यानान्यलसानि वै।
यो वर्जयति आचार्यान् तं वन्दे द्विपदां वरम् ॥ ७ ॥

× × ×

अथ द्वितीयोऽध्यायः।

न अत्रोन्मीलिते नेत्रे शब्दः पञ्चत्वमागतः।
मनो मूढं भवत्यत्र अमतित्वं गता मतिः ॥
अन्यत् तद्विदितादस्ति अन्यच्चाविदितादपि।
निद्रातत्त्वं न जानेऽहं कथनीयं कथमिति ॥ १ ॥

अभ्यासमेके कवयो वदन्ति
अलसं तथान्ये परिमुह्यमानाः।
निद्रायाः महिमा एष लोके
ययेदं भ्राम्यते छात्रविश्वम् ॥ २ ॥
वेदाहमेतां महतीं च निद्रां
छात्रप्रियां वै तमसः स्वरूपाम्।
तामेव विदित्वा अति-पाठमेति,
नान्यः पन्था विद्यते अयनाय ॥ ३ ॥

य एनां विदुरमृतास्ते भवन्ति,
अथेतरे दुःखमेवापि यन्ति ॥ ४ ॥
पाण्डित्ये हि बहुधा वर्तमानाः
स्वयं कृतार्थमभिजानन्ति बालाः।
यदज्ञानिनो न जानन्ति निद्रां
तयातुराः क्षीणबला भवन्ति ते ॥ ५ ॥
तदेतत्सत्यं मन्त्रेषु यदपश्यन् कवयः
निद्रैव कलौ बहुधा सन्ततेति।
तामनुसरन्ति नियतं मुक्तिकामाः
एष वः पन्था सुकृतस्य लोके ॥ ६ ॥
सम्प्राप्यैनां स्नातकाः स्वप्नतृप्ताः
कृतात्मानः वीतत्रासाः प्रशान्ताः।
ते आलीयैनां सर्वतः प्राप्य धीराः
युक्तात्मानः शून्यमेवाविशन्ति ॥ ७ ॥
नेयं निद्रा धैर्यहीनेन लभ्या
न च ज्ञानात्तपसो वाऽपि लेखनात्।
एतैरुपायै-र्यतते यस्तु विद्वान्
तमियं निद्रा न गच्छति सौख्यरूपा ॥ ८ ॥
नेयं निद्रा प्रवचनेन लभ्या
न मेधया नापि बहुना श्रुतेन।
यमेवैषा वृणुते तेन लभ्या
तमेवैषा विवृणुते तनुं स्वाम् ॥ ९ ॥

उपनिषदं भो ब्रूहीत्युक्तं त्वया। उपनिषत्-निद्रां वाव अब्रूम।

[यदा खलु समाप्तः उपदेशः, तदा शौनको ह वै महच्छात्रः निद्रामग्नो गुरुणा दृष्ट इति कृत्वा गुरुवर्यैरपि मौनं स्वीकृतम्। तेऽपि निद्राराधने मग्नाः।]

एवं संस्कृतभाषा राष्ट्रियैकतायाः सामान्यस्वरूपादुत्तरोत्तरं प्रवर्धमाना राष्ट्रियैकतायाः विराजं स्वरूपमासाद्य समस्तपृथिव्याः मानवसमाजं दृढबन्धुत्वभावनाया एकस्मिन्सूत्रे सम्यगाबध्नाति। अजरामरा चेयं भाषेति संसारे सर्व एव समामनन्ति। यूरोपदेशस्य मूर्धन्यविदुषः श्रीयुतो मोक्षमूलरभट्टस्य प्रशस्तिश्लोकोऽयं संस्कृतभाषाया अमरतायाः अमरतायाश्च सन्देशन्निरन्तरं दास्यतीति निश्चप्रचम्—

यावद् भारतवर्षं स्याद् यावद् विन्ध्यहिमाचलौ।
यावद् गङ्गा च शोणश्च तावदेव हि संस्कृतम् ॥

भगवान् श्रीकृष्णः : यत्र षोडशकलाः सर्वांशतो विकसिताः !

— श्री गोविन्द नरहरि वैजापुरकरः —

उच्यते यद् भगवान् कृष्णः षोडशकलाभिः परिपूर्णः पूर्णावतार आसीत्। किन्तु कास्ताः कला इत्यनेन कतिपये एव परिचिताः स्युः। अत एवात्र ताः षोडशकला विविच्य पर्यायतस्तत्कलावतो भगवतः श्रीकृष्णस्य जन्मदिवसप्रसङ्गे गुणवर्णनेनात्मानं पुनीमहे।

आसां षोडशकलानां विषये मतभेदोऽपि जागर्ति। वैदिकविज्ञानवादिनः भिन्ना एव कलाः परिगणयन्ति। तान्त्रिकाणां षोडशकलाः पुनरन्याः। दर्शन-पुराणदृष्ट्या च अपरा एव षोडशकलाः। तत्रापि अवान्तरं भेदद्वयमादाय तृतीयोऽयं षोडशकलाप्रकारः स्वयमपि त्रिविध आख्यातुं शक्यते। इत्थं षोडशकलाविषये संभूय पञ्च कल्पाः समुपलभ्यन्ते। तेषु वैदिकानां तान्त्रिकाणाञ्च षोडशकलास्तत्तद्ग्रन्थेषु वर्णिताः। अवतारवादस्य विशेषतो दर्शन-पुराणाद्यनुगृहीतत्वादत्र तमेव पक्षमुपबृंहयामः। विषयेऽत्र वेददर्शनाचार्यैः पूज्य श्री गङ्गेश्वरानन्द स्वामिवर्यैः उदासीनसम्प्रदायाचार्यैः स्वीयव्याख्यानेषु बहु प्रपञ्चितम्। तदाधारेणैव विषयोऽयमत्र वितन्यते।

वैदिक-विज्ञानमतम्

'सूची-कटाह'न्यायेन प्रथमं वैदिक-विज्ञानमतेन तान्त्रिकमतेन च स्वीकृतानां षोडशकलानां संक्षिप्तं परिचयमुपन्यस्य पौराणिकसम्मत-कलाविवेचनं विवेचयिष्यामः।

वेदविज्ञानविदां मतं यत् 'अक्षरात् परतः परः' (मुण्ड० २.१.२) इत्यौपनिषदे वचने 'अक्षर'स्य 'परात्पर'स्य च सुस्पष्टं निर्देशः। एवमेव 'गताः कलाः पञ्चदश प्रतिष्ठा''परेऽव्यये सर्वं एकीभवन्ति' (मुण्ड० ३.२.७) इत्यत्र 'अव्ययः' 'परः' चापि समुल्लिखितौ। तथैव 'संयुक्तमेतत् क्षरमक्षरं च क्षरं प्रधानममृताक्षरं हरः' (श्वेता० १.८.१०) इत्यत्रापि 'अक्षर'स्य 'क्षर'स्य च निर्देशः। इत्थं वैदिकवाङ्मयपरिशीलनेन सुस्पष्टं यत् एकमेव ब्रह्म १. परात्परः, २. अव्ययः, २. अक्षरः, ४. क्षरश्चेति भेदैर्विभक्तम्। तेषु अव्ययस्य पञ्च कलाः—१. आनन्दः, २. विज्ञानम्, ३. मनः, ४. प्राणः, ५. अन्नञ्च। सूक्ष्मेक्षिकया विचार्यमाणे तैत्तिरीयोपनिषदि परिगणिताः अन्नमयादि-पञ्चकोषा एव व्युत्क्रमेणाऽत्र निरूपिताः। अक्षरोऽपि पञ्चकला-समन्वितः—१. ब्रह्मा, २. विष्णुः, ३. इन्द्रः, ४. अग्निः, ५. सोमश्च। क्षरोऽपि पञ्चविधः—१. प्राणः, २. आपः, ३. वाक्, ४. अन्नम्, ५. अन्नादश्च। पुरुषत्रयस्य कलानामासां सम्मेलनेन १५ पञ्चदश कलाः सम्भवन्ति। षोडशी कला पुनः परात्परं विशुद्धं वा ब्रह्म। इत्थं वैदिकविज्ञानसम्मताः षोडशकला भवन्ति।

ज्ञातव्यमेतत् यद् अक्षर-क्षरयोः आधिदैविकी कला एकैव। क्षरस्य उपर्युक्ताः कलाः केवलम् आधिभौतिक्य एव। तस्य आध्यात्मिक्यः कलाः पुनरिमे—१. बीजचितिः (कारणशरीरम्), २. देवचितिः (सूक्ष्मशरीरम्), ३. भूतचितिः (स्थूलशरीरम्), ४. प्रजाः, ५. वित्तञ्च। व्यष्टेः क्षरेऽन्तर्भावात् क्षरजीवसम्बद्धा आध्यात्मिक्यः कला न पृथक् परिगणिताः। संक्षेपतो वैदिकशैल्या षोडशकलानामयमेव विभागः।

तान्त्रिक्यः षोडशकलाः

तान्त्रिकाणां षोडशकलानां सङ्केतो ब्रह्मसूत्र-

शाङ्करभाष्यस्य टीकायां श्री वाचस्पति मिश्रपादकृतायां भामती मङ्गलाचरणे समुपलभ्यते । यथा–

षड्भिरङ्गैरुपेताय विविधैरव्ययैरपि ।
शाश्वताय नमस्कुर्मो वेदाय च भवाय च ॥

सनातनं नित्यं वेदनारायणं परब्रह्माणञ्च नमस्कुर्वन् षड्दर्शनाचार्योऽयं विबुधाग्रणीः उभयमपि षडङ्गपूर्णं विविधाव्ययसमन्वितञ्च मनुते । तत्र वेदस्य षडङ्गानि—१. शिक्षा, २. कल्पः, ३. व्याकरणम्, ४. निरुक्तम्, ५. छन्दः, ६. ज्योतिषञ्च । विविधानि अव्ययानि पुनरेतानि, येषां वेदेषु भूरिशः प्रयोगः—प्र, परा, अनु इत्यादीनि ।

महेश्वरस्य परब्रह्मणः पुनरङ्गानि पञ्च, अव्ययानि च दश इतो भिन्नानि । तथा चोक्तम्—

सर्वज्ञता तृप्तिरनादिबोधः
स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अचिन्त्यशक्तिश्च विभोर्विधिज्ञाः
षडाहुरङ्गानि महेश्वरस्य ॥
ज्ञानं विरागमैश्वर्यं तपः सत्यं क्षमा धृतिः ।
स्रष्टृत्वमात्मसम्बोधो ह्यधिष्ठातृत्वमेव च ।
अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे ॥

अर्थात् ६ अङ्गानि, १० अव्ययानि च मिलित्वा षोडश परमात्मनः कलाः । तथा च तान्त्रिकदृष्ट्या षडङ्गानि—१. नित्यसर्वज्ञता, २. नित्यतृप्तिः, ३. अनादिबोधः, ४. नित्यस्वतन्त्रता, ५. नित्यालुप्तशक्तिः, ६. नित्याचिन्त्यशक्तिश्च । दश अव्ययानि यथा– ७. ज्ञानम्, ८. वैराग्यम्, ९. ऐश्वर्यम्, १०. तपः, ११. सत्यम्, १२. क्षमा, १३. धृतिः, १४. स्रष्टृत्वम्, १५. आत्मसम्बोधः, १६. अधिष्ठातृत्वमिति षोडश कलाः ।

अत्र सर्वज्ञता स्फुटा । तृप्तिश्च असन्तोषाभावः, सुप्रसन्नता, हर्षातिरेको वितृष्णता वा । अनादिबोधो नित्यज्ञानं स्व प्रकाशता वा । स्वतन्त्रता सर्वाधिष्ठातृत्वम्, अवशीभूतता वा । अव्ययानि पुनः सुस्पष्टानि । आत्मसम्बोध आत्मदर्शनम्, अनावृतस्वस्वरूपं वेति विवेकः ।

पौराणिक-दार्शनिक्यः कलाः

इतः परं पौराणिक-दार्शनिककलाः विवेचनपदं भजन्ते । अस्यास्त्रिषु प्रकारेषु मूलभूतः सर्वसम्मतश्च प्रकारः षोडशकलानामयम्—

१. अन्नकला, २. प्राण-कला, ३. मनः-कला, ४. विज्ञान-कला, ५. आनन्द-कला, ६. ग्राह्य-कला, ७. ग्रहण-कला, ८. ग्रहीतृ-कला, ९. भूमि-कला, (अपरप्रकृत्यन्तर्गता) १०. आपः-कला, ११. अनल-कला, १२. वायु-कला, १३. आकाश-कला, १४. अहङ्कार-कला, १५. महत्-कला, १६. मनः = मनोगम्य-कार्यानुमेय-मूलकारण-मूलप्रकृति-कला चेति ।

एतास्वेव कलासु अष्टौ अष्टौ च ससीमाऽसीम-भेदाभ्यां विभज्येन्ते । तत्र ससीमकलाः सामान्यजनेभ्यो योगिजनं यावद् विलसिताः । असीमकलाः पुनः केवलम् अवतारेष्वेव विलसन्ति । अयमेव तृतीयस्य कला-विभागस्य द्वितीयोऽवान्तरभेदः ।

अस्यैव तृतीयोऽवान्तरभेदश्चेत्थम्—प्रारम्भिक-पञ्चकोषात्मकं कलापञ्चकं विहाय षष्ठ-ग्राह्यकलायाः विभूतित्रयम्—१. अणिमादि - प्रादुर्भावः, २. कार्य-सम्पत्तिः, ३. तद्धर्मानभिघातश्चेति । सप्तम-ग्रहण-कलायाः विभूतित्रयम्—४. मनोजवित्वम्, ५. विकरणभावः, ६. प्रधानजयश्चेति । अष्टम-ग्रहीतृकलायाश्च विभूतिद्वयम्—७. सर्वज्ञता, ८. सर्वाधिष्ठातृत्वञ्चेति संकलय्य अष्टौ विभूतयो भवन्ति । एतासामेव अष्ट-विभूतीनां 'सातिशय'-'निरतिशय'-भेदाभ्यां विभजने पौराणिक - दार्शनिककलात्मकस्य तृतीय - षोडशकला-कल्पस्य तृतीयोऽवान्तरविभागो भवति । अवतार-कोटौ एता निस्सीमकलाः विकासं गच्छन्ति, लौकिक-कोटौ पुनः ससीमकलाः विकासम् ।

कलानां परिचयः

इत्थं पौराणिक दार्शनिकानां षोडशकलानां भेदत्रयेऽपि विश्लेषणवैशिष्ट्येन प्रथमभेद एव सामान्यरूपेण समादृतो दृश्यते। एतासु प्राथमिक्यः पञ्चकलाः दर्शनशास्त्रे प्रसिद्धान् पञ्चकोषान् (अन्नमय-कोषं, प्राणमय-कोषं, मनोमय-कोषं, विज्ञानमय-कोषं, आनन्दमय-कोषञ्च) आधृत्यैव प्रतिष्ठापिताः। एता हि कलाः एकैकवृद्ध्या सामान्यतः पञ्चसु जीवयोनिषु विकसिता दृश्यन्ते। जीवस्य पञ्च योनयश्चैताः—१. उद्भिजा (वृक्षादिगता), २. स्वेदजा (मशक-मत्कुणादिगता), ३ अण्डजा (पक्ष्यादिगता), ४. जरायुजा (गर्भवेष्टनचर्मपुटकरूपेण जरायुणा जन्या पश्वादिरूपा) ५. मनुष्यरूपा च। यद्यपि मनुष्ययोनिरपि जरायुजैव, तथापि ब्राह्मण-वसिष्ठन्यायेन विभागोऽयं समाद्रियते। मानवयोनौ किल एताः पञ्चापि कलाः पूर्णतो विकसिता दरीदृश्यन्ते। इतः परतरास्तिस्रः कला अपि योगबलेन मानवे विकासयितुं शक्यन्ते, या हि 'भगवद्विभूतिपदेन' व्यपदिश्यन्ते। किन्तु नवमकलातः शिष्टानां सर्वासां विकासः पुनः भगवदवतारेष्वेव जायते।

षष्ठाद्यष्टकलासु तिसृषु क्रमशः षष्ठी ग्राह्यकला 'भूतविजय-कला' इति, सप्तमी ग्रहणकला 'इन्द्रिय-विजय-कला' इति, अष्टमी ग्रहीतृकला च 'आत्म-विजय-कला' उच्यन्ते। आभिरेव संज्ञाभिः सुस्पष्टं यद् यस्मिन् एतासां विकासो जायते, तस्य वशे एते शब्दादिविषयाः; चक्षुरादीन्द्रियाणि ग्रहीतृबुद्धौ प्रतिबिम्बिता आत्मानश्च भवन्ति। मानवे हि आधिभौतिकम्, आध्यात्मिकञ्च द्विविधं बलं तिष्ठति। आध्यात्मिकं बलं तेन योगाभ्यासत आसाद्यते।

योगशास्त्रानुसारं योगस्य अष्टसु अङ्गेषु ध्यान-धारणा-समाधिरूपाणां परसाधनानां यदा कस्मिंश्चिद्विषये योगः साध्यते, तदा स 'संयम'शब्देन उच्यते : त्रयमेकत्र संयमः (योगसू० ३.४)। अयमेव संयमो यदा स्थूलभूतेषु क्रियते, तदा षष्ठी ग्राह्यकला भूत-विजय-कला वा मानवे विकसति। योगशास्त्रेषु इयं 'मधुमती'-भूमिका उच्यते।

घ्राणादीन्द्रियेषु पुनरयं संयमो यदा साध्यते, तदा मानवे सप्तमी ग्रहण-कला इन्द्रियविजयकला वा विकसति। योगशास्त्रे कलेयं 'मधुप्रतीका' उच्यते।

सांख्यदर्शनानुसारं ज्ञानोत्पत्तिकाले बुद्धितादात्म्यापन्नतां गते पुरुषे (आत्मनि) संयमे कृते ग्रहीतुर्यथार्थरूपस्य साक्षात्कारो जायते। तेन च बुद्धेः पुरुषस्य च पार्थक्यबोधः (सत्त्वपुरुषान्यताख्यातिः) सुस्पष्टं प्रतिफलति। इयमेव अष्टमी ग्रहीतृ-कला आत्मविजय-कला वा, या च योगशास्त्रे 'सर्वाधिष्ठातृत्वम्' 'सर्वज्ञातृत्वम्' उच्यते। एतेन सुस्पष्टमेतद् यद् योगमार्गानुसरणेन नूनं मानवः कलात्रयमेतदात्मनि विकासयितुं प्रभवति। तदा स नूनं 'भगवद्विभूति'पदेन व्यपदिश्येत।

अवतार-कलाः

नवम्याः भूमि-कलाया आरभ्य षोडशकलां यावत् अष्टौ कलाः अष्टविधाया अपरप्रकृतेरेव विलासो वक्तुं शक्यते। नवमीतस्त्रयोदशीपर्यन्तं कला-पञ्चकं भूत (सूक्ष्मभूत) - पञ्चतन्मात्ररूपमेव। शिष्टास्तिस्रः कलाः पुनः अहङ्कार-महत्तत्व-मूलप्रकृतेरेव विलासः।

भगवदवतारेषु 'कूर्मावतारे' अस्या एव भूमि-कलाया विकासः पूर्णतां गतः। दशमी आपःकला 'मत्स्यावतारे' पूर्णविकासं गता। 'मोहिनी'-संज्ञके अवतारे अनल (तेजः)-कलायाः पूर्णविकासो दृश्यते। 'वाराहावतारे' वायु-कलायाः पूर्ण-विकासः। 'वामनावतारे' 'हयग्रीवावतारे' पुनः आकाश-कलायाः पूर्ण-विकासो विलोक्यते। सांख्यशास्त्रोक्तः 'अहङ्कार' एव दर्शने 'विराट्' पुराणेषु च 'प्रजापतिः' उच्यते।

कालिदास-काव्येषु कुलपतयः

—— श्री प्राध्यापकः चन्द्रदेव रायः ——

प्राचीन-भारते शिक्षायै, संस्कृत्यै तथात्मसाधनायै परमरमणीया आश्रमव्यवस्थासीत्। एतेषामाश्रमाणां स्थापना नगराद्बहिः कस्मिंश्चिदपि तादृशे स्थानेऽभवत्, यत्र नागरिककोलाहलस्याभाव आसीत्। परन्तु प्रकृतेः सर्वासां सामग्रीणां सौलभ्यमभवत्। बौद्ध जातक-ग्रन्थेषु तक्षशिलायां, वाराणस्यां, राजगृहे, कोशलादि-स्थानेषु च शिक्षापीठस्य निर्देशो लभ्यते। बुद्ध-समकालीनस्य मगधस्य सम्राजो राजवैद्यस्य जीवकस्य राजकुमारप्रसेनजितश्च शिक्षा तक्षशिलायामेवाभूत्। गुप्तकाले नालन्दायाः प्रसिद्धविश्वविद्यालयस्योल्लेखः प्राप्यते, यत्र विधिवत् कुलपतयो नियुक्ताः जायन्ते स्म। शिक्षायाः समस्तमुत्तरदायित्वं कुलपतौ निर्भरमासीत्।[1] महान् विद्वान् तथा शिष्ट एव जन इदं पदमलङ्कुर्वन्नासीत्। नालन्दाविश्वविद्यालयस्य सर्वप्रथमः कुलपतिः धर्मपाल आसीत्। तत्पश्चात् तच्छिष्यः शीलभद्र एतस्य कुलपतिर्बभूव। कुलपतिर्न केवलं शिक्षादीक्षा-प्रवीण एवाभवत्, प्रत्युत ग्रन्थनिर्माण-कार्य-सम्पादनमप्यकरोत्।

महाकविकालिदासस्य ग्रन्थेषु कण्वस्य, वाल्मीकेः, च्यवनस्य, वरतन्तोश्च नामानि कुलपतिरूपेणायातानि। राजाश्रये, गुरुकुले ऋषीणामाश्रमेष्वपि च शिक्षादानमभवत् यत्र विशेषाध्ययनशीलव्यक्तीनां शिक्षाग्रहण-

---

[1] Buddhist Records of western world Vol 2 P. 171.

अतश्चतुर्दशी अहङ्कार - कला नाम 'विराड्विजयः', 'प्रजापति - विजयो' वा। इन्द्रादयो विराट्कोटौ परिगण्यन्ते। अतस्तेषां विजयो 'विराड् - विजयो' वक्तुं शक्यते। इन्द्रादिविजेतृ रावणस्य विजेतरि 'रामावतारे' अर्थतो विराड्रूपस्य अहङ्कारस्य विजयेन चतुर्दश्याः कलायाः पूर्णविकासः स्फुटीभवति।

किन्तु 'श्रीकृष्णावतारे' शिष्टयोः पञ्चदशी-षोडश्योः महद्विजयकला - मूलप्रकृतिविजयकलयोरपि पूर्णतो विकासः परिलक्ष्यते। सांख्यदर्शनोक्तं महत्तत्त्वमेव पुराणेषु 'ब्रह्म' दर्शनेषु च 'हिरण्यगर्भः' इत्युच्यते। कृष्णचरितविदां नापरोक्षमेतत् यद् भगवता श्रीकृष्णेन कथं ब्रह्मणोऽखर्वो गर्वः खण्ड-खण्डतां नीतः— अभिनवानां गवां वत्सानां गोपालकानां च नवां सृष्टिं समुत्पाद्य। इत्थं भगवति श्रीकृष्णे महत्तत्त्व-विजयरूपा ब्रह्म-विजयरूपा वा पञ्चदशी कला पूर्णतो विकसितेति वक्तुं शक्यते।

मूलप्रकृति-विजयरूपायाः षोडशीकलायास्तात्पर्यमिदं यत् प्रकृतिराज्ये यस्य वस्तुनः कृते ये नियमा निर्धारिताः, तानपि अतिक्रम्य तद्वस्तुनः प्रस्तुतीकरणम्। भगवान् रामः किल मर्यादावतारः, पुरुषोत्तमश्च। अत एव सत्यपि महत्सामर्थ्ये तत्र भगवत एतयोः कलयोः विकासो नाभवत्, नापि च तदौचित्यमपि। किन्तु श्रीकृष्णावतारे तयोरपि शिष्टयोः कलयोर्विकासो दृश्यते। गुरोर्मृतस्य पुत्रस्य पुनरुज्जीवनं प्रकृतिविजय एव। अतो निर्विचिकित्सं वक्तुं शक्यते यद् भगवति श्रीकृष्णे षोडशः कलाः पूर्णं विकसिताः। अत एव उच्यते—

कृष्णस्तु भगवान् स्वयम्।

मभूत्। तेऽध्ययनाध्यापनाभ्यां सह यज्ञ-यागादिभिस्तपस आराधनया चात्मसाधनां कुर्वन्त आसन्। भारद्वाजस्य वाल्मीकेश्चाश्रमाः प्राचीनकालादेव स्वसांस्कृतिकसम्पद्भिः प्रख्याताः सन्ति।[1] दुर्वासा ऋषिः स्वीयदशसहस्रशिष्यैः सह स्वगुरुनरेशं द्रष्टुकाम आगच्छति।[2] महाभारते मार्कण्डेयाश्रमस्य कण्वाश्रमस्य चोल्लेखः प्राप्यते, यत्र ज्ञानस्य विभिन्नशाखानामध्ययनं क्रियमाणमासीत्।[3]

कालिदास-निरूपित-कुलपतीनामाश्रमेषु विशेषतो वेदस्य शिक्षणकार्यमभवत्। कुलपतीनामाश्रमाः सघनवनेष्ववस्थिता आसन्। तेऽवश्यमेव वेदशिक्षार्थमुपयुक्ता अभवन्। अभिज्ञानशाकुन्तले काश्यपगोत्रीयकण्वर्षेराश्रमस्य निर्देश आयाति। कण्व एवात्र कुलपतिरासीत्। दुष्यन्तो यदाऽऽश्रमसमीपमागच्छति, तदा वैखानस आश्रमस्य परिचयं ददत् कथयति—

“राजन्, समिदाहरणाय प्रस्थिता वयम्। एष खलु कण्वस्य कुलपतेरनुमालिनीतीरमाश्रमो दृश्यते। न चेदन्यकार्यातिपातः, प्रविश्य प्रतिगृह्यतामातिथेयः सत्कारः।”

स्पष्टमेतद्यत् कुलपतेः[4] कण्वस्याश्रमो मालिनीनदीतटे शान्तवातावरण आसीत्। तत्र च राजनैतिकवितण्डावादस्याभावोऽभवत्। आश्रमे प्रत्येकशिक्षार्थिनः कृते यज्ञोऽनिवार्यधर्म आसीत्। आश्रमेषु नरनार्योः सहैव निवासोऽभवत्। आश्रमभूमिरत्यन्तशान्ता साधनामयी चाभूत्। “शान्तमिदमाश्रमपदम्” (अभि० शा० १.१६) इत्युक्त्या स्पष्टमेतद् ध्वन्यते यदाश्रमवासिषु शमगुणप्राधान्यमासीत्। शृङ्गाररसस्य प्रभावस्तेषु नाभवत्। आश्रमेष्वतिथिसत्कारक्रियापि सम्पद्यते स्म। महर्षिकण्वो यदा शकुन्तलायाः दुर्भाग्यशमनार्थं सोमतीर्थयात्रायां गत आसीत्, तदातिथिसत्कारभारं शकुन्तलोपरि समर्पितवान्। यद्यपि तत्रान्यर्षेः वयस्कव्यक्तीनाञ्च अभावो नासीत्, तथाप्यत्यन्तात्मीयतया सत्कारदायित्वं शकुन्तलोपरि समर्पितमभवत्।[1]

कुलपतेः कण्वस्य चरित्रं कविना आदर्शर्षेः, आदर्शाध्यापकस्य, आदर्शपितुश्च रूपेणाङ्कितम्। स हि तपस्वी तथान्तर्ज्ञानी च वर्तते। यदा मारीचाश्रमे दुष्यन्तशकुन्तलयोर्मिलनं भवति, तदादितिः एतत्सुखद वृत्तं कुलपतिकण्वसमीपं प्रापयितुं मारीचं निवेदयति। सन्दर्भेऽस्मिन् मारीचस्तत्सर्वज्ञतां निरूपयति। कविर्मारीचमुखेन वादयति–“प्रत्यक्षं सर्वमेव तत्र भवतः। तपसः प्रभावात् कण्वस्य सर्वं प्रत्यक्षमस्ति” (अभि० अं० ७)। सिद्धमेतद्यत् कण्वस्तपस्वी ज्ञानी नीतिज्ञश्चास्ति। तेन शकुन्तलागमनवेलायां य उपदेशः तस्यै दत्तः, सोऽद्यापि पतिगृहं गच्छन्तीभ्यो बालिकाभ्यः पितृभ्यां दीयते। कण्वः कन्यां परकीयसम्पदं मनुते। स उक्तवान्—

अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।

---

[1] वाल्मीकिरामायणम् ६.१२३.५१

[2] शिष्यायुतसमवेतो··· । महाभारतम् ३.२३२.८।

[3] महाभारतम् ३.२७१.४८।

[4] प्राचीनसमये कुलपतिः कोऽपि सामान्यजनो नाऽभवत्। प्रत्युत एतादृशो महान् जनः कुलपतिपदे नियुक्तोऽभवत्, यस्य छत्रच्छायायां दशसहस्रशिष्याणाँ पालन-पोषणैः सह शिक्षाभूत्—

मुनीनां दशसाहस्रं योऽन्नपानादिपोषणात्।
अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः।

पद्मपुराणेऽपि कथितमस्ति—

आचार्यो बहुशिष्याणां मुनीनामग्रणीस्तु यः।
व्रतयज्ञादिकर्माढ्यः स वै कुलपतिः स्मृतः॥

[1] इदानीमेव दुहितरं शकुन्तलामतिथिसत्काराय नियुज्य दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः। (अभि० शा० प्रथमाङ्के द्वादश-श्लोकपश्चात्।)

जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ॥
(अभि० शा० ४.२२)

कण्वः शोचति यत्प्रेम परमविलक्षणं भवति। अद्य शकुन्तलां पतिगृहं संप्रेष्य मम मनः शान्तं जातम्। यतः कन्या वस्तुतः परकीयैव सम्पद् भवति। अद्य मम मनः तथैव शान्तिं गृह्णाति यथा कश्चन जनः कस्यापि न्यासं प्रत्यर्प्य गृह्णाति।

कण्वेऽपारं वात्सल्यमस्ति। तथा सः क्षमाशीलोऽपि वर्तते। शकुन्तलायाः गन्धर्वविवाहवृत्तं श्रुत्वा स मनागपि रुष्टो नाभवत्। शकुन्तलाया एतदाचरणं धर्म-विरोधि वर्तते, तथापि क्षमाशील उदारश्च पिता कण्वस्तस्य समर्थनमेव करोति।

"तदो जाव एणं लज्जावणदमुहिं परिसज्जिअ तादकस्सवेण एव्वं अहिणंदिदं दिट्ठिआ धूमा उलिद दिट्ठिणो वि जअमाणस्स पावए एव्व आहुदो पडिदा। वच्छो सुसिस्सपरिदिण्णा विज्जा विअ असो अणिज्जासि संवुत्ता। अज्ज एव्व इसिरक्खिदं तुमं भत्तुणो सआसं विसज्जेमित्ति।'
(अभि० शा० चतुर्थाङ्के तृतीयश्लोकान्तिमं गद्यखण्डम्।)

अनेनोद्धरणेन स्पष्टमेतद्यत् कुलपतिः कण्वः क्षमाशीलस्तु वर्तते एव, सहैव विद्याविनयमहत्त्वदोऽप्यस्ति।

कुलपतेर्दृष्टिर्लोकानुग्रहे तथा सत्कारोपरि बद्धासीत्। तेन शकुन्तला लेखने गीतरचनायामपि शिक्षितासीत्। कुलपतौ विद्यासिद्धिजन्यमपूर्वं सामर्थ्यमासीत्। अस्माकमेतत्कथनस्य पुष्टिर्निम्नाङ्कितया ऋषिकुमार-प्रार्थनया भवति।

"तत्र भवतः कण्वस्य महर्षेरसान्निध्यात् रक्षांसि न इष्टिविघ्नमुत्पादयन्ति। तत्कतिपयरात्रं सारथिद्वितीयेन भवता सनाथीक्रियतामाश्रम इति।'
(अभि० २.१५ अनन्तरं गद्यखण्डम्)

सिद्धमेतद्यत्कण्वप्रभावेण यज्ञे राक्षसानां विघ्ना नाभवन्। ऋषयः सर्वे यज्ञादिक्रियाणां सम्पादनं निर्भयाः कुर्वन्ति स्म। एवं प्रकारेण महाकविना कालिदासेन विद्याव्यसनिन उग्रतपस्विनः कण्वस्य चरित्रे दयालुतायाः, क्षमाशीलतायाः दूरदर्शितायाः, लोकानुग्राहकतायाः, अतिथिसत्कारपरायणतायाः संगठनक्षमतायाः वत्सलताप्रभृतिगुणानाञ्च समावेशः कृतः।

कुलपतिर्वरतन्तुः

महाकविः कालिदासो वरतन्तोर्विद्यायाः, बुद्धेः, व्यवस्थायाश्च पर्याप्तप्रशंसां कृतवान्। कविना तत्सम्बन्धे व्यलेखि—

अप्यग्रणीर्मन्त्रकृतामृषीणां
कुशाग्रबुद्धे कुशली गुरुस्ते।
यतस्त्वयाज्ञानमशेषमाप्तं
लोकेन चैतन्यमिवोष्णरश्मेः॥
(रघुवंशम् ५.४)

कायेन वाचा मनसापिशश्व-
द्यत्संभृतं वासवधैर्यलोपि।
आपाद्यते न व्ययमन्तरायैः
कच्चिन्महर्षेस्त्रिविधं तपस्तत्॥
(५.५)

यथा सूर्यः स्वप्रकाशेन सुषुप्तसंसारमुद्बोधयति, तथैव कुलपतिर्वरतन्तुः स्वज्ञानज्योतिषा शिष्यानुद्बुद्धानकुर्वन्। स मन्त्रद्रष्टाऽऽसीत्। तस्य तपश्चरणं नितान्तमुग्रं कठोरञ्चाभवत्। तस्य तपसा इन्द्रोऽपि चिन्तितो बभूव। वरतन्तोर्गुरुकुले प्रकृतेः पूर्णरूपेण निवास आसीत्। तस्यैतद् गुरुकुलमाश्रमरूपेण सञ्चालितमासीत्। विविधानां वृक्षाणां लतागुल्मानाञ्च तत्र संवर्धनं क्रियमाणमासीत्। मृगास्तत्र निर्द्वन्द्वं विचरन्ति स्म। ते सर्वप्रकारेण तत्र स्नेहं संवर्धनञ्चाप्राप्नुवन्ति स्म।

आश्रमनिवासिनः समस्तस्नातकाः स्नानं संध्या-

तर्पणादिक्रियाश्चाकुर्वन्। शिक्षापेक्षया दीक्षा तत्राधिका ध्यातव्याऽऽसीत्। महाराजो रघुः कौत्सं वृत्तं पृच्छन्नाश्रमसम्बन्धिनीं सर्वां व्यवस्थां प्रकाशितवान्। आश्रमस्य पाठ्यक्रमे चतुर्दश विद्यानां स्थानमासीत्।[1] एतासु विद्यासु वेदाङ्गस्य, स्मृतेः, उपनिषदः, अर्थशास्त्रस्य, कामशास्त्रस्य, नाट्यशास्त्रस्य, ज्योतिषशास्त्रस्य, राजनीतेः, खगोलस्य, व्याकरणस्य, काव्यस्य, धनुर्वेदस्य, आयुर्वेदस्यच शिक्षा परिगणिताऽऽसीत्। महाकविकालिदासस्य शिक्षासम्बन्धिनो ये विचारा अन्यत्रोपलभ्भन्ते तैरप्युक्तविद्यानां समर्थनं भवति। 'रघुवंशस्य छाया हि भूमेः शशिनः' (१४.४०), 'तस्मिन् पुनः सरस्वतीकृतकाव्यबन्धे' (विक्रमो० ३), तौ सधिषु व्यञ्जितवृत्तिभेदम्, रसान्तरेषु प्रतिबद्धरागम्, (कुमार० ७.९१) वागर्थाविव संपृक्तौ (रघु० १.१), सिन्धुतीरविचेष्टनः (रघु० ४.६७), इतिहास-निबन्धेषु (अभि० अ० ३) पुराणस्य कवेस्तस्य (रघु० १०.३६) तथा साङ्गञ्च वेदमध्याप्य (रघु० १५.६३) प्रभृत्युद्धरणैराश्रमस्य पाठ्यक्रमः प्रकाश्यते। नात्र सन्देहो यत् कुलपतिवरतन्तोराश्रमो विद्यासंस्कृतेः प्रधानकेन्द्रमासीत्। कौत्ससदृशाः कियन्तः स्नातकास्तत्राधीयते स्म। आश्रमसुव्यवस्थायाः, अध्यापनप्रवीणतायाश्च प्रसिद्धिः सर्वत्र आसीत्। रघुना कौत्सः श्रुतपारदृश्वा कथितः। (रघु० ५.२४) एतेनापि तत्रत्यस्नातकानामाचार्याणाञ्च सम्बन्धे ज्ञानं भवति।

कुलपतिः वाल्मीकिः

कुलपतिर्वाल्मीकिः अत्यन्तकृपालुर्लोकशास्त्रमर्यादाभिज्ञः, तपश्चरणादिसाधनासु रतश्च दृश्यते। तस्याश्रमे मुनिकन्यका अपि निवसन्ति। तत्र प्रेमवात्सल्ययोः पूर्णं साम्राज्यमस्ति। संध्यायां मृगाः सिंहाश्च सहैव निवसन्ति। आश्रमवृक्षाः लताश्च जलैः सिच्यन्ते। स्नातकाः पर्णकुटीः निर्माय पृथक्-पृथक् निवसन्ति। तस्य कुटीषु इङ्गुदीतैलप्रदीपाः प्रज्वलन्ति। कविना वाल्मीकेः सम्बन्धः दशरथेन जनकेन च सहोक्तः। महर्षिः स्वयं सीतां प्रति कथयति—

तवोरुकीर्तिः श्वसुरः सखा मे
सतां भवोच्छेदकरः पिता ते।
धुरि स्थिता त्वं पतिदेवतानां
किं तन्न येनासि ममानुकम्प्या॥
(रघु० १४.७४)

आश्रमस्य शान्तेस्तत्रत्यनिवासिनां परस्परसौहार्दस्य सम्बन्धे च स्वयं महर्षिः सीतां प्रति कथयति—

तपस्विसंसर्गविनीतसत्त्वे
तपोवने वीतभया वसाऽस्मिन्।
इतो भविष्यत्यनघप्रसूते-
रपत्यसंस्कारमयो विधिस्ते॥
(रघु० १४.७५)

अनुग्रहप्रत्यभिनन्दिनीं तां
वाल्मीकिरादाय दयार्द्रचेताः।
सायं मृगाध्यासितवेदिपार्श्वं
स्वमाश्रमं शान्तमृगं निनाय॥
(रघु० १४.७९)

कुलपतिः लवकुशौ वेद-वेदाङ्गान्यध्यापितवान्, स्वरचित-रामायणगानं च शिक्षितवान्। कविकालिदासः कुलपतिं वाल्मीकिं 'मन्त्रकृतं' ब्रवीति—

सखा दशरथस्यापि जनकस्य च मन्त्रकृत्।
सञ्चकारोभयप्रीत्या मैथिलेयौ यथाविधि॥
(रघु० १५.३१)

अर्थात् स मन्त्रद्रष्टा ऋषिरासीत्। तस्याश्रमे शिक्षायाः साधनायाश्च मूर्तिमद्रूपमासीत्। कविना व्यलेखि—

---

[1] षडङ्गो वेदाश्चत्वारो मीमांसान्वीक्षिकी तथा धर्मशास्त्रं पुराणञ्च विद्या एताश्चतुर्दश।
(अभिधान चि० २.१६७)

पुष्पं फलं चार्तवमाहरन्त्यौ
बीजं च बालेयमकृष्टरोहि ।
विनोदयिष्यन्ति नवाभिषङ्गा-
मुदारवाचो मुनिकन्यकास्त्वाम् ॥
(रघु० १४.७७)

पयोघटैराश्रम - बालवृक्षान्
संवर्धयन्ती स्वबलानुरूपैः ।
असंशयं प्राक्तनयोपपत्तेः
स्तनन्धयप्रीतिमवाप्स्यसि त्वम् ॥
रघु० (१४.७८)

च्यवनर्षिः

महाकविकालिदासस्य चतुर्थः कुलपतिश्च्यवनर्षिरस्ति । एतस्य वर्णनं विक्रमोर्वशीयनाटके वर्तते । उर्वश्या आयुर्नामकः पुत्रो जायते । सा पतिवियोगशङ्कया पुत्रं कुलपतेः च्यवनस्याश्रमे शिक्षादीक्षार्थं त्यजति । च्यवनेन तस्य क्षत्रियकुमारस्य जातकर्मादयः सर्वे संस्काराः विहिताः । तस्य शिक्षादीक्षाणाञ्च पूर्णप्रबन्धः कृतः । कविः लिखितवान्—

जं खत्तिअ कुमारअस्स जादकम्मादि-विहाणं तं से भअवदा चवणेण असेसं अणुचिट्ठिदं । गहीविज्जो धणुव्वेदे अहिविणीदो ।’

(विक्रम०, पञ्चमाङ्क-दशश्लोकानन्तरगद्यम् ।)

गहीदामिसो किल गिद्धो पादवसिहरे णिलीअमाणो अणेण लक्खीकिदो बाणस्स । (तत्रैव)

उल्लिखितोद्धरणैः स्पष्टमेतद्यत् च्यवनेन आयुःकुमारो धनुर्वेदेऽपि पूर्णशिक्षित आसीत् । तेन कुमारेण यदाऽऽश्रमविपरीतमाचरणं कृत्वा वृक्षासीनं समांसखण्डं गृध्रं प्रति बाणसंधानं कृतं तदा कुलपतिना निर्णीतं यदयं कुमारः पितुः समीपे प्रेषणीयः । फलतो विद्वानायुःकुमारः पितृ-समीपं प्रेषितः ।

महाकविकालिदासवर्णितानामुल्लिखितचतुर्णां कुलपतीनामाश्रमव्यवस्थां वीक्ष्य निम्नाङ्कितो निष्कर्ष उपस्थितो भवति—

१. कालिदासस्य कुलपतयो दयालवः स्नातकाभ्युत्थानाय सर्वैः प्रकारैः सहायकाः सुव्यवस्थापकाश्च सन्ति ।

२. शिक्षया बौद्धिक-प्रगत्या च सह दीक्षायाः नैतिक-सांस्कृतिक-साधनानामभ्यासस्य चावश्यकता कुलपतिदृष्टावासीत् ।

३. बौद्धिकमानसिक-विकासानन्तरमाश्रमेषु शारीरिकः श्रमोऽप्यनिवार्यं आसीत् । स्नातकानां कर्तव्येषु वृक्षादीनां सेचनस्य, आश्रममृगादिपशूनां संरक्षणस्य कुशादीनां दूरस्थप्रदेशेभ्योऽप्यानयनस्य गणनासीत् ।

४. गुरुकुलेष्वाश्रमेषु वा सहशिक्षाप्यासीत् । ऋषिबालास्तथर्षिबालिकाः संयमपूर्वकं सहैव शिक्षिता अभूवन् । कुलपतेरतिरिक्तोऽन्याध्यापकवर्गोऽप्यासीत् । स स्वविषयस्य पूर्णपण्डितोऽभवत् । तेन च स्नातका अध्यापिता अभूवन् ।

५. वेदवेदाङ्गानां शिक्षा प्रयोगात्मकविधिनाप्यभूत् । प्रायेण सर्वे स्नातकाः संध्या-हवनादिकार्याणि चाकुर्वन् । पुष्पार्चनविधिराश्रमेषु प्रचलित आसीत् ।

६. आश्रमेषु पठनेन सह लेखनस्यापि शिक्षाभूत् । शकुन्तला चित्रकला-लेखनेऽपि शिक्षितासीत् ।[1]

७. राजकुमारेभ्यो धनुर्वेदस्य ऋषिकुमारेभ्यो यजुर्वेदस्य तथा सामान्यवर्गेभ्यो ललितकलायाः शिक्षा दीयमानाऽऽसीत् ।

८. सामान्यतः कुलपतिर्दशसहस्रस्नातकानामाश्रम एवावसत् । किन्तु कालिदासवर्णितकुलपतीनामाश्रमेषु विद्यमानानां छात्राणां संख्यासु न कोऽपि प्रकाशः पतति । परमेतावत्तथ्यं यत् कुलपतिः स्नातकानामभ्युत्थानाय स्वसमस्तशक्तिव्ययमकरोत् ।

९. आश्रमेषु स्नातकनिवासाय पर्णकुटीनां व्यवस्थासीत् । भोजनावासव्यवस्था गुरुदक्षिणया प्राप्तेनैव धनेनाभवत् । गुरुदक्षिणा राज्ञां महाराजानां धनिकानाञ्च सहयोगेनैव प्राप्यते स्म । कौत्सः चतुर्दशकोटि-स्वर्णमुद्राः महाराजात् रघोः गृहीत्वा कुलपतये वरतन्तवे समर्पितवान् । वरतन्तुश्च तामर्थराशिमाश्रमव्यवस्थायां नियोजितवान् । अन्यशिक्षकेषु सत्स्वपि गुरुदक्षिणां कुलपतिरेन गृह्णाति स्म । एतेन एतद्ध्वन्यते यद् धनराशौ कुलपतेः स्वत्वमासीत् । व्यक्तिविशेषस्य कस्यचन नहि । स्नातका इङ्गुदीतैलस्य दीपं प्रज्वाल्य रात्रावपि पठन्ति स्म । कुलपतेर्वाल्मीकेराश्रमे व्यवस्थेयमासीत् ।—‘मागधम्’ तः

---

[1] अभि० तृतीयाङ्के त्रयोदशश्लोकानन्तरं गद्यम् ।

विन्ध्यवासा शिवा स्ताव् !

—स्वर्गीयाः कविवराः श्रीरामानन्द त्रिपाठि शर्माणः—

[भाद्रपदकृष्णाष्टम्यां भगवतः श्रीकृष्णस्य जन्मनः सहैव भगवत्याः विन्ध्यवासिन्याः दुर्गादेव्या अपि जन्म समभवदिति पुराणेषु सुप्रथितम्। अतो भगवत्योश्चरणयोः उत्तरप्रदेशस्य भूतपूर्वं मुख्यमन्त्रिणां श्रीकमलापति त्रिपाठि महाभागानां पूर्वजैः श्री रामानन्दशर्म कविवरैर्ग्रथितानि (१७४२ वैक्रमेऽब्दे) एतानि पद्यानि नितरां भावभरितानि समुल्लसन्ति । वयमेभिरेव कविवचोभिर्मातरं स प्रश्रयं स्तुमः । —**सम्पादकः**]

सच्चिद्रूपां हि केचित् प्रकृतिमथ परे चापरेऽणुस्वरूपां
प्राहुः कर्मेति केचित् क्वचिदपि च जगुर्नेति नेति स्वरूपाम् ।
यत्तत्त्वं योगिनोऽपि स्वयमिह न विदुस्तत्त्वमस्यादिवाक्यै-
स्तां वन्दे मोहकाशां त्रिभुवनजननीं विन्ध्यशैलेन्द्रवासाम् ॥ १ ॥

यस्याः कारुण्यपूर्णां दिनकर - किरणोत्फुल्ल - कह्लारदीर्घां
दृष्टिं संप्रार्थयन्ते सकलसुरगणा ब्रह्मविष्णुप्रधानाः ।
सेयं सर्वा सुरेन्द्रप्रकर - विदलनोद्दाम - गर्वादखर्वा
सर्वाभीष्टप्रदात्री त्रिभुवनजननी विन्ध्यवासा शिवा स्तात् ॥ २ ॥

सिंहस्फालोग्रलीला - नियमितहृदया निर्दया वैरिवर्गे
घण्टा-चापासि-शूलाद्यखिल - भुजलसध्देतिभिर्भासमाना ।
गर्जज्जीमूतजालोद्भट - विकट - महोदग्र - चण्डाट्टहासा
नीलाम्भोदप्रकाशा प्रभवतु सततं शर्मणे विन्ध्यवासा ॥ ३ ॥

अष्टाभिर्दोर्भि - रष्टायुध - निवहवहा सिंहपृष्ठे निषण्णा
सोल्लासैस्त्रासयन्ती रिपुगणमचिरात् काममट्टाट्टहासैः ।
नानालङ्कारपूर्णा मणिमयविलसत् - कुण्डलोल्लासिकर्णा
नीलाम्भोदालिवर्णा प्रभवतु सततं शर्मणे काऽप्यपर्णा ॥ ४ ॥

पञ्जीकृत-संख्या—एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगतगंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४९

*

अङ्कः ९

*

सम्पादकः
गो० न० वैजापुरकरः

*

सितम्बर
१९७३

*

वार्षिक-मूल्यम्
५) रूप्यकाणि

*

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

*

उदिता शारद-शोभा भुवने !

•

१. उदिता शारद-शोभा भुवने, सलिले कमले घने गगने।
घवल-जलदमाला, विलुप्त-चपला-खेला,
विषण्ण बलाका स्वच्छ-गगने, चाकक्री तृषिता नीडसदने ॥
२. उदिता शारद-शोभा भुवने, कुसुमे मधुपमाला शोभने।
समीरण-सञ्चालिता, सस्यराजि-विनमिता,
क्षेत्रे क्षेत्रे नवभाववरणे, विलसिता विराजिता पवने ॥
३. उदिता शारद-शोभा भुवने, जलहीन-मेघमाल-गगने।
मेघध्वनि-विरहिता, मयूरी रव-विरता,
हंसश्रेणी रता गीतिसाधने, कुसुम-सौरभवहे पवने ॥
४. उदिता शारद-शोभा गगने, निर्मल-तटिनी दूर-गहने !
रम्य-सितकरहासे, तारामाला-दीप्तभासे,
शून्ये शोभा यथा नीलवसने, समुत्सुका निशा विधुमिलने ॥
५. उदिता शारद-शोभा भुवने, शेफालिका प्रस्फुटिता कानने।
माल्यप्रिया विलासिनी, तरुतल-विहारिणी,
निरता कुसुमराशिचयने, अलिमाला रता मृदु-गुञ्जने ॥
६. उदिता शारद-शोभा भुवने, विहङ्ग-सङ्गीत-मुग्धपवने।
शारद-मधुरोत्सवे, जनता मुदिता भवे,
भवानी मिलिता सुतसदने, गीत-वाद्य-मुखरित-गगने ॥

—स्वर्गीयाः श्री कालीपद तर्काचार्याः

अनुक्रमः

प्रपाठकः	पत्रपुटम्	परिवेषकः
श्रीजगदम्बार्तिक्षयम्	१९३	श्री डॉ० श्रीधर भास्कर वर्णेकरः
श्रीमहर्षि-ज्ञानानन्दचरितम्	१९४	श्री स्व० विन्ध्येश्वरीप्रसाद शस्त्रिणः
उत्तरप्रदेशे संस्कृतं सङ्कटग्रस्तम्	१९५	सम्पादकीयः अग्रलेखः
ब्रह्मलीनाः श्री कृष्णबोधाश्रम स्वामिनः	१९६	सम्पादकीया टिप्पणी
लुप्यमानाः शतशः संस्कृतपाठशालाः संरक्ष्याः	१९७	श्री महामन्त्री, प्रा० सं० वि० स०
किं साकारो निराकारोपासनाया आधारः सम्भवी ?	२०१	श्री पूज्य करपात्रस्वामिनः
सद्यः फलार्पणपरेव शरन्नितान्तम्	२०२	श्री रतिनाथ झा
गीतम्	२०५	श्री उमाशङ्करशर्मा त्रिपाठी
गणेशोत्सवे विद्वदभिनन्दने	२०६	सङ्कलितम्
वैदिकाऽवैदिक-दर्शन-मीमांसोपसंहारः	२०७	श्री जगन्नाथ श्रीधरशास्त्री पदे
श्रीज्ञानानन्द-चरित-प्रशंसनम्	२०८	श्री गोपालशास्त्री दर्शनकेसरी
आद्यो वैज्ञानिकः श्रीभास्कराचार्यः	२०९	श्री भास्कर जे० जोशी
ग्रामशोभा	२११	श्री 'यमुनेशः'
[illegible]तः-संस्कृतविदुषां संस्कृते प्रयोगलाघवम्	२१२	सङ्कलितम्
अस्माकं ग्राम्या नारी	२१३	श्री यमुनेश त्रिपाठी
(१) वायुछत्रिका-कूर्दन-प्रशिक्षणम्	२१५	श्री अशोकचन्द्र गौड शास्त्री

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः ॥

४९ वर्ष] वाराणसी, भाद्रपदः, २०३० वै० : सितम्बर १९७३ ई० [९ अ ः

श्रीजगदम्बार्तिक्यम्

जयतु जयतु जगदम्बा देवी। सर्वान्तर्यामिनी शक्तिपीठवासिनी ॥ धृ० ॥

कोटिसूर्यसम-भास्वररूपिणी।
नीलाम्भोधरसमकुन्तलिनी।
फुल्लोत्पलसम-दिव्यलोचनी।
करुणामृतवर्षिणी। सर्वान्तर्यामिनी ॥१॥

शक्तिशालिनां त्वमेव शक्तिः।
भक्तिमतां हृदयस्था भक्तिः।
वीतरागिणां महाविरक्तिः।
भुक्तिमुक्तिदायिनी। सर्वान्तर्यामिनी ॥२॥

सरस्वती त्वं ज्ञानदायिनी।
लक्ष्मीरतुलितविभववर्षिणी।
महाचण्डिका शस्त्रशालिनी।
महिषासुरमर्दिनी। सर्वान्तर्यामिनी ॥३॥

त्वमन्नपूर्णा परमवत्सला।
दयामयी त्वं महामङ्गला।
स्थिरचर-लालनपालन-लीला।
सकलविश्वजननी। सर्वान्तर्यामिनी ॥४॥

हिमनग-रजतकिरीट-शोभिनी
सत्यसिन्धुमय-दिव्यमालिनी।
विन्ध्यमेखला सह्यखड्गिनी भारतभूरूपिणी योगेश्वरजननी ॥ ५ ॥

—कविवरः डॉ० श्रीधर भास्कर वर्णेकरः

पूर्वतोऽनुवृत्तम्

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

--स्वर्गीयाः श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः--

(विंशे सर्गे)

२१. क्रोडास्थली चास्ति सदैव यस्या बहिर्जगद् यच्च तमःप्रधानम् ।
आस्ते जनन्यासुरसम्पदां या सदा सदाचारविधे-विरुद्धा ॥
२२. प्रसारिता ज्ञानतमोविताना जीवान् स्वरूपाद् विमुखं नयन्ती ।
सृजत्यशेषं भ्रमरूपविश्वं सैवास्त्यविद्येति वदन्ति विज्ञाः ॥
२३. यद् भ्रान्त्यविद्याप्रभवं दुरन्तं प्रत्यूहवर्गं सकलं निरस्यत् ।
विद्यां श्रयत् सत्यनिजात्मबोधं प्रकाशयेत् तद् भुवि शिक्षणं सत् ॥
२४. धर्मस्य मोक्षस्य सुखस्य किं वाऽधर्मस्य बन्धस्य तथाप्यशान्तेः ।
महर्षिवर्याः सदसत्कृतीनामन्तःकृतिं कारणमामनन्ति ॥
२५. चित्तं मनोबुद्धिरहङ्कृतिश्च चत्वार एते हि तदीयभेदाः ।
एतान् समाश्रित्य जगत्यशेषा बोभूयते कृत्यततिः सदैव ॥
२६. शश्वन्मनोनर्तनकारि चित्तं यदस्ति संस्कारनिधानभूतम् ।
तेनैव नित्यं परिचाल्यमानं मनोऽस्ति सङ्कल्पविकल्पकर्तृ ॥
२७. निश्चायिका वृत्तिरियं तदीया या सैव बुद्धि-र्विबुधैर्विबोध्या ।
तस्याः समुन्नायनमेव यत्नात् शिक्षाविधिज्ञैः सुविधेयमास्ते ॥
२८. अहङ्कृतिर्भेदकतत्त्वरूपा स्वतन्त्रसत्तापरिदर्शिका च ।
अज्ञानबीजाङ्कुरहेतुभूता सैवास्ति सर्वापदनर्थमूला ॥
२९. यस्याः प्रभावात् परमद्वितीयं ज्ञानस्वरूपं सदनन्तमेकम् ।
प्रतीयतेऽस्यां भुवि भिन्नभिन्नं तद् रोधनं शिक्षणलक्ष्यमास्ते ॥
३०. सूक्ष्मेक्षिका - ऽऽलोचन - शालिशीलै - र्विद्वद्वरेण्यै - रवधार्यमेतत् ।
अन्तर्विभागो मनसोऽस्ति चित्तं बुद्धेरहङ्कार इतीर्यते च ॥

(क्रमशः)

सम्पादकीयम्

उत्तरप्रदेशे संस्कृतं सङ्कटग्रस्तम्

दौर्भाग्यमस्माकं यद् देशस्य स्वातन्त्र्यलाभात् पञ्चविंशतिवर्षोत्तरमपि अद्य संस्कृतशिक्षा-समुन्नयन-विषये शासनस्य प्रगतिस्तु दूरे एवास्ताम्, तस्मिन्नपि पदे तन्न स्थितं यत्र परतन्त्रताकाले आसीत्। परतन्त्रे भारते संस्कृतशिक्षा, संस्कृतज्ञानम्, संस्कृतज्ञानां समादरश्च यावान् व्यापक आसीत्, अद्य स तावानेव अल्पीयान् संवृत्तः। खेदास्पदमेतद् यदद्यतनीयाः शासकाः संस्कृतशिक्षां प्रतिगामिवृत्तिं मन्यमानाः तदीयसाङ्गरूपनिर्वहणतोऽपि किं तद्रक्षणतो विरतिं चात्मनः प्रगतेर्मानदण्डमिव मन्वते। संस्कृतानां तिरस्करणम्, दारिद्र्यमुखभान् तदीयान् अलास्वल:-प्रसादान् प्रकाशतां नेतुमद्यतनीया बहवोऽधिकारिणः परमां सभ्यतामवगच्छन्ति येषां किल शरीरं संस्कृत-शिक्षान्नतो निर्मितं पोषितञ्चास्ते। देशस्य कृते परतरमेतद् दौर्भाग्यम्।

अवश्यमेव विगतेषु वर्षेषु संस्कृतायोगः सङ्घटितः शासनेन। तेन च विविधैः प्रकारैः परीक्ष्य गवेषणमुखेन संस्कृतशिक्षायाः व्यापक-प्रचार-प्रसारस्य कृते नैके महत्त्वपूर्णाः प्रस्तावाः कृताः। तेन स्फुटमेवोक्तं यत् संस्कृतशिक्षा मूलतो गुरुकेन्द्रिता, विद्वत्केन्द्रिता चास्ते। आयोगेनानेन ये मार्मिक उपाया विषयेऽत्र संसूचितास्ते सर्वे प्रतिवेदने एव स्थिताः। केचन तादृशा उपायाः कैश्चित्प्रदेशैः समादृताः, तदनुसारं स्व-स्वप्रदेशेषु संस्कृतप्रचार-प्रमुख-साधनभूतानां शिक्षालयानां समुल्लेखाः परिष्काराश्च कृताः। स्वतन्त्र-संस्कृतनिदेशालयोऽपि सङ्घटितस्तैः। किन्तु अस्माकम् उत्तरप्रदेशः किल विषयेऽत्र स्थितिस्थापक इव दृश्यते। राजस्थानादि-सदृश-मरुभूमिष्वपि, यत्र संस्कृतविदुषां छात्राणाञ्च संख्या परिगणितैव जागर्ति, यादृशाः संस्कृतविद्यालयाः सुपरिष्कृताः समुचित-वेतनमानसंवलिताः लाभत्रयी-योजनालाभान्विताश्च दृश्यन्ते। किन्तु संस्कृतविद्या-मातृगृहरूपां वाराणसीमात्मनि धारणेन विद्वत्तासङ्कुले सर्वथा सरसे उत्तरप्रदेशे संस्कृतशिक्षास्रोतोरूपाणामेतेषां विद्यालय-महाविद्यालयानां मानवता-त्रपाकरीं दुःस्थितिं समुपेक्षां शासनकृतां दर्शं दर्शं कस्यापि सहृदयस्य चेतः सात्त्विक-रोषेण नितरां परिपूरितं भवेत्। प्रादेशिक-संस्कृत-विद्यालयाध्यापक-समित्या विषयेऽत्र प्रादेशिक-शिक्षा-सचिवेभ्यः प्रदत्तं ज्ञापनमस्माकं सन्निधे प्रेषितं यच्च अस्मिन्नेवाङ्केऽन्यत्र प्रकाशितम्। तेनैव सुस्पष्टं भवति यत् राज्यशासनस्य संस्कृतसमुन्नयनविषये कीदृशो भाव इति।

इतोऽन्यद् वयं साम्प्रतं विशुद्ध-न्यायप्रद-राष्ट्रपति-शासन - प्रतिनिधिभूत - यवनराज्यपालशासितेऽस्मिन् उत्तरप्रदेशराज्ये द्वितीय - राज्यभाषारूपेण 'उर्दू'-नामिकायाः विशेषशैल्याः प्रस्थापनस्य दुष्प्रयासं पश्यामः। प्रायो बहुत्र प्राथमिक-विद्यालयेषु उर्दू-शिक्षार्थिनां सर्वथाऽभावेऽपि सहस्रशः उर्दूशिक्षकाणां बलान्नियोजनस्यादेशं शृणुमस्तत्परिणतिञ्च सांक्रामिकीमवलोकयामः। सर्वथा पुनरेतद्विपरीतं तपस्विनां संस्कृतशिक्षकाणां सविधे पञ्चदशछात्राणां परिनिष्ठितानां सत्त्वे त्रिंशत्संख्यक-छात्रसम्पत्तेरभावं पुरस्कृत्य तेषां कृते राजकीयमनुदाननिरोधनस्य प्रयासं विलोकयामः। त्रिभाषायोजना-परिपालनेन आंग्ल-हिन्दी-

भाषयोस्तृतीया भाषा प्रदेशेऽस्मिन् प्रायः संस्कृतभाषैव बहुभिराद्रीयते स्म। अनेन उर्दूभाषायाः 'द्वितीयराज्यभाषाकरणप्रयासेन पर्यायतः संस्कृतस्य प्रदेशतः समुच्छेदस्यापि दुरभिसन्धिः साध्यते शासनेन इत्येव वक्तव्यं भवेत्। इत्थमद्य संस्कृतसीतायाः कृते उत्तरप्रदेशोऽयं प्राच्यसंस्कृतशिक्षास्रोतोरूपाणामेतेषां विद्यालयानां दृष्ट्या लङ्केव सम्पन्नो दृश्यते। उत्तरप्रदेशवास्तव्यैः संस्कृतप्रणयिभिः किमेतादृशेऽपि समये निद्रैव समाश्रीयेत ? सत्येवं ते चिरनिद्रिता एवेति जानीयुर्विवेचकाः। नो चेत्तोः सपदि उत्थातव्यम्, जागृतव्यम्, संस्कृतपरिपन्थिनां परिहरणाय योक्तव्यञ्चेत्येवास्माकं मतम्।

ब्रह्मलीना श्री कृष्णबोधाश्रमस्वामिनः

सितम्बरमासस्य नवमदिनाङ्के उत्तराम्नायज्योतिष्पीठाधीश्वराः भगवत्पाद-श्रीशङ्कराचार्याः प्रातःस्मरणीयाः श्री कृष्णबोधाश्रमस्वामिपादा अकस्माद् ब्रह्मणि लीनाः समभवन्। ज्योतिष्पीठमिदं चिरात् लुप्तप्रायमासीत्। श्रीभारतधर्ममहामण्डल - संस्थापकैः महर्षिवर्यैः श्री ज्ञानानन्द स्वामिपादैः महता प्रयासेन तत्पीठमन्विष्य तत्र च सर्वथा तदधिकारिणो ब्रह्मलीनाः श्री ब्रह्मानन्द सरस्वति स्वामिपादाः संप्रार्थ्य आचार्यरूपेण प्रतिष्ठापिताः। तेषां ब्रह्मत्वप्राप्तौ पीठस्य गौरवमालक्ष्य तत्कालीनैः वाराणसेयैः विद्वद्भिर्महात्मभिश्च श्री कृष्णबोधाश्रम स्वामिपादाः ज्योतिष्पीठ-शङ्कराचार्यत्वेन वृताः। स्वभावतो बाह्यव्यवहारपराङ्मुखैः परमसत्त्वनिष्ठैः श्री कृष्णबोधाश्रम स्वामिपादैः पदमिदं स्वीकर्तुं सुस्पष्टं निषेधितम्। किन्तु यदा तेषां पुरतः सर्वैरुक्तं यद् 'भवन्तो धर्मरक्षणायैव धृतचतुर्थाश्रमा विराजन्ते चेत्स धर्मोऽधुना विपन्नस्तत्र भवन्तं पदमिदं स्वीकृत्य स्वात्मरक्षायै प्रार्थयते', तदा कथंकथमपि नैकैर्निर्बन्धेस्तैरेतत्पदं स्वीकृतम्। स्वामिपादा एते कण्ठस्थीकृताष्टादशपुराणाः वेदव्यासप्रतिमूर्तय एव आसन्। सर्वथा निःस्पृहाः, गङ्गाजलवत्, निर्मलाः, वीतरागा अपि सांसारिक - जन - दुर्दशाद्रुतान्तःकरणाः, नियोजनव्यवस्थापन-कुशलाः अजातशत्रव इव आसन्। अनन्तश्री - करपात्रस्वामिपादानां तु ते सर्वस्वमेवासन् धर्मग्लान्यधर्माभ्युत्थान - निवृत्तिप्रयासेषु। अखिल-भारतीय - धर्मसङ्घो हि मूलत एतेषामेव सत्सङ्कल्पस्य फलम्। एतादृशानां तपःपूतानामभिनवमहर्षिणां ब्रह्मसायुज्यलाभेन कामं तेषां जीवतस्य कृतार्थता भवेत्। अस्माकं तदनुयायिनां कृते महती विपत्तिरेव समुपस्थिता। किन्तु महति खेदावसरेऽपि भगवान् किमपि आलम्बनं जीवनाधायकं स्थापयत्येव। अन्यथा तदीयो लोकः सर्वथा उच्छिद्येत। तदेवमस्माकं सौभाग्यात् तेषां रिक्तं पदमलङ्कर्तुं तपःपूताः प्रोल्लसदन्तर्बाह्यकृतयः विधर्मिपरिपीडितानामादिवासि-वनवासिनां समुद्धारकास्तत्रभवन्तः श्री स्वरूपानन्द सरस्वति स्वामिपादाः (स्वगुरोः ब्रह्मलीन ज्योतिष्पीठाधीश्वर ब्रह्मानन्द सरस्वतिपादानां प्रतिमूर्तयः) विद्वद्भिः संप्रार्थितास्तत्पदमलञ्चक्रुः। तेषां शासने सनातनधर्मरक्षणव्रतदीक्षिता वयमद्य ब्रह्मसायुज्यमुपगतानां पूर्वज्योतिष्पीठ-शङ्कराचार्याणां श्री कृष्णबोधाश्रम स्वामिपादानां चरणकमलेषु स्वकीयं श्रद्धाभावसंवलितं शब्द-सुमनाञ्जलिममुं सादरं समर्पयन्तस्तान् अमरात्मनः प्रार्थयामो यदस्मासु धर्मरक्षणविषये दृढनिष्ठाधानस्य वरः प्रदेय इति।

◆

लुप्यमानाः शतशः संस्कृतपाठशालाः संरक्ष्याः

——श्री महामन्त्री ः प्रादेशिक-संस्कृतविद्यालयाध्यापक-समितेः——

[प्रादेशिक-संस्कृतविद्यालयाध्यापक-समितेः महामन्त्रिणा आचार्य श्री गोविन्द नरहरि वैजापुरकर शास्त्रिणा प्रदेशीय-समस्त-संस्कृतविद्यालयाध्यापकानां प्रातिनिध्येन ज्ञापनमिदं प्रदेशशिक्षासचिवेभ्यः प्रहितम् ।]

१. सर्वदा भारतीय - संस्कृते - रुद्घोषं कुर्वताऽस्माकं राज्यशासनेन तस्या एव संस्कृतेर्मूलस्रोतस्विनीं संस्कृतभाषां जीवयद्भ्यः सर्वेभ्यः संस्कृतशिक्षकेभ्यः स्वतन्त्रे भारते १५ वर्षाणि यावत् केवलं ७५) मासिकवेतनं पर्याप्तं मत्वा स्वात्मनः समाधानं कृतम् । किन्तु क्रमशो वर्धमानां महर्घतां व्यापकमसन्तोषं चालक्ष्य १९६२ मितेशवीय-वत्सरतः पुनस्तेन शासनेन केवलम् १०३ विद्यालयेषु पाठयतामध्यापकानां १२०), १५०) मितां वेतनवृद्धिं कृत्वा स्वीयकर्तव्यस्य पर्यवसानमाशंसितम्—यदा किल प्रदेशे ८३० संख्यकाः संस्कृतपाठशालाः विराजन्ते, यत्र प्रायः पञ्चसहस्रसंख्यकाः संस्कृतशिक्षकाः पाठयन्ति । अर्थात् शिष्टेषु ७२७ संख्यकविद्यालयेषु पाठयद्भ्योऽध्यापकेभ्यः साम्प्रतिके भीषणतमे महर्घताकाले ७५) रूपकमात्रं मासिकवेतनं मिलति । अद्य यदा बी० टी० सी० प्रशिक्षितेभ्यः पूर्वमाध्यमिक - विद्यालयाध्यापकेभ्यो महर्घताभृतिसहितम् १८५) रूप्यकमितं मासिकवेतनं मिलति, तदा बी० ए०, एम० ए०-परीक्षा-समकक्षे आचार्यशास्त्रिकक्षे, माध्यमिकोच्चतरमाध्यमिक - समकक्षे प्रथम-मध्यमकक्षे पाठयद्भ्योऽध्यापकेभ्य. ७५) रूप्यकमितं वेतनमिदं शासनस्य 'समाजवादि-समाजरचना'-नीतेर्नग्नचित्रं प्रदर्शयति ।

२. शासनेन सुस्पष्टमवगन्तव्यं यत् संस्कृताध्यापकानामुपरि तत् न कमपि उपकारं करोति । प्रत्युत संस्कृतशिक्षका एव तस्मिन् राष्ट्रियमुपकारं कुर्वन्ति । यतो हि कस्यापि स्वतन्त्रराष्ट्रस्य कृते स्वीयस्वतन्त्र-सांस्कृतिक-राष्ट्रियशिक्षारूपेण संस्कृतं तस्मै सहज-सुलभम् । तस्यैव शिक्षामखण्डव्रतरूपेण परिचालयन्तः संस्कृत-शिक्षकाः शासनस्य स्वतन्त्रराष्ट्रियास्तित्वभवनस्य मूलाधारभूताः । इतोऽतिरिक्तम् अद्यावधि नैके राजानो महाराजानः भूस्वामिनश्च स्वीयधनेन राष्ट्रियामिमां सम्पदं रक्षन्त आसन् । किन्तु इदानीं शासनेन तेषां सर्वेषां विलयनं कृत्वा तदीया सर्वा सम्पत्तिः स्वहस्तगता कृता । सत्येवं तस्य नैतिकं कर्तव्यं यत् तैः परिचालितामिमां राष्ट्रियशिक्षासेवां तथैव निर्वहेयुः । अस्यां स्थितौ संस्कृतेन सह शासनस्यायं घोरतमोऽसमताभावो नितरां सुस्पष्टो भूत्वा तटस्थान् परिपीडयति ।

३. संस्कृतशिक्षकाः स्वभावतोऽल्पसन्तोषिनः । अतः एवैते घोरतमामिमाम् असमतां सहन्त आसन् । पक्षान्तरे माध्यमिक-शिक्षकवत् नैते स्वभावतः तथाकथित-'कर्मकर-सङ्घ' (ट्रेड-यूनियन) व्यसनिनः । अत एव शासनमेतेषां सौजन्यस्य दुरुपयोगं करोति । तथापि यथाकथञ्चित् समस्त संस्कृतसङ्घटनानि सम्मेल्य सङ्घटितया प्रादेशिक-संस्कृतविद्यालयाध्यापक-समित्या प्रश्नोऽयं विगते वर्षे नवसङ्घटितस्य वेतनायोगस्य पुरतो महता सङ्कोचेन साहसेन च समुपस्थापितः । समितेर्महामन्त्रिणः एतद्विषयकैस्तर्कैः क्षणं यावत् वेतनायोगोऽपि संस्कृताध्यापकानामनया दयनीयोपेक्षया विचलितोऽभवत् । फलतस्तेन सामान्यसंस्कृताध्याप-

कस्य वेतनं ७५) रूप्यकतः संवर्ध्यं १७५) रूप्यकमितं घोषितं स्वीये प्रतिवेदने । एतदर्थं सोऽस्माकं धन्यवादभाजनम् ।

४. किन्तु वेतनायोगस्य सर्वाऽपीयं सद्भावना तदा पूर्णतो वन्ध्या समभवत् यदा तेन प्रतिवेदने संस्कृताध्यापकानां कृते प्रस्तावितेषु वेतनक्रमेषु सर्वत्र संख्याया निर्बन्धः स्थापितः । सहैव सः प्रतिवेदनेऽस्मिन् बी० ए०, एम० ए० परीक्षा-समकक्षे आचार्य-शास्त्रिकक्षे पाठयद्भ्योऽपि प्राध्यापकेभ्यः माध्यमिक-शिक्षास्तरीयमेव वेतनक्रमं समुद्धुष्य समकक्षता-सम्बन्धिन्याः राजाज्ञायाः स्वीययैव लेखन्या निरस्तीकरणस्य दुस्साहसमपि समाचरति, यद्धि कदाचित् केनापि शासनबाह्यजनेन कृतं स्यात्, शासनं कदापि सोढुं न प्रभवेत् । कस्यचन शासकीयस्य आयोगस्य इत्थं शासकीय-राजाज्ञा-समुल्लङ्घनं नूनमैतिहासिकी एव घटना उच्येत । न्यायतुलायामेतत् कथमपि आरोहणाय न प्रभवेत् । इत्थमयं 'समानकार्याय समान-वेतन' - रूपस्य समाजवादि - शासनस्य मूलसिद्धान्तस्यैव गलग्रहमाचरति ।

५. संख्याया निर्बन्धेनानेन वेतनायोगस्य प्रतिवेदनमिदं उत्तरमध्यमान्तं पूर्वमध्यमान्तं च स्वीकृतेभ्यो विद्यालयेभ्यो व्यावहारिकरूपेण न जातु रक्षकम्, प्रत्युत भक्षकमेव सिद्ध्यति । अन्वेषणेन निष्कर्षोऽयमधिगम्यते यद् उपर्युक्त-कक्षाद्वये प्रतिवर्षं ३०-३० संख्यक-परीक्षार्थिछात्रसम्पत्तिमन्तो विद्यालयाः निखिले प्रदेशे केवलं पञ्चाशत्, पञ्चपञ्चाशद् वा भवेयुः । उपर्युक्ते क-ख-वर्गद्वये परिगणितैः १०३ संख्यकैः सह एतादृशानां वर्गीकृतानां विद्यालयानां संख्या १५८ भवति । प्रादेशिकेषु ८३० संस्कृतविद्यालयेषु तस्या व्यवकलनेन ६७२ संख्यकाः संस्कृतविद्यालयाः पुनरपि अवर्गीकृताः सन्तः ७५) मासिकवेतनभागिनः स्वीयमन्धकारमयं भविष्यमाकलय्य तथैव नामशेषतां गच्छेयुः, यथा १५०० मिताः पूर्वतनीयाः प्रादेशिकाः संस्कृतविद्यालयाः क्रमशो हृसन्तोऽद्य ८३० संख्यासु सम्प्राप्ताः ।

६. ज्ञातव्यमेतद् यत् संस्कृतस्य प्राच्यशिक्षा किल न मुण्डगणनायां भ्रमरवत् शत-शत-पुस्तकानां पल्लवग्राहिपाण्डित्ये तथाकथितायाम् 'अपटू-डेट' वेषभूषायाम् वा निर्भरा । अर्धजरतीयानां संमर्दमनायोज्य परिगणितानां निर्माणमेव संस्कृतस्य स्वीया संस्कृतिः ।

दृशाऽनया 'जीविका - साधन'स्य प्रकारविशेषरूपेण प्राच्यसंस्कृतशिक्षया सह आधुनिकविषयाणां भारवृद्धिरपि संस्कृतस्य प्रौढपाण्डित्यदृष्ट्या न तावती हितावहा । तथापि यदा शासनेन ते पाठ्यक्रमे सन्निवेशितास्तदा तस्येदमपि अनुपेक्ष्यं कर्तव्यं भवति यत्तेषां विषयाणां पाठयितृणामध्यापकानां कृतेऽपि समुचितवेतनादिव्यवस्था करणीयेति । खेदस्यायं विषयो यत् शासनं तेषां कृते केवलम् ७५) रूप्यकतः २००) रूप्यकात्मकं, १५०) रूप्यकेभ्यः ३५०) रूप्यकात्मकं वा वेतनस्तरं स्वीकुरुते, यदा हि राजाज्ञया स्वीकृतां बी० ए० समकक्षां शास्त्रिकक्षां यावत् ते पाठयन्ति । नैतावदेव, तेभ्यो विभागाध्यक्षपदमपि नूनं दातव्यम् । तदैव समुद्दिष्टं सफलं स्यात् ।

इत्थं सुस्पष्टमिदं यत् शुद्धसंस्कृतशिक्षायाः कृते शासनस्य न किमपि प्रोत्साहनम् । अत एव अगतिगतिच्छात्रोऽध्ययनवासनाप्रपूर्त्यै संस्कृतमधीते । अन्यच्च, तेभ्यः पणकमपि शिक्षाशुल्कं न गृह्यते, प्रत्युत तेभ्यः छात्रवृत्ति-छात्रावासादिसुविधा अपि प्रदेया भवन्ति । तदैव ते संस्कृतविद्यालयेषु पठनाय समागच्छन्ति । एवंस्थितौ अध्यापकेभ्योऽपि कथंकथमपि ७५) रूप्यकमासिकदानं कुर्वन्तो विद्यालयाः कुत एतावतीं वृत्ति प्रदाय उत्तरमध्यमायाः ३० संख्यकान् पूर्वमध्यमायाश्च ३० संख्यकान् छात्रान् सङ्घट्टयेयुः ? न्यूनतमा छात्रवृत्तिरेतेभ्यः २०) रूप्यकाणि, २५) रूप्यकाणि वा नूनं प्रदेयैव । सत्येवं वार्षिकी ६००), ७५०) रूप्यकमिता

वा धनराशिः कुतस्तैरासाद्येत ? अतः ५ धाराया आरम्भे यथोक्तं तथैव संख्याया निर्बन्धने तृतीय-चतुर्थश्रेणिकानां विद्यालयानां कृते प्रतिवेदनमिदं न रक्षकम्, अपि तु भक्षकमेव सिद्ध्यति। नैतावदेव, प्रथम-द्वितीयश्रेणिकानां विद्यालयानामपि कृते संख्याया अयमाग्रहो नूनमात्मघातकः। अतः सपदि परित्याज्योऽयम्।

७. तथापि शासनं संख्यामोहेनैव ग्रस्तं चेत् असमताविषये विरोधं प्रदर्शयन्तोऽपि वयं 'सिद्धस्य गतिश्चिन्तनीया' इति न्यायमनुसृत्य वेतनमानीयस्तरचतुष्टयस्य वर्गीकरणस्य व्यावहारिकमेकं प्रकारं प्रस्तोतयामः।

चतुर्विधोऽप्ययं वेतनमानः केवलं त्रिप्रकारेष्वेव विद्यालयेषु विभजनीयः। यद्यपि स्वाभाविकरूपेण प्राचीनकाले संस्कृतविद्यालयाः कक्षाद्वये विभक्ता आसन्—१. प्रथमा-मध्यमा, २. उपाधिः (६ वर्षाणि) च। प्रथमकक्षायां तस्य तस्य विषयस्य मूलभूतं ज्ञानं दीयते स्म चेत् द्वितीयकक्षायां तत्र विवेचनात्मक ऊहापोहो जायते स्म। तथापि प्रगतिदृष्ट्याऽद्य तेषां कक्षात्रये विभजनं सुविधाजनकं स्यात्—(१) आचार्यान्तपरीक्षामान्या आचार्य-शास्त्रिपरीक्षार्थिसम्मिलिताः विंशतिः (२०) पञ्चविंशतिर्वा परीक्षार्थिसौलभ्यकारिणो विद्यालयाः। (२) शास्त्रिपर्यन्तं मान्याः प्रथम-मध्यम-शास्त्रिपरीक्षाणां सम्मिलितान् ३० छात्रान् प्रदातारः। अनयोः कक्षयोर्विद्यालयेषु प्रथमकक्षीयविद्यालयेभ्यः प्रथमस्तरीणो वेतनमानः, द्वितीयकक्षीयविद्यालयेभ्यश्च द्वितीयस्तरीणो वेतनमानः प्रदेयः। (३) उत्तरमध्यमपरीक्षान्तमान्याः प्रथम-पूर्वमध्यमोत्तरमध्यमपरीक्षाणां १५ परीक्षार्थिनां प्रदातारो विद्यालया अस्यां कक्षायां निवेशयेयुः, येषां कृते तृतीय-चतुर्थस्तरीणौ वेतनमानौ विभज्य प्रदेयौ।

एतेषां तृतीयकक्षीयविद्यालयानां कृते सुस्पष्टासुविधेयं भाव्या यत् कस्मिंश्चिद् विद्यालये ७. कुत्रचन ५. कुत्रापि च ३ परीक्षार्थिनः स्युस्तदा तेषां विद्यालयानां काममान्तरिकं शासनं स्वतन्त्रं स्यात्, परं शासकीयानुदानसन्दर्भे त्रयाणामपि विद्यालयानामेकं संस्थानं भाव्यम्। अत्र ७ संख्यक (बहुसंख्यक) छात्राणां विद्यालयेन षाण्मासिकीं परीक्षां गृहीत्वा शिष्टानां (अल्पानाम्, अल्पतमानाम् च) विद्यालयानां छात्राणां परीक्षावेदनपत्राणि स्वयमेवाग्रसारितानि कर्तव्यानि। एतेषु तृतीत-चतुर्थस्तरीयविद्यालयेषु सर्वेषु तृतीय-चतुर्थस्तरीयवेतनमानवतां पदानां वितरणं किल प्रादेशिक-संस्कृतविद्यालय-निरीक्षकाणां विवेकेन भवेत्। इत्थं यत्र त्रयः (३) पञ्चशो (५) वा छात्राः स्युस्तत्रस्था अध्यापका अपि वर्गीकरणनववेतनक्रमादिलाभैर्वञ्चिता न भवेयुः। अग्रे यदा ते स्वतन्त्ररूपेण १५ परीक्ष्यछात्रायां सौलभ्यं कुर्युस्तदा स्वतन्त्रवर्गीकरणेनापि लाभान्विताः स्युः। विश्वसिमो वयं यत् निकटभविष्ये अधिकतरा विद्यालया अमुं १५ संख्यकनिर्बन्धं प्रपूर्य स्वतन्त्रवर्गीकरणेनापि लाभान्विता भविष्यन्तीति। अद्य किलायमेव व्यावहारिक उपायः।

८. सहैव प्रथम-द्वितीयस्तरीयविद्यालयेष्वपि अस्मदुक्तसंख्यानिर्बन्धायापि पञ्चवर्षीया, त्रैवार्षिकी वा अवधिरवश्यं देया। अत्रान्तर भूयशो विद्यालया निर्बन्धममुं प्रपूरयितुं प्रभविष्यन्ति। एवञ्च अद्यावधि वर्गीकृताः १०३ क-ख-वर्गीया विद्यालया यथास्थित्यामेव स्थापनीयाः। काममितः परं नवमान्यताप्रसङ्गे संख्याया अस्या निर्बन्धः कर्तुं शक्यते। किन्तु प्रतिवेदने प्रथमस्तरीण-वेतनमानस्य कृते केवलमाचार्यपरीक्षार्थीनां त्रिंशतिसंख्यायाः कृतो निर्बन्धः अङ्गुलिगण्यानामेव तादृशस्तरप्रदानस्य दुरभिसन्धिग्रस्त एव वक्तुं शक्येत।

९. वेतनायोगेन संस्कृतविद्यालयेभ्यः कृते लिपिकस्य, पुस्तकालयाध्यक्षस्य, भृत्यानां वा पदानां या संस्तुतिः कृता, तानि पदानि नववेतनमान-प्रवर्तन-समकालमेव कार्यरूपतां नेयानि। तदैव विद्यालयाः शासकेभ्यः समुचितं शुद्धं विवरणं निश्चितसमये प्रदातुं पारयेयुः। अत्र उपेक्षया एतत्सम्बद्धानां जायमानानाम् असङ्गतीनां दूषणं शासनपक्षे एव भवेत्।

१०. नवीनवेतनक्रम-कार्यान्वयनेन सहैव सर्वेभ्यस्त्रिविधेभ्यो विद्यालयेभ्यस्तत्र पाठयद्भ्यः, सर्वेभ्यः संस्कृताध्यापकेभ्यश्च अविलम्बं लाभत्रयी-योजनाऽपि कार्यान्वयीकरणीया। विषयेऽत्र उत्तरप्रदेश विधान-सभायां २२-३-७२ दिनाङ्के प्रादेशिक - मुख्यमन्त्रिकृतं समुद्घोषणं नूनमवधेयम्।

११. संस्कृतशिक्षायाः कृते 'स्वतन्त्र-संस्कृतनिदेशालय - स्थापनमपि अस्माकं प्रस्तावेषु प्रमुखतमस्तीव्रतमश्च प्रस्तावः। तदैव संस्कृताध्यापकानां सुख-दुःखानि प्रत्यक्षं शासनपर्यन्तं समुपस्थापितानि भवेयुः, शासनस्य तद्विषयिण्याः सद्भावनाया लाभश्च संस्कृताध्यापकैरशेषतो लभ्येत। सन्दर्भेऽस्मिन् शासनेन संस्कृतशिक्षोपनिदेशकपदं यन्नवीनं परिचालितं तत्र प्राच्यविद्यायाः प्रौढविदुषोऽनुभविनः शासकस्य नियोजनेन स्वतन्त्रनिदेशालयस्य कथञ्चित् तात्कालिकी पूर्तिर्भवितुं शक्नोति। किन्त्वद्य पदेऽस्मिन् नियुक्तानां महानुभावानां विषये प्राच्यविद्याप्रौढज्ञानस्य कथैव का, संस्कृतविषये एम० ए० परीक्षाऽपि तैर्न समुत्तीर्णा। ते किल विज्ञानविषये एम० ए० समुत्तीर्णाः। अस्य स्वाभाविकपरिणामरूपेण उत्तरदायिव्यक्तीनां पुरतस्तैः संस्कृतविद्यालयानां विषये समुद्भावितान् उद्गारानालक्ष्य इदं पदं संस्कृताध्यापकानां हिताय नैव स्यात्, बाधकमपि भवितुं शक्नोति। अतः पदेऽस्मिन् सपदि प्रौढप्राच्यविद्वान् अनुभवी प्रशासक एव स्थापनीय इति सर्वेषां संस्कृताध्यापकानां सुनिर्धारितं मतम्। ●

सद्यः फलार्पणपरेव शरन्नितान्तम्

(१)

उद्दाम - यौवन - विवर्धित - कामभाया-
जायां पयोधिनृपतेरपि कान्तिहीनाम्।
मर्यादया विरहितामहितां प्रजानां
सद्यो नियन्त्रयति धन्यशरन्नितान्तम्॥

(२)

वर्षासु हर्षभर - निर्भर - जातवेगा-
मुन्मादिनीमिव विलेपितगाढपङ्काम्।
कूलङ्कषामपि नियम्य विनिर्मलाङ्गीं
गाङ्गीं श्रियं वितनुतेऽद्य शरन्नितान्तम्॥

(३)

सान्द्राम्बुदोन्नत - घटावृत - मित्रवृत्तं
ज्ञात्वा मरालकुलशोभमिलाङ्गणाच्च।
श्यामं घनं द्रुतमतो विनिहन्तुकामा
सज्जीकरोति धनुरद्य शरन्नितान्तम्॥

(४)

वर्षातपाद्यसह - दुःखशतानि मूर्ध्ना
धृत्वा कृषीवलकुलं कृषिकर्मसक्तम्।
धान्यैः समेधयति सम्प्रति शारदीयैः
सद्यः फलार्पणपरेव शरन्नितान्तम्॥

(५)

पद्म - प्रसून - मकरन्द - कदम्बितश्रीः
शेफालिका - कुसुम - सौरभ - संभृतापि।
भानुं दिवा कुमुदबान्धवमप्यमन्दं
रात्रौ प्रसादयति किन्न शरन्नितान्तम्॥

(६)

सन्तर्पयत्यथ पितॄनथ चाम्बिकायाः
पूजोत्सवं वितनुते जनहर्षहेतुम्।
लक्ष्मीं समर्चयति दीपकमालिकाभि-
रामोदयत्यथ नरं च शरन्नितान्तम्॥

—कविवरः श्री रतिनाथ झा—

किं साकारो निराकारोपासनाया आधारः सम्भवो ?

--अनन्तश्री करपात्रस्वामिपादाः--

[भारतधर्म-महामण्डलद्वारा तदीये श्रीगायत्रीमन्दिरे समायोजिते ऐषमे श्रीकृष्णजन्माष्टमी-महोत्सवावसरे अनन्तश्री करपात्रस्वामिपादानां शुभागमनं प्रवचनञ्च समभूत् । प्रवचनात्पूर्वं महामण्डल - गौरवविषये तैरुक्तम्—'अतितरां पवित्रमैतिहासिकञ्चेदं स्थलम् । सत्यसनातनधर्मस्य प्रचार-प्रसाराय संस्थानेनानेन महान्ति कार्याणि सम्पादितानि सन्ति ।' तदनन्तरं पूज्यपादैः स्वामिवर्यैः भगवतः श्रीकृष्णचन्द्रस्य प्राकट्यमहोत्सवपर्वविषये निम्नलिखितं प्रवचनं कृतम् ।]

नन्दनन्दन - श्रीकृष्णरूपेण परमानन्दकन्दस्य सच्चिदानन्दस्य आविर्भावः समभवत् । ग्रहीतृभिस्तल्लाभो गृहीतः, अग्रहीताराश्च ततो वञ्चिताः । दुर्योधनः, युधिष्ठिरः, अर्जुनश्चेति सर्वेऽपि भगवतो दर्शनं कुर्वन्त आसन् । किन्तु पुराणमेव साक्षी यत् कैस्तल्लाभः समासादितः ? वस्तुतो भगवतो मिलने नाधिक्यं वैशिष्ट्यम् । वैशिष्ट्यं पुनस्तस्मिन् प्रेमाधाने एव निहितम् । भगवतो मिलनेऽपि प्रेम नाविर्भूतं चेत्, तन्मिलनं मुधैव जायते । दुर्योधनस्य किल एतादृश्येव स्थितिः । किन्तु प्रेम आविर्भूतं चेत् सर्वमेव शोभनम् । अर्जुनस्तेनैव प्रेरितः कथयति—

स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ।

आसीद् गोपाङ्गनानाम् उत्कटं प्रेमदर्शनम् ! तद्धि न वर्णनस्य, प्रत्युत अनुभवस्यैव विषयम् । तासामुच्चतमाया मानसिकताया दर्शनं भक्तवरेण उद्धवेन कृतम् । परावृत्य स भगवन्तमाह—'भगवन् ! भवन्तं करुणावरुणालयं मन्यमान आसम् । किन्तु व्रजयात्रया मह्यं भवान् अतितरां निष्ठुरः प्रतीयते । तासां गोपगोपीनां तदद्भुतं प्रेम विहाय कथङ्कारं मथुरा भवते रोचते ?' इति

भगवान् प्रावोचत्—'उद्धव ! त्वया तत्त्वमेव न ज्ञातम्, यदर्थं मया त्वं प्रेषितवानसि । वस्तुतस्तासां मम च सम्बन्धो 'नन्ददास'-शब्देषु तरङ्गवारि ज्यों वर्तते । अर्थात् जल-तरङ्गयोरिव नौ सम्बन्धः । ताः किल अन्तःकरणेषु रोम-रोमेषु कृष्णचन्द्रं परमात्मानमनुभवन्ति । त्वया वियोगानुभव एव किमर्थं कथं वा कृतः ? तत्र मम निवसनमनुपस्थितिर्वा मुधैव । ताः नूनं मत्सन्निधानम्, आत्यन्तिकं सामीप्यं वा समनुभवन्ति । प्रेमाभावे सन्निहितमपि दूरतरं भवति । प्रेमानुभूतौ विरहः कुतः ?' इति ।

रासलीलाप्रसङ्गं प्रस्तुत्य स्वामिपादैरुक्तम्—'रासलीला किल नित्यलीला । सा हि प्रतिपलं प्रतिक्षणञ्च प्रचलति, न तु कादाचित्की । लीलानायको ललितललामो भगवान् श्यामसुन्दरो नित्यः । तेषां प्रमी नित्यः । ततस्तस्य रासस्य महारासस्य वा विरामः कुतः ? अविरतमश्रान्तञ्च स प्रचलत्येव । स हि रसराजो यमनुगृह्णाति, स एव तमनुभवति ।

भारतदेशस्य परमं सौभाग्यं यदत्र भगवान् स्वयमेव समायाति । अन्यत्र स प्रेषितं दूतं प्रेषयति । कुत्रचन पुत्रं प्रेषयति, परमत्र स्वयमेव समायाति । तस्य विषये साकारता-निराकारतयोस्तर्को व्यर्थः । कामं केऽपि किमपि तर्कयन्तु । जीवोऽपि निराकार एव । तथापि स साकारः शरीरवान् भवत्येव । सांख्यदृष्टाः पुरुषा अनन्ताः । नैयायिक-वैशेषिकौ ज्ञानानुरागविशिष्टं परमात्मानमभ्युपगच्छन्त्येव । द्वैत-द्वैताद्वैत-विशिष्टाद्वैत-शुद्धाद्वैतवादिनः शैवाश्च आत्मानमणुपरिमाणं मन्यन्ते एव ।

बालाग्रशतभागस्य शतधा कल्पितस्य च अणुपरिमाणतां विचारय, प्रत्येकदृष्ट्या तस्य अणुत्वं सिद्धमेव। निराकारत्वेऽपि जीवो अनन्तानन्तान् देहान् धारयति चेत् भगवता परात्पर-परमात्मना देहो धार्यते, इत्यत्र किन्नाम विस्मयास्पदम् ? का नाम तेन महती आपत्तिः स्यात् ? तत्र तर्कस्यावसर एव कः ? जीवः स्वात्मदेहं स्वयमेव न निर्माति। यद्येतत् तदधीनश्चेत् अस्थिमांसमयं तं कथं निर्मीयात् ? स्वर्णमयं वज्रमयं मौक्तिक-विद्रुमादिमयं वा देहं किमिति न निर्मीयात्, यो हि अतितरां द्युतिमान् भवति ? अतः सुस्पष्टं यद् देहनिर्माणं न जीवाधीनम्। येन किल अनन्तकोटि-ब्रह्माण्डानि रचितानि तेनैवेदं शरीरं निर्मितम्। तत्र च विषमतायाः भेदभावस्य च प्रश्न एव न परिस्फुरति। देहस्य कुरूपता सुरूपता वा न तदिच्छाकल्पिता। नूनमेतत् जीवस्य कर्माधीनमेव। भक्तवरेण तुलसीदासेनाप्युक्तम्—

कर्म प्रधान बिस्व करि राखा।
जो अस करे सो तस फल चाखा॥

तात्पर्यमेतद् यद् भगवानेव मानव-दानव-कीट-पतङ्गादि-देहान् प्रददाति, परं तत्प्रदानं नूनमस्माकं कर्माधीनमेव जायते। इत्थं अनन्तब्रह्माण्डनायकः किल अनन्तानन्तब्रह्माण्डानि तदन्तर्गतांश्च अनन्तान् प्राणिनो निर्माति। सत्येवं तेन आत्मनोऽपि देहः कल्पितश्चेत् किमनुपपन्नम् ? एवञ्च जीवोऽपि देहवान्, भगवानपि देहवान् वक्तव्यः।

वेदनारायणोऽपि एतदनुमनुते—**नमस्ते रुद्रमन्यवे··· इषवे नमः। नमो हिरण्यबाहवे** इति। देहाभावे मन्युः क्रोधो वा कथम् ? तस्य शराः कुत्र तिष्ठेयुः ? तस्य हिरण्यबाहुः कथं नमस्कार्यो भवेत् ? वयं तु ब्राह्मणभागम्, उपनिषद्भागञ्चापि वेदमभ्युपगच्छामः। किन्तु यैस्तौ वेदभागत्वेन नानुमन्येते, तेषां मतेऽपि भगवतो देहवत्त्वं सिद्धमेव। सत्येवं स भगवान् निराकारोऽपि साकारः साकारोऽपि निराकारः सिद्ध्यति। वस्तुतस्तस्य साकारो विग्रहो वरेण्य एव। श्रुतिरपि आह—**अकायमस्नाविरमव्रणम्···** इत्यादि। देहाभावे व्रणस्य कल्पना कुतः ? स्नायूनां कल्पनायाः कोऽभिप्रायः ? कायेऽसति **'अकाय'**स्य कोऽर्थः ? वस्तुतोऽकायेऽपि स अकाय एव। नञ्-समासोऽत्र वर्तते। अत्र नञ् स्वभावतो यत् सम्बन्धिनः स्वभावं द्योतयति। अर्थात् नञो हि नञर्थसम्बद्धस्य स्वभावं बोधयति। असति बाधके नञोऽभावार्थकत्वम्। सति बाधके च तदभावः। यथा **'अनुदरी कन्या'** इत्यत्र प्रत्यक्षबाधात् 'कृशोदरी' इत्येव **'अनुदरी'**-त्यस्यार्थः। अत्र नञोऽल्पार्थकत्वम्। शास्त्रेषु नञः षडर्था उक्ताः। यथा—

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥

अत एव 'अधर्म' इत्यस्य न धर्माभावोऽर्थः, अपि तु धर्मविरुद्धत्वमेव।

इत्थं सच्चिदानन्दघनस्य साकारविग्रहग्रहणे न किमपि बाधकम्। निराकारः साकारो भवितुं शक्नोति। उपनिषत्सु उच्यते—**अद्भ्यः पृथिवी समुपजायते।** जलं किल निर्गन्धम्, ततो गन्धवत्याः पृथिव्याः समुत्पत्तिः। वायोरग्निः वायुतस्तेजसः समुत्पत्तिरुच्यते। वायुः किल नीरूपः, तेन च रूपवतस्तेजस उत्पत्तिः। अग्नेरापः—नीरसेन तेजसा रसवतो जलस्य समुत्पत्तिः। आकाशाद् वायुः—निस्स्पर्शाद् आकाशात् स्पर्शवतो वायोरुत्पत्तिः। अत एवात्र अभावरूपा निराकारतैव साकारतायाः उपादानम्। **अजायमानो बहुधा व्यजायत**—पृथिव्यादिरूपेण, अहंतत्त्वादिरूपेण, जगद्रूपेण अजो अरूपोऽपि रामकृष्णरूपेण साकारविग्रहवान् भवति।। यशोदायाः मणिकुट्टिम-प्राङ्गणे वेदान्तसिद्धान्तो नृत्यति। अयमेव प्राकट्यमहोत्सवस्य तत्त्ववादः। सत्यसनातन-धर्मस्य सुनिश्चितोऽयं राद्धान्तः।

भगवतो निर्गुण-निराकारात्मकस्य, सगुणसाकारात्मकस्य सगुण-निराकारात्मकस्य च त्रिविधस्य ब्रह्मरूपस्य वर्णनं कुर्वन् गोस्वामितुलसीदासः प्राह—

व्यापक ब्रह्म निरंजन, निर्गुन बिगत बिनोद ।
सो अज प्रेम भगतिबस कौसल्याके गोद ॥

× × ×

राम ब्रह्म परमारथ रूपा ।
अबिगत अलख अनादि अनूपा ॥
सकल बिकार रहित गतभेदा ।
कहि नित नेति निरूपहि बेदा ॥
निर्गुण सगुण बिषम समरूपम् ।
ज्ञानगिरा गोतीत - मनूपम् ॥
अमल - मखिल - मनवद्य - मपारम् ।
नौमि राम भंजन - महिभारम् ॥

अत्र गोस्वामिपादैः सिद्धान्तत्रयस्य समन्वयः कृतः। त्रिविधमपि ब्रह्मरूपमेकया दृशा दृष्टम् । अत्र श्रौतस्मार्तकर्माणि, ज्ञानम्, उपासना च—सर्वमेव सार्थकतां भजते । शङ्करवन्दिताङ्घ्रिदण्डस्य भगवतो गुणगानेन वस्तुतो वाणी स्वार्थसमन्विता जायते । अत एवायम् अजन्मा, अरूपः, अबिगतगतिः गो-गिरातीतः, अलक्षः, अनादिः, अरूपश्च रूपं धृत्वा साकारतां परिणमते चेतसोऽयं तदीयोऽनुग्रह एव ।

वैदिकी शाण्डिल्यविद्या दहरोपासना सगुणोपासनारूपैव । अवान्तरतात्पर्यदृशा विचार्यमाणे स्फुटीभवेदिदम् । अधिकारिणां निस्तारस्तु तत्तन्मार्गेण जायते । किन्तु सगुण-साकाररूपं परिगृह्य भगवता पुनः साधारणजना अनुगृहीता एव ।

नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतः प्रभो ।

इत्यत्र नृणामिति सामान्यजनस्यैव वाचकम् । अव्ययस्याप्रमेयस्य इत्यादिना अव्ययाऽप्रमेयस्य परमात्मनः परानुकम्पाया एव आकलनं कृतम् । दुर्गासप्तशत्यामुच्यते—

'नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ।'
'उत्पन्नेति तदा लोके सा नित्याऽप्यभिधीयते ॥'

अत्र पराम्बाया अनुकम्पाया एव समुल्लेखः ।

एवं त्वयि नान्यथेतो न कर्म लिप्यते नरे इत्यनेन श्रुतिः सूचयति यत् नरशरीराभिमानिनि प्राणभृति न कर्मणो लेपः । अतः स कर्तव्यबुद्ध्यैव सर्वं कर्म कुर्वन् जिजीविषेत् शतं समाः । एतेषामेव नरशरीराभिमानवताम् अबोधग्रस्तानां जीवानां समुद्धारायैव भगवानवतृतः । तमेव परमानुग्रहमनुभवत ।

तत्रापीदं काशीधाम । अत्र किल भगवान् विश्वनाथो मोक्षस्य अन्नसत्रमेव परिचालयति । मोक्षस्य सत्रमिदं शाश्वतं प्रचलति । अनुग्रहस्यास्य महनीयताया महानुभूत्या किमिति लाभान्विता न भवन्ति भवन्तः ? तर्कणानेन किं स्याद् यत् "मोक्षस्तु कर्मोपासनज्ञानाभ्यासेन जायते; नियमोऽयं यत् आसन-प्राणायाम-ध्यान-धारणा - समाधिसिद्धावेव मोक्षलाभः ; श्रवण - मनन-निदिध्यासनेनायं लभ्यते ; एतदर्थं तीर्थयात्राव्रतादेरनिर्वार्यता च । सत्येवं कथङ्कारं मोक्षसत्रं प्रचलेत् ?" इति । अरे ! यदि नाम कामयेत स तत्क्षणं मोक्षाय प्रभवति । स हि परमपुरुषः परमेश्वरः कर्तुमकर्तुमन्यथा कर्तुं सर्वसमर्थोऽस्ति ।

अद्वैतवादिनोऽपि एवमेव मन्वते । यो हि सङ्कल्पमात्रेण अनन्तकोटि-ब्रह्माण्डानि निर्मातुं प्रभवति, स किं सङ्कल्पमात्रेण मोक्षस्य सृजनं पालनं संहारं वा न कर्तुं शक्नुयात् ? यदि स उच्यते—'इदमिदानीम् उत्पादयितव्यम्, इदमिदानीं पालयितव्यम्, इदानीं सर्वे जना मोचयितव्याश्चेत् को नाम तं निरुद्ध्येत ? सत्येवं 'काश्यां मरणान्मुक्तिरि'त्यत्र कुतस्तर्कस्य प्रसरः ? मोक्षभाण्डागाररूपेण तेन काशी किल निर्वाचिता । बालक्रीडायै गोकुलं निर्वाचितम् । रासक्रीडायै वृन्दावनस्य पुलिनप्रदेश एकान्तो ज्योत्स्नामयो वेला च निर्धारिता । अवताराय कारागारो निर्वाचितः ।

सत्येवं योजनाया अस्या नियोजनविषये, तत्प्रबन्धादिविषये त्वया कथं हस्तक्षेपः करणीयो भवेत् ? अतः केवलं क्षेत्रे भुनक्तु, कैवल्यं चासादयतु। अन्ततः सर्वेभ्यः कैवल्यं मिलत्येव।

एवञ्च सुस्पष्टमेतद् यद्भगवता प्राणिनां कल्याणायैव अवतारस्य व्यवस्था कृता। स वदति—यान्ति तन्मयतां हि ते। स हि परमेश्वरस्तु निवासः शरणं सुहृद्, गतिर्भर्ता प्रभुः साक्षी सर्वमप्यास्ते। भक्तोऽप्यनुभवति—मोहि तोहि नातो अनेक मानिये जो भावै। कामं तेन सह कामस्य क्रोधस्य भयस्य स्नेहस्य ऐश्वर्यस्य वा कस्यापि सम्बन्धस्य अनुभूतिं कुर्वन्तु। केनापि प्रकारेण तेन सह भावसम्बन्धं योजयत। जीव हौं तू ब्रह्म तू ठाकुर हौं चेरो। जगन्निवासस्य निवासभूता देवकी भगवतोऽनुग्रहेण ब्रह्मणो माता समभवत्। कंसः शिशुपालश्च भययुक्तौ अभवताम्। गच्छन् तिष्ठन् स्वपन् भुञ्जन् श्रीकृष्णस्तस्मै कालरूपेणैव दृश्यते स्म। अपश्यत् तन्मयं जगत्, भृङ्गीकीटन्यायेन तन्मयः संवृत्तः। किमुताऽधोक्षजप्रियाः ? अयमेव महाभावः शिशुपालस्य मुक्तेर्हेतुरभवत्। अघासुरस्य मुखे भगवान् सन्निविष्टः। गोपबालानामनुग्रहकर्ता भगवान् कथङ्कारं पश्चात्पदो भवेत् ? किमद्य कश्चित् सर्पमुखे प्रवेष्टुं प्रभवेत् ? सर्पमुखे अङ्गुलिप्रक्षेपेण प्राणान्तो भवेदिति विज्ञाय किं कश्चित्तत्र अङ्गुलिप्रवेशाय प्रस्तुतः स्यात् ? किन्तु भगवन्तं पश्य। दन्दह्यमानानां गो-गोपालानां प्रेष्ठानां वत्सानां रक्षणाय भगवान् सर्पमुखमपि प्रविष्टः। तेन अघासुरस्य मुखं मुद्रितमभूत्। दिव्यशक्त्या भगवता सर्वे पुनरुज्जीविताः।

उच्यते यदघासुरस्य मुखतो ज्योतिर्निर्गतेति। सा हि भगवतो मुखे समाविष्टा। भगवान् वेदव्यास उवाच—

नैतद्विचित्रं मनुजार्भमायिनः
परावराणां परमस्य वेधसः।
अघोऽपि यत्स्पर्शनधौतपातकः
प्रापाऽऽत्मसाम्यं त्वसतां सुदुर्लभम्॥
सकृद् यदङ्गप्रतिमान्तराहिता
मनोमयीं भागवतीं ददौ गतिम्।
स एव नित्यात्मसुखानुभूत्यभिव्युदस्तमायोऽन्तर्गतो हि किं पुनः॥
(भाग० १०.१२.३८-३९)

केवलं स्पर्शमात्रेण मनोमयप्रतिमाया एकवारं स्मरणमात्रेण वा भागवतीं गतिं प्रदातुं प्रभुः अकारणकरुणावरुणालयः अद्यैव प्राकट्यं गतः।

जगद्विभ्रमो हि नित्यबोधपरिपीडितः। वासुदेवनिहतं कौरवकुलमनायासेन अर्जुनो जघान—'वासुदेवनिहतं धनञ्जयः कौरवकुलं यथा।' अतः नित्यबोधपरिपीडितस्य जगद्विभ्रमस्य नाशोऽर्जुनो भूत्वा करणीयः। भगवता उक्तम्—

मयैवेते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन्।

विराट्रूपस्य वर्णनप्रसङ्गे तैरुक्तम्—केचन दंष्ट्राभिः चूर्ण्यमानाः केचिच्च नितरामस्वस्थाः। किमेतत् ? वस्तुतः कालः, असि-प्रभृति सर्वमपि लुलितं जायते। कोऽपि न विश्वसिति चेन्मा विश्वसेत्। नैतावता तस्य शक्तिमत्तायां किमपि अन्तरमायाति। यदि नाम उलूकः समर्थयेत्—'सूर्ये अन्धकारः' इति, तेन किम् ? अखण्डबोधरूपे भगवति अविद्या कुतः ? चिद्घने रामे ज्ञानमज्ञानं वा किमपि नास्ति। सूर्यस्य कृते न दिवा, न च रात्रिः। अयं पुनरस्माकमन्तरात्मनो विभ्रम एव।

मायाविषये निरूपयद्भिः पूज्यपादैरुक्तम्—माया तु भगवतः पुरो गन्तुं लज्जते। अध्यात्मरामायणे उक्तम्—विलज्जमानयाऽनया इति। सूर्यस्य पुरः स्थातुं रात्रिर्लज्जते। किं कापि तमिस्रा सूर्येण मिलितुं प्रभवेत् ? गता चेत् किं शिष्टा स्यात् ? एवमेव तत्त्वातीततो माया लज्जते।

एकदा अयोध्यायां रात्रिः सूर्यण मिलितुं समागता—प्रभुहि मिलन आयी जनु राती। किन्तु तदपि बनी सन्ध्या अनुमानी। माया हि भवाटव्यां भवजीवान् भ्रामयति। भक्तान् वित्रासयति। मायाया हृदयं भगवानेव जानाति। भगवद्विमुखाता-निवारणायैव सा तथाकरोति। भक्तः प्रार्थयते—जय जय जहि अजाम्। किन्तु किमर्थमियं गुणवती माया हन्तव्या? स दोषगृहीतो गुणोऽस्ति। अत एव 'जाहि जहि' इति भक्तैरुद्धुष्यते। तेषामेव प्रार्थनां श्रुत्वा भगवता उक्तम्—मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते। भगवत्प्रपन्ना भवत, तेन माया स्वत एव मरिष्यति।

वस्तुतो बुद्धिः, शान्तिः, लज्जा, धृतिः सर्वमेतत् मायाया एव रूपम्—विद्या हि सा भगवती परमा हि देवी। केवलं सा बहिर्मुखानां कृते हानिकरी। यो हि श्रद्धया मायापतेरनुमोदनं करोति, न स मायया मुह्यते। नर सेवकाहिं न व्यापै माया। भगवत्प्रपन्नेभ्यः सा नूनं श्रेय एव प्रददाति। एका ज्योतिरभूद्विद्या, या देवी सर्वभूतेषु चितिरूपेण संस्थिता, सृष्टि-स्थिति-संहारकारिणीं क्लेशहारिणीम्, सर्वचैतन्यरूपां तामाद्यां विद्यां हि धीमहि इत्यादिषु वर्णिता मायाशक्तिर्नूनं कल्याणकारिण्येव। सैव भगवतो त्रिपुरसुन्दरी, अखण्डबोधरूपा, ब्रह्मरूपा, स्थूल-सूक्ष्म-कारणरूपा च।

अस्या एव प्रभोरीशस्य परात्परपरब्रह्मणो व्रजेन्द्रनन्दनस्य अद्य प्रादुर्भावः समजनि। कामेश्वरः कामेश्वरी चेति उभयम् एकमेव। तत्त्वं द्विधा कल्पितमात्रम्। इत्थं निर्गुण-निराकारस्य ब्रह्मण उपासनायाः साकार आधारो भवितुं शक्नोति। प्रतिमाया आराधनया परमाराध्यः शिवो रामकृष्णौ वा हृत्प्रदेशेऽवतरन्ति। रागानुगा भक्तिर्नितरामसीमा। पुलकिताः किरातबालाः हरिण्यो वा पूज्यापूज्यस्य साधनभावं कथं जानीयुः? ता अपि प्रणयजलेन भगवन्तं पूजयन्ति। व्रजेन्द्रनन्दनमविलोक्य लोकोत्तरभक्तिरसे आकण्ठ निमज्जन्ति। मयूरो-मयूरी हंस-कारण्डवौ स्थावर-जङ्गमात्मकं सर्वं जगत् भगवत एव रूपम्। इदमेव रागानुगारससारसरोवरे समुद्भूतस्य दिव्यसरोजस्य श्रीकृष्णस्य अवतारतथ्यम्। 'श्रीराम जय राम जय जय राम' नामघोषणेन पूज्यपादैः प्रवचनमिदं पूर्णतां नीतम्।

●

गीतम्

त्वन्मुखे वीक्ष्य हासं मनोनन्दिनि !
लोक मेषोऽवसादो ध्रुवा हास्यति !!
अम्बरे नीलिमाभे स्फुरत्तारके
स्निग्धलीलावती चन्द्रिका भास्यति ॥
मूर्च्छिता मूर्च्छनामुत्सुकाऽऽकर्ण्य ते,
निर्मितिश्चेतनां निश्चितं प्राप्स्यति ॥
आम्रकुञ्जे पिको नन्दनं नेष्यति,
स्वर्भुवं पुष्पमासो भुवे दास्यति ॥
त्वत्स्वभावार्पिते वीक्षितेऽपि स्थलो,
दीर्घवैरस्य निर्वेद - माव्रत्स्यति ॥
पद्मिनी - पद्मगन्धासवं सप्रियो,
भृङ्गलोको विलोलस्पृहं पास्यति ॥
वारिदाङ्के विशन्तीव सौदामिनी,
स्निग्धरागे त्रपामुक्ति - मभ्यस्यति ॥
मेचकालोक - नृत्यन्मयूराग्रहं
मुग्धमुग्धं मयूरी मनो भ्रास्यति ॥
प्रेषितुं त्वत्कृते मेघदूतं कविः
सर्गनिश्शेष - सौन्दर्य - माधास्यति ॥
विस्मृतौ वीतशङ्काधमा - मङ्क्ष्यति
भाविचिन्ताऽपि नूनं लयं यास्यति ॥
मुक्तकालाग्रहो वर्तमानो हठा-
दात्मबोधस्मृतिं तत्क्षणे नत्स्यति ॥

—श्री उमाशङ्करशर्मा त्रिपाठी

गणेशोत्सवे विद्वदभिनन्दने

श्री रामनाथ मिश्र द्विजोत्तमानाम्

छन्दश्छद्मपदाय कल्पकरिणे ज्योतिर्दृशे भूतिने
नैरुक्तश्रवणाय सन्धृतवते शिक्षामयीं नासिकाम् ।
अक्षस्रक्कुलिशाय पोतरुचयेऽजास्याय संबिभ्रते
वक्त्रं व्याकरणात्मकं प्रणतयो वेदावताराय ते ॥ १ ॥

आस्ते जह्नुसुतापवित्रवसतिः काशीपुरी, तत्र च
श्रौत-स्मार्त-पुराणसम्मतपथाः कुर्वन्ति वासं द्विजाः ।
साङ्गं शुक्लयजुर्घनान्तमनिशं यागांश्च सम्पादयन्
मन्नूमिश्र इति प्रसिद्धिमगमत् तेषु द्विजः श्रेष्ठधीः ॥ २ ॥

तेषां पुत्रा वैक्रमे सिद्धि - बाण-
द्वीप - ब्रह्मख्यातरूपे शुभेऽब्दे ।
प्रादुर्भूता रामनाथाभिधानाः
साक्षाद् वेदा जङ्गमाः शुक्लवर्णाः ॥ ३ ॥

आचार्येभ्यो निर्मले - वंशजेभ्यो
विद्यामूर्ति - श्रीगणेशाभिधेभ्यः ।
एते साङ्गं याजुषं मन्त्रजातं
प्रापुः शास्त्रं चान्यविद्वद्वरेभ्यः ॥ ४ ॥

यागांस्तांस्तान् सोमरुद्रादिरूपा-
नाचार्यत्वे स्वे समापादयन्तः ।
कोणे कोणे भारतस्य भ्रमन्तो
मूर्ता वेदाः स्वागतार्हा इमेऽत्र ॥ ५ ॥

श्रीनाथ-नामक-वरात्मज-गुप्ततत्त्वाः
शिष्यादिसेवित-पदाब्जरजाः सुसेव्याः ।
मध्येसभं सततमेव शतायुषोऽस्मा-
नुत्साहयन्त्विति गजाननमानमामः ॥ ६ ॥

नूतन - बालक - गणपत्युत्सव - सन्मण्डलग्रथितम् ।
उपकण्ठयन्तु हारं पद्यसुमुक्तामयं तारम् ॥ ७ ॥

गणेशभवनम्, वाराणसी
भाद्र० शु० ४ : २०३० वै० सं०

कत्तिल नरसिंह उडुपा महाभागानां

पौरस्त्य - पाश्चात्त्य - विधान - नेत्रं
शल्यक्रियाकारि - परश्वधालम् ।
दूर्वाङ्कुरैः सूचित - सूचिकाग्रं
वन्दे चिकित्सातनु-मेकदन्तम् ॥ १ ॥

श्रीमद्भारतभूरिभाग्यभरिते सद्योगमुक्तान्विते
संसाराब्धिसुतारणेन महिते पोतोत्तमे सन्मते ।
नाम्ना किन्तु वरोडुपेति गणिते वंशे द्विजोत्तंसिते
जातः श्रीनरसिंह कत्तिल इति ख्यातो नृसिंहः स्वयम् ॥ २ ॥

एभि - र्हिन्दू - विश्व - विद्यालयाच्च
नानान्येभ्यो विश्वविद्यालयेभ्यः ।
विद्याः प्राच्यां पश्चिमे सम्भवाश्च
प्राप्ता आयुर्वेद - शल्यप्रधानाः ॥ ३ ॥

भव्यैर्ग्रन्थैः पाठनैः शोधकार्यै-
र्नीत्या रीत्या माध्वसिद्धान्तभक्त्या ।
एभिर्नूनं रत्नतुल्यैः स्वकार्यै-
र्देशाम्भोधी रत्नसारीकृतो नः ॥ ४ ॥

'पद्मश्री'ति विभूषणेन महता तस्मादिमेऽलङ्कृता
राष्ट्राध्यक्षमहोदयै-र्वरगुणा अन्यैस्तथा भूषणैः ।
एतेषामभिनन्दनं जनहितं लम्बोदरप्रेरित-
मित्येवाद्य वयं प्रमोदभरिताः प्राप्यात्र मान्यानिमान् ॥ ५ ॥

मान्यास्तस्मात् स्वागतं व्याहरामः
श्रीमत्पूजां वाचिकां भावयामः ।
श्रीमन्मूर्तिः शातकीं वर्षपूर्ति
यायादित्येतद् श्रीगणेशं नमामः ॥ ६ ॥

नूतन - बालक - गणपत्युत्सव - सन्मण्डल - प्रमितम् ।
युक्तं सुवाक्प्रसूनैरमुमुपहारं निजीयन्तु ॥ ७ ॥

इति निवेदयते—
नू० बा० ग० समाजसेवा-मण्डलम्

वैदिकावैदिक-दर्शनमीमांसाया उपसंहारः

— श्री जगन्नाथ श्रीधरशास्त्री पदे महाभागाः —

[श्रीमतां पदे-शास्त्रिनामयं धारावाहिको लेखः 'सूर्योदये' (४८ वर्षे २ अङ्के) विगताङ्केषु प्रकाशतामुपगतः। लेखस्य गौरवो विपश्चिद्वरैरनुभूतपूर्व एव। दौर्भाग्यात् नैकैः कारणैः लेखस्यास्य उपसंहारोऽद्यापि नाभवत्। शास्त्रिपादै सोऽनेन अङ्केन समारब्धः। आशास्यते च कतिपयैरेवाङ्कैः उपसंहारमिदं सहृत्य तत्रभवन्तः शास्त्रिपादाः अन्यैरपि लेखैः 'सूर्योदय'-पाठकाननुग्रहिष्यन्तीति।— **सम्पादकः**]

अवसितः प्रासङ्गिको विचारः। उपसंह्रियते इदानीमियं वैदिकावैदिक-दर्शनमीमांसा। विस्तरेण इयमुपपादिता समग्रे गीताशास्त्रे। तत्र वैदिकः सिद्धान्तः प्रतिष्ठापितः। अवैदिको दार्शनिकस्तान्त्रिको लौकिको वा पक्षः प्रत्याख्यातः। अथवा ब्रह्मवादो ब्रह्मचर्यं च प्रतिष्ठापितम्। प्रधानवादो भोगापवर्गवादः पुरुषार्थवादः कामचर्या च निराकृता। तथा हि—

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।

(गी० २.४७) इति वैदिकः पक्षः।

बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्॥

इत्यवैदिको दार्शनिकस्तान्त्रिको लौकिको वा पक्षः। एवमेव सर्वत्र ज्ञेयम्। समग्रं च गीताशास्त्रं प्रथमे श्लोके ध्वनितम्। प्रथमः श्लोकः समस्तस्य सारसङ्ग्रहभूतः। अत एव तमेव श्लोकं सविस्तरं व्याख्याय वैदिकावैदिक-दर्शनमीमांसेयमुपसंह्रियते।

धृतराष्ट्र उवाच

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥

—(गी० १.१)

धृतराष्ट्रे नाम पञ्चविंशतितत्त्वात्मकः पदार्थः। तत्र चतुर्विंशतितत्त्वात्मकं क्षेत्रं शरीरं वा, पञ्चविंश आत्मा। तत्रात्मा सर्वान् स्वधर्मान्—अद्वितीयत्वम्, एकत्वं, ब्रह्ममयत्वं वा आनन्दमयत्वं, चिन्मयत्वं, ज्ञानमयत्वं च परित्यज्य अव्यक्तधर्मान् व्यक्तधर्मांश्च प्रकृतिधर्मान् विकृतिधर्मान् क्षेत्रधर्मान् वा स्वधर्मत्वेन अविद्यया अभिमन्यमानः पूर्वरूपं ब्रह्मधर्मान् वा विहाय पररूपं परधर्मान् क्षेत्रधर्मान् प्राकृतत्वं वैकृतत्वं वा प्राप्तः, व्यापिन्या प्रकृत्या विकृतिरूपेण परिणतया धृत्या धृतो बद्धो व्याप्तश्चायं व्यापको विवेकी चात्मा अव्यापो अविवेकी च भूत्वा चतुर्विंशतितत्त्वात्मकस्य शरीरस्य धर्मी सन्नपि धर्मः संवृत्तः। तथा चोक्तं गीताशास्त्रे—

भूतानामस्मि चेतना। —(गी० १०.२२)
संघातश्चेतना धृतिः। —(गी० १३.६)

अस्यामवस्थायां क्षेत्रसङ्गी आत्मा चतुर्धा अवतिष्ठते—(१) विज्ञानमयकोशे विज्ञानमयः। (२) मनोमयकोशे मनोमयः। (३) प्राणमयकोशे प्राणमयः। (४) अन्नमयकोशे चान्नमयः। धृतराष्ट्रस्य अन्धत्वात् दर्शनाभाव इति तस्यात्मा प्राणमयकोशेऽपि नास्ति, अपि तु अन्नमयकोशे वर्तते। एतादृशेन अन्नमयकोशस्थितेन काममयेन कामहतेन वा धृतराष्ट्रेन गीताशास्त्रमुपक्रान्तमिति प्रथमेश्लोके वैदिकस्य दर्शनस्य समस्तस्य गीताशास्त्रस्य वा

श्रीज्ञानानन्द-चरित-प्रशंसनम्

★ – श्रीगोपालशास्त्री दर्शनकेसरी –

अये श्रीसूर्योदय सम्पादकः !

'वाग्जन्मवैफल्यमसह्यशल्यं
गुणाद्भुते वस्तृति मौनिता चेत् ।'

इति श्रीहर्ष - पद्यानुसारं मया श्रीजी - जीवनचरितस्य समुपोब्दलकं स्वीयं वाक्यं प्रहीयते । तत् स्वपत्रे मुद्रितं विधाय पाठकानां श्रेयो विधीयताम् ।

श्रीदत्तात्रेयावतारस्वरूपाणां कलाविह धर्मद्रुमबीजरक्षणार्थं कृतविविधप्रयत्नानां भारतीय-संस्कृति-संरक्षणामृतवर्षिणां वेदविलुप्त-कर्मकाण्डोपासनाकाण्डोद्धारकाणां सप्तगीताद्यनेकग्रन्थरत्नाविर्भावकानां सर्वथा सर्वतो विलुप्तार्यमहिलामहत्त्वस्य पुनरुद्भावकानां सर्वतोऽपि ह्रसन्त्या भारतीय-मर्यादाया दृढभित्तिसंस्थापकतया आप्रलयं सुरक्षकाणां निष्कामकर्मयोगिनां महर्षि-श्रीज्ञानानन्दापराह्व-श्रीजी-महाराजानां मसृणमञ्जुल-पद्यमय-संस्कृतभाषया निबद्धं महाकाव्यमिदं पठित्वा यो हि महानन्दसन्दोहे मयाऽन्वभावि, स हि महानन्दः सर्वैरपि पाठकैः, तन्मित्रेष्टबन्धुबान्धवादिरपि समनुभवनीयः पठित्वेदं महाकाव्यमिति मेऽनुरोधः ।

महाकाव्यमिदं नहि महाजीवन - जीवनचरितमात्रम् । इदन्तु वेदत आरभ्य पुराणधर्मशास्त्रादि - सर्वसंस्कृतवाङ्मयसाररहस्यं विद्यते । इदमेकमेव काव्यमधीत्य सर्वदर्शनरहस्यं धर्मशास्त्ररहस्यं जागतिकव्यवहाररहस्यं च ज्ञातुं समर्था भविष्यन्ति पाठकाः ।

यथा ह्यस्य महाकाव्यस्य नायकाः श्रुतीनां विलुप्तज्ञानोपासनाकर्मकाण्डप्रवर्तकाः शास्त्रजङ्गमशरीरिण आसन्, तद्धि तेषां शास्त्रज्ञानधर्ममर्यादा - निष्कामकर्मयोगस्वरूपमेव तु किशनगढपति - काशिकविद्वत्प्रश्नोत्तररूपेण दत्तात्रेयात्मकश्रीजीकृतेनेदं महाकाव्यं विवृतं विस्तृतं विद्यते । तेषां जीवनं महन्निष्कामकर्मयोगमयमेवाध्येयं सर्वैरिति ममानुरोधः ।

यदि विश्वविद्यालय-परीक्षासञ्चालकाः परीक्षापाठ्ये इदं सन्निवेशयेयुः समुचित-स्थाने तदा महांल्लाभः स्यात् संस्कृत-साहित्यसमाजस्येति । एतस्य महाकाव्यस्य प्रकाशनकर्त्र्याः स्मारकसमित्याः कार्यकारिण्याश्चाध्यक्षायाः श्रीमत्या महाशक्त्या विद्यादेव्याः, भूमिकालेखस्य च श्रीपरमहंसमिश्रस्य काव्यकर्तुश्च महाकवेः श्रीविन्ध्येश्वरीप्रसादशास्त्रिणो वयं महदुपकारणं बिभृमो यदेते साम्प्रतं महोपकारि ग्रन्थरत्नमिदम् प्राचीकसन्नित्यलम् ।

●

वाच्यार्थन अवरोहक्रमण सारसंग्रहः अशक्यप्रायः, अशास्त्रीयश्चेति समग्रं गीताशास्त्रं ध्वनितं प्रथमे श्लोके ।

ध्वनिकाव्यस्योदाहरणं प्रथमः श्लोकः । वाच्यार्थस्य निरोधनमेवात्र सम्पद्यते । श्लोकेऽस्मिन् वाच्यार्थो न्यग्भावितः, उपसृर्जनीकृतः, अप्रधानीकृत इति यावत् । समग्रं च गीताशास्त्रं वैदिकं दर्शनं वा अस्मिन् प्रथमे श्लोके ध्वनितमिति श्लोकोऽयं विस्तरेण व्याख्यायते वैदिका-ऽवैदिकदर्शन-मीमांसा-प्रबोधाय ।

द्वया ह प्राजापत्या देवाश्चासुराश्च ।
—(मा० बृ० उ० १.१.१)

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
—(गी० १६.६)

सृज्येत इति सर्गः । भूतानां सर्गौ भूतसर्गौ । द्वौ द्विसंख्याकौ । भूतानि पञ्चविंशतितत्त्वात्मकानि । तत्रात्मा अजः अव्ययश्चेति उत्पत्तिविनाशरहितः । अवशिष्टानि चतुर्विंशतितत्त्वानि अनित्यानि । अत एव चतुर्विंशतितत्त्वात्मकं क्षेत्रमुत्पद्यते विनश्यति च । तदेवेह 'भूत'शब्देन गृह्यते । तस्य क्षेत्रस्य शरीरस्य वा उत्पद्यमानस्य प्रकारद्वयम्—दैवं आसुरं च । संस्कृतं प्राकृतं च । गुणमयं दोषमयं च । आनन्दमयं दुःखमयं च । अक्लिष्टं क्लिष्टं च । तदेवोपन्यस्तं प्रथमे श्लोके धर्मक्षेत्रं कुरुक्षेत्रं च ।

(क्रमशः)

आद्यो वैज्ञानिकः श्री भास्कराचार्यः

—श्री भास्कर जे० जोशी—

[श्री भास्कराचार्यस्य परिचयं ग्रन्थकर्तृत्वं च विविच्य लेखेऽत्र सुस्पष्टं साधितं यद् गणितविज्ञानं, विद्युच्छक्ति-संशोधनप्रकारः, गुरुत्व-महत्त्वाकर्षणसिद्धान्तः, सापेक्षिकगतिविज्ञानं चेति सर्वविज्ञानसूत्रं श्री भास्करप्रणीतमेवाधारं स्वीकृत्य, न्यूटन-गेलेलियो-प्रभृतिभिर्वैदेशिकैर्वैज्ञानिकैः स्वस्वसिद्धान्ताः स्थापिताः ।]

शाण्डिल्यगोत्रोत्पन्नः दक्षिणभारते सह्याद्रिसमीपे बिज्जलबीड (बीजापुर) नाम्नि नगरे शकाब्दस्य १०३६ ख्रिस्ताब्दस्य च १११४ मिते वर्षे महेश्वरोपाध्यायनाम्नः पितुः सकाशात् भारतवर्षस्य भूषणरूपः साक्षात् भास्करावतार एव भारतेऽस्मिन् अवातरत् श्री भास्कराचार्यः ।

श्री भास्कराचार्येण अनेके ग्रन्थाः निर्मिताः, येषु प्रधानतः सिद्धान्तशिरोमणिः, करणकुतूहलम्, सर्वतोभद्रयन्त्रम्—इमे त्रयो ग्रन्थाः सन्ति ।

सिद्धान्तशिरोमणेरेव व्यक्तगणितम् (लीलावती), अव्यक्तगणितम् (बीजगणितम्), गणिताध्यायः, गोलाध्यायश्चेति चत्वारो विभागाः ।

इदानीं भारते श्री भास्करग्रन्थानधीयाना एव विद्वांसो भवन्ति । यत्र तत्र सर्वत्र विश्वविद्यालयीयपरीक्षासु श्री भास्करग्रन्था एव पाठ्यक्रमे निर्धारिताः भवन्ति । यतो हि श्री भास्कररचनाशैली यादृशी सरला सूक्ष्मतरा विषयग्राहिणी च, न तादृशी अन्येषामाचार्याणां दृश्यते । भारतेऽस्मिन् भास्करो यदि न अभविष्यत्, तर्हि ज्योतिर्ज्ञानं विज्ञानवैदुष्यं च कथं प्रकाशमगमिष्यत् ।

स्वतः समुद्भूतं ज्ञानं ज्ञानमिति कथ्यते । तस्यैव विशेषरूपेण ज्ञानं 'विज्ञानमि'त्युच्यते । वेदः सूत्ररूपेण आध्यात्मिका - ऽऽधिदैविका - ऽऽधिभौतिकविज्ञानानां मूलं वर्तते ।

गणित-विज्ञानम्

सार्वभौतिकविज्ञानानां मूले गणितशास्त्रं विद्युच्छक्ति-संशोधनं चेति विषयद्वयमेव मुख्यत्वं भजते । अनादिकालतः प्रचलितेषु विविधगणितेषु पूर्वाचार्यैः यानि यानि विशिष्टप्रक्रियाद्योतकानि गणितानि आविष्कृतानि, तानि अतिविस्तृततया श्री भास्कराचार्येण परिष्कृत्य व्यक्ताव्यक्तरूपेण लिखितानि । तेषां समानि अधिकानि च अधुनाऽपि संशोधितानि वर्तन्ते नवेति साम्प्रतिक-अरिथमेटिक - अलजब्रागणिताऽवलोकनेन न ज्ञायते । गणितविज्ञाने यानि यानि अपूर्वाणि सूत्राणि श्री भास्कराचार्येण ग्रथितानि, तान्येव आधारत्वेन प्रकल्प विस्तृततया गणित - चक्रवर्तिप्रभृतीन्यनेकानि पुस्तकानि रचितानि सम्प्रति दृश्यन्ते श्रूयन्ते च । किन्तु लीलावत्यां बीजगणिते च कानिचित् इत्थंभूतान्यपि सूत्राणि सन्ति येषां नियमप्रकाराः कुत्रचित् आधुनिकगणिते ग्रथिताः सन्ति नवेति न ज्ञायते । यथा कयोरपि राश्योः 'कृति युति वियुती व्येके वर्गौ स्याताम्' इति राश्योरन्वेषणविधिः । तथा त्रिभिः पारावताः पञ्च पञ्चभिः सप्त सारसाः, सप्तभिर्नत्रहंसाश्च नवभिर्बर्हिणां त्रयं द्रम्मैरवाप्यते, द्रम्मशतेन शतमानय—इत्यत्र पक्षिणां पण्यविषयं विज्ञाय शतद्रम्मैः जीवितपक्षिणां शतमानेयमिति । न सच्छेदकाः राशयोऽपेक्ष्यन्ते । शतेन शतमेव पक्षिणः स्युः

इत्यादि । इत्यनयोरुत्तरं गणितनियमप्रकारो वा नवीनगणितेषु कुत्राऽपि नावलोक्यते ।

विद्युच्छक्तिः

गणितज्ञानानन्तरं समस्त - भौतिक - विज्ञानानाम् आधाररूपा विद्युच्छक्तिरेवेति सर्वे वैज्ञानिकाः वदन्ति । किन्तु इयं विद्युच्छक्तिः कदा कथं केन संशोधितेति जिज्ञासायाम्, परस्परविरोधे पदार्थे एकोऽपरस्य अन्तर्गतो भवतीति सिद्धान्तेन जलगर्भे अग्निरिति विज्ञानं विज्ञाय सृष्टिवादनिरूपणावसरे श्री भास्कराचार्यो वक्ति······खकशिखिजलैर्व्यस्ततः संहतेश्च······ इत्यादि । तथैव यथोष्णत्वार्कानलयोश्च शीतता विधौ द्रुतिः के कठिनत्वमश्मनि इत्यादिसूत्राणि प्रतिपादयन्, श्री भास्कराचार्यस्तर्कयति यत् भपञ्जरस्थानां चाकचिक्यपदार्थानां प्रकाशो जले पतति । जले च आकर्षणशक्तिः, यया स च प्रकाशः जले प्रतिबिम्बितः सन् अन्तर्भूतो भवति इति सिद्धान्तं स्वीकृत्य पञ्चभूतानां परस्परसम्मिश्रणेन भूरियं सर्वशक्तिमती निरवधिकाकाशे निराधारा सर्वतः पर्वतारामग्रामचैत्यचयैर्युक्ता स्वशक्त्या तिष्ठति । अत एव विद्युच्छक्तिसंशोधननिर्देशकोऽपि श्री भास्कराचार्य एव ।

आकर्षण-शक्तिः

आकर्षणशक्तिविषये सूत्ररूपेण वस्तुनिर्देशकर्ता श्री भास्करो वक्ति भपञ्जरस्य भ्रमणावलोकनप्रसङ्गे स्वीये सिद्धान्तशिरोमणौ—

आकृष्टिशक्तिश्च मही तया यत्
खस्थं गुरु स्वाभिमुखं स्वशक्त्या ।
आकृष्यते तद् पततीव भाति
समे समन्तात् क्व पतत्वियं खे ॥
भपञ्जरस्य भ्रमणावलोका-
दाधारशून्या कुरिति प्रतीतिः ।
खस्थं न दृष्टं च गुरु क्षमातः
खेऽधः प्रयातीति वदन्ति बौद्धाः ॥

एवं बहुभिः प्रकारैः खस्थं गुरु वस्तु तदधिको गुरुर्भूगोलः स्वाभिमुखमाकर्षति इति सिद्धान्तः स्वयंसिद्धो भवति । नो चेत् आकाशे लघु-गुर्वोः पदार्थयोः अनन्ताकाशे सहैव पतनावसरे द्वयोर्योग एव कदाचिद् नहि समुत्पद्येत । तथा च—ग्रहाणां स्वस्वकक्षायाम् उच्च-नीचपातादयः प्रकल्पिता भवन्ति इति खगोलविदां विदितमेव । तत्र ग्रहगतौ तेषामेव पदार्थानां स्वस्वासन्नतावशात् आकृष्टतया वैलक्षण्यं दृष्ट्वा गुरुवस्तुनि महदाकर्षणम्, अल्पे चाल्पमिति दर्शयति; तद्वशादेव गतौ वैलक्षण्यमपि भवति । अमुमेव आकर्षणशक्ति - सिद्धान्तमादाय न्यूटनमहोदयेन खिष्टाब्दस्य सप्तदशशतमिते अतिविस्तारेण लघुत्वाकर्षण-गुरुत्वाकर्षणसिद्धान्तः स्थापितः ।

सापेक्षिक-गतिः

सापेक्षिकगतिविषये च मन्दोच्चपात-भगणोपपत्तौ

ज्ञातं कृत्वा मध्यं भूयोऽन्यदिने तदन्तरं भुक्तिः ।
त्रैराशिकेन भुक्त्या कल्पग्रहमण्डलानयनम् ॥

इत्याधारतः सव्येतराकृष्टतनुर्भवेद् वक्रगतिः इत्यनेन च प्रत्यहं ग्रहवेधेन यदा यत्र ग्रहगतिः शून्या विलोक्यते, तदा तत्र तदुच्चस्थानं प्रकल्पयति । यदा यत्र च गतेः परमत्वं दृश्यते, तदा तत्र तन्नीचं प्रकल्प्यते । नीचोच्चान्तरे ग्रहः तात्कालिकवेगेन स्पर्शरेखामार्गेण गच्छतीति ज्ञात्वा कक्षामध्यग - तिर्यक्रेखाप्रतिवृत्तसंपातासन्ने गतिफलाभावं विलोक्य चतुर्भिः फलसंस्कारैः शैघ्रं मान्दं पुनर्मान्दं शैघ्रं चत्वार्यनुक्रमात् इत्युक्तप्रकारेण ग्रहस्पष्टतां करोति । एवं च कक्षाक्रमे सर्वेषां ग्रहाणां योजनात्मिका गतिः समैव । कलात्मिका गतिस्तु भिन्ना भिन्ना भवति इति दर्शयन् ।

वृत्ते लघ्व्यो लघुनि महति स्युर्महत्यश्च लिप्ताः ।···
तथा—

ग्रहस्य चक्रैर्विहृता खकक्षा
भवेत्स्वकक्षा निजकक्षिकायाम् ।

ग्राम-शोभा

★ —श्री यमुनेश त्रिपाठी साहित्याचार्यः

संछादितं हरितशष्पदलैः समन्तात्
सौन्दर्यमण्डित-महस्कररश्मिमाल्यैः ।
ग्रामं विलोकय सखे वसुधातलेऽस्मिन्
स्वर्गोपमस्य शिवशासित भारतस्य ॥ १ ॥

आगत्य पावसऋतौ गमने सहर्षाः
गर्जन्ति नीरतरलाः जलदाः यदा हो ।
रोमाञ्चितं भवति कस्य तदा न गात्रं
गेहेषु वीक्ष्य मृदुनृत्यरतं मयूरम् ॥ २ ॥

क्षेत्रेषु वृष्टिसलिलानि यदा पतन्ति
पङ्कत्वमाशु परिचुम्बति चारुरेणुः ।
पीताम्बरावृतशरीर-महर्निशं च
गायन्ति मत्तमण्डूकगणाः प्रसन्नाः ॥ ३ ॥

स्कन्धे निधाय कृषकाः परशुं हलं च
गच्छन्ति मन्दगतिना वृषभैः सहाशु ।
वृष्ट्यम्भसा पथि पथि प्रचलन्ति मुग्धाः
क्रीडारताः मलिनवस्त्रयुताः कुमाराः ॥ ४ ॥

उद्दामवृष्टि - पतनेन यदा पतन्ति
गेहानि दैन्यहतजीवित - पोषकानाम् ।
नि सृत्य घोरकरुणाश्लथ - शब्दसेना
हन्तुं सुरेन्द्रमिव दृष्टिपथं प्रयाति ॥ ५ ॥

क्षेत्रेषु शुष्कसरसीषु नवाम्बुजातं
चिन्वान्ति शाकमधरीकृतहासबालाः ।
तासां स्वरूपमधुपानविलोलचेताः
गोपा भ्रमन्ति मृदुगानरताश्च नम्राः ॥ ६ ॥

स्वच्छन्दघार्मसलिलं पवनं च पूतं
नानाविधान् मृदुरसाप्तनवान् पदार्थान् ।
संसेवितुं यदि मनस्सु सुलालसास्ति
ग्रामं विहाय नगरं गमनं न कार्यम् ॥ ७ ॥

वाञ्छन्ति ये निजगतार्यसुगौरवं ते
गच्छन्तु ग्राममवलम्बितसाधुभावाः ।
यत्रा स्थिताः रजयुताहि नराश्च नार्यः
स्पन्दन्ति मौन हृदये मनुनोक्तधर्मान् ॥ ८ ॥

इत्यादिषु अनेकस्थलेषु सापेक्षिकगतिसिद्धान्तविषये भास्करो वक्ति । अमुमेव सिद्धान्तं आधारभूतं प्रकल्प्य गेलेलियो महाशयः ख्रिस्ताब्दस्य सप्तदशशतमिते वर्षे सापेक्षिकगतिसिद्धान्त-संशोधकत्वेन स्वात्मानं समुद्घोषयामास ।

भुवो वर्तुलत्वम्

भूरियं गोलाकारेत्याधुनिका इदानीं वदन्ति, तत्रापि विवदन्ति च । किन्तु श्री भास्कराचार्य—

सर्वतः पर्वताराम-ग्रामचैत्यचयैश्चितः ।
कदम्बकुसुमग्रन्थिः केसरप्रसरैरिव ॥

इत्यनेन एकेनैव सूत्रेण भूरियं गोलाकारा स्वशक्त्या आकाशे निराधारा तिष्ठतीति सिद्धान्तं प्रतिपादयति । तथा च ये केचन इत्थमपि वदन्ति यत् भूरियं प्रत्यक्षतो दर्पणोदरसन्निभा परिदृश्यमाना कथं गोलाकारेति वक्तुं शक्या ? इति, अस्योत्तरं ददत् श्री भास्कराचार्यो वक्ति—

समो यतः स्यात् परिधेः शतांशः
पृथ्वी च पृथ्वी नितरां तनोयान् ॥
नरश्च तत्पृष्ठगतस्य कृत्स्ना
समेव तस्य प्रतिभात्यतः सा ॥

अर्थात् कस्यापि गोलपदार्थस्य शतांशभागो दण्डवदेव परिदृश्यते । गोलाकारेयं पृथ्वी नितरां महती, तत्पृष्ठगतो नरः सूक्ष्मातिसूक्ष्मतरोऽस्ति । स च पृथिव्या लक्षलक्षांशमपि भागमवलोकयितुं न शक्नोति । तर्हि कथं गोलाकारामिमां पृथ्वीं पश्येत् ? एतेन स भुवो निराधारत्वस्य अधोगमनराहित्यस्य आकर्षणशक्तिमत्त्वस्य च सिद्धान्तं स्थापयामास । तथा चेत्थं ज्ञायते यत् साम्प्रतिकानां समस्तवैज्ञानिकानां गणितज्ञानाञ्च आद्यगुरुः भारतभास्करः भास्करापरभास्करः श्री भास्कराचार्यं एवेति । तमेव जगद्गुरुं श्री भास्करं प्रणमामि ।

विदेशीय-संस्कृतविदुषां संस्कृते प्रयोगलाघवम्

[कोरियादेशवासिनः संस्कृतभाषाकोविदस्य श्री बाक्कन्वे महानुभावस्य गीर्वाणवाण्यां लिखितं पत्रं केन्द्रीयकृषिराज्यमन्त्रिणा प्रो० शेरसिंहमहोदयेन प्रहितञ्च तस्य प्रत्युत्तरं पाठकानां सूचनार्थ मविकलमत्र समुद्ध्रियते ।—सम्पादकः]

श्री बाक् कन्वे महानुभावस्य पत्रम्

स्वस्ति ।

श्रीकोरियादेश-भारतवर्षयोः स्वतन्त्रतादिवस-पुरोगराधाजानिजन्माष्टमी-महाभिनन्दनम्

निजनिजदेशभक्तिपरायणसमग्रजनतामनोह्लादिनि मञ्जुलमञ्जुलनैसर्गिकाकृतिसुषमाऽनायसपरिमुषितसकललोकलोचनस्य आसंशयमनिर्वार्यराष्ट्रियनियतिवशग्रस्तत्वादहो सतताक्षमणीयाक्रमणशीलबलीयो विदेशद्वाराऽष्टाविंशतिसंवत्सरानपि सुतरां दुर्विषहत्वान्नूनं हायनशतायमानान् प्रसह्य द्वैधीकृतस्यापि सर्वथा स्पृहणीयश्रीसंपद्विराजितस्य अतिमनोहरसौहार्दैकीभूतैकवर्णप्रजासमूहविधीयमानरम्यवसतेः श्रीकोरियादेशस्य भारतवर्षस्य च तुहिनाचलवदचलत्वाच्चिरस्थायिनः स्वातन्त्र्यवासरे सोऽयमधस्तात् स्वयंदत्तस्वहस्तः श्री बाक्कन्वे नाम श्लाघ्यप्रगुणगुणराशि शुभंकरसौभाग्याभ्युदयशालिनं विशेषतो समस्तभारतनिवासिलोकहितैषिणं सुकृतिनं भवन्तं भारतीयराज्यमन्त्रिणं श्रीमच्छेरसिंहमहाभागमनामयमनुपमं निर्व्याजतप्रीतिपूर्वकं संपरिपृच्छन्नचिरभाविनि सनातनधर्मनिर्दिष्टमार्गानुयायिनामत्रत्यानां सर्वेषां हृदयमहोत्सवदायिनि जन्माष्टमीप्रसङ्गे ननु सुपरिगृहीतस्वजन्मा भगवद्गीतायाम्––"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम्। परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥" इति सव्यसाचिनं सोपदेशमूचिवान् देवकीनन्दनो वासुदेवो मनसि समभिलषितमायुष्यं यशस्यमपि पुनः सार्वकामिनं मङ्गलपुञ्जं ते यथेच्छं वितरत्विति सौहार्दात् खल्वाशास्ते । इति शम् ।"

केन्द्रीय-कृषिराज्यमन्त्रिणा प्रो० शेरसिंहमहोदयेन प्रदत्तं प्रत्युत्तरम्

अधिगतमस्माभिर्भवतां १५ - अगस्त - ७३ - तिथ्यङ्कितं पत्रम् । प्रीतोऽस्मि नितरामालोक्य भवतां गीर्वाणवाणीनैपुण्यम् । एतच्चानुदिनं वर्धतेततरामिति महानयमस्मादृशामानन्दस्य विषयः । धन्यवादार्हाः भवन्तोऽस्माकमायुष्यं यशस्यं च कामयमानाः । भवतामपि तथाविधं भवतु । आशास्महे, भवद्विधानां कोरियादेश-विदुषां प्रयासैरनिशं वर्धिष्यते मैत्रीसम्बन्ध आवयोरुभयोर्देशयोः । कामये, भवतामनामयं सारस्वततपोवर्धनं चाहर्निशम् । स्वस्ति ।

•

अस्माकं ग्राम्या नारी

——श्री त्रिपाठीः यमुनेश 'साहित्याचार्यः'——

त्रिभागेष्वद्रिराजोत्तुङ्गशृङ्गसंवेष्टितेयमेकस्मिन् भागे लोललहरीभिरान्दोलितेन हिन्दमहासागरेण क्षालितचरणकमला धन्यास्ति भारतवसुन्धरा। आर्यलीलाध्वंसावशेषाङ्कैरङ्कितान्यद्यापि सन्ति यत्र तत्र सर्वत्र स्थानानि। देशस्यास्य विलोक्यैव सुरम्यं प्रकृतिसौन्दर्यं देवा अपि जन्मग्रहणेनैनं सनाथीकुर्वन्ति काले काले। अस्यापरिमितं वैभवं दूरदेशवासिनामपि मनांसि मोहयति। प्रमाणीकरोति प्राचीनेतिहासोल्लिखितमस्य स्वर्णविहङ्गम-नाम। अस्य सौन्दर्यवशीभूताः आगत्यागत्य बहवः विजातयः शासनमकुर्वन् समृद्धिमपि च यथेच्छं हस्तगतामकुर्वन्। प्रमाणभूताः सन्ति वीथ्यां वीथ्यां कृतनिवासाः मुस्लिमजनाः। अस्मिन् भारते नास्ति तद्द्रव्यं यत्पृथिव्यामन्यत्र वर्तते। एतादृशोऽयं भारतवर्षदेशो ग्रामपुरनगरणां समन्वयः। अत्याधुनिकयुगे यद्यपि सर्वमेव विनाशं गतं प्राचीनार्यगौरवम्। कृत्रिमचाकचिक्यं चमत्करोति मानवानां चेतांसि। तथापि ग्रामेष्वस्ति सा छबिरद्यापि तथैव स्पन्दिता। ग्रामीणजनाः वेदोक्तमार्गेणैव समस्तसंस्कारानुकूलमेव यापयन्ति जीवनम्। यद्यपि भारतीया ग्राम्याः शिक्षादीक्षाविहीनाः सन्ति, तथापि ते पूर्वप्रतिपादितां पद्धतिमामनन्ति विना तर्कम्। वैज्ञानिकयुगेऽस्मिन् यदा जनानां हृदये शास्त्रोक्ताः धर्माः महदानन्दलहरीं न जनयन्ति, तदापि ते गङ्गा-गीता-गोमातॄणामर्चनायां दत्तावधानाः दृश्यन्ते एतेषां ग्रामबान्धवानां मध्ये ग्राम्यवनितानां कीदृशमस्ति कौतूहलपूर्णं जीवनं तद् विलोकनीयमस्माकं सहृदयसाहित्यकाराणां कृते।

निरन्तरमेव गार्हस्थ्यप्रपञ्च - संलग्नहृदयाः नवनीतकोमलमानसः ग्राम्यमहिलाः निश्चितमेव देव्य इव दरीदृश्यन्ते। सर्वविधसौन्दर्यप्रसाधनविहीनाः सर्षपनिम्बैरण्डादितैलोत्तंसितकेशपाशाः कुसुमस्तबकैः कृतकर्णावतंसाः लाक्षारसराजितचरणकमलाः लौहविनिर्मित - कंकणक्वणन - मुखरीकृतदिङ्मण्डला ग्रामबालाः मलिनवसनाभ्यन्तरालावगुण्ठितमुखचन्द्रेण वारं वारं हासप्रकाशं प्रसारयन्त्यः केषां रसविदां चित्ताकर्षणं न कुर्वन्ति? एतादृशेणैव सुन्दरीसौन्दर्येणसमाकृष्टेन हिन्दीभाषाकविवरेण दिनकरेणापि उक्तम्–

कवि आषाढ़की इस रिमझिममें घन खेतोंमें जाने दो।
कृषकसुन्दरीके संग मिल अटपटे गीत कुछ गाने दो॥

× × × ×

बालाएँ जिनकी नीमतेलसे अपने केश भिगोती हैं।
मिट्टीकी चार चूड़ियोंको कन्याएँ जिनकी रोती हैं॥

सत्यमेवासां नारीणां कारुणिकचित्रं वीक्ष्य प्रवहति करुणरसनदी। नारीसुलभसौकुमार्यस्य रक्षणार्थं कुत्र सन्ति वैज्ञानिकाविष्कृत-सौन्दर्यप्रसाधनानि, कुत्र वास्ति पर्याप्तसमयः स्थित्वा सौधोपरि शृङ्गारस्य? आसां जीवनन्तु नितान्तमेव व्यस्तं गृहकार्येषु पतिपश्वादिपरिचर्यायाम्। ताः महत्सुखमनुभवन्ति गोधूमादिपेषणे धान्यकुट्टने च। कर्मयोगसाधने लीनहृदया अपि ताः श्रमपरिश्रान्तं पतिं मधुरस्मितसम्मिलितालापेन चरणक्षालनेन भोजनादिदानेनानन्दयन्ति दिवानिशम्। बालकानां यादृशीं सुव्यवस्थितां सेवां कुर्वन्ति ग्रामनार्यः, तादृशी सेवा सुदुर्लभा नागरीणां जीवने। रेणुमण्डितशरीरमपि शिशुं हर्षोत्फुल्लमनसाऽङ्के निधाय स्तन्यं

पाययन्ति। सहजचारुतां विलोक्याऽऽसां कालिदासस्य शकुन्तला स्मृतिपथं सहसाऽधिरोहति—

इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥

प्राचीनपरम्परानिर्वाहकुशलाः ग्रामीणमहिलाः यदा कदा कोलाहलमपि कुर्वन्ति परस्परं संघर्षमपि च। आक्षिपन्ति कमपि रोषमवलम्ब्य परस्परम् । परन्तु स्वल्पीयसैव कालेन ताः पुनः मिलन्ति प्रेमगद्गदाः, जलाशयं मन्दिरं च गच्छन्ति सहैव। भूतप्रेतादिभावनायां विश्वासोऽवश्यमेवास्ति भयावह आसाम्। रुग्णं बालकं 'ओझा' इति नाम्ना प्रसिद्धपुरुषस्याऽन्तिकं संस्थाप्य तस्यानुग्रहं वाञ्छन्ति। स तु ओझामहोदयः बहुद्रव्यादिलाभं समभिलषति। अतः ताः चौर्यकार्येऽपि रताः भवन्ति। प्रभावोऽयमशिक्षायाः। यदा ग्रामीणपुरुषा एव अशिक्षिताः सन्ति तदा नारीणां शिक्षायाः का कथा? स्वाधीनताप्राप्त्यनन्तरं भारतवर्षस्य प्रतिक्षेत्रेषु क्रान्तिः प्रसरति। श्रीमैथिलीशरणसदृशाः कवयोऽपि चिरकालाद्दलितामवगुण्ठनप्राकारावगुण्ठितां नारीं विस्तीर्णे व्यापके च क्षेत्रे समानयन्ति, स्थापयन्ति च। किन्तु तेषां विचारकानां भावुकसहृदयानां हृदयोद्गाराः पुस्तकेषु एव सुरक्षिताः। तैः यत्किञ्चित् स्वरूपपरिवर्तनं दरीदृश्यते नागरीणाम्, परं तत्रापि बाह्याडम्बरमेव प्रधानम्।

मुक्त करो नारी को मानव!
मुक्त करो नारी को
जननि सखी प्यारी को!—पंत

इति मुक्तिगीतसम्प्रेरिताः काश्चिच्छिक्षिता महिलाः मुक्तेः शाब्दिकमेवार्थं स्वीकृत्य शास्त्रोक्तनारीगौरवं त्यजन्ति। महतीयं हृदयोद्वेजिका घटना यत्कृतापराधाऽपि नव्या नारी पतितिरस्कृता त्यक्त्वाऽनुनयं विनयं 'तलाक' इति नाम्ना ख्यातं प्रसिद्धं सम्बन्धविच्छेदकमुपाय स्वीकरोति। नारीस्वातन्त्र्यान्दोलनमावश्यकमस्ति। परन्तु पतिपराधीन-प्रेमपद्धतितिरस्कारः नोचितः। लज्जापरिरक्षणार्थं प्राचीनपरम्परागतावगुण्ठनधारणमपि नोपेक्षणीयम्। शिक्षितापि नारी निजगुरुजनानां समक्षमनवकुण्ठितवदनारविन्देन कि कामपि शोभामावहति? नारीणां कृते तु—

सलज्जा गणिका नष्टा निर्लज्जाश्च कुलाङ्गनाः।

तथा—

तुम कनककिरन के अन्तराल में
लुक-छिपकर चलते हो क्यों
हे लाजभरे सौन्दर्य बता दो
गर्व वहन करते हो क्यों?

इति सर्वमेव शालीनत्वम्।

अत्याधुनिकसमाजवादिनः मम कथनं पर्यालोचयितुं शक्नुवन्ति। परन्तु तेषां कृतेऽपि अस्माकं भारतीयपद्धतिपोषणमत्यावश्यकम्। नारी तु लालनेन मातेव, हितोपदेशेन सरस्वतीव भोगार्थसमर्पितयौवनेन वल्लभेव स्वीकृता सर्वैः पुरुषैः। तां विना निखिलमेव जगज्जीर्णारण्यम्। निरर्थकं गार्हस्थ्यजीवनम्। पूज्येयं नास्ति निगडनिगाडनयोग्या। ये जनाः निरापराधिनीनां तासामुपरि कुर्वन्ति व्यर्थमेव पौरुषप्रयोगं, ते तु अवश्यमेव दण्डनीयाः। विचारस्वातन्त्र्यं तु आवश्यकं नारीणाम्। नारीपुरुषसम्बन्धेनैव विश्वस्य स्थितिः। अत एव द्वयोः वैचारिक समन्वयः पूजनीयः।

अस्माकं ग्राम्यानार्यः धर्मकर्मरता अपि पुरुषाणामनधिकारिकान् प्रघातान् सहन्ति। पुरुषावमानिता अपि किञ्चिद् वक्तुमसमर्थाः। पुरुषेण भ्रष्टाः कृता अपि मौनमवलम्ब्य दुःखपूर्णं जीवनं यापयन्ति। एतादृशानां दुराचाराणां निराकरणं शासनेन नूनं कर्तव्यम्। स्वरूपन्यासीकृतग्रामीणनार्यो यदा वर्तमानयुगीनचन्द्रधवलप्रकाशेन प्रकाशीभविष्यन्ति तदैव भणितुं शक्ष्यामो वयम्—

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

वायुछत्रिकाकूर्दन-प्रशिक्षणं रोमहर्षकारस्तदनुभवाश्च

--श्री अशोकचन्द्र गौड़ शास्त्री--

[प्राचीनव्याकरण-विभागीयः-वाराणसेय-संस्कृत-विश्वविद्यालयस्य]

युद्धभूमौ यदा शत्रुमण्डले स्थलसेना आक्रमितुं न प्रभवति तदा वायुसेना उपरिष्टादाक्रम्य साफल्यमधिगच्छति। विगते 'बाङ्गलादेश'-संग्रामे नैकेष्वपि क्षेत्रेषु अधिकाराय भारत-बाङ्गलादेशाभ्यां वायुसेनाया एव साहाय्यं गृहीत्वा साफल्यं समधिगतम्। वायुसैनिकानां प्रशिक्षणे वायुछत्रिका-कूर्दनस्य महत्त्वपूर्णं स्थानं विद्यते। प्रशिक्षणेऽस्मिन् युवकेभ्यो वायुछत्रिका (पैराशूट) द्वारा वायुयानात् कूर्दनस्य प्रशिक्षणं प्रदीयते।

वर्षेऽस्मिन् (१९७२) प्रथमवारं एन० सी० सी० युवकेभ्योऽपि वायुछत्रिकाकूर्दन-प्रशिक्षणावसरः प्रदत्तोऽस्माकं राष्ट्रियप्रशासनेन। भारतवर्षस्य विभिन्नप्रदेशेभ्यः समागतैः एकोनत्रिंशत्सैनिकच्छात्रैः (एन० सी० सी० युवकैः) 'पैकेट'-वायुयानात् पञ्चाशदुत्तरद्वादशशत (१२५०) फुटपरिमितोच्चस्थानात् कूर्दनेऽभूतपूर्वं सफल्यं सम्प्राप्य सम्पूर्णेऽपि देशे प्रथमं समुल्लेख्यं स्थानमधिगतम्। प्रशिक्षणस्यास्य वृत्तचलचित्रमपि निर्मितं यद्धि अचिरादेव देशे प्रदर्शितं भवेत्।

प्रशिक्षणमिदं आगरानगरस्य वायुछत्रिकाकूर्दनप्रशिक्षणविद्यालये (Para Trooping training school) भवति, यश्च आगरा-वायुयान-केन्द्रतः (हवाईअड्डा) पार्श्वभागे वर्तते। युवकेभ्यो वायुछत्रिकाद्वारा कूर्दयितुं साधारणतः 'पैकेट'-'डकोटा'-वायुयानानि प्रयुज्यन्ते। प्रशिक्षणार्थिनां भोजनावासादिकस्य व्यवस्था आगरा-नगरस्य "पैरा होल्डिंग विंग" स्थाने भवति, यच्च "खेड़िया कैम्प" (Kheria Camp) इत्यप्युच्यते। एतत् वायुछत्रिकाकूर्दन-प्रशिक्षणविद्यालयतः किलोमीटरद्वयदूरं वर्तते यस्य प्राङ्गणमर्धक्रोशायतमास्ते।

प्रशिक्षणाय समागतेषु सैनिकच्छात्रेषु २८ यू० पी० बटालियन, वाराणसेय-संस्कृत-विश्वविद्यालयतः लेखकोऽप्यन्यतम आसीत्। सैनिकच्छात्राणां भौतिकयोग्यता (Physical Titness) सिद्धये प्रारम्भिकसप्तदिवसेषु सप्तानामष्टानां वा किलोमीटर-परिमितानां धावनम्, पी० टी० - सिटअप - पुलअप प्रभृतयोऽनेके व्यायामाश्च कार्यन्ते स्म। तदनन्तरं वायुयानात् बहिर्गमनं एविजटकरणं (Exit) वा कूर्दनानन्तरं भूमौ अवसरणम् (Tanding), भूमिविलुण्ठनम् (Rolling) प्रभृतीनि प्रशिक्षणानि प्रदीयन्ते स्म।

सिट-अप

व्यायामेऽस्मिन् चरणयुगलं समं विस्तार्यैवं संवेष्टव्यम्। यथा—पार्ष्णिपाद-पञ्चकौ मिलितौ भवेताम्, करद्वयञ्च शिरसो निम्नभागे भवेत्। अथैको मनुष्यस्तत्पादौ तथा ग्रहीष्यति यथा जानुरुन्नतं न भवेत्। ततः शिरसो निम्नभागे हस्तौ सम्मेल्य स्थापयन् क्रमशो दक्षिणे वामे च मुखं कृत्वा उत्थाय आत्मनो नासिकायाश्चरणयुगले स्पर्शनस्य प्रयत्नो विधेयः।

व्यायामेनानेन उदरस्य नैरुज्यं, क्षुधावृद्धिः, पाचन-

शक्तिप्राप्तिश्च भवति । एक्जिट-करणे रोलिंग-करणे च सारल्यं भवति। वायुयानात् कूर्दनानन्तरं भूम्यवतरणकाले उदरस्य नाडिकासु कोऽपि हानिकरः प्रश्रावश्च न जायते ।

पुल-अप

'पुल अप' व्यायामकरणार्थं "पैरेलल वार" इत्याख्यस्य उपकरणस्य दक्षिणे वामभागे वा स्थातव्यम् । ततः करयुगलेन तं गृहीत्वा तावदुच्चैरुत्थातव्यम् यावद् पार्ष्णिपादपञ्चकौ मिलितौ न भवेताम् । चरणयुगलेन च समं भवितव्यम् । क्रमशः नीचैर्गन्तव्यम्, पुनरुपरि आगन्तव्यम् । कार्यमिदं निरन्तरं करणीयम्। व्यायामेनाऽनेन हस्तयोर्बलं जायते । विशेषतः कराग्रयोः शक्तिः प्रवर्धते, येन वायुछत्रिकायाः पट्टिकाः गृहीत्वा तीव्रवायौ तस्याः नियन्त्रणकरणे सारल्यं भवति ।

दैनिकः कार्यक्रमः

विद्यालयेऽस्मिन् प्रतिदिनं प्रातः षड्वादने सैनिकच्छात्राणां प्रायः सप्तकिलोमीटरं यावत् धावनं विधीयते। क्रमश्चेदं प्रतिदिनं वर्धते। तदनन्तरं क्षणं विश्रम्य विविधाः व्यायामाः क्रीडाश्च कार्यन्ते । घण्टार्धावकाशानन्तरं 'सिटअप'-व्यायामः 'पुलअप'-व्यायामश्च कार्यते । वायुछत्रिक कूर्दने (Para jump) भौतिकयोग्यतायै 'सिटअप'-व्यायामो निरन्तरं सप्ततिवारम्, 'पुलअप'-व्यायामश्च दशवारमावश्यको भवति। पूर्वाह्णे दशवादने भूमौ विलुण्ठनं (Rolling), वायुयानात् कूर्दनम्, कूर्दनानन्तरं वायुस्थितेः (Air Position), वायुछत्रिकाग्रहस्थितेश्च (Para Position) निर्माणप्रभृतीनि प्रशिक्षणानि प्रदीयन्ते, द्वादशवादने चावकाशो भवति ।

सप्तदिवसानन्तरं सैनिकच्छात्राणां परीक्षा भवति । प्रातःकाले १० मीलधावनानन्तरं परीक्षा प्रारभ्यते । १०० गज-परिमिते दूरे एकैकः पाषाणः स्थाप्यते । सैनिकच्छात्राणां कृते पञ्चचत्वारिंशत्क्षणाभ्यन्तरे चक्रत्रयं धावित्वा स्वस्वस्थाने प्रत्यावर्तनमावश्यकम् । तदनन्तरं 'सिटअप-पुलअप' - व्यायामयोः परीक्षणानन्तरं व्यजनपरीक्षणं (Eeanlest) क्रियते ।

अस्माकं व्यजनपरीक्षाया (Fan test) विवरणमित्थम्-षड्विंशतिफुटपरिमितोच्चस्थानतो विशालजलपात्रवत् लौहनिर्मितम् उपकरणमेकम्, यत्र भागद्वये सोपानद्वयमासीत् । उच्चभागे एक व्यजनमासीत् । तेन संयुक्तं कौशेय-रश्मिजालमिव किञ्चिदासीत्, यद्धि हस्तयुगले प्रवेशयित्वा चोलपरिधानवत् परिधाय धरण्यां (Hook) योजयन्ति स्म । ततः समं स्थित्वा पार्ष्णिपादपञ्चकौ सम्मेल्य जानौ ईषत्स्तम्भनम्, उदरमभ्यन्तरे च विधाय प्रशिक्षकस्य "ग्रोन ऑन गो" इत्युक्ते सत्येव कूर्दन्ते स्म । नीचैः कूर्दिते सत्येव व्यजनं चलितुमारभते स्म । प्रशिक्षार्थी चाऽतिसारल्येन भूमौ अवतरति स्म । भूमाववतरणकाले वायुस्थितौ भूमाववतीर्णे सति च वायुछत्रिकाग्रहस्थितौ भविष्यतीत्यवधेयम् ।

वायुस्थितिः (Air Position)

कूर्दनानन्तरं भूम्यवतरणकाले पार्ष्णिजानूनि मेलयितव्यानि, स्थितिश्च सुदृढा निर्मातव्या । आत्मनश्च कूर्परे (कुहनियां) अभ्यन्तरे स्थापयित्वा करौ निगृहीत-वायुछत्रिकायां (Reserve Parashoot) स्थापयितव्यम् । (व्यजनपरीक्षणे निगृहीतवायुछत्रिकाया उपरि हस्तस्थापनस्याभिनयो विधेयः) उदरमभ्यन्तरे कटिप्रदेशञ्चाग्रे संस्थापयता भवता चिबुकं (ठोढ़ी) उरसि (सीना) स्थापयित्वा नीचैरवलोकनीयम् । निगृहीत-वायुछत्रिका उरसि बद्धा भवति, अथ च मुख्यवायुछत्रिकाया अनुद्घाटितायां सत्यां तस्याः प्रयोगो विधीयते ।

(क्रमशः)

विक्रेयाणि बहुमूल्यानि पुस्तकरत्नानि

गृहं स्वर्गीकर्तुं मानवजीवनञ्च सफलयितुं वाणीपुस्तकमालातः महापरिषदः महामण्डलसंस्थानतश्च प्रकाशितानि निम्नलिखितपुस्तकानि विक्रयार्थं प्रस्तुतानि। विशेषविवरणाय सूचीपत्रं नियमाश्च पत्रप्रेषणेन समासादनीयाः।

१. भारतधर्म-समन्वय	१-५०
२. परलोक-तत्त्व	२-५०
३. कठोपनिषद्	३-००
४. धर्मतत्त्व	२-५०
५. वेदान्तदर्शन	१-५०
६. हिन्दूधर्मका स्वरूप	०-३७
७. तत्त्वबोध, सजिल्द	१-००
विना जिल्दका	०-७५
८. आदर्श देवियाँ प्रथम भाग	२-२५
,, ,, द्वितीय भाग	२-५०
९. सती सदाचार	१-५०
१०. कर्म-रहस्य	२-५०
११. केनोपनिषद्	१-५०
१२. ईशावास्योपनिषद्	१-००
१३. सप्तशती (दुर्गा) गीता, सजिल्द	३-००
,, दफ्ती जिल्द	२-२५
१४. सदाचार-प्रश्नोत्तरी	०-३७
१५. व्रतोत्सव-कौमुदी	१-३७
१६. हिन्दू-संस्कृति-समीक्षा	०-५०
१७. धर्म-प्रवेशिका	०-७५
१८. पूजा-प्रार्थना	०-६२
१९. गायत्रीमन्त्र-टीका	०-२५
२०. आचार-चन्द्रिका	१-००
२१. कन्या-शिक्षा-सोपान	०-२५
२२. गजेन्द्र-मोक्ष	०-३७
२३. महिला-प्रश्नोत्तरी	०-५०
२४. व्रतोत्सव-चन्द्रिका	५-००
२५. धर्माधर्म-प्रश्नोत्तरी	०-२५
२६. सुलोचना	०-६२
२७. तीर्थ और देवपूजन-प्रश्नोत्तरी	०-२५
२८. स्मरणी	०-६२
२९. स्त्री-पुरुष-विज्ञान	०-३७
३०. श्राद्ध और परलोक-विचार	०-३७
३१. धर्म-विज्ञान प्रथम, द्वितीय, तृतीय, ५) ४)	४-००
३२. श्रीमद्भागवत, एकादश स्कन्ध	३-५०
३३. सती धर्म और योगशक्ति	०-३७
३४. अन्तःकरण-विज्ञान	०-७५
३५. निर्मूल आक्षेपोंका उत्तर	०-३७
३६. परलोक-प्रश्नोत्तरी	०-२५
३७. श्रीमद्भगवद्गीता प्रथम भाग	४-००
,, ,, द्वितीय भाग	३-५०
३८. मनुष्य-धर्म	०-३७
३९. धर्मकल्पद्रुम प्रथम खण्ड	६-००
,, द्वितीय खण्ड	३-००
,, तृतीय ,,	३-५०
,, चतुर्थ ,,	५-००
,, पञ्चम ,,	३-५०
,, षष्ठ ,,	४-००
,, सप्तम ,,	३-५०
,, अष्टम ,,	४-००
४०. प्रवीण दृष्टिमें नवीन भारत (प्रथम खण्ड)	२-००
,, ,, (द्वितीय खण्ड)	२-००
४१. नवीन दृष्टिमें प्रवीण भारत	१-२५
४२. साधन-चन्द्रिका	१-७५
४३. शास्त्र-चन्द्रिका	१-७५
४४. धर्म-चन्द्रिका	१-६५
४५. पातञ्जल-योगदर्शन (हिन्दी भाष्य)	३-००
४६. कर्ममीमांसा-दर्शन (सम्पूर्ण)	१२-००

व्यवस्थापक : वाणी-पुस्तकमाला, आर्यमहिला हितकारिणी महापरिषद्, जगतगंज, वाराणसी

पञ्जीकृत-संख्या—एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगतगंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४९

❋

अङ्कः १०

❋

सम्पादकः
गो० न० वैजापुरकरः

❋

अक्तूबर
१९७२

❋

वार्षिक-मूल्यम्
५) रूप्यकाणि

❋

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

❋

मुरलीरवः

स्वर्गीयाः श्री कालीपद तर्काचार्याः

मञ्जुलकुञ्जकुटीरे तटिनीतीरे समुत्पतत्कीरे।
शीकरहारिसमीरे क्व नु मृदुमुरलीरवो हारी ॥ १ ॥
यमुना प्रचलति मन्दा निन्द्यमिलिन्दा प्रदीपितानन्दा।
वीचिवितीर्णच्छन्दाः क्व नु मृदुमुरलीरवो हारी ॥ २ ॥
नृत्यति कृत्तविषादः सुमधुरनादः सदा भुजङ्गादः।
कामविभूतिकलादः क्व नु मृदुमुरलीरवो हारी ॥ ३ ॥
क्षालितनीलाकाशा सितकरभासा निशा वितोल्लासा।
मूर्च्छितमानसहासा क्व नु मृदुमुरलीरवो हारी ॥ ४ ॥
तारा विगतविकारा मणिमयहारामलप्रियाकाराः।
शून्ये सितकरधाराः क्व नु मृदुमुरलीरवो हारी ॥ ५ ॥
क्वापि प्रियरसवापी मत्तकलापी रसालसोल्लापी।
मानसतापविलापी क्व नु मृदुमुरलीरवो हारी ॥ ६ ॥
गोष्ठे शष्पगरिष्ठे वनजप्रेष्ठे प्रसारभूयिष्ठे।
गौरपि चरति वरिष्ठे क्व नु मृदुमुरलीरवो हारी ॥ ७ ॥
यमुनायामवतीर्णा रसपरिकीर्णा सुखाशयोदीर्णा।
गोपी कामविशीर्णा क्व नु मृदुमुरलीरवो हारी ॥ ८ ॥
नीपः सलिलसमीपः सकुसुमदीपः प्रियामलश्रपः।
रसमयतटिनीद्वीपः क्व नु मृदुमुरलीरवो हारी ॥ ९ ॥
विकसितकुसुमामोदं जनितविनोदं हृतान्तरक्षोदम्।
लतिका ददति समोदं क्व नु मृदुमुरलीरवो हारी ॥ १० ॥
क्रीडति हरिणनिकायः प्रमुदितजायः सदा रसानायः।
कृतयवसाध्यवसायः क्व नु मृदुमुरलीरवो हारी ॥ ११ ॥
वल्ली सूनविचित्रा मधुकरमित्राश्रिता चलत्पत्रा।
दीव्यति वातपवित्रा क्व नु मृदुमुरलीरवो हारी ॥ १२ ॥
यमुनास्रोतसि दूरे गच्छति सूरे पयोनिधेः पूरे।
तरणिध्वनि - परिपूरे क्व नु मृदुमुरलीरवो हारी ॥ १३ ॥
सकलमिह तदेव दिव्यरूपं तरुलतिकातटिनीविहङ्गमाद्यम्।
तदपि च मुरलीरवेण शून्य न सदिव भाति विलासबन्धुबन्धे ॥ १४ ॥

अनुक्रमः

प्रपाठकः	पत्रपुटम्	परिवेषकः
महाकवि-कालिदासं प्रति	२१७	श्री डॉ० शिवशरण शर्मा
श्रीमहर्षि-ज्ञानानन्दचरितम्	२१८	श्री स्व० विन्ध्येश्वरीप्रसाद शास्त्रिण:
साम्प्रतिक दुरवस्थाया निदानं धर्मशिक्षाभाव:	२१९	सम्पादकीयम्
हिमागम:	२२१	श्री बटुकनाथ शास्त्री खिस्ते
,,	,,	श्री रतिनाथ झा
शब्दशास्त्रे भट्टोजिदीक्षित:	२२२	श्री परेशकुमार शुक्ल:
हिमालयो नाम नगाधिराज:	२२४	श्री रामस्वरूप शास्त्री वैद्य:
वैदिकाऽवैदिक-दर्शन-मीमांसा	२२५	श्री जगन्नाथ श्रीधरशास्त्री पदे
(२) वायुछत्रिका-कूर्दन-प्रशिक्षणम्	२२७	श्री अशोकचन्द्र गौड़ शास्त्री
बाल-रामायणम्	२३२	श्री जयशङ्कर ब० शुक्ल:
यशश्शेषा: श्री ताताचार्यपादा:	२३४	श्री एस० बी० रघुनाथाचार्य:
राजनीति परमाचार्यो महाकवि: कालिदास:	२३६	श्री शमशेर जंगबहादुर:
प्राप्त: शरत्समय एष विशुद्धकान्त:	२३९	श्री रामस्वरूप शास्त्री

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४१ वर्ष] वाराणसी, आश्विन-कार्तिकौ, २०३० वै० : अक्तूबर १९७३ ई० [१० अङ्कः

महाकवि-कालिदासं प्रति !

कविकुलगुरुवर्य ! विभो स्वीकुरुष्व वन्दनम् !

१. श्रद्धामय - मानसेन, भक्ति - विनत - मस्तकेन;
विश्वकवे क्रियते तव हार्दिक - मभिनन्दनम्।

२. प्रीतिस्तव मलरहिता, गीति - रमृत - सारयुता;
नयति सदा पुण्यपथे नीति - र्जनजीवनम्॥

३. मृदुला तव काव्यलता, दिव्यभाव - कुसुमयुता;
कुरुते रस - सौरभेण सहृदयजन - रञ्जनम्।

४. कण्वसुता शकुन्तला, स्नेह - तप - स्त्यागबला;
वहति शाश्वतं यशःसितं त्वदीय - केतनम्॥

— श्री डॉ० शिवशरण शर्मा

पूर्वतोऽनुवृत्तम्

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

--स्वर्गीयाः श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः--

(विंशे सर्गे)

३१. यश्चेतसः प्रेरणयैव नित्यं मनस्यनेके ह्युदयन्ति भावाः ।
स्वाहङ्कृतेर्वेगत एव बुद्धौ जागर्ति शश्वत् सदसद्विवेकः ।।
३२. अत्यन्त - सूक्ष्मेक्षिकया विचारे विधीयमाने तु विभाति चैतत् ।
शुद्धं त्वशुद्धं च मनो द्विरूपं तत्त्वज्ञविद्भिः परिकीर्तितं तत् ।।
३३. शुद्धं मनस्त्वातममुखं त्वशुद्धं दासायते स्वेन्द्रियसन्ततीनाम् ।
आत्मोन्मुखी चेन्द्रियगामिनी वा बुद्धिर्नराणां द्विविधा विबोध्या ।।
३४. निजेन्द्रियाण्याश्रितया च बुद्ध्या ह्यशुद्धिभाजा मनसा तु, यानि ।
कार्याणि कुर्वन्ति नराश्च तेषा - मुदर्कभूतो विषयप्रमोदः ।।
३५. या बुद्धिरात्मोन्मुखतां प्रपन्ना मनश्च शुद्धं द्वयमेकमेव ।
एतद्द्वयी रम्यकृतेरुदर्क आत्मानुभूतिर्हि ततस्तु मोक्षः ।।
३६. शिक्षाप्रणाल्यां जगतीह यस्यामशुद्धिभाजो मनसश्च बुद्धेः ।
निजेन्द्रियग्राम - सुसंरताया निरन्तरं लालनपालनं स्यात् ।।
३७. तस्या उपादानमनर्थमूल-मशान्तिदं शर्मसमूलनाशम् ।
स्वरूपविज्ञान-विरोधि तस्माद् यत्नात् परित्याज्यमदः सुधीभिः ।।
३८. यस्यां तु विद्या-समुपासनेन शुद्धं मनस्त्वात्मपरा च बुद्धिः ।
विकासिते स्तः क्रमशः सदैव सैवास्ति शिक्षासरणिः शुभंयुः ।।
३९. एतत्सुसिद्धान्त - वरेण्यभित्तौ प्रतिष्ठितं शिक्षणरूप - दुर्गम् ।
समाश्रयन्तो मनुजाः कदापि ग्रस्ता भविष्यन्ति न ते विपद्भिः ।।
४०. स्वदेश एवास्त्यखिलं धरित्रीतलं समस्तोऽपि च जीववर्गः ।
आत्मस्वरूपो नहि कोऽपि भिन्नः शिक्षाविधेर्लक्ष्यमनुत्तमं तत् ।।

(क्रमशः)

सम्पादकीयम्

साम्प्रतिक-दुरवस्थाया निदानं धर्मशिक्षाभावः

स्वतन्त्रभारतस्य रजतजयन्ती-महोत्सवो विगते वर्षे समारोहेण भारतशासनेन समायोजितः। परीक्षकैर्विवेचकैः आशंसितं यद्रजतजयन्ती-सम्पन्ने राष्ट्रे रजतस्य वैपुल्यं स्यात्। किन्तु पर्यन्ते ते रजतस्थाने लौहमपि नासादितम्। विगतवर्षोन्तरम् अस्मिन् प्रचलिते वर्षे समग्रे राष्ट्रे एतादृशं दारिद्र्यं सर्वेष्वपि क्षेत्रेषु प्रसृतं येन इदमपि शङ्कास्पदं समभवद् यद्वयं स्वतन्त्राः स्याम न वा? स्वतन्त्रताया अस्यास्तथाकथितजनकैः स्वर्गीय महात्मगान्धि महाभागैरुद्घोषितपूर्वं यन्मम सङ्कल्पितं स्वतन्त्रं राज्यं रामराज्यं भवेत्। रामराज्यस्य स्वरूपनिर्वचने तैं राष्ट्रभाषामहाकवेस्तुलसीदासस्य पद्यमिदं प्रस्तूयते स्म—

दैहिक दैविक भौतिक तापा।
रामराज्य नहि काहुहि व्यापा॥

अर्थात् 'रामराज्या'ख्ये स्वतन्त्रशासने दैहिक-दैविक-भौतिकानि सर्वाण्यपि दुःखतापानि विलयं यान्ति। किन्त्वद्य तु दुःखतापान्येतानि अहमहमिकया भारतीयं जनं समालिङ्गितुं स्पर्धमानानीव विलोक्यन्ते। किमतः परं तथाकथितराष्ट्रपितॄणां पुत्रैः परिचाल्यमानस्य स्वतन्त्रशासनस्य तत्सङ्कल्पात्यन्तविप्रतीपं विधुरं वक्तव्यं भवेत्?

क्षणमादिकवेर्वाल्मीकेः रामायणगतां शम्बूकवृषलकथां स्मरन्तु। मृतस्य युवकपुत्रस्य शवमादाय न्यायप्राप्त्यै समागतस्य ब्राह्मणस्य वचनं निशम्य भारतीयादर्शराज्ञा रामचन्द्रेण तपोनिरतं शम्बूकं वृषलमन्वेष्य तच्छीर्षच्छेदेन ब्राह्मणबालः पुनरुज्जीवितः। कोऽत्र हेतुः? सुस्पष्टमेतद् यद्वर्णधर्मानुसारं ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां शास्त्रविहितान्येव कर्माणि तैस्तैः समनुष्ठेयानीति भारतीया मर्यादा। नहि केनापि स्वधर्मस्त्याज्यो न वा परधर्मः समाचरणीयः। 'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः' इति हि नन्दनन्दनो भेरीघोषमस्मान् समुपदिशति। सेवा हि चरमस्य वर्णस्य परमो धर्मः। ततः प्रच्युतो भूत्वा शम्बूकः प्रथमवर्णीय धर्माचरणे संप्रवृत्त आसीत्। आपातदर्शने स कथमपि अधर्मे प्रतिष्ठितो नासीत्। तथापि अकाले ब्राह्मणपुत्रमरणं दृष्ट्वा भारतीयशासकादर्शमूर्तिना रामचन्द्रेण धर्मेऽपि सुगुप्तमधर्ममन्विष्य तन्निवारणेन ब्राह्मणपुत्रस्य पुनरुज्जीवनं कृतम्। एतेन सुस्पष्टमेतद् यद्भारतीयशासनस्यानुपेक्ष्यं कर्तव्यं स्वशासितप्रजावर्गस्य धर्मणि नियोजनं नाम। तदैव सङ्कल्पितं रामराज्यं मूर्तरूपतां गच्छतीति।

भारतीयशासकस्यादर्शं श्रीमद्भागवते (४.२१.२२,२४) भगवान् वेदव्यासः आदर्शसम्राज्यः पृथोर्मुखेन वक्ति—

अहं दण्डधरो राजा प्रजानामिह योजितः।
रक्षिता वृत्तिदः स्वेषु सेतुषु स्थापिताः पृथक्॥
य उद्धरेत् करं राजा प्रजा धर्मेष्वशिक्षयन्।
प्रजानां स मलं भुङ्क्ते भगं च स्वं जहाति सः॥

एतेन सुस्पष्टं प्रमाणितं यद् राज्ञः शासनस्य वाऽनिवार्यं कर्तव्यं प्रजावर्गस्य आजीविकाप्रबन्धस्तत्तन्मर्यादासु तस्यप्रतिष्ठापनञ्च। नैतावदेव, प्रजाभ्यो धर्मशिक्षणमपि तस्यानुपेक्ष्यं कर्तव्यमिति भारतस्य स्वर्णिमं पुरावृत्तम्।

काममद्य राजतन्त्रशासनं न स्यात्। किन्तु शासनं तु किमप्यस्त्येव। तस्मिन्नेव उत्सर्गतो भारतीयराज्ञः सर्वं कर्तव्यमन्वेति। केनापि भारतशासनेन सुस्पष्टमवधेयं यदिदं भारतं धर्मप्राणो देशः। नायं अमेरिका-रूसादिवद् भौतिकवादशिखरं समारूढः। महतोऽस्य राष्ट्रस्य समतीतो गौरवो नितरामतुलनीयः। एतदीयशासनस्य पार्यन्तिक आदर्शो रामराज्यं नाम। निर्विशेषस्पृहणीयताऽपरपर्यायं रामराज्यमेतदर्थमेवाभवद् यदिदं धर्मराज्यमासीत्। सम्राट् रामचन्द्रः प्रजारञ्जनाय सर्वस्वमपि समर्पयितुं

प्रस्तुत आसीत् । प्रजाप्रसादनायैव तेन प्राणप्रिया धर्मपत्नी जानकी अपि निर्वासिता ।

किन्त्वद्य सर्वं तद्विपरीतमेव दृश्यते । शासनं स्वात्मानं धर्मनिरपेक्षं पर्यायतो धर्मविरहितं समुद्घोषयितुं गर्वमनुभवति । समस्तस्य प्रजाजनस्य जीवनं धनं सम्मानश्च किमपि सुरक्षितं नास्ति । साम्प्रतिकानि दैनिकवृत्तपत्राणि सूर्यप्रकाशे एव लुण्ठन-मारण-स्तेय-प्रकाशचौर्या-ऽपहरणदीनां रोमाञ्चोद्भावकैर्वृत्तजातैरेव नख - शिखं पूरितानि विलोक्यन्ते । एतादृशातङ्ककारिषु शासकस्य कीदृशोऽप्यातङ्को नास्ति, यतः प्राय एते दण्डनिर्मुक्ता एव भवन्ति । इदं किल जनरक्षणस्य अद्यतनीयं वृत्तम् !

इदानीं धर्मशिक्षाविषयमेव परिशीलयन्तु । आसीद् भारतराष्ट्रस्य सुनिर्धारितः सुप्रचारितः समनुष्ठितश्च सिद्धान्तो यत् शिक्षायाः सर्वथा शासनानियन्त्रितत्वं नाम । किन्त्वद्य तु सर्वाऽपि शिक्षा शासनाधीना । वैयक्तिक्यः शिक्षासंस्था अपि अहरहः शासननियन्त्रिता भवन्ति । याश्च नाद्यापि तथाभूतास्तदर्थमस्माकं शिक्षानेतारो महत्तराणि महाभियानानि विदधन्तो दरीदृश्यन्ते । एतासु शिक्षासंस्थासु शासनाधीनासु शासननियन्त्रितासु च धर्मशिक्षाया न कापि व्यवस्था । यतः शासनं तद्व्यवस्थापनं स्वीयधर्मनिरपेक्षतानीतेः सर्वथा विरुद्धं मनुते । तस्य धर्मस्वरूपमपि प्राचीनतमधर्मस्वरूपादन्यद् दृश्यते । भारतीयं चिरन्तनं वैदिकं हिन्दूधर्मं तत् साम्प्रदायिकमामनति । अत एव साम्प्रतिकं शासनं शिक्षासु सर्वथा धर्मं निषेधते । अस्या एव धर्महीनशिक्षाया दुष्परिणामो यदद्यतनीयाः शिक्षासंस्थास्तादृशानां निर्माणकेन्द्राणि जायन्ते ये अग्निकाण्ड-लुण्ठन हत्या-स्तेयाऽपहरणादिकृत्येषु स्तोकमपि न लज्जन्ते, प्रत्युत तदुपादाने गौरवमेव मन्वते । अध्यापक-शिक्षक-गुरुजन-हत्यासदृशानि जघन्यतमानि कृत्यान्यपि एतेषां कृते साधारणतमानि !

प्राचीनकाले भारतीयाः शिष्याः गुरोराज्ञापालकाः महत्तरमपि त्यागं कुर्वन्तः कष्टानि च समुपभुञ्ज्यन्त आसन् । ते गुरुगृहवासकाले गुर्वाज्ञापालनमनुपेद्यं कर्तव्यं मन्वन्ते स्म, गुरुञ्च इष्टदेववत् पूजयन्ति स्म । तदैव ते भारतस्य आदर्शनागरिक गौरवं भजन्ते स्म । तेभ्यो वेद-वेदाङ्ग-दर्शनोपनिषदायुर्वेदेतिहास-पुराण-धनुर्वेदादीनां शास्त्राणां चतुष्षष्टिकलानाञ्च शिक्षणं दीयते स्म । तेभ्यो भारतीय धर्म-संस्कृतेर्यथार्थरूपं परिचाय्यते स्म । ते हि पाप-पुण्ययोः, अनाचार-सदाचारयोः कर्तव्या-ऽकर्तव्ययोश्चाञ्जसा विवेकं कर्तुं प्रभवन्ति स्म । अत एव प्राचीनभारतीया युवका गुरुगृहतः समावर्तनोत्तरं विधिवत् पाणिग्रहणं कृत्वा आदर्शगृहस्थाः सुयोग्यानुशासनदीक्षिताः मातृ-पितृ - गुरु - सेवकाः देशस्य धर्मस्य च कृते सर्वस्व - समर्पणतत्पराश्च आदर्शनागरिका जायन्ते स्म । तेनैवास्माकं देशो जगद्गुरुत्वरूपे महत्पदे समधिष्ठित आसीत् ।

किन्तु अद्यतनीयं शासनं प्रजाभ्यो धर्मशिक्षादाने सर्वथाऽसफलमास्ते । प्रजाया आजीविकाव्यवस्था शासनस्य कर्तव्यं भवति । किन्तु साम्प्रतिकशासनस्य कार्यनीत्या प्रायः सर्वेषां प्रजा-जनानामाजीविका नश्यन्ति । अद्यास्मिन् निर्धनप्राये देशे कोटिशो जना आजीविकाहीना दृश्यन्ते । मन्त्रिणां पुनः सुखसुविधासु आवासादिषु च अब्जाधिकं द्रव्यं प्रतिवर्षं व्ययीभवति । गुप्तकाले किल गुप्तसाम्राज्यमहामन्त्री पर्णकुटौ निवत्स्यमान आसीत् । अत एव तदा दैवजगदपि भारतीयशासकस्य अनुकूलमासीत् । प्रकृतिरपि यथासमयं तत्तद्वस्तूनि उपहारीकर्तुमहमहमिकया प्रवर्तमानाऽऽसीत् । पृथ्वी धनधान्यपरिपूर्णा जनता च सर्वसमृद्धा दृश्यते स्म ।

साम्प्रतं प्रायो जनैरुच्यते यत् 'परिवर्तितोऽयं कालः । अद्य प्राचीन-विषयाणां विचारो मूर्खतापूर्ण एव स्यादि'ति । बाढमेतत्, समयः परिवर्तित इति । आसीत् स त्रेतायुगः, साम्प्रतं तु कलियुगः प्रचलति । किन्तु शासकस्य शासितानाञ्च कर्तव्यानि न जातु परिवर्तितानि । वेदशास्त्रोक्तानि किल कर्तव्यानि यथार्थानि शाश्वतानि भवन्ति । कालदिशौ न तत्र मनागपि परिवर्तनं कर्तुं प्रभवतः । तथा सति तेषां याथार्थ्यमेवापगतं स्यात् । मानवस्य स्वीय-मातृ-पितृ-गुरुजन-विषयकम्, स्वसन्तति - विषयकम्, पोष्यवर्ग - विषयकम्,

विभाति हिमागमः !

उषसि सरसामम्भोजिन्या विलोक्य विपन्नता-
मुदयति परं वाक्योद्रेको यदीय विचेष्टितैः ।
चरमवयसां विदूध्यत्यङ्गं समीर शरोत्करै-
मर्दयति शिशून् कोऽयं स्वैरी विभाति हिमागमः ॥

—श्रीबटुकनाथ शास्त्री खिस्ते

असुन्दरस्याहनि या हिमांशोः कलां विलोक्योल्लसतीव पद्मिनी ।
ततोऽनिकोपात् कुलमेव तस्या निहन्ति तन्मित्रतया हिमागमः ॥ १ ॥
द्विजमथामृतमप्यखिलप्रियं सरसिजं च विरूपयितुं भृशम् ।
जगति मित्रमति प्रणयास्पदं शिखिनमातनुते च हिमागमः ॥ २ ॥
नहि धनं न सुशासनजासनं समधिकर्तुमनाचरितं शुभम् ।
अपनयादपयाति रसातलं चिरसमर्जित - सन्महिमागमः ॥ ३ ॥
प्रियं द्रुतं गन्तुमिवाम्बराञ्चलाज्झटित्यकस्मादुपसंहृत श्रियम् ।
मुहुर्मुहुः प्रार्थयते सरोजिनी निशागमे नाथ बहिर्हि मा गमः ॥ ४ ॥

—श्री रतिनाथ झा

सामाजिकं राष्ट्रियं वा कर्तव्यं न जातु अद्यापि परिवर्तितम् । मानवस्य जीवन - मरण - नियमेषु, उन्नत्यवनति - नियमेषु उत्थान-पतन-नियमेषु वा न किमपि परिवर्तनं साम्प्रतमपि सम्पन्नम् । नापि च मानवस्य श्रेष्ठपुरुषस्य अनुकरण-प्रवृत्तिरद्यापि परिवर्तिता । सामान्यजनस्य स्वभाव एवायं यत्—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥

अत एव कांग्रेससंस्थायाः धर्महीने शासने जनताऽपि तदनुकरणेन साम्प्रतं धर्महीना संवृत्ता । वेदशास्त्रोक्ता मौलिकाः सिद्धान्ताः सर्वथा अपरिवर्तनीया भवन्ति । धारण-संयुक्तं तत्त्वमेवास्माकं धर्मः । न तत्र परिवर्तनं जातुचन संवृत्तम्, न वा संभाव्यते । किन्तु यदा मौलिकसिद्धान्तान् परित्यज्य स्वेच्छाचारः प्रसरति, तदैव प्रकृतिकोपो दैवरोषश्च जायते, येन प्रजासु विविधसङ्कटानि वस्तूनामभावा, उत्पाताः, महामारयः दुर्घटनाः, अतिवृष्ट्यनावृष्टि-रोगाद्या आपदश्च परितः प्रसरन्ति । धर्महीनशिक्षाशिक्षिता परलोक-परमार्थविषयानभिज्ञाः केवलं दृश्यमानं जगदेव सत्यं मन्वन्तः एभिरलौकिकैः सूक्ष्मैरापन्निदानै अपरिचिताः स्थूलमुपायमेव समाश्रयन्ति, यो हि अलोकिकविकृति-निवारणे स्वभावत एव न प्रभवति । अतो भारतराष्ट्रस्य स्वातन्त्र्यं सर्वसम्पन्नं सर्वातिशायि कर्तुं समीहमानैः केन्द्रीय-राज्यीय-शासनैः धर्म-शिक्षायाः सुनियोजिता योजना आगामि-पञ्चवर्षीय-योजनायां समावेश्या । तदैव भारतस्य स्वातन्त्र्यं कृतकृत्यं भवेत्, स्वातन्त्र्य-जन्मदातुर्महात्मगान्धिनश्च रामराज्य-स्वप्नं साकारतां गच्छेदिति ।

शब्दशास्त्रे भट्टोजिदीक्षित : एकं समीक्षणम्

—श्री परेशकुमार सु० शुक्लः—

अथ 'व्याकरण'शब्दस्य का व्युत्पत्तिः ? 'व्याक्रियन्ते = व्युत्पाद्यन्ते शब्दा अनेन' इति व्युत्पत्त्या शब्दसाधुत्वव्युत्पादकं शास्त्रं व्याकरणम्। अथ कानि प्रयोजनानि व्याकरणाध्ययनस्य ? 'रक्षोहागमलध्वसन्देहाः प्रयोजनम्' इत्यादीनि अष्टादश प्रयोजनानि महाभाष्ये भगवता पतञ्जलिना प्रदर्शितानि सन्ति। अत एव एकः पण्डितः स्वपुत्रं कथयति यत्—

यद्यपि बहु नाऽधीषे तथाऽपि पठ पुत्र! व्याकरणम्।
स्वजनः श्वजनो माभूत्सकलः शकलः सकृच्छकृत् ॥

भाष्यकारेण तु स्वकीयमहाभाष्ये लिखितमस्ति यद् 'म्लेच्छो ह वा एष यदपशब्दः, म्लेच्छा मा भूम' इत्यध्येयं व्याकरणम्' इति। व्याकरणाध्ययनस्य प्रवर्तिका एका श्रुतिरपि वर्तते—'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।' षडङ्गेषु च व्याकरणं प्रधानम्। प्रधाने च कृतो यत्नः फलवान् भवति। व्याकरणेषु च मुख्यं पाणिनीयव्याकरणम्।

अत एवोक्तम्—

"पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥"

पाणिनीयव्याकरण-शास्त्रस्य प्रमुखग्रन्थः अष्टाध्यायी महाभाष्यं च वर्तते। अष्टाध्याय्याः प्राक् अनेके ऐन्द्र-चान्द्रादिव्याकरणग्रन्थाः प्रचलिता आसन्, परं पाणिनीयव्याकरणस्याग्रे तेषां प्रभावः अत्यल्पः सञ्जातः। यतो हि लौकिक-वैदिकोभयविधशब्दव्युत्पादकम् 'अइउण्' इत्यादिचतुर्दशशिवसूत्रमूलक - प्रत्याहारनिष्पादनद्वारा लघुभूतम् उदात्तादिस्वरप्रतिपादकञ्च वर्तते पाणिनीयं व्याकरणम्। अतस्तत् सर्वथा चतुरस्रं देवाश्रितम् अनवद्यञ्च। ख्रिस्तीयषोडशशतके समुत्पन्नेन महामहिमशालिना पण्डितप्रवरेण लक्ष्मीधरसूनुना श्रीभट्टोजिदीक्षितेनानेन 'वैयाकरणसिद्धान्तकौमुदी' नाम पुस्तकं रचितम्।

भट्टोजिदीक्षितस्य मार्मिकवैयाकरणत्वम् :

पाणिनेराचार्यस्य दृष्ट्या 'विश्रमः' इति रूपम्, नोपधावृद्धिसंपन्नो 'विश्रामः' इति। किन्तु लोके 'विश्रामः' इत्येव प्रयोगः श्रूयते प्रयुज्यते च। अतो भट्टोजिना उक्तम्—**अपाणिनीयमेतत्**। इयं पाणिनेराचार्यस्य महती त्रुटिः कियता माधुर्येण दीक्षितेन समालोचिता !

एवं यथा रामशब्दात् जायमानप्रथमैकवचने सुप्रत्ययान्तर्गतस्य उकारस्य इत्संज्ञा जायते तथैव सप्तमीबहुवचनविवक्षायां जायमानसुप्प्रत्ययान्तर्गतस्य उकारस्य इत्संज्ञा कथं न भवति ? इत्यादिशङ्कानिवारणार्थं दीक्षितेनोक्तम्—**प्रतिज्ञानुनासिक्याः पाणिनीयाः** इति। तेन 'रामेषु' इत्यत्र इत्संज्ञासन्देहो निवर्तते।

'अअ' इति सूत्रे पठितः प्रथमोऽकारः विवृतः, अन्त्यश्च संवृतः। इयं वार्ता यद्यपि सूत्रतो न स्पष्टीभवति; तथापि 'ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्, प्रक्रियादशायान्तु विवृतमेव' इति कौमुद्यां स्पष्टीकृतम्। अतः 'दण्डाढकम्' इत्यत्र दीर्घादिकमुपपद्यते :

'अणुदित्सवर्णस्य चाप्रत्ययः' इत्यस्मिन् सूत्रे अण्प्रत्याहारग्रहणे शङ्का भवति 'पूर्वणकारेण प्रत्याहारः उत परणकारेण ?' तर्ह्युच्यते—

'पूर्वेणैवाण्ग्रहाः सर्वे, परेणैवेण्ग्रहाः मताः, ऋतेऽणुदित्सवर्णात्' इति। कौमुद्यामपि दीक्षितेनोक्तम्—'अत्रैवाण् परेण कारेण।' कुचुटुतुपु एते उदितः, अनेन कचटतपवर्गाणां बोधो भवति। अतः कौमुदीविषये केनापि पण्डितेनोक्तम्—

कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः ।
कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः ॥

नव्य-प्राचीनभेदात् व्याकरणं द्विविधम्, तत्र प्राचीनव्याकरणे महाभाष्य-काशिका-प्रभृतीनि पतञ्जलि-वामन-जयादित्यादिरचितानि पाणिनीयसूत्रक्रमानुसारीणि व्याख्यापराणि ग्रन्थरत्नानि अन्तर्भवन्ति । नव्यव्याकरणे तु भट्टोजिदीक्षिताद् आरभ्य नागेशप्रभृतिभिः विरचिताः प्रौढमनोरमा-शब्देन्दुशेखरादिग्रन्थाः गृह्यन्ते ।

भट्टोजिदीक्षितस्य वैशिष्टचम् :

भगवता भट्टोजिना उक्तं कौमुद्याम्—"एषामन्त्या इतः चतुर्दशसूत्रेषु पठिता अन्त्यवर्णाः इत्संज्ञकाः, लण्सूत्रेऽकारश्च । किं प्रयोजनं लण्सूत्रेऽकारस्य इत्संज्ञाकरणे ? साधयितुं रप्रत्याहारम्, तेन कृष्णर्द्धिः, तवल्कारः इति रूपे 'उरण्रपरः' इति सूत्रेण 'र'प्रत्याहारसिद्धचा लपरत्वमपि उपपद्यते ।"

पाणिनीयव्याकरणे इतस्ततः विकीर्णानि शब्दतत्त्वरत्नानि भट्टोजिना एकीकृत्य तत्तत्प्रकरणे निबद्धच सङ्कलितानि मणिमालावद् गुम्फितानि समुचितप्रकरणानुसारं व्यवस्थापितानि च वर्तन्ते । यथा संज्ञाविधायक-सूत्राणि प्रायशः संज्ञाप्रकरणे समागच्छन्ति । कानिचित् संज्ञाविधायकसूत्राणि विशेषप्रकरणे निबद्धानि सन्ति । यथा—टिसंज्ञा । यत्र टिसंज्ञायाः प्रकरणं तत्र तद्विधायकं सूत्रं वर्तते । तथैव मुख्याः परिभाषा अपि परिभाषाप्रकरणे संलग्नाः कृताः । यथा—'तस्मिन्निति निर्दिष्टे पूर्वस्य', 'तस्मादित्युत्तरस्य' इत्यादि ।

पाणिनीयव्याकरणाष्टाध्याय्यां वैदिकप्रयोगसाधनेषु आगतानि सूत्राणि दीक्षितेन वैदिकप्रक्रियायां क्रमशः अष्टसु अध्यायेषु संकलय्य स्थापितानि सन्ति । प्रायशः प्रथमाध्याये प्रथमाध्याये प्रथमाध्यायान्तर्गतसूत्राणि आगच्छन्ति, तथैव द्वितीय-तृतीय चतुर्थ-पञ्चम-षष्ठ-सप्तमा-ऽष्टमाध्यायेषु तत्तदध्यायान्तर्गतानि चेदं वैशिष्टचं भगवतः भट्टोजिदीक्षितस्य ।

तथा रघुवंशस्य द्वितीयसर्गे कविकुलगुरुणा कालिदासेन उक्तम्—'विस्मापयन् विस्मितमात्मवृत्तौ' इति । किन्तु 'नित्यं स्मयतेः' इत्यनेन सूत्रेण प्रयोजकाद् विस्मये नित्यमात्वं भवति । उक्तप्रयोगे तु 'मनुष्यवाचा' इति करणादेव स्मयस्य सत्त्वेन आत्वं न स्यात् । यदि एवञ्चेत् तर्हि शानच्प्रत्ययः स्यात् ? सत्यम्; 'विस्माययन्' इत्येव पाठ इति साम्प्रदायिकाः ।

भट्टोजिदीक्षितस्तु 'राजा विस्मयते, तं राजानं मनुष्यवाक् विस्मापयते, मनुष्यवाचा सिंहः तं राजानं विस्मापयन्' अनया रीत्या ण्यन्ताण्णिच्प्रत्ययं कृत्वा शतृप्रत्ययेन 'विस्मापयन्' इति रूपं साधयति । इदमपि वैशिष्टचं भगवतो भट्टोजिदीक्षितस्य ।

'टाबृचि—पादन्ताट्टाप् स्यात् ऋचि वाच्यायाम्' इति तु वृत्तिः । किन्तु सूत्रे पादशब्दोच्चारणं न वर्तते, तथैव 'इको यणचि' इति सूत्रे अच्पदं पठितम् । परन्तु 'आद्गुणः' 'अकः सवर्णे दीर्घः' इत्यादिसूत्रेषु अच्पदस्यावृत्तिः न दृश्यते । अतः दीक्षितेन उक्तम्—**सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र** । इतीदं रहस्यं भगवता पाणिनिनाऽपि 'स्वरितेनाऽधिकारः' इति सूत्रेण सूचितम् ।

भगवता पाणिनिना 'वाचो ग्मिनिः' वाचः, ग्मिन् प्रत्ययो भूत्वा वाग्मीति रूपं जायते । 'बहुभाषिणी'त्यर्थे 'आलजाटचौ' प्रत्ययौ स्तः । तेन वाचालः, वाचाटः सिद्धचति । तत्रोक्तम्—. 'आलजाटचौ बहुभाषिणी'ति । परन्तु वाचो ग्मिनिः इत्यत्र किमपि न स्पष्टीकृतम् । परन्तु तत्र दीक्षितमहाभागः कथयति—'यस्तु सुष्ठुरीत्या बहु भाषते स वाग्मी'त्येव ।

इत्थं स्थले स्थले सूक्ष्मेक्षिकया गवेषणे बहु वैशिष्टचं समुपलप्स्यते । किन्तु विस्तरभिया नोल्लिखितुं पार्यते । एभिश्च महाभागैः प्रौढमनोरमा-शब्दकौस्तुभ-भूषणकारिका-प्रभृतयो ग्रन्था अपि मौलिकविचारसरण्या शब्दपरिष्करणपद्धतिं स्वाप्रतिमप्रतिभया परिशील्य विरचिताः, शब्दकौस्तुभादि-ग्रन्थनिर्माणद्वारा च शब्दशास्त्रे सर्वप्रथमं स्वप्रातिमं नावीन्यमाविष्कृतं दीक्षितमहाभागेन ।

तत्र "फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते ॥"

इत्यादिकारिकाभिरेव स्थालीपुलाकन्यायेन तद्वैशिष्टचं व्यज्यते ।

●

गृहरत्ना निबालका:

हिमालयो नाम नगाधिराजः

--श्री रामस्वरूप शास्त्री वैद्यः--

हिमालयः 'पर्वतानां राजा' कथ्यते । अयं सर्वेभ्यः पर्वतेभ्यः उच्चतमः । एष भारतस्य उत्तरस्यां दिशि अवतिष्ठते । अयं हिमस्य आलयः, एषः औषधीनां निधानम्, वनेचराणाम् आश्रयः, मृगेन्द्राणां जन्मभूमिः, देवानां विहारस्थलम्, प्रदर्शनाधिष्ठानं वन्यवृक्षाणाम्, आकरश्च रत्नानाम्। जलधरा अस्य महोत्तुङ्गानि शृङ्गाणि सङ्घघट्टयन्ते समाश्रयन्ते च वर्षासु भारश्रान्ताः । अस्य उपत्यकासु नैके शश-मृग-वृक-शिवा शृगाल-शार्दूल-महिष-गण्डक-भल्लूक-सल्लक गवय-चामर-पञ्चाननाः स्वैरं विचरन्ति वन्यपशवः, गुहासु निवसन्ति तपस्विनः, विलसन्ति च उपवनेषु निवहाः खगानाम् । जनाः सुदूरदेशात् अस्य दर्शनार्थम् आयान्ति । अस्य उदग्रशिखरारुढैः अधःस्थितानि महाक्षेत्राणि केदाराणि इव, भवनानि क्रीडनकानि इव, मनुष्याः बालका इव, बालकाः शालभञ्जिका इव, नद्यः सरीसृपा इव, समुद्राः तडागा इव, तडागाश्च पल्वला इव प्रतीयन्ते ।

साहसिकाः युवानः सङ्घान् विधाय अस्य उदग्राणि शिखराणि समारोहन्ति । पाश्चात्त्याः यात्रिणः अस्यमहोतुङ्गानि शिखराणि समारोढुं सुतरां प्रयतन्ते । वर्षं वर्षम् एतेषां सङ्घाः एनं गिरिराजम् आरोहन्ति । हिमवतः आरोहणं न कश्चित् बालानां विलासः, अपि तु शौर्यस्य निकषपाषाणम् । तत्र हिमः वर्षति, हिमचिते मार्गे न मिलति पदपद्धतिः, जडीकरोति हिमानीशीतं यात्रिभिः हसन्तीषु नीयमानम् अनलमपि । शरांसि इव क्षिनत्ति देहं हिमशीतलः पवनः । नालं भवन्ति साधनानि, व्यर्थीभवन्ति च सहाया हिमवतः आरोहणयात्रायाम् । कदाचित् सहसा हिमानी पादतलात् अधस्ताद् प्रस्खलति, आरोहकश्च क्रोशात् निम्नासु अद्रिद्रोणीसु परिपतन् हिमराशौ निलीयते । यदि कश्चिद् अवश्यायविस्पष्टे पथि स्खलति स तु त्वरितमेव निम्नं प्रयाति नश्यति च तत्क्षणादेव ।

महोच्छ्रितानि अस्य शृङ्गाणि सदैव हिमेन आच्छादितानि भवन्ति। नाङ्गपर्वतः, नन्दादेवी, केदारनाथः, गङ्गोत्री, यमुनोत्री, काञ्चनजङ्घा च इत्यादीनि अस्य अन्यानि अपि उन्नतानि सन्ति शिखराणि । केदारनाथः, मानसरोवरः, कैलाशश्च इत्यादीनि हिमालयस्य वक्षसि तीर्थस्थानानि सन्ति। गौरीशङ्कर नाम हिमवतः शिखरं सर्वोच्चतमम्, अस्य उच्छ्रायः षट्क्रोशार्धपरिमितं वर्तते ।

हिमालयः खलु नदीनां प्रभवः। अस्मात् गङ्गा, यमुना, ब्रह्मपुत्रा अन्या अपि च नद्यः प्रभवन्ति । अस्य अधित्यकायां मानसे नाम्नि सरसि हंसाः निवसन्ति स्म । इदानी नष्टा जातिः हंसानाम्। अस्य तटात् नातिदूरे एव स्थितेषु प्राचीनबौद्धमन्दिरेषु दीर्घायुषः मुनयः निवसन्ति, ये केवलं जलाहारं पवनाहारं फलाहारं वा विधाय ईश्वरं भजन्ते, अत्र चिरञ्जीविनः कृष्णद्वैपायनस्य मुनेः केचित् पुण्यवन्तस्तपस्विनः कुर्वन्ति दर्शनम् ।

कविकुलगुरुः कालिदासः हिमालयस्य अधिष्ठातृदेवं हिमाचलं निरूपयामास । स हिमाचलस्य पत्नीं मेनां वर्णयामास । पार्वती हिमाचलस्य पुत्री अभवत्। या तु अधुनातनेऽपि लोके शिवा भवानी रुद्राणी मृडानी चण्डिका-अम्बिका इत्यादिभिः नामभिः कथ्यते पूज्यते च जनैः । पर्वतराजस्य पुत्री सा पार्वती देवदेवस्य महादेवस्य पाणि जग्राह । तयोः पुत्रौ श्रीगणेश-स्कन्दौ अद्यापि लोकेषु पूजां लभेते ।

(शेषांश २४० पृष्ठे)

धर्मे सर्वं प्रतिष्ठितम्

पूर्वतोऽनुवृत्तम्

वैदिकाऽवैदिक-दर्शन-मीमांसा

— श्री जगन्नाथ श्रीधर पदे शास्त्रिणः —

धर्मक्षेत्रम्

धर्मक्षेत्रं नाम धर्मस्य क्षेत्रम् । तथा चोक्तं गीतासु :

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते । (१३.१)

क्षेत्रं नाम शरीरम् । 'शीर्यत इति शरीरम्' । अत एव तत् सादि सान्तं च । तच्च चतुर्विंशतितत्त्वात्मकम् । तथा चोक्तं भगवद्गीतासु (१३.५)—

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥

अवशिष्टः पञ्चविंशः पदार्थः पुरुषः क्षेत्रज्ञः, आत्मा वा । स एवात्र 'धर्म'शब्देन निर्दिष्टः । अत एवाऽत्र धर्मशब्देन 'आत्मा' गृह्यते प्रकरणात् ।

ननु आत्मनः आत्मशब्देनात्र निर्देशः कर्तुं शक्यते—आत्मक्षेत्रे इति ? बाढमेवम् । तथापि तथानिर्देशे कृते आत्मनः क्षेत्रेण ब्रह्मणा च साकं सम्बन्धो ज्ञातुं न शक्यते । स च अवश्यं ज्ञापनीय इति वैदिकस्य दर्शनस्य प्रबोधनार्थं धर्मशब्देन आत्मनो निर्देशः । धर्मशब्देन आत्मनो निर्देशात् अनुक्तोऽपि धर्मी आक्षिप्यते इति अवरोहक्रमेण पदार्थत्रयं वैदिके दर्शने सम्पद्यते—–धर्मी, धर्मः क्षेत्रं च । ब्रह्म, आत्मा शरीरं च । एतदेव पदार्थत्रयं गीताशास्त्रे आरोहक्रमेणोक्तम् । तथा हि (गी० १३.१८)—–

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥

अत्र क्षेत्रशब्देन शरीरम्, ज्ञानशब्देन धर्मवाचकेन धर्मी आत्मा ज्ञेयशब्देन च ब्रह्म प्रतिपादितम् । क्षेत्राध्याये क्षेत्रस्य प्राधान्यात् आरोहक्रमः पदार्थानाम् ।

धर्मशब्देन आत्मनो निर्देशात् धर्मिणा ब्रह्मणा क्षेत्रेण च साकमात्मनः स्वधर्मेण सम्बन्धः सिद्धो भवति । आत्मनः स्वधर्माः परधर्माश्च सांख्यकारिकायामुक्ताः । तथा हि—

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं तद्विपरीतमव्यक्तम् ॥
त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥

(सांख्यकारिका १०-११)

'तद्विपरीतः पुमान्' इत्यनेन विद्यावस्थायामात्मनः क्षेत्रयोगे प्रकृति विकृतियोगे वा स्वधर्मा उक्ताः । 'तथा च पुमान्' इत्यनेन आत्मनः अविद्यावस्थायां क्षेत्रसङ्गे प्रकृति-विकृतिसङ्गे वा परधर्मा उक्ताः । स्वधर्म-परधर्मविभागोऽयं प्रदर्शितो गीताशास्त्रे (३.३५) । तथा हि——

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥

'तद्विपरीतः पुमान्' इत्यनेनोक्ता आत्मनः स्वधर्मा यथा—१. अहेतुमत्त्वं कारणशून्यत्वं वा, २. नित्यत्वम्, ३. व्यापकत्वम्, ४. निष्क्रियत्वम्, ५. एकत्वम्, ६. अनाश्रितत्वम्, ७. अलिङ्गत्वम्, ८. निरवयवत्वम्, ९. स्वतन्त्रत्वम्, १०. अत्रिगुणत्वं निस्त्रैगुण्यं वा, ११. विवेकित्वम्, १२. अविषयत्वम्, १३. असामान्यत्वम्, १४. चेतनत्वम्, १५. अप्रसवधर्मित्वम्, १६. साक्षित्वम्, १७. केवलत्वम्, १८. मध्यस्थत्वम्, १९. द्रष्टृत्वम्, २०. अकर्तृत्वं चेति विंशतिरात्मधर्माः ।

एते धर्मा द्विविधाः—भावरूपा अभावरूपाश्च । धर्मस्य भावरूपत्वाद् अभावरूपा धर्माः क्षेत्रवैधर्म्यप्रतिपादनार्थाः । आत्मा एकः अद्वितीयश्च इति साधर्म्याभावः । तत्राऽऽत्मनो

भावरूपा धर्मा यथा--१. नित्यत्वम्, २. चेतनत्वम्, ३. व्यापकत्वम्, ४, एकत्वम्, ५. विवेकित्वं च ।

तत्र नित्यत्वेन सत्यत्वं ज्ञानमयत्वं वा, चेतनत्वेन चिन्मयत्वम्, व्यापकत्वेन अनन्तत्वम् आनन्दमयत्वं, वा एकत्वेन ब्रह्ममयत्वं अद्वितीयत्वं प्रधानत्वं वा । अत्र अद्वितीयो नाम न द्वितीयः । विवेकित्वेन अद्वितीयत्वम्–न विद्यते द्वितीयं यत्र तदद्वितीयं ब्रह्म प्रतिपाद्यते ।

तत्राऽऽत्मनः क्षेत्रेण साकं विवेकित्वे सति व्यापित्वेन सम्बन्धः । विवेकित्वेन असङ्गत्वं बोद्ध्यते । क्षेत्रेण साकमात्मनः व्याप्य-व्यापकभावसम्बन्धमन्तरा सम्बन्धान्तरं प्रस्थापयितुं न शक्यते । अत एव यत्र यत्र क्षेत्रं तत्र तत्र आत्मा इति अन्वयव्याप्तिः । आत्मव्यतिरेकेण क्षेत्रस्य जगतो वा अभावः । अत एवोक्तं भगवत्-पूज्यपादैः शारीरकमीमांसाभाष्ये--

एवमस्य भोग्यभोक्त्रादिप्रपञ्चजातस्य ब्रह्मव्यतिरेकेण अभाव इति द्रष्टव्यम् । (शा०भा० २.१.१४)

> "तथा च सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात् । नह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुम् । नित्यमशरीरत्वमकर्मनिमित्तत्वादित्यवोचाम । तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेन्न । शरीरसम्बन्धस्यासिद्धत्वात् धर्माधर्मयोरात्मकृतत्वासिद्धेः । शरीरसम्बन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गाद् अन्धपरम्परैषाऽनादित्वकल्पना । क्रियासमवायाभावाच्च आत्मनः कर्तृत्वानुपपत्तेः । सन्निधानमात्रेण राजप्रभृतीनां दृष्टं कर्तृत्वमिति चेन्न । धनदानाद्युपार्जित-भृत्यसम्बन्धत्वात् तेषां कर्तृत्वोपपत्तेः, न त्वात्मनो धनदानादिवच्छरीरादिभिः स्वस्वामिसम्बन्धनिमित्तं किञ्चिच्छक्यं कल्पयितुम् । मिथ्याभिमानस्तु प्रत्यक्षः सम्बन्धहेतुः । एतेन यजमानत्वमात्मनो व्याख्यातम् ।" (शा०भा० १.१.४)

धर्मधर्मिणोरनन्यः सम्बन्ध इति धर्मिणा ब्रह्मणा साकं धर्मस्य आत्मनः अनन्यः सम्बन्धः । क्षेत्रेण साकं व्याप्य-व्यापकभावः सम्बन्धः । तेन ब्रह्मणा साकमनन्यत्वे सति क्षेत्रेण साकं विवेकित्वे असङ्गत्वे अन्यत्वे वा सति व्यापित्वेन अवस्थानमात्मधर्मः । अत एव ब्रह्मणा साकमनन्यत्वे सति क्षेत्रेण साकं विवेकित्वेन व्यापित्वेन अवस्थितस्य आत्मनः परब्रह्मणो धर्मस्य वा क्षेत्रं धर्मक्षेत्रम् ।

कुरुक्षेत्रम्

कुरुक्षेत्रं नाम कुरोः कुरूणां वा क्षेत्रम् । 'क्षेत्र'शब्देन चतुर्विंशतितत्त्वात्मकं शरीरमुच्यते । अवशिष्टः पदार्थ आत्मा । स एवात्र 'कुरु'शब्देन निर्दिष्टः । आत्मशब्देन निर्देशे तस्य ब्रह्मणा क्षेत्रेण च साकं सम्बन्धो ज्ञातुं न शक्यते । तस्य ज्ञापनार्थम् आत्मनः कुरुशब्देन निर्देशः । कुत्सितं रौतीति कुरुः । दुःखत्रयाभिघातात् क्षेत्रस्थ आत्मा कुत्सितं रौतीति कुरुशब्देन व्यपदिष्टः । दुःखं च क्षेत्रधर्मो नात्मधर्मः । तथा चोक्तं गीताशास्त्रे (१३.६)--

इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः ।
एतत् क्षेत्रं समासेन सविकारमुदाहृतम् ॥

अत एव क्षेत्रेऽस्मिन्नात्मा क्षेत्रधर्मे वा वर्तते, स्वधर्मे नास्ति ।

द्रष्टा आत्मा ब्रह्मदर्शनं परित्यज्य दृश्यं विषयं क्षेत्रं वा पश्यति, विषयी च भवति । विषय-विषयिणोः युष्मदस्मत्प्रत्ययगोचरयोः क्षेत्र-क्षेत्रज्ञयोः अविद्यया अविवेकेन वा मिथ्याभिमाननिबन्धनः तादात्म्यसम्बन्धो भवति । विषयाः चतुर्विंशतितत्त्वानि क्षेत्रं वा विषयिणः आत्मनो धर्मो भवति। इत्थं धर्म-धर्मिसम्बन्धे सम्पन्ने सर्वान् विषयधर्मान् क्षेत्रधर्मान् प्रकृति-विकृतिधर्मान् व्यक्ताव्यक्तधर्मान् वा अत्यन्तविरुद्धान् अविद्यया स्वधर्मत्वेनाभिमन्यते आत्मा इति दुःखत्रयाभिहतो भवति, कुत्सित च रौति ।

अस्यामवस्थायामात्मा प्रकृतिसरूपो विकृतिसरूपश्च सम्पद्यते । पूर्वरूपं ब्रह्मधर्मान् ब्रह्मचर्यं वा परित्यजति । पररूपं परधर्मान् क्षेत्रधर्मान् कामचारं वा प्राप्नोति ।

वायुछत्रिकाकूर्दन-प्रशिक्षणं रोमहर्षकास्तदनुभवाश्च

-- श्री अशोकचन्द्र गौड़ शास्त्री --

[प्राचीनव्याकरण-विभागीयः-वाराणसेय-संस्कृत-विश्वविद्यालयस्य]

२.

वायुछत्रिका-ग्रहस्थितिः (Para Position)

भूमौ अवतीर्णे सति हस्तद्वयमुपरि कृत्वा वायुछत्रिकायाः पट्टिकाः गृहीतव्याः (व्यजनपरीक्षणे च पट्टिकाग्रहणस्याभिनयो विधेयः)। पार्ष्णिपादपञ्चकौ (एड़ी एवं पञ्जे) मेलयित्वा चिबुकमुरसि स्थापयता जान्वोः ईषत् स्तम्भनञ्च कुर्वता उदरमन्तरा आकृष्टव्यम् । तदनन्तरं कटिप्रदेशमग्रे संस्थापयता, पार्ष्णि-पादपञ्चकौ च दक्षिणे वामभागे वा घूर्णयता भूमौ चरणस्थापनं कृत्वैव विलुण्ठितव्यम् । विलुण्ठनस्य (Rolling) विषयेऽस्माभिरग्रे सविस्तरं वर्णनं क्रियते ।

परीक्षायामस्यामुत्तीर्णा अभ्यर्थिन एव वायुछत्रिकाकूर्दनस्य प्रारम्भिकपाठ्यक्रमं (Basic Course) पूरयितुमनुमन्यन्ते । पाठ्क्रमोऽयं द्वादशदिवसीयो भवति । पाठ्यक्रमे संपूरिते निर्वाचिता अभ्यर्थिन एकस्मिन्दिवसे वायुयानमारुह्य उड्डीयन्ते, तेषाञ्च वायवीयानुभवो (Air Experience) भवति । वायवीयानुभवस्य कार्याणां वर्णनमनुपदं करिष्यते ।

अतः परं वायवीयानुभवात् पूर्वं वायुछत्रिका-कूर्दनस्य यः प्रारम्भिकः पाठ्यक्रमः (Basic Course) प्रवर्तते, तस्य सविस्तरं विवरणमत्र प्रस्तूयते ।

वायुछत्रिका कूर्दनम् (Parashooting)

प्रशिक्षितैरुपायैः वायुयानात् वायुछत्रिकाद्वारा कूर्दित्वा सफलतापूर्वकं भूमौ अवतरणमेव 'वायुछत्रिकाकूर्दनम्' (Parashooting) उच्यते । त्रिषु भागेष्वस्य प्रशिक्षणं

तांश्च धर्मान् अविद्यया स्वधर्मत्वेन अभिमन्यते । तथा च स्मृतिः—

अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥
(गी० १८.३२)

परधर्माश्च 'तथा च पुमान्' (सां० का० १०-११) इत्यनेन सांख्यकारिकायामुक्ताः । ते च यथा--

१. हेतुमत्त्वम्, २. अनित्यत्वम्, ३. अव्यापित्वम्, ४. अनेकत्वं नानात्वं वा, ६. आश्रितत्वम्, ७. लिङ्गत्वम्, ८. सावयवत्वम्, ९. परतन्त्रत्वं चेति नव व्यक्तधर्माः । १. त्रिगुणत्वम्, २. अविवेकित्वम्, ३. विषयत्वम्, ४. सामान्यत्वम्, ५. अचेतनत्वम्, ६. प्रसवधर्मित्वमिति षट् व्यक्ताव्यक्तयोः साधारणधर्माः ।

धर्मस्य भावरूपत्वात् अभावरूपा धर्मा क्षेत्रस्य आत्मनो वैधर्म्यं प्रतिपादयन्ति । भावरूपाधर्मा यथा--१. हेतुमत्त्वम्, २. क्रियावत्त्वम्; ३. आश्रितत्वम्, ४. लिङ्गत्वम्, ५. सावयवत्वम्, ६. परतन्त्रत्वम्, ७. त्रिगुणत्वम्, ८. विषयत्वम्, ९. सामान्यत्वम्, १०. प्रसवधर्मित्वं चेति ।

अत एवात्र क्षेत्रेण साकमात्मनः अविवेकित्वेन अनन्यत्वेन वा अव्यापित्वेन च सम्बन्धः । आत्मनः अविवेकित्वात् अव्यापित्वाच्च व्यापिन्या प्रकृत्या व्याप्यतेऽयमात्मा । प्रकृत्या समावृतत्वात्, ब्रह्मणा साकमस्य सम्बन्धो विच्छिद्यते, अन्यत्वं च सम्पद्यते, ब्रह्मणोऽदर्शनं च भवति । एतेन ब्रह्मणा साकमन्यत्वे सति क्षेत्रेण साकं अविवेकित्वेन अनन्यत्वेन वा अव्यापित्वेन च अवस्थितस्य आत्मनः दुःखत्रयाभिहतस्य, अत एव कुरोः क्षेत्रं कुरुक्षेत्रम् । (क्रमशः)

प्रदीयते—१. वायुयानाद् बहिर्गमनम् (Exit)। २. उड्डयनकला (Flight Technic) ३. भूमाववतरणम् (Landing) भूमिविलुण्ठनञ्च (Rolling)।

वायुयानाद् बहिर्गमनम् (Exit) : प्रशिक्षितोपायैः वायुयानान्निष्क्रमणमेव 'वायुयानाद् बहिर्गमनम्' (Exit) उच्यते। वायुयानबहिर्गमनस्य प्रशिक्षणार्थमुपकरणद्वयं वर्तते वायुछत्रिका-कूर्दनप्रशिक्षणविद्यालये--एकम् वायुयानबहिर्गमन-प्रशिक्षकः (Exit Trainer); अपरम्, पैकेट-वायुयानस्य प्रारूपम्। अनयोः प्रथमस्य विवरणमत्र प्रस्तूयते।

वायुयानबहिर्गमन-प्रशिक्षकः (Exit Trainer) : भूमौ पञ्च षड् वा 'फुट'परिमितोच्चस्तरपर्यन्तं बलिष्ठकाष्ठस्य पञ्च'गजा'यतः एकः सेतुरिव निर्मीयते। स एतादृशो दीर्घो भवति यत्र दश जनाः स्थित्वा 'ऐक्शन-स्टेशन'-स्थितेः कार्यं कर्तुमर्हन्ति। तदनन्तरमेकं द्वारं निर्मीयते। तत्रैव आगत्य युवकाः 'रैडान'-स्थितौ कार्यं कुर्वन्ति। भूमौ कुशाकटो (खसकी चटाई) द्विरावेष्ट्य विस्तार्यते, येन कूर्दिते सति शारीरिकी क्षतिर्न भवेत्। द्वारतो युवका अस्मिन्नेव कटे कूर्दन्ते।

कार्यविधिः--सेतौ द्वारस्य दिशि एकस्यां पङ्क्तौ तथा स्थातव्यं यथा दक्षिणपादोऽग्रे वामपादश्च ईषत्पृष्ठे भवेत्। ततो वामहस्तमुपरि विधाय पट्टिकाग्रहणं नाटयता कटिप्रदेशञ्चाऽग्रे कुर्वता जानूनी ईषत् स्तम्भितव्यानि, उदरञ्च अन्तराऽऽकृष्टव्यम्। दक्षिणकरो दक्षिणभागे समायताः कराङ्गुलयश्च सम्मिलिता भवेयुः। तदनन्तरं 'ऐक्शन-स्टेशन' आदेशे जाते वाम-दक्षिण-क्रमेण चलितव्यम्। किन्तु वामपादोऽग्रे नागच्छेदिति सर्वैरप्यवधेयम्। ततः प्रशिक्षकस्य 'रैडान' इत्युक्ते सति वामपादोऽग्रे आनेयः, दक्षिणपादश्च ईषत्पृष्ठे स्थापयितव्यः। करद्वयं समं संस्थाप्य, अङ्गुलीश्च सम्मेल्य द्वारकपाटे सम्पीड्य रक्षणीयम्। उदरमभ्यन्तरे कटिप्रदेशमग्रे संस्थाप्य जानूनि च ईषत् स्तम्भयता शरीराभ्यन्तरे निष्कृष्य प्रशिक्षकस्य 'गो' इत्युक्ते सति तूर्णमेव कूर्दितव्यम्।

वायुयानाद् बहिर्गमनस्य प्रशिक्षणार्थं द्वितीयमुपकरणमस्ति पैकेट-वायुयानस्य प्रारूपम्। उपकरणस्याऽस्य आकार-प्रकारः पैकेट-वायुयानवदेव भवति। सीमेण्ट-विनिर्मितेऽस्मिन्नुपकरणे वायवीयानुभवकालिक - कार्यविधानस्य, वायुयानाद् बहिर्गमनस्य च प्रशिक्षणं प्रदीयते। कूर्दनानन्तरं वायुस्थितौ अवस्थानमनिवार्यमस्ति।

वायुयानबहिर्गमनप्रशिक्षणम् (Exit Training)।

वायुयानबर्हिगमनस्य प्रशिक्षणं त्रिषु भागेषु प्रदीयते— १. ऐक्शन-स्टेशन, २. रैडान, ३. ग्रीन आन गो।

ऐक्शन-स्टेशनः-- पैकेटवायुयाने कपाटद्वयं भवति। एकम् 'पोर्टसाइड', द्वितीयञ्च 'स्ट्रा-बोर्ड' इत्युच्यते। पोर्टसाइड-कपाटस्य दिशि स्थितेभ्यो युवकेभ्यो यदा 'ऐक्शन-स्टेशन' इत्यादेशः प्रदीयते, तदा तैर्वामहस्तमुपरि विधाय पट्टिकाः ग्रहीतव्याः। दक्षिणं हस्तं दक्षिणभागे समं कृत्वा अङ्गुलीश्च सम्मेल्य स्थापयितव्याः। उदरमभ्यन्तरे कटिप्रदेशञ्चाग्रे स्थापयन् जानूनी ईषत् स्तम्भयित्वा चलितव्यम्। कपाटस्य सकाशमासाद्य दक्षिणो हस्तः कपाटेभवेत्। 'ऐक्शन-स्टेशन' इत्यादेशे सति दक्षिणपादोऽग्रे वामश्च ईषत्पृष्ठे भवेदिति सर्वैरप्यवधेयम्।

स्ट्राबोर्ड-कपाटस्य युवकैरपि दक्षिणपादोऽग्रे वामश्च पृष्ठे विधाय दक्षिण-वामक्रमेण चलितव्यम्, उपर्युक्तप्रकारेण कार्यञ्च कर्तव्यमिति।

रैडानः—यदा प्रशिक्षकः 'रैडान' इत्यादिशति तदा पोर्टसाइड - कपाटस्थैः युवकैर्वायुयानस्य द्वारि तूर्णमेवागत्य वामपादोऽग्रे दक्षिणश्च ईषत्पृष्ठे विधातव्यः। करद्वयं समं कृत्वा अङ्गुलीश्च सम्मेल्य कपाटे सम्पीड्य स्थापयितव्यम्। उदरमभ्यन्तरे कटिप्रदेशञ्चाग्रे संस्थाप्य, जान्वोरीषत्स्तम्भनं विधेयम्। ततः शरीरमभ्यन्तरामाकर्षयता, शिरः उपरि कृत्वा, दृष्टिञ्च पुरस्तात् कुर्वता छात्रेण प्रशिक्षकस्य अग्रिमादेशः प्रतीक्षितव्यः।

ग्रीन-आन-गो— पैकेटवायुयाने द्वारि हरित-रक्त-प्रकाशवर्तिके भवतः। यदा हरितप्रकाशवर्तिका प्रज्व-

लिता भवति तदा प्रशिक्षको युवकान् प्रकाशे ध्यानाकर्षणाय कथयति—'ग्रीन आन' इति । ततश्च 'गो' इत्यादिशति । 'गो' इत्यादेशे सति तूर्णमेव वायुयानात् कूर्दितव्यम् । वायुछत्रिका - कूर्दन-समये युवकानामनुक्रमाङ्काः निर्धार्यन्ते । कूर्दनकाले 'गो-एक, दो' इति क्रमेण आदेशाः प्रदीयन्ते । अस्य प्रयोजनं युवकाः निर्दिष्टस्थान एव पतेयुरिति । यद्यस्मिन् कार्ये शीघ्रता न विधीयेत तर्हि युवकाः दूर-दूरतरं पतिष्यन्ति । ततश्च तेषामेकत्रीकरणे काठिन्यं भवेत् ।

उड्डयन-कला (Felight Technin) वायुयानात् कूर्दनानन्तरं भूमौ अवतरणात्पूर्वं वायौ यानि कार्याणि क्रियन्ते तानि 'उड्डयन-कला' (Felight Technic) इति पदेन उच्यन्ते । वायुस्थितेर्वर्णनमस्माभिः पूर्वमेव विहितम् । सम्प्रत्यत्र पट्टिकानां कार्यविधिर्वर्ण्यते ।

पट्टिकानां कार्यविधिः (पट्टे की काररवाई) : वायुयानात् कूर्दनानन्तरं "एक हजार, दो हजार, तीन हजार चार हजार" इति विगणय्य उपरि विलोकनीयम् । प्रायः विपलत्रये विपलचतुष्टये वा वायुछत्रिका उद्घाटिता भविष्यति । तदभ्यन्तरे सा नोद्घाटिता स्यात्तदा स्वोरसि बद्धा निगृहीतवायुछत्रिका उद्घाटयितव्या । उद्घाटनविधिश्चेत्थम्—दक्षिणहस्ते वाहककर्णं (Barring Handle) वामहस्ते लौहकर्णञ्च गृहीत्वा वेगेन च तद् वामभागे कर्षणीयम् । पुनः 'रिंगिंग-लाइन'-पदवाच्यान् रज्जून् बहिर्निष्कास्य प्रकम्पयितव्यम् । वायुछत्रिका उद्घाटिता वायुना पूरिता च स्यात् । सम्प्रति कठोरस्थितेर्निर्माणं विधेयम् । छात्रोऽधुना वायुस्थितौ भविष्यतीत्यवधेयम् । यदि पट्टिकासु उद्वर्तनमावर्त्येत तर्हि हस्तौ पादौ च घूर्णयन् उद्वर्तनस्य विपरीतायां दिशि शरीरं घूर्णयितव्यम् । ततश्च पृष्ठतः करद्वयं निधाय पुनरुद्वर्तनादवरोद्धव्यम् । किन्तु तदानीमेव द्रष्टव्यं यद् भूमिः कियद् दूरे स्थितेति ।

चतुर्दिगवलोकनम् (चारों तरफकी देखभाल) : यदि पुरस्तात् कोऽपि छत्रिकयाऽवतरन् स्वीयदिशि समेयेत तर्हि खगस्थितिः (चिड़िया-पोज़ीशन) कार्या । करद्वयमुभयभागे समं कृत्वा पादौ च दक्षिणे वामे समं विस्तार्य पुरोऽवलोकनीयम् । यदि छत्रिकयाऽवतरन् कोऽपि पृष्ठतः स्वीयदिशि समागच्छति तर्ह्यस्या एव स्थितेर्निर्माणं विधाय पृष्ठभागेऽवलोकनीयम् । ततो दक्षिणेन हस्तेन दक्षिणभागस्य पट्टिकाः गृहीत्वा बहिर्भागे कर्षयता दक्षिणभागेऽवलोकनीयम् । ततश्च विपरीतकार्यं विधाय वामभागेऽवलोकनीयम् ।

सर्वं समीचीनम् (All Clear) : 'सर्वं समीचीनम्' (आल क्लीयर) इति सूचना नियन्त्रणकार्यालयात् प्रदीयते । अतः यदा इयं सूचना प्रदीयते, तदा पूर्णा वायुछत्रिकाग्रहस्थितिः (Para Position) कार्या । वायुछत्रिकाग्रहस्थितेः वर्णनमस्माभिः पूर्वमेव विहितम् ।

कूर्दनानन्तरं भूमाववतरणकालेऽवधेयाः नियमा इमे सन्ति :—१. यदा "जमीन दो सौ फीट नजदीक" इति सूचना प्रदीयते तदा तूर्णमेवाऽग्रभागस्य पट्टिकाः कर्षितव्याः । २. यदा "जमीन बीस फीट नजदीक" इति सूचना प्रदीयेत तदा पट्टिकाः कर्षितव्याः । पार्ष्णि-पादपश्चकौ सम्मेल्य तौ दक्षिणे वामे वा घूर्णयता भूमाववतरणाय सज्जीभवितव्यम् । ३. यदि वायुर्भवन्तमग्रे नयेत् तर्हि पृष्ठभागस्य पट्टिकाः वेगेन कर्षितव्याः । ४. यदि वायुर्भवन्तं वामभागे नयेत्तर्हि दक्षिणपादौ दक्षिणौ च हस्तौ अग्रे विपरीतहस्तपादौ च पृष्ठभागे स्थापयितव्यौ । ५. यदि वायुर्भवन्तं दक्षिणभागे नयेत्तर्हि वामहस्त-पादौ अग्रे तद्विपरीतहस्तपादौ च पृष्ठे स्थापयितव्यौ । ६. यदि वायुछत्रिकयाऽवतरन् कश्चिद् वृक्षे पतेत्तदा निगृहीतवायुछत्रिकामुद्घाट्य 'रिंगिंग्स-लाइन्स'पदवाच्यरज्जूनां साहाय्येन भूमौ अवतरितव्यम् । ७. यद्यवतरणकाले नीचैः जलमापतेत् तर्हि तथा प्रयतनीयं यथा जले न पतेत् । तथापि जलावतरणस्थितौ तूर्णं तालयन्त्रं घूर्णयित्वा उद्घाटयितव्यम्, पट्टिकादींश्च बहिर्निष्कास्य अवक्षेपयता वायुछत्रिकातो बहिरागन्तव्यम् ।

भूमाववतरणम्, भूमिविलुण्ठनञ्च
(Landing and Rolling)

वायुछत्रिकाद्वारा वायुयानात् कूर्दनानन्तरं भूमौ आगमनम्, भूमौ च प्रशिक्षितैरुपायैरवस्थानमेव 'भूमाववतरणम्' (Landing) इत्युच्यते ।

भूमाववतरणानन्तरमुच्चस्तरत आगमनानन्तरं बाध्यमानं कुप्रभावं शरीरस्य सर्वेष्वपि भागेषु विभाजयितुं भूमौ क्रियमाणानि यानि कार्याणि तान्येव 'भूमिविलुण्ठनम्' (Rolling) इति पदेन उच्यन्ते। भूमाववतरणानन्तरं विलुण्ठनमत्यावश्यकम् । यतो हि विलुण्ठनेन जायमानः कुप्रभावः शरीरस्य सर्वेष्वपि भागेषु विभक्तो भवति । अन्यथा मस्तिष्के कुप्रभाव आशङ्क्यते । भूमिविलुण्ठनमिदं षड्विधं भवति—१. पुरस्ताद् दक्षिणविलुण्ठनम् (Forward Right Roll)। २. पुरस्ताद् वामविलुण्ठनम् (Forward Left Roll)। ३. पश्चाद् दक्षिणविलुण्ठनम् (Back Right Roll)। ४. पश्चाद् वामविलुण्ठनम् (Back Left Roll) ५. दक्षिणपार्श्वविलुण्ठनम् (Side Right Roll)। ६. वामपार्श्वविलुण्ठनं (Side Left Roll) च । एषां क्रमशो वर्णनमधो निर्दिश्यते ।

पुरस्ताद् दक्षिणविलुण्ठनम् (Forward Right Roll) : प्रशिक्षकाभिमुखं स्थित्वा पार्ष्णि-पादपञ्चकौ सम्मेलयितव्यौ । तौ चार्धवामं घूर्णयित्वा हस्तौ उपरि विधाय वायुछत्रिकाग्रहस्थितिः कार्या । ततः स्वशरीरं पुरो घूर्णयता पतितव्यम्, पार्ष्णि-पादपञ्चकौ जानू च मेलयता शिरसा ऊर्ध्वभागात् पादौ च नेतव्यौ । शिरः कथमपि शिथिलं न भवेत् । अन्यथा शारीरिकी क्षतिः स्यात् । पृष्ठस्योर्ध्वभागं भूम्या उपरि कुर्वता शरीरं धनुषाकारं कर्तव्यम् ।

पुरस्ताद् वामविलुण्ठनम् (Forward Left Roll) : प्रशिक्षकाभिमुखं स्थित्वा पार्ष्णिपादपञ्चकौ जानू च सम्मेल्य वायुछत्रिकाग्रहस्थितिं कुर्वता पार्ष्णि-पादपञ्चकौ अर्धदक्षिणं घूर्णयता प्रशिक्षितैरुपायैर्विलुण्ठितव्यम् ।

पश्चाद् दक्षिणविलुण्ठनम् (Back Right Roll) : प्रशिक्षकस्याभिमुखं स्थित्वा पश्चादावर्तितव्यम् । पट्टिकाः गाढमाकृष्टव्याः, अथ च पादपञ्चकयोः शरीरस्य भारं धारयता विलुण्ठितव्यम् । इदानीं पार्ष्णिपादपञ्चकौ जानू च मिलितौ भवेताम्, पादयोर्नयनं शिरसा ऊर्ध्वभागतो भवेत् । शिरसः शैथिल्यन्न स्यात्, पृष्ठस्योर्ध्वभागश्च भूम्या किञ्चिदुपरि उत्थितो भवेदिति स्मर्तव्यम् । एतद्विपरीतमेव 'पश्चाद्वामविलुण्ठनम्' (Back Left Roll) भवति । तदपि करणीयमेव ।

दक्षिणपार्श्व - विलुण्ठनम् (Side Right Roll) : प्रशिक्षकस्याभिमुखं स्थित्वा दक्षिणपार्श्वमावर्त्य पार्ष्णिपादपञ्चकौ जानू च सम्मेल्य स्थातव्यम् । ततः उदरमभ्यन्तरे कटिप्रदेशमग्रे दक्षिणहस्तमुपरि वामहस्तञ्च ईषदुपरि विधाय प्रशिक्षितैरुपायैर्विलुण्ठितव्यम् । विलुण्ठनानन्तरं हस्तद्वयमुपरि समं भविष्यति । एतद् विपरीतमेव 'वामपार्श्वविलुण्ठनम्' (Side Left Roll) इत्यपि कर्तव्यम् ।

वायवीयोऽनुभवः, तत्कार्याणि च

वायुछत्रिकाकूर्दनात् पूर्वं युवकेभ्यः वायुयानमारोह्य उड्डाय्यते वायवीयानुभवश्च (Air experience) कार्यते । अस्य वायवीयानुभवस्य कार्याणां विस्तृतं वर्णनमधो निर्दिष्टं वर्तते ।

पैकेट-वायुयाने भागद्वये आसनानि भवन्ति, मध्ये चैका आसनपङ्क्तिर्भवति । वायुयानेऽस्मिन् कपाटद्वयं भवति—एकम्, "पोर्ट साइड", द्वितीयञ्च "स्ट्राबोर्ड" इति पदेनोच्यते । उभयभागे युवकान् सादयित्वा प्रशिक्षकः वायुयानस्य चलनसमये आदिशति—"बेल्ट आन" इति । आदेशमिममाकर्ण्यैव सर्वे युवकाः मेखलां बध्नन्ति, वायुयानञ्च उड्डायितुमारभते । यदा वायुयानं पूर्णोच्चप्रदेशमुपयाति तदा प्रशिक्षकेन "बेल्ट आफ" इत्युक्ते सति सर्वे युवकाः मेखलामुद्घाटयन्ति । ततः प्रशिक्षकः सज्जीभवितुं सङ्केतयति । तदा सर्वे युवकाः स्वीयद्वारस्य भागे स्थितौ पादौ

पृष्ठभागे, तद्विपरीतपादौ चाग्रे कुर्वन्तः स्वीयं हस्तद्वयमात्मनः जान्वोरुपरि स्थापयन्ति। ततः प्रशिक्षकस्य 'प्रिपेयर फॉर ऐक्शन' इत्युक्ते सत्येव सर्वे उद्गम्य स्थिता भवन्ति। 'पोर्टसाइड' कपाटस्य युवकाः स्वीयदक्षिणपादं 'स्ट्राबोर्ड'-कपाटस्य युवकाश्च स्वीयवामपादमग्रे कुर्वन्ति । तत आदेशः प्रदीयते--'हुक अप' इति । तदा युवकाः वायुछत्रिकातः संलग्नाया एकस्याः पट्टिकायाः धरणिम् (Hook) उपरि स्थिते तारे संयोज्य पट्टिकां गृह्णन्ति। 'चेक हुक' इत्यादेशे सति धरणिं (Hook) दक्षिणं वामञ्च नीत्वा नीचैश्च कर्षित्वा सम्यक् निरीक्षणं विधेयम् । 'चेक इन्स्ट्रूमेण्ट' इत्यादेशे च स्वीयानि समस्तान्युपकरणानि पट्टिका-शिरस्त्राणादीनि सम्यक् नियोजितानि न वेति द्रष्टव्यम् । अथ च पङ्क्तेः पृष्ठभागस्य द्वाभ्यां युवकाभ्यां पृष्ठमावर्त्य द्रष्टव्यम्, अग्रिमयुवकस्य च दक्षिणजानौ हस्ताघातं विधाय वक्तव्यम्--"अमुक नं० ठीक" इति । पर्यन्ते अग्रिमो युवकः पृष्ठमावर्त्य द्रक्ष्यति कथयिष्यति च--"नं० १ ठीक स्टिक ठीक" इति ।

तदनन्तरं सर्वेऽपि पूर्वस्थितौ आगमिष्यन्ति, आदेशश्च मिलिष्यति—"ऐक्शन-स्टेशन" इति । आदेशेऽस्मिन् पोर्टसाइड-कपाटस्य युवकाः दक्षिणहस्तेन स्ट्राबोर्डस्थ-युवकाश्च वामहस्तेन पट्टिकां गृहीत्वा शनैः शनैरग्रे चलिष्यन्ति । तदा विपरीतहस्तस्य अङ्गुलीः सम्मेल्य हस्तौ पक्षे समे भविष्यतः। उदरमभ्यन्तरे जान्वोश्च ईषत्स्तम्भनं भवेत् । सर्वैरप्यवधेयं यत् पोर्टसाइड-कपाटस्थयुवकैः वामेन, स्ट्राबोर्ड-कपाटस्थयुवकैश्च दक्षिणेन पादेनाग्रे नागन्तव्यम् । पोर्टसाइड-कपाटस्थयुवकैः "वाम-दक्षिण"क्रमेण स्ट्राबोर्डकपाटस्थ - युवकैश्च "दक्षिण-वाम"क्रमेण चलितव्यम् । ततः "रैडान" इत्यादेशे सति पूर्वोक्तैरुपायैः कार्यं कर्तव्यम् । "रैडान" स्थिताववस्थाय द्वारि स्थातव्यम् । प्रशिक्षकेणादिष्टञ्च सर्वमपि कार्यं निर्भयतया कार्यम् । प्रशिक्षकः कथयिष्यति—"हाथ बाहर निकालो, पैर बाहर निकालो, नीचे देखो" इति । कार्यमिदं शीघ्रतया निर्भयतया च कर्तव्यम् । पृष्टाः प्रश्नाश्च गाम्भीर्येण ओजस्विवचोभिश्च उत्तरणीयानि । ततः "पीछे मुड़" इत्यादेशे पृष्ठमावर्त्य शनैः शनैर्गन्तव्यम्, पर्यन्ते चोपवेष्टव्यम् । इत्थं सर्वेषां युवकानां कार्यं समाप्य वायुयानं नीचैरवतरति ।

वायुछत्रिकाकूर्दनारम्भात् पूर्वं यत्र कूर्दनं निश्चितं भवति तस्य 'मील'द्वयायातस्य प्राङ्गणस्य सम्यङ् निरीक्षणं क्रियते । तस्य मृत्तिका हलेनोद्धृवा चूर्णीक्रियते, शिलादयः वृक्षादयश्च पूर्णरूपेण दूरीक्रियन्ते, येन वायुच्छत्रिकाकूर्दकेभ्यः काचिदप्यसुविधा न भवेत् । ततस्तस्य प्राङ्गणस्य पूर्णनिरीक्षणं कारयित्वैव कूर्दनस्य कार्यक्रमो निश्चीयते। कूर्दनकाले वायोर्वेगेनाऽतिन्यूनेन भवितव्यम् । ततो वायुयाने युवकाः सादयित्वा कूर्दनप्राङ्गणस्योपरि उड्डीयन्ते । सर्वप्रथमं द्वौ अधिकारिणौ वायुछत्रिकया कूर्दतः । यदा ते सफलतापूर्वकं भूमाववतरतस्तदा पञ्च-पञ्चक्रमेण युवकानां कूर्दनं प्रारभ्यते। यदा कोऽपि युवकः पञ्चाशदुत्तरद्वादशशत-फुटपरिमितोच्चतातः कूर्दते तदा स आकाशे उड्डीयमानः खग इव दृश्यते। यदा वयमुच्चप्रदेशतो नीचैरागच्छामस्तदा वायुछत्रिकाया उद्घाटनात्पूर्वं यावच्चेतना न भवति। वायुछत्रिकायामुद्घाटितायाम् ईषत् झटित्याघातोऽनुभूयते। ततश्च उच्चप्रदेशतः क्रमशो नीचैरवतरणमतीव रोचते ।

कूर्दने भूमावतरणे च सति वायोर्दिगनुसारेण विलुण्ठितव्यम् । ततश्च स्थित्वा वायुछत्रिकाया अर्धावर्तनं कर्तव्यम् । वायुछत्रिकाया वायुर्निर्गमिष्यति, सा चाऽवरुद्धा भविष्यति । तदनन्तरं प्रशिक्षितैरुपायैस्तां छत्रिकामावर्त्य तया सार्धं नियन्त्रणकार्यालये गत्वा स्वीयोपस्थितिर्दातव्या, वायुछत्रिका च निर्दिष्टस्थाने स्थापनीया ।

इत्थं सफलतापूर्वकं पञ्चकूर्दनानन्तरं पूर्णवायुछत्रिकाकूर्दका भवन्ति । प्रशिक्षितैरुपायैः समीचीनं कार्यं क्रियेत चेद् आघातस्य का कथा, सामान्योत्क्षिप्तिरपि न भवितुमर्हति । किन्तु कार्येषु साहसाभावात् सम्यग्विधिविधानाभावात् अविहितस्थितिकरणाच्च पाणिपादाद्यङ्गभग्नता मस्तिष्काघातो मृत्युर्वा भवितुमर्हति ।

राष्ट्रियसैनिकच्छात्रसङ्घस्य (N. C. C.) युवकैः स्वीयशारीरिक-क्षतिमन्तरेण सफलतापूर्वकं वायुछत्रिकाकूर्दनं विधाय सम्पूर्णमपि देशमिदं दर्शितवन्तो यन्न केवलं सेनाया कुशलाः सैनिका एव वायुछत्रिकाकूर्दनं सफलतापूर्वकं कर्तुं पारयन्ते, अपि तु राष्ट्रियसैनिकच्छात्रसङ्घस्य प्रत्येकयुवकोऽपि वायुछत्रिकाकूर्दने साफल्यमधिगन्तुमर्हति, यदि तस्मिन्निर्भयतायाः परिश्रमस्य साहसस्य च प्राचुर्यं स्यादिति ।

बाल-रामायणम्

—श्री जयशङ्कर बहेचरलाल शुक्ल:—

[कर्मकाण्डाध्यापक:—बटोदर म०स०यु० संस्कृतमहाविद्यालयस्य]

['हरेहरानन्दा'परनामधेयानां श्री शुक्लमहोदयानां 'वेदेषु गृहस्थाश्रम:' इति शीर्षको लेख: अगस्तमासाङ्के प्रकाशितोऽस्माभि: । कर्मकाण्डाध्यापकैरेभि: 'बाल-रामायणम्' संग्रथितमास्ते । तस्य बालकाण्डीय: प्रथमसर्ग: पाठकानां परिचयायाऽत्र प्रस्तूयते । एतेनैव विदुषोऽस्य प्रसन्नगम्भीरं वैदुष्यं स्फुटीभवेत् ।—सम्पादक:]

।। बालकाण्डे प्रथम: सर्ग: ।।

१. राजीवलोचनं रामं नत्वा सीताञ्च लक्ष्मणम् ।
शत्रुघ्नं भरतं नत्वा वन्देऽहं वायुनन्दनम् ।।
२. हरिं नत्वा हरं नत्वा नत्वोमां जगदम्बिकाम् ।
गणेशं विघ्नहर्तारं नमामि सुरवल्लभम् ।।
३. क्रौञ्चपक्षिप्रसङ्गेन रामायणमलौकिकम् ।
निर्मितं मुनिना येन तस्मै वाल्मीकये नम: ।।
४. नृपं दशरथं नौमि कौशल्यां राममातरम् ।
सुमित्राञ्चैव कैकेयीं सरयुं पापहारिणीम् ।।
५. नत्वा मुनिं वशिष्ठञ्च नत्वा चैव तु कौशिकम् ।
अयोध्यां नगरीं रामजन्मभूमिं नमाम्यहम् ।।
६. भूतेभ्यश्च भविष्यद्भ्य आचार्येभ्यो नमोनम: ।
शास्त्रविद्भ्यश्च सर्वेभ्यो विद्वद्भ्यो मे नमोनम: ।।
७. रुक्मिणिं जन्मदात्रीं स्वां मातरं पितरं तथा ।
बहेचराह्वयं भक्त्या नौमि स्वान्त:स्थितं सदा ।।
८. नामसङ्कीर्तनेनैव हरेश्चैव हरस्य च ।
आनन्दो जायते तस्मादानन्दो यस्तयो: सुत: ।।
९. बालो हरेहरानन्द: स तु ज्ञेयो न संशय: ।
बाल - रामायणं तेन बालानां ज्ञानवर्धकम् ।।
१०. इषुद्विशून्यनेत्राब्दे वैक्रमीये तथा शुभे ।
श्रावणे कृष्णपक्षे च नवम्यां भृगुवासरे ।
प्रीतये रघुनाथस्य स्वान्त:शुद्धचै विरच्यते ।।
११. न शब्दशास्त्रं न च तर्कशास्त्रं
न चार्थशास्त्रं न च धर्मशास्त्रम् ।
न दण्डनीतिं न च राजनीतिं
न चैव जानामि हि काव्यशास्त्रम् ।।
१२. शास्त्रेषु न प्रवेशोऽस्ति मूढस्य मे मनागपि ।
विद्वांसस्तेन प्रार्थ्यन्ते नत्वा पादौ मुहुर्मुहु: ।।
१३. बालस्य सकलान् दोषान् क्षमेते पितरौ यथा ।
क्षन्तव्या मे तथा दोषा नीरक्षीरविवेकिभि: ।।
१४. प्रगच्छत: संस्खलनं प्रमादतो
भवेदवश्यं नहि तत्र संशय: ।
हसन्ति ये तत्र नरा हि दुर्जना:
समादधत्यत्र तु पण्डिता नरा: ।।
१५. अखण्डानन्दरूपस्य सन्त्यनेके गुणा: शुभा: ।
आदायैकं गुणं तेभ्यो न तं वर्णयितुं क्षम: ।
सहस्रवदन: शेषस्तदा का मे गतिर्भवेत् ।।
१६. महिम्नस्तु हरे: पारं न याता ये दिवौकस: ।
यदि ब्रह्मादयस्तेऽपि तदा मे स्यात् कथं गति: ।।
१७. अगुणस्य गुणात् वक्तुं को जन: स्यादिह क्षम: ।
तथाऽप्यात्मविशुद्ध्यर्थं ते वर्ण्यन्ते यथामति ।।
१८. एकदा बालरूपस्तु गणेशो मातरं मुदा ।
प्रोवाच वचनं चेदं तुहिनाचलसंस्थिताम् ।।

१९. रम्यां रामकथां त्वं मे भो मातः श्रावयेति वै ।
तदा संश्रावयामास पार्वती सा पराम्बिका ।
ध्यात्वा तु मनसा शम्भुं तस्मै रामकथां शुभाम् ॥

श्रीपार्वत्युवाच—

२०. शृणु बाल प्रवक्ष्यामि शिवेनोक्तं पुरा मम ।
श्रीरामचरितं पुण्यं भवरोगभयापहम् ॥
२१. यच्छ्रुत्वा मुच्यते जन्तु - र्जन्मसंसारबन्धनात् ।
लभते परमामृद्धिं विन्दते च परं सुखम् ॥
२२. तत्रादौ शृणु माहात्म्यं कथायाः कथयामि ते ।
कथा रामस्य लोकेऽस्मिन् जगन्मङ्गलकारिणी ।
हारिणी भवरोगस्य भवसागरतारिणी ॥
२३. सदा सेव्या सदा सेव्या रम्या रामकथा नरैः ।
मुक्तिदा मुक्तिदा चैव सर्वसन्तापहारिणी ॥
२४. कथाः कल्याणकारिण्यः कथाः कलहनाशिकाः ।
कथा बुद्धिप्रदायिन्यस्तस्मात्ताः शृणु सर्वदा ॥
२५. लब्ध्वेह मानुषं देहं देवानामपि दुर्लभम् ।
न शृणोति कथाः पुण्या महन्मुखविनिर्गताः ।
यो नरो न नरो ज्ञेयः स नरो वानरः स्मृतः ॥
२६. यस्मिन्देशे न सन्तः स्युः पुण्याश्चैव हरेः कथाः ।
स देशो न नरैः सेव्यः कदाचन शुभेप्सुभिः ॥
२७. यत्र रामकथा लोके साधवश्च तदाश्रयाः ।
तत्र तीर्थानि सर्वाणि संवसन्ति हि सर्वदा ॥
२८. गङ्गा मही सूर्यसुता च रेवा,
गोदावरी पुण्यजला च तापी ।
एतास्तु नद्यो निवसन्ति नित्यं
यत्रा - ऽच्युतोदारकथा - प्रसङ्गाः ॥
२९. समाजो हि सतां स्वर्गः कामधेनुस्तथा कथा ।
अतः सेव्यः सतां सङ्गः सेव्या चैव हरेः कथा ॥
३०. सन्तः सिन्धुसमा ज्ञेयाः कथा गङ्गास्वरूपिणी ।
यत्र स्नात्वा नरो नित्यं मुच्यते भवबन्धनात् ॥
३१. कथा पुनाति सर्वान् वै गङ्गा स्नातारमेव तु ।
आयासो वर्तते तत्र न कथायां मनागपि ॥
३२. पिबन्ति ये कर्णपुटैर्मनुष्या
महन्मुखाम्भोज - विनिःसृतं यत् ।
कथामृतं संसृतिमूलहारं
न ते पुनर्वै जनिदुःखभाजः ॥
३३. अहेर्बिलसमौ कर्णौ कथाश्रवण - वर्जितौ ।
बर्हिपिच्छसमे नेत्रे हरिदर्शनवर्जिते ॥
३४. मण्डितं मुकुटेनापि भाररूपं हि तच्छिरः ।
यन्नमेन्न हरिं विप्रान् गुरूंश्चैवकदापि हि ॥
३५. दर्दुरिका च जिह्वा सा या न वक्ति हरेर्गुणान् ।
जीवञ्छवः स विज्ञेयो यो हरेर्भक्तिवर्जितः ॥
३६. रामनाम्नोऽपि माहात्म्यं संक्षेपेण पुनः शृणु ।
वैराग्यदो रकारः स्यादाकारो ज्ञानदः स्मृतः ।
मकारो भक्तिदः प्रोक्तो मुनिभिस्तत्त्वदर्शिभिः ॥
३७. अजामिलश्च वाल्मीकिर्द्वाविमौ प्रथितौ भुवि ।
नामसङ्कीर्तनेनैतौ मोक्षभाजौ न संशयः ॥
३८. रामनामैव नामैव रामनामैव केवलम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥

इति बालरामायणे बालकाण्डे कथामाहात्म्यवर्णनं नाम प्रथमः सर्गः ॥ १ ॥

यशश्शेषाः श्री ताताचार्यपादाः

—— श्री एस० बी० रघुनाथाचार्यः ——

[दक्षिणभारतस्य दिव्यज्योतिषां पण्डितरत्नानां श्री डी० टी० ताताचार्य पादानां विगते अप्रैल-मासेऽनपेक्षितमस्तमनं नूनं भारतीयसंस्कृतविद्वत्समाजस्य महती क्षतिः। उत्तरभारतीया एतेषां वैदुष्येन सुरभारती-समुल्लेख्यसेवया च न तथा सुपरिचिता इति तेषां चरणेषु सादरं श्रद्धाञ्जलिं समर्पयन्तो वयमत्र तेषां जीवनस्य वैदुष्यदर्शनं समुपस्थापयामः। —सम्पादकः]

मद्रासप्रदेशीये सौत्-आर्काट् मण्डलवर्तिनि तिरुवरङ्ग-नामके ग्रामे समुपलब्धजन्मानः 'पण्डितराज'-'मीमांसा-केसरी' - 'पण्डितरत्ने'त्यादिविरुदावलीविभासुरा भारत-राष्ट्रपतिपुरस्कारसम्मानिता वैकुण्ठलीनाः श्री उ० वे० प्र० डी० टी० ताताचार्य महोदया १९१७ तमे ईशवीये वर्षे मद्रविश्वविद्यालये सर्वप्रथमं 'शिरोमणि'-परीक्षां समुत्तीर्य १९१८ पर्यन्तं मीमांसाशास्त्रे परिशोधनमकार्षुः। तदनु अष्टादशवर्षपर्यन्तं (१९१८–१९३४) तञ्जावर मण्डलान्तर्गतायां तिरुवय्यारु-महाराज संस्कृतकलाशालायां प्रधान-मीमांसकत्वेन मीमांसाशास्त्रं सोत्साहमध्यापयामासुः।

१९३७ तमे वर्षे मद्रविद्यालयः एभ्यः M. O. L. विरुदप्रदानेन आत्मानमेव पुरस्कृतवान्। १९३४ वत्सर-मारभ्य १९३९ वत्सरपर्यन्तम् एतेषामाध्यक्ष्ये तिरुपतिस्थ-वेङ्कटेश्वर-प्राच्यकलाशाला प्रागननुभूतां व्यवस्थां निखिल-जनादरणीयतां च प्रासवतीत्यत्र तदानीन्तना विपश्चितो विद्यार्थिनश्च प्रमाणम्।

आचार्यैः १९३९ वत्सरतः १९४३ वत्सरपर्यन्तं तिरुपतिस्थ - प्राच्यपरिशोधनालये 'क्यूरेटर' (Cnrator) पदमधिष्ठितम्। तदनन्तरं (१९४३–१९४) वत्सरत्रितयमेभिः श्रीवेङ्कटेश्वर-कलाशालायां संस्कृतोपन्यासकपदं निर्व्यूढम्। १९४७ वत्सरमारभ्य १९५५ वत्सरपर्यन्तं तिरुपतिस्थ-प्राच्यपरिशोधनालय एव संस्कृतभाषायां प्रवाचकपदं (Reader in Sanskrit) एभिरलङ्कृतम्। तस्मिन्नेव समये ततः प्रकाश्यमानायाः परिशोध - पत्रिकायाः उप-सम्पादकत्वेन परिशोधनकर्मणि व्यापृतवद्भिरेभिर्महोदयैः प्राच्यपरिशोधनालयस्य महती प्रतिष्ठा न केवलं भारते देशे, किन्तु देशान्तरेष्वपि सम्पादिता।

ततः परं उत्तरप्रदेशस्थित-वृन्दावनगते परिशोधनालये श्रीमद्रामानुजवेदान्ताचार्यपदे महोदयैरेभिः वत्सरद्वयं (१९५७-५८) महती सेवा कृता।

तदनन्तरम् १९६५ वत्सरमारभ्य १९६९ पर्यन्तं तिरुपतिस्थ - श्रीवेङ्कटेश्वर-विश्वविद्यालयीय - वेदान्तविभागे कोशनिर्माण-व्यवस्थाया उपदेशकत्वेन एभिः बहवो विषयाः परिशीलिताः।

भारतशासनोपकल्पिते केन्द्रीय संस्कृतसङ्घे विशिष्टसदस्यतया (१९६६–१९६९) वत्सरत्रितयमेभिः संस्कृतभाषायाः भारतदेशे सर्वत्र अनल्पा सेवा विहिता।

बिहारप्रदेशस्थ संस्कृतभाषाप्रचारसमीक्षणार्थम् एते एक-प्रतिनिधिसङ्घरूपेण नियुक्तास्तदभिवृद्ध्यै महतीं श्रद्धां प्रदर्शयामासुः। वाराणसेय संस्कृत-विश्वविद्यालयोन्नतोद्योगिनियोगावसरे एते विश्वविद्यालयेन मुख्यपरीक्षकत्वेन नियुज्य सम्मानिताः।

विरुदावाप्तिः

निर्विराम - व्यवसायशालिन एते विपश्चिदपश्चिम-महोदयाः पञ्चविंशतिवत्सरेभ्यः प्राक् बम्बईनगरस्थ-भारतमण्डलेन 'मीमांसाकेसरी'ति विरुदेन, पञ्चत्रिंश-

द्वत्सरेभ्यः प्रागेव 'मीमांसार्णव'-विरुदेन, कोचीन-महाराजसभाजितसंस्कृतपरिषदा 'पण्डितराज'-विरुदेन च विभूषिता अभूवन् ।

विंशतिवत्सरेभ्यः प्राक् तिरुपतिस्थ - वेदान्तदेशिकसम्प्रदायसुधास्वादिन्या सभया 'पूर्वोत्तरतन्त्रप्रदीप'-विरुदेन महीशूरपुरीविभ्राजमानपरकालमठाधीशशताभिषेकमहोत्सवावसरे तैः 'पण्डितरत्न'-विरुदेन (यच्च पञ्चभिरेव विद्वच्छिरोमणिभिः प्राप्तम्), शताभिषेकमहोत्सवे १९७२ तमे वर्षे तिरुपतिनगरे 'देशिकसिद्धान्तविजयध्वज' - विरुदेन च सम्माविता एते अनन्यसाधारण-प्रतिमा-प्रभावसमुदञ्चिता विद्वन्मण्डलमण्डनायमानाः परमां प्रतिष्ठामविन्दन्त ।

१९६४ तमे वर्षे भारतराष्ट्राध्यक्षेण संस्कृतभाषायाः कृतां सेवामुपलक्ष्य जातीयपुरस्कारः एभ्यो वितीर्णः ।

ग्रन्थ-रचनम्

१९२७ वत्सरमारभ्य एकोनचत्वारिंशद्वर्षपर्यन्तं (१९६६) एभिः विषह्य बहूनि विघ्नानि 'उद्यान-पत्रिका'-ख्या संस्कृतमासिकपत्रिका प्रचालिता । तस्यामेभिः बहवो ग्रन्थाः प्रकटिताः ।

संस्कृत-तमिल-आंग्लभाषासु बहवो ग्रन्था विरचिता आचार्यवर्यैः । तेषु केचिदत्र निर्दिश्यन्ते ।

संस्कृतभाषायाम्

१. मीमांसाभ्युदयः (परिशोधनप्रबन्धः) ।
२. रूपक-परिशुद्धिः ।
३. उद्यानवृत्तिः (भामह-काव्यालङ्कारव्याख्या) ।
४. विशिष्टाद्वैतकोशः ।
५. विशिष्टाद्वैतसिद्धिः ।
६. शरीरसिद्धिः ।
७. वैशेषिकदर्शन-व्याख्या ।
८. न्यायभाष्य-व्याख्या ।
९. शाबरभाष्य-वृत्तिः (श्लोकात्मिका) ।
१०. कपीनामुपवासः ।
११. मुग्धाञ्जलिः ।

अन्ये च बहवः ।

तमिलभाषायाम्

१. सज्जनाराधनम् ।
२. मतसारसंग्रहः ।
३. श्रीस्तुतिव्याख्या ।
४. पादुकासहस्रव्याख्यानम् ।

हौण्याम्—ईश-केन-कठ-प्रश्नोपनिषदाम् आंग्लानुवादः कृतः पण्डितरत्नैरेभिः । मद्र - आन्ध्र - अन्नामले - प्रतिभूषु विश्वविद्यालयेषु बहुवारं आचार्यतल्लजैरेभिः परीक्षकता निर्व्यूढा । भारतदेशे बहुषु मठेषु, शास्त्रार्थगोष्ठीषु, आस्थानपरीक्षासु च एते महाभागाः प्रधानपरीक्षकपदमधिष्ठाय विद्वन्मनोहारिण्या सरण्या सभाः सञ्चालयामासुः ।

परस्सहस्रान्तेवासिजनवन्दितपदपद्मानामेतेषां विद्यावंशः दिगन्तविश्रान्तः विविधवैभवोपेतः समिन्धे । तेषु महोदयेषु त्रिचतुराः विश्वविख्यातप्रतिष्ठा विद्वांसा निम्नलिखिताः सन्ति—

१. श्री के० बालसुब्रह्मण्य शास्त्री; विश्रान्तः प्रांशुपालः—संस्कृतकलाशाला, मैलापुरम्, मद्रास ।

२. श्री टी० रामस्वामी अय्यंगारः; विश्रान्तः प्रांशुपालः—संस्कृतकलाशाला, मधुरान्तकम् ।

३. श्री वी० एस्० वेंकटराघवाचार्यः; विश्रान्तः प्रांशुपालः—केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपति ।

४. श्री आर्० एस्० राघवन्, डेक्कन-कलाशाला, पूना ।

राजनीति-परमाचार्यो महाकविः कालिदासः

——श्री शमशेर जंगबहादुरः——

[राजनीतिविज्ञान-प्राध्यापकः—एच० डी० जैन महाविद्यालयस्य, आरा]

भारते सर्वत्र संस्कृतप्रणयिसमाजेषु महाकवेः कविकुलगुरोः कालिदासस्य जयन्त्युत्सवो महता समारोहेण परमया श्रद्धया च समायोज्यते एषु दिवसेषु । भारतशासनद्वाराऽपि कालिदास - कविताप्राणपदे उज्जयिनीनगरे समारोहोऽयं नैकैः कार्यक्रमैः सफलीक्रियते प्रतिवर्षम् । वयमपि शुभावसरेऽस्मिन् तस्य कविकुलगुरोश्चरणयोः सप्रश्रयं श्रद्धासुमानि समर्पयन्तोऽत्र तदीयं रघुवंशमहाकाव्यमाश्रित्य महाकवेरस्य राजनीति-वैशारद्यं प्राध्यापक श्री शमशेर जंगबहादुर महोदयानां लेखनीमुखेन समुपस्थापयामो यत् हि 'मागधम्'पत्रस्य कालिदासाङ्के तैः प्रकाशितम् । अनेन सुस्पष्टं भवेद्यदयं महाकविर्न केवलं कल्पनाक्षेत्रे एव विचरति, प्रत्युत याथार्थ्यक्षेत्रेऽपि तथैव निर्बाधो विचरति । नूनं कान्तासम्मितैर्वचोमी राजनीतितत्त्वोपदेष्टाऽयं महाकविः सर्वान् राजनयिकानतिशेते ।—सम्पादकः

प्राचीन भारतीयराजनैतिक सङ्घटने राजतन्त्रस्यैव प्रधानताऽऽसीत् । विश्वस्यान्यदेशेष्वपि दीर्घकालं यावत् राजतन्त्रस्य प्राबल्यमासीत् । यद्यपि प्राचीन-यूनाने खीष्टाब्दपूर्वं षष्ठ्यां शताब्द्याश्च भारतेऽपि गणतन्त्र-व्यवस्था दृश्यते, तथापि मानवसभ्यतायाः प्राचीनेतिहासो राजतन्त्रस्य प्रकाशेनैवोद्भासितः । आधुनिक-जनतन्त्रीय-सिद्धान्तस्येतिहासस्तु केवलं शतद्वयस्यैवास्ति । इदानीमपि प्रयोगावस्थायामेवायं वर्तते । नेदं निश्चयात्मकरूपेण वक्तुं शक्येत यज्जनतन्त्रीयशासक-प्रणाली मानवसमाजस्य राजकीयलक्ष्याणां पूर्णरूपेण सिद्धिं करिष्यतीति । आधुनिकजनतन्त्राणां दोषपरीक्षणेन प्रतीयते यन्नेयं प्रणाली सर्वथा कल्याणकारिणी ।

अन्यत्र राजतन्त्राणामितिहासेषु दृष्टिपातेन ज्ञायते यदियं शासकीयप्रणाली मानवसमाजाय पूर्णकल्याणप्रदा वर्तते । न केवलं भारतस्यैव, अपि तु अन्यदेशानामप्येतादृशविवेकशीलानां सम्राजामुदाहरणानि लभ्यन्ते येषां शासनकाले मनुष्यो न केवलं भौतिकक्षेत्रे, प्रत्युत बौद्धिके नैतिके च क्षेत्रे पर्याप्तं विकासं प्राप्तवान् । राजतन्त्राणामितिहासो मानवसभ्यतायाः संस्कृतेस्य च विराट् इतिहासोऽस्ति ।

स्वयं शासनव्यवस्था आत्मनि न साध्यस्वरूपा, प्रत्युत साधनमात्रम् । साध्यस्तु मानवसमाजस्यास्ति भौतिको बौद्धिको नैतिकश्चाभ्युदयः । एतस्यैव लक्ष्यस्य सिद्धिहेतवे मनीषिभिः गहनं चिन्तनं कृतम्, शासक-तन्त्रैश्च अविश्रान्तप्रयत्नो व्यधायि । स्यान्नाम 'प्लेटो' 'अरस्तू' वा, अथवा याज्ञवल्क्यः, मनु-पराशरौ वा, सर्वैरेव उक्तदिशि स्वादर्शनिर्माणस्य भूयान् यत्नः कृतः ।

महाकविकालिदासः सम्राड्विक्रमादित्यकाले बभूव । स न केवलं महाकविरेव, प्रत्युत महान् विचारकोऽप्यासीत् । किन्तु तद्विचाराणां गङ्गा काव्यरूपे प्रवाहिता । जीवनस्य अन्यक्षेत्रीय - नैतिक - सामाजिक - सांस्कृतिकविचारैः सह महाकविना राजकीयसङ्घटनादिश्यपि समद्युतिपूर्ण आदर्शो निरूपितः ।

एष आदर्शो विवेकपूर्णराजतन्त्रस्य (Enlightned desportism) अस्ति, यस्तात्त्विकविवेचनाधारे प्रतिष्ठितो मानवसमाजाय कल्याणकारी वर्तते । राजतन्त्रं तादृशं राजनैतिकव्यवस्थारूपं शासनप्रणालीरूपञ्चास्ति, यस्मिन् राज्ञः सम्राजो वा पदं केन्द्रीयमस्ति । जनता तस्यैव

छत्रच्छायायां कल्याणं समाप्नोति । राजतन्त्रीयदर्शनाधारो मानवस्वभावस्य त्रिगुणीय-विभाजन-स्वरूप एव । जनकल्याणसाधनाय न केवलं भागीरथ-भौतिक-प्रयत्न एव आवश्यकः, प्रत्युत तत्त्वदर्शनस्य क्षमताप्यपेक्षिता । एतादृशी बहुमुखी क्षमता कर्मयोगिनि सम्राज्येव संभवा । यद्यपि सम्राट् स्वसम्पूर्णशासनयन्त्रस्य, (मन्त्रिगणस्य, सेनायाः, न्यायधीशस्य) प्रयोगमपि साधनरूपेण करोति । राजतन्त्रे जनतायाः स्थानं गौणमस्ति, परन्तु तस्याः हितं सर्वप्रधानमस्ति । राजा सम्पूर्णशासकीयनिर्णयानां सम्पादने वैयक्तिकाधिकारसंपन्नो भवति । परन्त्वेतदधिकारस्य आधारो जनकल्याणमेव । इत्थं राजा सर्वथाऽनुत्तरदायी न भवति । तस्योद्वुद्धं नैतिकस्वत्वं तं जनकल्याणं प्रति सततं सावहितं विदधाति ।

एतादृशविवेकशीलस्य राजतन्त्रस्यादर्शस्वरूपं 'रघुवंशे' प्राप्यते । राज्ञा समर्थेन तेजस्विना च भाव्यम् । तेन शारीरिकबलेन शौर्येण च सह बुद्धि-विवेकपूर्णेनापि भाव्यम् । राज्ञो दिलीपस्य जन्मविषये महाकविर्लिखति—

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥

—रघुवंशम् १.१२

अत्यन्तशुद्धचरित्रवता सह राज्ञा दिलीपेन जन्म गृहीतम् । शारीरिक-सौन्दर्येण पूर्णस्य राज्ञो रूपस्य पुनर्वर्णनमस्ति—

व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः ।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ॥

(१.१३)

सुन्दरशरीरेण सह राजा तीक्ष्णबुद्धिरप्यासीत्—**आकार सदृशप्रज्ञः प्रज्ञया सदृशागमः** इत्यादिः । शासन-कुशलतायाः वर्णनं महाकविशब्देषु दृश्यताम्—

रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ।

(१.१७)

प्रजासु करव्यवस्था तदीयकल्याणसाधनाय आसीत्, न तु राज्ञो विलासाय । दिलीपस्य करग्रहणस्य मन्तव्यं द्रष्टव्यम्—

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥

(१.१८)

एवमेव वयं पश्यामो यद् राज्ञो दिलीपस्यैका महती सेनाऽऽसीत्, किन्तु तस्याः प्रयोगः प्रायो नाभवत् । राजा स्वशत्रूणां पराजये सर्वथा समर्थ आसीत् । तथापि स शत्रुभ्य क्षमादानमप्यकरोत् । कस्यापि शासकस्य कृते एतादृशी विशालहृदयता नूनमादर्शस्वरूपा । राजा दिलीपो नीतिकुशलोऽप्यासीत् । राजनीतौ मौनताऽप्येका कला । अनुभवी राजनीतिज्ञो नाधिकं वदति । तन्मनोभीष्टज्ञानं कठिनम् । राज्ञि दिलीपेऽपि एष गुण आसीत् । दृश्यताम्—**तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।** शासनकुशलोऽतिसमृद्धोऽपि सन् राजा विलासी नासीत्—**अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।** (रघुवंशम् १.२०) सः प्रजाः कुमार्गगामिनीः नाकरोत् । प्रजाभिस्तस्य पितृपुत्रसम्बन्ध आसीत्—

प्रजानां विनयाधानाद् रक्षणाद्भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥

(१.२४)

सत्यपि न्यायशासने कतिचन जनाः समाजे एतादृशा भवन्ति येऽपराधं कुर्वन्त्येव । तेषां कृते दण्डव्यवस्था विधि-व्यवस्था चाप्यासीत्—**श्रुतौ तस्करता स्थिता ।** (रघु० १.२७)

राजा रघुरपि पितृ-सदृश एव यशस्वी आसीत् । स महान् बलवान् विनम्रश्चासीत् । **कपाटवक्षाः परिणद्धकन्धरः, तथापि नीचैर्विनयाददृश्यत** । (रघु० ४.३४) । परन्तु शत्रुसमक्षं सोऽतिदुर्धर्ष आसीत् । यज्ञाश्वे मघवता गृहीते रघुणा स आहूतः—

गृहाण शस्त्रं यदि सर्ग एष ते
न खल्वनिर्जित्य रघुं कृती भवान्।
(रघु० ३.५१)

आधुनिकजनतन्त्रैरपि सफलतायै स्वविदेशनीते एष एव सिद्धान्त आधाररूपेण स्वीकरणीयो भविष्यति।

महाकविकालिदासेन राजभ्यो दिग्विजयाभियानस्यापि महत्ता प्रदर्शिता। एतादृशाभियानलक्ष्यं शान्तेर्न्यायस्य च स्थापनमासीत्, न नग्नसाम्राज्यवादः। एतादृशाभियाने रघुप्रतापोऽग्रे चलति स्म, सैन्यं च पश्चात्—**प्रतापोऽग्रे ततश्चमूः**। (रघु० ४.८६)

दिग्विजयानन्तरं रघुर्विश्वजिन्नामकं यज्ञं कृतवान्, यस्मिन्नसौ स्वीयामशेषसम्पदं दक्षिणायां दत्तवान्।

स विश्वाजतमाजह्रे यज्ञ सवस्वदक्षिणम्।
आदानं हि विसर्गाय सतां वारिमुचामिव॥
(४.८६)

यथा मेघाः पृथ्व्याः जलमादाय पुनः पृथिव्यामेव वर्षन्ति तथा महात्मानोऽपि दानायैव धनमेकत्रीकुर्वन्ति। एष आसीद् राजसम्मुखे त्यागादर्शः।

अन्ते भगवतो रामस्य विषये महाकविकालिदासेन य आदर्शं समुपस्थापितः, स विचारणीयोऽस्ति। महाराज्या कौशल्यया तमोगुणनाशकः पुत्र उदपादि—

अथाग्र्यमहिषी राज्ञः प्रसूतिसमये सती।
पुत्रं तमोपहं लेभे नक्तं ज्योतिरिवौषधिः॥
(१०.६६)

कुशलशासको रामस्तमोगुणविनाशक आसीत्। अर्थात् समाजस्य सर्वविधकलुष-विनाशक आसीत्। मानवसम्मुखं कदाचिद्विकटं मानसिक-द्वन्द्वमुपस्थितं भवति—किं कर्तव्यं किमकर्तव्यमिति? एतादृश एव प्रसङ्गो महाराजदशरथसमक्षं तदा समुपस्थितो यदा महर्षिविश्वामित्रो राममसुरसंहाराय नेतुमिच्छितवान्। रघुकुलरीतिः समक्षमासीत् महाराजस्य। अत एव स राजकुमारौ राम-लक्ष्मणौ दत्तवान्—

कृच्छ्रलब्धमपि लब्धवर्णभाक्तं
दिदेश मुनये सलक्ष्मणम्।
अप्यसुप्रणयिनो रघोः कुले
न व्यहन्यत कदाचिदर्थिता॥
(रघु० ११.२)

अत्र जनकल्याणार्थं स्वप्रेष्ठजन-त्यागस्याप्यादर्शो महाकविना समुपस्थापितः।

महाराजो रामचन्द्रो युद्धे रावणं जघान। समाज आततायिमुक्तो जातः। युद्ध-प्राङ्गणे स्वकर्तव्यपूर्त्यनन्तरं रामो धनुषो ज्यामवतारितवान्। यतस्तेन देवकार्याणि सम्पादितानि। बलप्रयोगस्यापि सीमाऽऽसीत्।

जनमतस्य महत्त्वं दर्शयता महाकविना रामजीवनस्यैकः परममार्मिकः प्रसङ्गः समुपस्थापितः। अयोध्यां परावर्त्य स्वनगरशोभां पश्यता रामचन्द्रेण भद्रनायकः स्वदूतः पृष्टो यद् भद्र! कथयास्माकं विषये प्रजा किं कथयतीति? अनेकवारं पृष्टे भद्रेण कथितम्—

निर्बन्धपृष्टः स जगाद सर्वं
स्तुवन्ति पौराश्चरितं त्वदीयम्।
अन्यत्र रक्षोभवनोषितायाः
परिग्रहान्मानवदेव देव्याः॥
(१४.३२)

भवता रक्षोगृहनिवासिनी सीता पुनर्गृहीता। तदेव ग्रहणं जनाः समीचीनं नावगच्छन्ति। एतच्छ्रुत्वा रामचन्द्रस्य हृदये भयानकं द्वन्द्वमुपस्थितम्—'दोलाचल-चित्तवृत्तिः।' वार्ताऽश्रुता क्रियेत अथवा निर्दोषा पत्नी निर्वासिता क्रियेत? अन्ते जनमतं समर्थयन् रामो देवीं सीतां त्यक्तुमेव निर्णीतवान्। जनताविश्वासाय राज्ञि कियान् त्यागोऽपेक्षित इत्येतस्य सीमा महाकविकालिदासेन निर्धारिता। कर्तव्यसमक्षं 'स्वं' सदैव विस्मरेदिति।

कुशपुत्रस्य राज्ञोऽतिथेर्विषये लिखन् महाकविः कथितवान्—

प्राप्तः शरत्समय एष विशुद्धकान्तः !

धन्याः शरदि सेवन्ते
प्रोल्लसच्चित्र - शालिकान् ।
प्रासादान् स्त्रीसखाः पौराः
केदारांश्च कृषीवलाः ॥

तीक्ष्णं रविस्तपति नीच इवाचिराढ्यः
शृङ्गं रुरुस्त्यजति मित्रमिवाऽकृतज्ञः ।
तोयं प्रसीदति मुनेरिव चित्तवृत्तिः
कामं दरिद्र इव शोषमुपैति पङ्कः ॥

आसादितप्रकटनिर्मलचन्द्रहासः
प्राप्तः शरत्समय एष विशुद्धकान्तः ।
उत्खाय गाढतमसं घनकालमुग्रं
रामो दशास्यमिव संभृतबन्धुजीवः ॥

वृद्धाङ्गनेव विजहौ सरिदुद्धतत्वं
वेदान्तिनामिव मनः शुचि नीरमासीत् ।
चन्द्रे प्रभा युवतिवक्त्र इवाद्भुताभूत्
विद्वत्कवित्वमिव केकिरुतं न रेजे ॥

— श्री रामस्वरूपशास्त्री —

प्रजास्तद्गुरुणा नद्यो नभसेव विवर्धिता ।
तस्मिँस्तु भूयसीं वृद्धिं नभस्येता इवाययुः ॥
(१७.४१)

यदुवाच न तन्मिथ्या तद्ददौ न जहार तत् ।
सोऽभूद्भग्नव्रतः शत्रूनुद्धृत्य प्रतिरोपयन् ॥
(१७.४२)

राज्ञा बाह्यशत्रूणां विजयात् पूर्वमेवाभ्यन्तराः काम-क्रोध-मोह-मद-मत्सराः शत्रवो जिताः । पश्चात् कूटनीत्या युद्धेन चोभाभ्यां शत्रवः पराजिताः । राज्ञोऽतिथेः समये दूतानां जालं विस्तृतमासीत्, येन प्रजानां कापि वार्ता तस्मै प्रच्छन्ना नाभवत् । मन्त्रिभिः सह नित्यं मन्त्रणा जायते स्म । परन्तु मन्त्रणानां विषयाः सदा गुप्ताः जायन्ते स्म । शत्रुभ्यः स सदा सावधान आसीत् । ऐश्वर्यशाल्यपि स कुमार्गे पदन्यासं नाकरोत् । यतो ज्वार-समयेऽपि यदा समुद्रो वर्धते तदा नदीनामेव मार्गेण, नान्यथा ।

अपथेन प्रववृते न जातूपचितोऽपि सः ।
वृद्धौ नदीमुखेनैव प्रस्थानं लवणाम्भसः ।
(१७.५४)

शासकः पथभ्रष्टो न स्यादेतस्य कीदृशं सुन्दरमुदाहरणं वर्तते । राजातिथिः प्रजायां कदापि नासन्तोषमुत्पादितवान् ! शत्रुदोषाणां लाभमादाय तान् नष्टानकरोत् । विघ्नेभ्यस्तपस्विनां रक्षामकरोत् । चौरेभ्यः प्रजासम्पदं जुगोप । चतुर्भ्यो वर्णेभ्यो तद्धनानुसारं षडंशं गृह्णन्त आसन् । ते सम्यग्रूपेण षड्गुणानां (सन्धि - विग्रह - ध्यान-ऽऽसन-संश्रय-द्वैधीभावानां राजगुणानां साधु-व्यवहारं जानन्ति स्म । साम-दाम-दण्ड-भेदानां चतुर्भिरुपायैः सह राजनीति-परिचालनं कुर्वन्ति स्म ।

रघुवंश - महाकाव्यस्य अन्तिमसर्गे महाकविकालिदासो महाराजस्य अग्निवर्णस्य हृदयद्रावकं विनाशं चित्रितवान् । राज्ञि मार्गच्युते तस्य विनाशो निश्चितः, एष एव महाकवेः निष्कर्षः ।

रघुवंश - महाकाव्याधृतः निम्नाङ्किताः राजगुणाः प्रकटिताः सन्ति—

१. प्रजापालनम्, २. दुष्टनिग्रहः, ३. दानम्, ४. धार्मिक-कार्य - सम्पादनम्, ५. कोषार्जनम्, ६. कोष - संवर्धनम्, ७. राज्यविस्तारहेतवे दिग्विजययात्रा-क्षमता, ८. प्रजा-

समृद्धये सार्वजनिक-कार्य-निर्माण-प्रवृत्तिः, ९. गुरुजन-सेवा, १०. व्यसनत्यागः, ११. कामक्रोधाद्यान्तरङ्ग - शत्रुजयः, १२. निष्पक्षता, १३. सत्यवादिता, १४. उदारता, १५. विनयशीलता १६. गम्भीरता च ।

रघुवंशे वर्णितराजधर्मानुसारं राजशासन - प्रबन्धाया मन्त्रिमण्डलस्यापि सहयोगः प्राप्त आसीत् । महा कविन लिखितम्—

तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव ॥

मन्त्रिमण्डलं गुप्तरूपेण मिलित्वा । मन्त्रणां करोति स्म । स्वनिर्णयं च यथासमयं प्रकाशयति स्म । मालविकाग्निमित्रनाटकेनाऽपि मन्त्रिमण्डलस्य[1] मन्त्रणया राज्य-सञ्चालनस्य समर्थनं भवति । कालिदासनाटकैः मन्त्रिणां कार्यविभाजनस्य ज्ञानं जायते । अभिज्ञानशाकुन्तल-मालविकाग्निमित्रयोः युद्धमन्त्रिणः, करमन्त्रिणः, राजकोषमन्त्रिणः, अमात्यस्य, पुरोधसः, धर्माध्यक्षस्य, नागरिक-श्यालस्य, राष्ट्रियस्य, नगरस्य शान्तेः, रक्षोत्तरदायित्वस्य च निर्देशो विद्यते ।

न्याय-सेना-सुरक्षा-सम्पत्ति-विभागा अद्यतनविभागसदृशा एव निर्दिष्टाः सन्ति । (रघुवंशम् ८.१९, १७.५०, १७.६८, १०.८६; १७.४७, १७.५२, १७.६७) । रघुवंशस्य निर्दिष्टश्लोकेषु प्रभुमन्त्रोत्साहशक्तीनां साहाय्येन सरलतापूर्वकं राज्यभारवहनस्य निर्देशः कृतोऽस्ति । साम-दान-दण्ड-भेदनीतीनां ज्ञानमावश्यकमासीत् । दुर्ग - सन्धि - विग्रह - यानासनादिषड्गुणानां मौल-भृत्य-सुहृच्छ्रेणी - द्विषदाटविकादिबलानामुपयोगं राजाकरोत् । युद्धे सफलतायै वनपरिष्कारस्य च कलाकौशलं राज्ञे ज्ञातमासीत् । (रघुवंशम् ४.३१) "कूटयज्ञविधिज्ञे"-पदेनैतद् ध्वन्यते यद् राजा कूटनीतिज्ञोऽपि कूटनीतेः प्रयोगं नाकरोत् ।

---

[1] **तेन हि मन्त्रिपरिषदं ब्रूहि । मालविका० अङ्कः ४ । एवममात्यपरिषदे निवेदयामि । मालविका० अङ्कः ५ ।**

(२२४ पृष्ठस्य शेषांशः)

हिमालयं भारतमातुः हैमं मुकुटं प्रणिगदन्ति कवयः । अयं पुरा भारतस्य प्राकाराय प्राकल्पत । न एनम् उल्लङ्घ्य वैदेशिकाः भारते प्रवेशं पारयामासुः । इदानीं तु व्योमयानस्य आविष्कारेण भग्न इव व्यर्थ इव पुरातन इव च भाति भारतस्य अयं महाप्राकारः । तथापि हिमगिरिः अयं देशस्य बहून् उपकारान् करोति । अस्य नदीनां जलैः अस्माकं क्षेत्राणि सिच्यन्ते, एष भुवननिर्माणयोग्यं परमोत्तमजातीयं काष्ठं उत्पादयति, खनिभ्यः लौहम्, सुवर्णम्, रजतम्, अभ्रकम्, अन्यानि च खनिजानि उत्पाद्य प्रयच्छति । एष फलानि औषधानि पशुजातानि च बहूनि वस्तूनि ददाति । अस्य एव आकरेभ्यः हीरकादीनि महारत्नानि समुद्भवन्ति, इति एनम् अनेकरत्नप्रभवं कथयन्ति कवयः । यथाह महाकविः कालिदासः—

अनेकरत्नप्रभवस्य तस्य
हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोः किरणेष्विवाङ्कः ॥

विक्रेयाणि बहुमूल्यानि पुस्तकरत्नानि

गृहं स्वर्गीकर्तुं मानवजीवनञ्च सफलयितुं वाणीपुस्तकमालातः महापरिषदः महामण्डलसंस्थानतश्च प्रकाशितानि निम्नलिखितपुस्तकानि विक्रयार्थं प्रस्तुतानि। विशेषविवरणाय सूचीपत्रं नियमाश्च पत्रप्रेषणेन समासादनीयाः।

१. भारतधर्म-समन्वय	…	१–५०
२. परलोक-तत्त्व	…	२–५०
३. कठोपनिषद्	…	३–००
४. धर्मतत्त्व	…	२–५०
५. वेदान्तदर्शन	…	१–५०
६. हिन्दूधर्मका स्वरूप	…	०–३७
७. तत्त्वबोध, सजिल्द	…	१–००
बिना जिल्दका	…	०–७५
८. आदर्श देवियां प्रथम भाग	…	२–२५
,, ,, द्वितीय भाग	…	२–५०
९. सती सदाचार	…	१–५०
१०. कर्म-रहस्य	…	२–५०
११. केनोपनिषद्	…	१–५०
१२. ईशावास्योपनिषद्	…	१–००
१३. सप्तशती (दुर्गा) गीता, सजिल्द	…	३–००
,, दफ्ती जिल्द	…	२–२५
१४. सदाचार-प्रश्नोत्तरी	…	०–३७
१५. व्रतोत्सव-कौमुदी	…	१–३७
१६. हिन्दू-संस्कृति-समीक्षा	…	०–५०
१७. धर्म-प्रवेशिका	…	०–७५
१८. पूजा-प्रार्थना	…	०–६२
१९. गायत्रीमन्त्र-टीका	…	०–२५
२०. आचार-चन्द्रिका	…	१–००
२१. कन्या-शिक्षा-सोपान	…	०–२५
२२. गजेन्द्र-मोक्ष	…	०–३७
२३. महिला-प्रश्नोत्तरी	…	०–५०
२४. व्रतोत्सव-चन्द्रिका	…	५–००
२५. धर्माधर्म-प्रश्नोत्तरी	…	०–२५
२६. सुलोचना	…	०–६२
२७. तीर्थ और देवपूजन-प्रश्नोत्तरी	…	०–२५
२८. स्मरणी	…	०–६२
२९. स्त्री-पुरुष-विज्ञान	…	०–३७
३०. श्राद्ध और परलोक-विचार	…	०–३७
३१. धर्म-विज्ञान प्रथम, द्वितीय, तृतीय, ५) ४)		४–००
३२. श्रीमद्भागवत, एकादश स्कन्ध	…	३–५०
३३. सती धर्म और योगशक्ति	…	०–३७
३४. अन्तःकरण-विज्ञान	…	०–७५
३५. निर्मूल आक्षेपोंका उत्तर	…	०–३७
३६. परलोक-प्रश्नोत्तरी	…	०–२५
३७. श्रीमद्भगवद्गीता प्रथम भाग	…	४–००
,, ,, द्वितीय भाग	…	३–५०
३८. मनुष्य-धर्म	…	०–३७
३९. धर्मकल्पद्रुम प्रथम खण्ड	…	६–००
,, द्वितीय खण्ड	…	३–००
,, तृतीय ,,	…	३–५०
,, चतुर्थ ,,	…	५–००
,, पञ्चम ,,	…	३–५०
,, षष्ठ ,,	…	४–००
,, सप्तम ,,	…	३–५०
,, अष्टम ,,	…	४–००
४०. प्रवीण दृष्टिमें नवीन भारत (प्रथम खण्ड)		२–००
,, ,, (द्वितीय खण्ड)		२–००
४१. नवीन दृष्टिमें प्रवीण भारत	…	१–२५
४२. साधन-चन्द्रिका	…	१–७५
४३. शास्त्र-चन्द्रिका	…	१–७५
४४. धर्म-चन्द्रिका	…	१–६५
४५ पातञ्जल-योगदर्शन (हिन्दी भाष्य)	…	३–००
४६. कर्ममीमांसा-दर्शन (सम्पूर्ण)	…	१२–००

व्यवस्थापक : वाणी-पुस्तकमाला, आर्यमहिला हितकारिणी महापरिषद्, जगतगंज, वाराणसी

पञ्जीकृत-संख्या—एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगतगंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वेजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी केण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४९

*

अङ्कः १२

*

सम्पादकः
गो० न० वैजापुरकरः

*

डिसम्बर
१९७३

*

वार्षिक-मूल्यम्
५) रूप्यकाणि

*

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

*

शिशिर-विलसितम् !

●

अंशुकमिव शीतभयात् संस्त्यानत्वच्छलेन हिमधवलम् ।
अम्भोधिरपि गृहीतं पश्यत शिशिरस्य माहात्म्यम् ॥ १ ॥
द्वारं गृहस्य पिहितं शयनस्य पार्श्वे
वह्निर्ज्वलत्युपरि तूलपटो गरीयान् ।
अङ्गानुकूल - मनुरागवशं कलत्र-
मित्थं करोति किमसौ स्वपतस्तुषारः ॥ २ ॥
पीनोतुङ्ग - पयोधराः परिलसत्सम्पूर्ण - चन्द्राननाः
कान्ता नैव गृहे गृहे न च दृढं जात्यं न काश्मीरजम् ।
ताम्बूलं न च तूलिका न च पटी तैलं न गन्धाविलं
सद्यो गोघृतपाचिता न वटकाः शीतं कथं गम्यते ॥ ३ ॥
केशानाकुलयन् दृशौ मुकुलयन् वासो बलादाक्षिपन्
नातन्वन् पुलकोद्गमं प्रकटयन् नावेगकम्पं गतेः ।
वारंवार - मुदार - सीत्कृतिभरै - र्दन्तच्छदं पीडयन्
प्रायः शैशिर एष सम्प्रति मरुत् कान्तासु कान्तायते ॥ ४ ॥

●

अनुक्रमः

प्रपाणकः	पत्रपुटम्	परिवेषकः
पूषा पुराण पुरुषः स नमोऽस्तु तस्मै	२६५	सङ्कलितम्
श्रीमहर्षि-ज्ञानानन्दचरितम्	२६६	श्री स्व० विन्ध्येश्वरीप्रसाद शास्त्री
साम्प्रतिकी राष्ट्रिय स्थितिः, अस्माकं कर्तव्यञ्च	२६७	सम्पादकीयम्
नलचम्प्वा आध्यात्मिकं तत्त्वम्	२७०	श्री त्रिलोकीनाथ द्विवेदी
(२) पुराणम्, इतिहाश्च : साङ्गं समीक्षणम्	२७३	श्री श्रीकृष्ण शर्मा
संस्कृतस्य अध्ययनम् : नवीना दृष्टिः	२७७	श्री हनीफ नूरानी महोदयः
व्यावहारिक-वेदान्तगङ्गाया रामतीर्थम्	२८८	श्री गोविन्द नरहरि वैजापुरकरः
शृङ्गार-सप्तशती	२८३	श्री महाकविः परमानन्दः
एकोनपञ्चाशद्वर्षीया लेख-सूची	२८५	सङ्कलिता

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४१ वर्षे] वाराणसी, मार्गशीर्ष-पौषौ, २०३० वै० : दिसम्बर १९७३ ई० [१२ अ०ः

पूषा पुराणपुरुषः स नमोऽस्तु तस्मै !

●

ब्रह्माण्ड - संपुट - कलेवर - मध्यवर्ति
चैतन्यपिण्डमिव मण्डलमस्ति यस्य।
आलोकितोऽपि दुरितानि निहन्ति यस्तं
मार्तण्डमादिपुरुषं प्रणमामि नित्यम्॥ १॥

स टोप-व्योमहट्टोषित-रजनिवणिङ्-नायकोन्मुक्ततारा-
मुक्ताहारापहारात् तरलखगरव-प्रोत्थिताकीर्तिशान्त्यै।
कर्षन्नम्भोजकुम्भोदरकुहरबहि-र्निस्सरत्-षट्पदाली-
कालव्यालीं करेणाकलयतु दिनकृत् कल्मषोन्मूलनं वः॥ २॥

प्राचीकुङ्कुमतिलकं पूर्वाचलरोहिणेयमाणिक्यम्।
त्रिभुवनगृहैकदीपं वन्दे लोकैकलोचनं देवम्॥ ३॥

यद्बिम्बमम्बरमणि - र्यदपां प्रसूति-
र्नक्तं निषिञ्चति यदग्निशिखासु भासः।
ज्योत्स्ना निशासु हिमधाम्नि च यन्मयूखाः
पूषा पुराणपुरुषः स नमोऽस्तु तस्मै॥ ४॥

●

पूर्वताऽनुवृत्तम्

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— स्वर्गीयाः श्री विन्ध्येश्वरीप्रसाद शास्त्रिणः —

(विंशे सर्गे)

५१. याऽऽस्ते कलाकौशल-शिल्पसम्पत् पदार्थविद्या विविधप्रकारा।
अत्यन्तसूक्ष्मा परमाणुशक्तिस्ता एव लक्ष्यं एव नहि शिक्षणस्य॥
५२. समस्तया या ह्यधिभूतशक्त्या तेजस्विना दैवबलेन चापि।
अत्युन्नता - ऽऽध्यात्मिकचिन्तया च युनक्ति लोकं शुभशिक्षणं तत्॥
५३. देहो मनो बुद्धिरथान्तरात्मा यया विकासं परियन्ति सर्वे।
नृणां हिता शिक्षणपद्धतिः सा सर्वाङ्गपूर्णा कथिता मुनीन्द्रैः॥
५४. कामार्थ - धर्मामृत - मोक्षनाम्ना चतुर्विधा ये पुरुषार्थवर्गाः।
ते शूद्र-विट्-क्षत्रिय-भूमिदेवैः संसेवनीयाः क्रमशः सदारैः॥
५५. सर्वेषु देशेषु वसद्भिरेतैर्वर्णैश्चतुर्भिः परिषेवणीयाः।
चत्वार उक्ताः पुरुषार्थवर्गा अन्तर्भवत्येषु हि सर्वसिद्धिः॥
५६. निजं निजं सत्पुरुषार्थभावं परस्पर प्रेम समेधमानम्।
चतुर्षु वर्णेषु च बाल्यकालाद् या वर्धयेत् सैव मता सुशिक्षा॥
५७. प्रयोजनीयत्व-मिहास्त्यवश्यं कामार्थयोश्चापि नितान्तमेव।
परन्तु शिक्षासरणेर्हि लक्ष्यावङ्गीकृतौ ताविव धर्म - मोक्षौ॥
५८. निष्कामतो या निजधर्मसेवा तयैव पूज्या मनुजा भवन्ति।
वृथा जनुर्गर्वरतिस्तु नैव शिक्षा समुद्देश्यमदोऽवधेयम्॥
५९. आगर्भधानान्निजबालकेभ्यो वर्णानुकूला पुरुषार्थशिक्षा।
दीयेत चेत्तर्हि मनुष्यजातिः समुन्नतिं सर्वविधां भजेत॥
६०. विद्या मतिर्लोकबलं च धर्म ऐश्वर्यमेतानि समेधितानि।
समुन्नतीनां शिखरेषु लोकान् संस्थापयन्त्यत्र न संशयोऽस्ति॥

(क्रमशः)

सम्पादकीयम्

साम्प्रतिकी राष्ट्रिय-स्थितिः, अस्माकं कर्तव्यञ्च

अनिच्छन्तोऽपि महता खेदेन वक्तव्यमापतति यत्साम्प्रतमस्माकं चिरन्तनं सांस्कृतिकता - शिरःशेखरायितं राष्ट्रं यादृशीं दशां समनुभवत् प्राणीति, सा नूनमभूतपूर्वैव। वैदेशिकदासतायां स्वातन्त्र्यमहाभियानावसरेऽपि राष्ट्रस्यास्य यादृशी स्थितिरासीत्, न जातु सा एतादृशी सर्वतोव्यवस्थाव्यवस्थापिका उच्येत। तदा किलास्माभिः अव्यवस्थापादनस्य सुनियोजितः क्रमोऽनुसृतः, तात्कालिकं शासनं पुनः सर्वथा शान्ति-सुव्यवस्थास्थापने सर्वथा क्षमं समनुभूयते स्म। अस्माकं सोऽव्यवस्था-निर्माणक्रमोऽपि यथार्थतो न्यायदानविप्रतीपस्य एकान्ततो राष्ट्राऽऽमयावितस्य वैदेशिक-शासनंतत्त्वस्य समूलोन्मूलनायैवासीत्। शासनमपि येन केनाप्युपायेन सुदृढां व्यवस्थां स्थापयितुं क्षमं विभाव्यते स्म। किन्त्वद्य तु उभयमेकपदे भग्नं भज्यमानं वा परिदृश्यते। साम्प्रतमव्यवस्थानिर्मातारो राष्ट्रप्राणपदीनां व्यवस्थामपि मूलतः समुन्मूलयितुं प्रवर्तन्ते। शासनं पुनर्व्यवस्थास्थापने सर्वथाऽदृढां बालिशचेष्टां समाचरति। अत एवोच्यते, राष्ट्रस्य साम्प्रतिकी दुरवस्थाऽभूतपूर्वेवेति।

वस्तुतस्तथाकथिता-ऽव्यवस्थानिर्मातार एव ज्ञानतोऽज्ञानतो वा शाश्वतीं सुदृढां व्यवस्थां स्वीयया व्यभिचरितबुद्धिप्रसूतयाऽस्मितया भङ्‌तुं बद्धपरिकराः सन्ति। 'यथा राजा तथा प्रजे'ति नयेन व्यवस्थेयपक्षोऽपि प्रतिहिंसापरिप्लुतो राष्ट्रप्राणपदोनामपि व्यवस्थाम् अव्यवस्थायां परिणमय्य स्वोयपौरुषस्य कातार्थ्यं मन्तुं समभिलषति। शासनमेतावद् दौर्बल्यं गतं यत्प्रतिहिंसाप्रेरितस्य आकूतस्य तदीयचेतस्येव प्रविलापनस्य कथा तु दूरे आस्ताम्। सुस्पष्टमेतत् तदीयचेष्टितं निरोद्धुमपि तन्न पारयति। अस्यैव दुष्परिणामोऽद्य सहस्रधा रक्तबीजानां समुदयो परिदृश्यते। देशस्य सर्वो व्यापारः, सर्वं धनञ्च कतिपयानामेव मुष्टिगतं दृश्यते। अन्ये किल कोटि-कोटिमिताः निष्क्रिया निर्व्यापारा निर्धनाश्च तैः स्पर्धन्ते। ईर्ष्याकलुषितास्ते न्याय्यस्यापि धनस्य स्वामिनं द्रुह्यन्ति, तान् च नामशेषतां नेतुं प्रयतन्ते। दैनिक-राष्ट्रजीवनोपयोगि क्रियाजातं खञ्जीकृत्य स्वात्मनो गौरवमनुभवन्ति।

* * महती अव्यवस्थाऽद्य अस्माकं राष्ट्रे पदं कुर्वाणा दरीदृश्यते। कस्यापि जीवनं जलबुद्बुदतोऽपि अस्थिरं संवृत्तम्। गृहाद् वहिर्गतः कश्चिद्यदि सुस्थिरः सजीवः परावर्तेत तदपि महद्भाग्यं संवृत्तम्। त्यक्तलोकपरिग्रहाः शतशः साधवोऽपि कर्त्यन्ते। शासनं पुनर्मूकवत् साक्षितया तद्दर्शनमेव स्वकीयाम् इतिकर्तव्यतामवगच्छति। नैका योजनाः बहुधनसाध्याः परिचाल्यन्ते। परं तच्चालका स्वकीयं वैयक्तिकं नियोजनमेव तत्फलं मन्वते। यातायातस्य सर्वोऽपि क्रमः सर्वथाऽक्रमतां गतः। वृत्तसंप्रेषण-व्यवस्थापि प्रतिपच्चन्द्र इव कार्श्यं गता। महर्घता पिशाचिनी आबालवृद्धानभिभवति। व्यावसायिकाः नितरां कूटव्यापारे मग्नाः। विद्यार्थिनस्त्यक्तविद्याः उन्मादग्रस्ताः कानीन-जननाय सतीत्वलुण्ठनाय च बद्धपरिकरा विलोक्यन्ते। शासकीयकर्मकराः स्वात्मानं शासनस्य जामातरं मन्यमानाः निष्कर्मं लाभभोक्तारोऽवलोक्यन्ते। अधिकारिणः पुनः कथञ्चन प्राप्तस्य ऐन्द्रपदस्य अखण्डितसमुपभोगाय स्पर्धन्ते। प्रायोगिके क्षेत्रे मानवतायाः राष्ट्रियतायाश्च बलिमुपभुज्य प्रादेशिकताजातीयता-दलीयता - वैयक्तिकतारूपाश्च पिशाचित्य उन्मुक्तं नग्नताण्डवं समाचरन्त्यो दरीदृश्यन्ते। किं वा वक्तव्यम्, किं वा न वक्तव्यम्? सर्वे पदा हस्तिपदे अव्यवस्था-

ऽनैतिकताऽमानवीयतापदे निमग्नाः। अलं पापानां कथापि अश्रेयसे जायते!

* * * *

सर्वस्यास्य निरूपणस्येदमेव हार्दं यदद्य व्यवस्थापका व्यवस्थाप्याश्च सर्वेऽपि चिरन्तनमिदं राष्ट्रं सर्वथा उपप्लावयितुं बद्धपरिकरा दृश्यन्ते। कामं ते मनसा न तथा वाञ्छेयुः, परं तेषां सर्वा अपि चेष्टा अस्मिन्नेव सार्वभौमाव्यवस्था-निर्माणे एव नियुज्यन्ते। तदा किलाश्चर्यमपि आश्चर्यचकितं जायते यदा सर्वमेतत् 'सार्वत्रिकी क्रान्तिरि ति नाम्ना जोघुष्यते। एवंस्थिते सर्वथाऽशरणशरणो भगवानेव शरण्यो दृश्यते, येनाऽऽदितो व्यवस्थानिर्माणाय नैकानवतारान् परिगृह्य महानुपक्रमः कृतः। यतो हि भारतं किल तस्य शाश्वती लीलाभूमिः। तस्या गौरवरक्षणाय तेन यावान् महत्तरः प्रयासः कृतस्तस्य साक्षिणोऽस्माकं वेद-पुराणादीनि वर्तन्ते। स एव भगवानस्मान् भारतीयान् सद्बुद्ध्या योजयेत्तदैव राष्ट्रमिदं समर्जितस्य राजनैतिक-स्वातन्त्र्यस्य परिरक्षणाय प्रभवेत्। अन्यथा तथाकथित-साम्यवादिनः पुनरस्मान् स्वीयमायया ग्रसितुं विषकन्यावच्चेष्टन्त एव। एतादृशेन एकेन भ्रात्रा वयं यथा परिमुषितास्तत्तु पुरावृत्तमेव वदति। अपरो भ्राता किं वा विधास्यति इति तु भगवानेव जानीयात्! अस्माकं शासनारूढं दलं पुनस्तेभ्यो निर्वाचन-सन्धिकरणायापि पश्चात्पदं न दृश्यते। एतेनैव परिस्थिते-राभासः स्फुटीभवति।

वस्तुतो विचार्यमाणे विश्वस्य धारण-पोषणे सर्वथा क्षमा शान्ति-सामञ्जस्य-सौमनस्य-विश्वबन्धुत्वादिगुणगणा-लङ्कृता व्यवस्था भारतराष्ट्रनायकेन अनादिकालत एव स्वनिःश्वासतः शब्दमूर्त्या परिकल्पिता वर्तते। न च सा कृत्रिमा, देशकालसीमानियन्त्रिता, प्रत्युत नित्या सार्वभौमा च। तत्र आब्रह्मस्तम्बपर्यन्तस्य जीवजातस्य आवश्यकता-योग्यतानुरूपो योगक्षेमो विवृतो वर्तते। तदेव व्यवस्थाशास्त्रं समाश्रित्य अद्यावधि असंख्यैः आदर्शशासकै-स्तथा राष्ट्रमेतच्छासितं यथाऽत्र शतशः सहस्रशश्च घृतकुल्याः मधुकुल्याश्च प्रवहन्ति स्म। वृक्षा ओषधयश्च स्वयमेव अहमहमिकया फल-पुष्प-सस्यादीन् सर्वेभ्यः प्रदातुं स्पर्धन्ते स्म। काले पर्जन्यो वर्षति स्म, देशश्च सर्वथा क्षोभरहित आसीत्। किम्बहुना, व्यवस्थयाऽनया एकदाऽत्र ईदृशीस्थितिरासीत् यत्—

न राज्यं नैव राजासीत् न दण्डो न च दाण्डिकः।

इति। केवलं सर्वे जनाः स्व-स्वकर्तव्येनैव शासिताः सुखेन भारतभूमौ निवसन्ति स्म।

आवश्यकमेतदासीत् यद्वैदेशिकदासता-बन्धनोन्मोचनेन सहैव राष्ट्रस्य व्यवस्थापकैश्चिरन्तनेऽस्मिन् व्यवस्थाशास्त्रे सापेक्षा दृष्टिर्दीयेत इति। तदा राष्ट्रस्य चित्रमद्य अन्यथैव सर्वसाधनसम्पन्नमादर्शायितं दृष्टिपथं समागतं स्यात्। किन्तु तन्नाभवत्। हेतुरस्य दासताकाले नेतृणां तेषां मनसां वैदेशिकशिक्षादीक्षाभ्यो नितरां वासितत्वं स्वकीय-चिरन्तनवाङ्मयाध्यवसायसमुपेक्षितत्वञ्च। नूनं लार्ड 'मेकाले' महोदयस्य स्वप्नमद्य सर्वांशतः साकारतां गतं दृश्यते। साम्प्रतिकाः प्रायः सर्वे राष्ट्रकर्णधाराः कामं भारतीयाः स्युः, परं तेषां समग्रं चेतः समग्रा प्रज्ञा च सर्वथा वैदेशिक-शिक्षादीक्षया सर्वथाऽभिभूता। यथा पाश्चात्यदेशे राजतन्त्र-सञ्चालकैः प्रजानामुत्पीडनं कृतम्, या च तस्य विपरीता परिणतिः समभवत्, तयैव प्रभाविता एते भारतीयं राजतन्त्र-मपश्यन्। वैदेशिकदासतासुलभदोषजां तदीयामौपाधिकीं विकृतिमनाकलयन्तस्ते सर्वमपि भारतीयराजतन्त्रं पाश्चात्य-राजतन्त्रवत् सर्वथा विनाश्यमेव साधयामासुः। स्वीय-चिरन्तनवाङ्मयानध्यवसायेन तेषां कर्णयोर्भारतीयादर्श-राज्ञो रामभद्रस्य प्रतिज्ञेयं न प्राविशत् यत्—

स्नेहं दयां तथा सौख्यं यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा॥

श्रुत्वाऽपि वा तद्वाङ्मयेऽनास्थया समुपेक्षिता सा। अत एव ते राजतन्त्रमितः समुन्मूल्य लोकतन्त्रं गणतन्त्रं वा संस्थापितम्। कामं 'स्वीडेन'-सदृशे अल्पीयसि देशे तथाकथितं लोकतन्त्रं सफलं दृश्येत, परं विशाले राष्ट्रे लोकतन्त्रस्य पूर्णतः प्रतिफलनं सर्वथाऽसम्भवि एव। तदर्थं कस्यापि

राजतन्त्रस्य अधिनायकतन्त्रस्य वा धर्मनियन्त्रितस्य सत्त्वं परमावश्यकमेव । नामतो लोकतन्त्रं समुद्घुष्य पर्यायतोऽधिनायकतन्त्राचरणमद्य इव कथमपि परीक्षकाणां तोषाय न भवतीति सुनिश्चप्रचम् ।

साम्प्रतं पुनरनेनापि वैदेशिकराजनयिकोपदिष्ट-लोकतन्त्रेण अतृप्ताः साम्यवादीयदेशानुकरणाय 'समाजवादीसमाजरचना'तन्त्रं परिचालयितुं प्रवृत्ता अस्माकं शासकाः यत्र तत्र तस्यैव गीतानि गायन्ते । किन्तु इत्थं नित्यं परिचितजनद्वेषिणो लोकस्य नवनव - समीहायाः कुत्रापि अन्तः स्यान्न वेति न ज्ञायते । शासकानामनया दलविशेषभक्त्या वैदेशिक-बौद्धिकदासतया च स्वर्णपक्षिसदृशोऽस्माकं देशोऽद्य दारिद्रयस्याभिनवावतार इव जायमानो दृश्यते । अनेन तथाकथित - स्वातन्त्र्येण यावदपकृतम्, तावत्पारतन्त्र्येणापि नापकृतमिति महता खेदेन वक्तव्यं भवति ।

अतो लोकतान्त्रिकेऽस्मिन् राष्ट्रे लोका एवाचिरात् प्रबुद्धा भवन्तु, विचारयन्तु च किमस्माकं श्रेयः किं वाऽश्रेयः ? न कोऽपि दलविशेषो नाधिकृतो जन्मतो भारतावनौ । भारतीयाः भारतीयसंस्कृतिप्रणयिनस्तदनुष्ठापका एव अस्या भूमेर्वास्तविका अधिकारिणः । अस्माकमेतद् राष्ट्रं नाद्यतनम्, सर्वथा चिरन्तनमेव तत् । अस्य पूर्वपूर्वतनैः प्रयुक्ता, परीक्षिता सफलतां गता च धार्मिक-सामाजिकाऽऽर्थिकादिविविधविषयाणां प्रातिस्विकी व्यवस्था, सुपरिष्कृता च यासामाकरोऽस्माकं वेदशास्त्राणि विराजन्ते । व्यक्तेः सर्वत्र प्राधान्यम्, विकेन्द्रीकरणस्य सर्वत्र समादरः, वैयक्तिकसमुत्थानेन समाज-राष्ट्रादिसमष्टिजातानां समुत्थानमेव अस्माकं राजमार्गः । विश्वजनेषु सौभ्रातृत्वं एकस्य अमृतस्य पुत्रत्वभावश्च मनसि निधाय सर्वेषां हितसाधनम्, आत्मनः प्रतिकूलस्य परेषां कृते कदाप्यनाचरणम्, एवमादयो नैके विशेषा अस्माकं भारतीयसंस्कृतौ वर्तन्ते । तेषां समादरे एव भारतीयैर्दृढमवधेयम् । अपराधविशेषेच्छायाः समुदये तैर्दृढं प्रतिपदं स्मर्तव्यं यत्—

गुरुरात्मवतां शास्ता राजा शास्ता मनस्विनाम् ।
अथ प्रच्छन्नपापानां शास्ता वैवस्वतो यम ॥

अचिरादेव भारतराष्ट्रस्य पञ्चमं महानिर्वाचनं भविता । पञ्चविंशतिवर्षवयस्केन स्वतन्त्र-भारतराष्ट्रेण तदीयजनतया च विविच्य स्वात्मनो हितं न साध्येत अहितञ्च नापाक्रियेत, तदा मुधाऽतिवाहितः कालस्तेनेति वक्तव्यं भवेत् । तदा तु 'काकोऽपि जीवति चिराय बलिञ्च भुङ्क्ते' इत्यस्यैव एतन्निदर्शनं भवेत् । आशास्महे यद् भारतीयेषु साम्प्रतमप्येतादृशा दलनिरपेक्षाः भारतीयसंस्कृतिसमुपासकाः स्वधर्मस्वदेशनिष्ठाव्रतिनो भूयांसो विद्यन्ते । तेषां कृतेऽस्माकमिदं निवेदनमुद्बोधकं स्यात् । अन्ये च वर्तमानशासका अपि विषयेऽत्र अभिनिवेशपराङ्मुखा विचारयेयुस्तदनुसारं कार्यविधिं च निर्धारयेयुश्चेद् भारतस्य पुनरपि जगद्गुरुत्वपदं सार्थकं भवेत् । वयमास्तिकास्तु पर्यन्ते लीलासूत्रधारं प्रज्ञाप्रेरयितारं भगवन्तमेव प्रार्थयामो यत् स सर्वान् भारतीयान् सद्बुद्ध्या योजयत्विति ।

●

ग्राहका विनिवेद्यन्ते—

यद् अनेन अङ्केन 'सूर्योदय'स्य एकोनपञ्चाशत्तमं वर्षं प्रपूर्यते । अग्रिमः अङ्कः पञ्चाशत्तमवर्षस्य प्रथमः अङ्कः भविता । एतावद्दीर्घकालं जनता-जनार्दनस्य सेवासु निरतस्य पत्रस्य पोषणाय भारतीयजनतायाः शासनसंस्थानानां च किं वर्तव्यमिति पृथक् वक्तव्यं नावशिष्यते । वयं पुनः विषयेऽत्र तस्याः तेषां वा औत्सुक्यं तदैव अवगमिष्यामः यदा सा तानि वा प्रातिस्विक रूपेण एकैकं गव्यं ग्राहकं पञ्चरूप्यकप्रेषणेन अस्य अचिराद् विधास्यति इति ।

धनादेश (M. O.) प्रेषण-सङ्केतः—
व्यवस्थापकः 'सूर्योदय'
जगत्गंज, वाराणसी

नलचम्प्वा आध्यात्मिकं तत्त्वम्

--श्री त्रिलोकीनाथ द्विवेदी —

अस्ति शास्त्रेषु पुराणेषु च भारतवर्षस्य महन्महत्त्वम्। देवा अपि तथा यतन्ते यथा ते भारतं प्राप्नुयुः। तद्वासिनो जनाः स्वर्गस्थितानामपि देवानां धन्यवादार्हतामर्हन्ति।[1] कथन्न ते देवान् अतिक्रम्य तिष्ठन्ति; देशश्च सः कथन्नातिरिच्यते स्वर्गात्? अत एव देशोऽयं चूडामणिः सर्वदेशानामिति नातिकथनम्। साम्प्रतं त्वस्मिन्नसारे संसारे सर्वतो दरीदृश्यते भौतिकवादस्यैव साम्राज्यम्, नरीनृत्यते च शृङ्गारिकतैव सर्वत्र। अतः सुखसम्पत्तिभिरपि खपुष्पायितमेव। किन्तु समये समये भारतमन्तश्चमत्कारकारिणा बाह्यचाकचिक्यरहितेन, स्वकीयेन उद्धूयमानेन अध्यात्मध्वजेन भौतिकवादप्रतियोगितायामपि पराजित्य सर्वान् देशान् गौरवमधिरोहति। अत्र अध्यात्मतत्त्वमेव गुरुतरो हेतुः। अध्यात्मवादक्षेत्रे भारतम् एव गुरुः सर्वदेशानामिति नातिदुष्प्रेक्ष्यं प्रेक्षावताम्। अत एवाध्यात्मप्राणस्य भारतवर्षस्य संस्कृतिरेवाध्यात्मिकेति निर्विवादसिद्धम्। एवमनादिकालतः शाश्वतमार्गे शाश्वतप्रवाहशीलेयमद्य वैपरीत्यमुपगतेऽपि समाजे अत्याहता तिष्ठति।

अत एव परमानन्दसन्दोहजनकस्य, सुकुमारबुद्धीनामपि मोक्षसोपान-परम्परायमाणस्य काव्यस्यापि प्रयोजनत्वेन चतुर्वर्गफलप्राप्तिमेव[2] यदि स्वीकुर्वन्ति चतुर्दशभाषाविलासिनी-भुजङ्गायमानाः दर्पणकारास्तर्हि किमाश्चर्यम्? एवं "त्रिवर्गसाधनं नाट्यमि"ति अग्निपुराणे। तथा—

काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च।
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः॥

इति विष्णुपुराणे महर्षिव्यासः। अपि च—

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिवेषणम्॥

इति भामहेनापि उक्तम्।

नहि एतावदेव, अपि तु—किमाराध्यम्? सदा पुण्यम्; कश्च सेव्यः? सदागमः; को ध्येयो? भगवान् विष्णुः; किं काम्यम्? परमं पदम् इति। तथा "भक्तिर्भवे, न विभवे; व्यसनं शास्त्रे, न युवतिकामास्त्रे; चिन्ता यशसि, न वपुषि; प्रायः परिदृश्यते महतामिति वदन्तः स्मराद्वैतमङ्गीकुर्वन्तोऽपि साहित्यकारा अध्यात्मतत्त्वस्य परां कोटिमधिरोहन्ति इति नापलापार्हम्। एवं काव्यशास्त्रविमर्शकारिभिः प्रतिपादितकाव्यप्रयोजनेन काव्यमपि आध्यात्मिकताविषये न पश्चाद् भवति। अस्य ग्रन्थस्यापि काव्यत्वात् शृङ्गाररसस्य प्राधान्येऽपि अध्यात्मनिष्ठत्वं स्वीकरणीयमेव।

अस्य काव्यस्य रचयिता कविकुलकमलदिवाकरः, सर्वविद्यानामाकरः, कविताकामिन्याः ललाटिकायमानः, चन्द्रायमाणः कविनक्षत्रमण्डले, हारायमाणो हृदये, नीरक्षीरविवेके हंसायमानानां काव्यभावनापरिपक्वहृदयानां सहृदयधुरीणानाम्, कदा कस्मिंश्च देशे समजायत इति यद्यपि विवादपदवीमारूढ; तथापि समयेन दशतमा खैस्ताब्दी देशेन च दक्षिणो देशः

---

[1] गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे। (भागवतम्)

[2] चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥
(साहित्यदर्पणम् १.२)

स्वजन्मना समलङ्कार्षीदिति प्रायो निश्चीयते तैस्तैः प्रमाणैः ।[1] कविरयं भङ्गश्लेष-कथाबन्धं दुष्करं कुर्वन्[2] कस्य हृदयं नाधिरोहति; कस्य च मनःसागरं न मथ्नाति स्वकीयेन काव्यमन्दराचलेन; कस्य हृदयं च न परिभूषयति काव्यरत्नाकर-रत्नालङ्कारैः, नाप्लावयति च रसामृतैः, स्वकवितारसमदिरया कस्य शिरश्च न घूर्णयति ?[3]

अस्य महाकवेः विषये लोके दन्तकथा प्रचरत्येका यद् "आसीदयं महामूर्खः, सरस्वतीप्रसादात्तु अल्पकालिक्यैव प्रतिभया काव्यनिर्माणमकार्षीदि"ति । उदाहरन्ति च त एवं वादिनोऽस्यैव महाकवेः—

"मन्दधीस्तद्वदिच्छामि कविवृन्दारकायितुम् ।"

—इत्युक्तिम् ।

तद्विषयेऽपि वक्तव्यमस्ति किञ्चित्—सत्यमेतत् कविरयमासीन्मूर्खः, किन्तु विलक्षणः, न तु साधारणः । संस्कृत-साहित्ये सन्त्यनेके महाकवय एवं वैलक्षण्यविशिष्टाः । सर्वप्रथमम् अमन्दरसनिष्यन्द-प्रवाहपूर्णनदीप्रभवगिरिः कविताकामिन्याः विलासभूतो महाकविः कालिदास एव—

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनाऽस्मि सागरम् ॥

तथा—

मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥

इति रघुवंशमहाकाव्येऽवदत् । एवमेव सोऽपीति न चिन्तास्पदम् ।

अस्य नलचम्पूकाव्यस्य आध्यात्मिकताविषये किं वर्णनीयमस्ति ? यत्रास्ति सकलकलिप्रभावं दमयन्ती दमयन्ती एव प्रधाननायिका । नल-दमयन्त्योः परस्परम् अन्योन्यानुरागकन्दलीभिन्नवारिदः, अस्य प्रेमप्रपञ्चनाटकस्य नवसूत्रहारः, उभयोर्हृदये हारभूतः, सहृदयचमत्कारकारकः, वाहनः चतुर्मुखस्य चतुर्मुखमुखोच्चरितवेदध्वनिश्रवणेन निर्धूतसकलकलिकल्मषः, राजहंस एव प्रमुखपात्रम् । तथा स्वयं कलिप्रभावनाशकः[1] प्रबलवैरिवनदावानलः नल एव नायकः । यस्य नलस्य कथां निपीय बुधाः सुधामपि तथा नाद्रियन्ते ।[2] अतः सुधावधीरणी[3] यस्य कथा जगति स्मृता सती पवित्रतामातनुते ।[4] तथा येन चतुर्भिः पदैः सुकृते स्थिरीकृते सति अधर्मोऽपि भुवमेकाङ्घ्रिकनिष्ठिकया स्पृशन् कृशः सन् तपस्वितामाचरति स्म ।[5] स्वर्गप्राप्तय एव जना भौतिकतामनादृत्य आध्यात्मिकतामुररीकुर्वन्ति, सर्वे देवान् स्मरन्ति याचन्ते च । किन्त्वत्र देवा एव याचकत्वमवलम्ब्य स्वर्गं विहाय भूमिष्ठाः दृश्यन्ते, कामयन्ते च नाकनारीः विहाय दमयन्तीमेव । एवं यत्र स्वर्ग एव भूमौ दृश्यते तस्य काव्यस्य आध्यात्मिकतायाः यत्किञ्चिदपि कथनं सूर्यदीपदर्शनमिव न प्रशस्यतरम् । तथापि—

---

[1] देशानां दक्षिणो देशस्तत्र वैदर्भमण्डलम् ।
तत्रापि वरदातीरमण्डनं कुण्डिनं पुरम् ॥
देशो भवेत् कस्य न वल्लभोऽसौ······।
देशो दक्षिणदिङ्मुखस्य तिलकः······॥

[2] भङ्गश्लेषकथाबन्धं दुष्करं कुर्वता मया ।
दुर्गस्तरीतुमारब्धो बाहुभ्यामम्भसां पतिः ॥

[3] किं कवेस्तेन काव्येन किं काण्डेन धनुष्मतः ।
परस्य हृदये लग्नं न घूर्णयति यच्छिरः ॥

[1] कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ॥

[2] निपीय यस्य क्षितिरक्षिणः कथास्तथाऽऽद्रियन्ते न
बुधाः सुधामपि । (नैषधीयचरितम् १:१)

[3] रसैः कथा यस्य सुधावधीरणी··· । (नैष० १.२)

[4] पवित्रमत्रातनुते जगद्युगे
स्मृता रसक्षालनयेव यत्कथा । (नैष. १.३)

[5] भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन्
दधावधर्मोऽपि कृशस्तपस्विताम् । (नैष. १.४)

सोऽहं हंसायितु मोहाद् बकः पङ्गुर्यथेच्छति ।
मन्दधीस्तद्वदिच्छामि कविवृन्दारकायितुम् ॥

इति कविप्रौढोक्तिं स्मारंस्मारं स्वान्तःसुखाय अत्रत्यमध्यात्मतत्त्वं किञ्चिन्मया विविच्यते ।

"भोगोः योगेन शोभतेतराम्" इत्येव ख्यापितं महाकविना कालिदासेनापि स्वकीयनाटके काव्ये च प्रधाननायिकारूपेण शकुन्तला-पार्वत्योर्वर्णनेन । दमयन्त्यपि तथा । अतः—

उदात्तनायकोपेता गुणवद्वृत्तमुक्तका ।
चम्पूरिव हारयष्टीश्च केन न क्रियते हृदि ॥

(नल० प्र. उ. श्लो. २५) इति स्वयमुपवर्ण्य—

गद्यावली पद्यपरम्परा च
प्रत्येकमप्यावहति प्रमोदम् ।
हर्षप्रकर्षं तनुते मिलित्वा
द्राग्बाल्यतारुण्यवतीव कन्या ॥

इति जीवन्धरचम्पूकाव्ये हरिचन्द्रेणोक्तं मनसि कृत्वा न गद्यात्मिकां न च वा पद्यात्मिकाम्, अपि तु उभयात्मिकां चम्पूकाव्यपद्धतिमङ्गीकृत्य माध्वीक - मृद्वीकयोरिव अध्यात्म-शृङ्गाररूपयोः गङ्गा-यमुनयोरप्रयाग एव सङ्गमोऽकारि कविना । अत्रत्यमध्यात्मतत्त्वं गाङ्गमम्बु यामुनं च शृङ्गाररसः । केवलं जाह्नवीजलस्य न सा शोभा भवति, न वा यामुनस्य यथा सङ्गमे द्विगुणात्मिका प्रयागे सघटाटोपं समीपवर्तिनोः प्रतिद्वन्द्विनोरिव । तत्तुल्येव स्थितिर्दृश्यतेऽत्र काव्येऽध्यात्म-शृङ्गारयोः । अध्यात्मं विना शृङ्गारः सुगन्धेन रहितं शिरीषम्, भ्रमररहिता मालती, किं बहुना, सिन्दूरबिन्दुं विनाऽनवद्या वनिता इव न शोभते । तथा शृङ्गाररहितमध्यात्ममपि मालतीं विना वसन्तः प्रकृतिं विना पुरुष इव च न शोभाधायकम् । अतः शृङ्गारेऽध्यात्मस्य तथैव आवश्यकी स्थितिर्दृश्यते यथा व्यञ्जने लवणस्य, सरसि कमलस्य, कमले भ्रमरस्य आकाशे च चन्द्रस्येति । अध्यात्मतत्त्वे च शृङ्गारस्य तथैवावश्यकता भवति यथा तिले तैलस्य, पुष्पे परागस्य इन्दौ अमृतबिन्दोरिति ।

एवमनयोर्नान्तरीयकत्वं प्रतिपादयतैव कविना अस्मिन् काव्ये मर्यादामनुपालयता प्रथमे माङ्गलिके श्लोके जगतः पितरौ पार्वती-परमेश्वरौ वर्णयित्वा अनन्तरित एव श्लोके सर्वसंसारवल्लीजननजरठकन्दः कामो वर्णितः । अनेनाध्यात्मपरिपोषित एव शृङ्गारः शोभाधायक इति सङ्केतितम् । उद्घोषितञ्च मुक्तकण्ठेन शृङ्गारोपरि अध्यात्मविजय एव । अतः प्रसङ्गप्राप्तानि कानिचिदुदाहरणान्युदाह्रियन्ते ।

१. सर्वप्रथममाध्यात्मिकभावना द्वितीयोच्छ्वासे तदाऽङ्कुरिता दृश्यते यदा आत्मरूपापहसित-समस्तसुरसुन्दरी-सौन्दर्यसम्पत्तिः—

देशानां दक्षिणो देशस्तत्र वैदर्भमण्डलम् ।
तत्रापि वरदातीरमण्डनं कुण्डिनं पुरम् ॥

इति प्रशंसिते वैभवन्यक्कृत - सुरपुरे कुण्डिने पुरे आखण्डलायमानस्य राज्ञः परभीमस्य भीमस्य प्राणप्रिया प्रियङ्गुमञ्जरी, वरदायाः पुण्यपुलिनपादपतलेषु शूरतल्लजेन स्ववल्लभेन रममाणा सती बालकमेकमुदरदेशलग्नमपरमपि पृष्ठप्रतिष्ठितमुद्वहन्तीमवलोक्य कपिकुटुम्बिनीं काममपि, नरमणिना स्वरमणेन सहैवानपत्यविषादविषादिता भूम्नि राज्ये जने जीविते च वैमनस्यमनुभूय, सममेव स्मारं स्मारमनश्वरं महेश्वरं स्मरराज्यधिष्ठातृदेवतेव, सर्वेषां शङ्करः शङ्कर एव सर्वसमर्थ इति मत्त्वा आजीवितं लब्धं कामं (शृङ्गाररसम्) सकामं कर्तुमनङ्गमनङ्गं साङ्गरूपेण परिणमयितुं निष्फलं पुष्पशरं सफलीकर्तुकामा ललनाललामा कामवामा सा आराधितवती अनवरतं प्रियङ्करं शङ्करम् । तद्वर्णनं कृतं कविना—

अखण्डितप्रभावोऽथ प्रदोषेणान्धकारिणा ।
तस्याश्चित्ते स्थितः शम्भुरुदयाद्रौ च चन्द्रमा ॥

(शेषांशः २८२ पृष्ठे)

पुराणम्, इतिहासश्च : साङ्गं समीक्षणम्

—श्री श्रीकृष्ण शर्मा—

(२)

इतिहास-समीक्षा

अथेतिहासः सङ्गृह्यते। तत्र 'पुरुषार्थ-तदाभासान्यतरप्रयोजनमुद्दिश्य कर्तृत्वम्' इतिहासः। प्रयोजनमनुद्दिश्यैव लीलाकर्तृत्वमिति पुराणविषयाद्वैलक्षण्यम्। तच्च पुराणविषयवदेव स्वोय-यथासम्भव-कारकोपकारकाऽपकारक-देश-काल-फल-क्रम-सङ्गतिकलापविशिष्टम्। सुखस्यैव पुरुषार्थत्वमिति पक्षेऽपि अनिष्टपरिहारादीनां पुरुषार्थत्वे अर्थमानत्वमेव पुरुषार्थत्वम्। आब्रह्मस्तम्बपर्यन्तानां सर्वेषामेव प्रवृत्तिः पुरुषेणार्थ्यमानं पुरुषार्थत्वेन भासमानं (धर्मम्, अर्थम्, कामम्, मोक्षम्) तदाभासं (धर्माभासम् अर्थाभासं कामाभासं मोक्षाभासं) वा किञ्चिदुद्दिश्यैव। **प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते** इत्येव तेषामनाप्तकामानामुत्सर्गतो गतिः। उद्दिष्टस्यानुपाये विपरीते वा भ्रान्त्या कामं कस्यचित् प्रवृत्तिः स्यात्! कस्यचित् च उद्दिष्टस्योपाये प्रमया। कथमपि किञ्चिदुद्दिश्यैव प्रवृत्तिः। फलं तु फलति नियत्या नियतमेव। किं कुर्मः? कथमपि इतिहासत्वे न विरोधः। द्विविधयोरपि तयोः यथायोग्यं विधौ निषेधे वा अर्थवादत्वेन उपयोगो वक्ष्यते।

अकामहतस्य श्रोत्रियस्यापि यदि कापि प्रवृत्तिः सा **जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन्** इति, **लोकसङ्ग्रहमेवापि सम्पश्यन् कर्तुमर्हसि** इति च अपारमार्थिकत्वेन गृहीतमेव किमपि प्रयोजनं स्वस्य परेषां वा प्रारब्धवशात् समुद्दिश्यैव। यद्यनुद्दिश्यैव काचित् कृतिस्तस्य कस्याञ्चिद् भूमिकायां भवति तर्हि तत्र न तदीयं पृथक् कर्तृत्वं कल्पनीयम्। किन्तु **योगक्षेमं वहाम्यहम्** इतिरीत्या परमेश्वरस्य सर्गमूलभूत-पूर्वोक्तलीलाकर्तृत्वेनैव निर्वाहः। तस्य च स्वतो नेतिहासत्वम्। किन्तु तादृशब्रह्मनिष्ठस्य चतुर्थपुरुषार्थमुद्दिश्य पूर्वं सम्पादितसाधनानुष्ठानस्य इतिहासस्य फलतया विशेषणत्वमेव। जगद्व्यापारवर्ज्यमेव च पुरुषार्थत्वमुक्तम्। अतस्तत्र प्रवृत्तिर्नेतिहासः।

उन्मादचेष्टापि नेतिहासः। वृथाचेष्टाया अपि सैव गतिः। एवं स्वाभाविकचेष्टानामपि। उन्मत्त-मत्त जडचर्यादि तु भवत्येवेतिहासः, **जडवल्लोक आचरेत्** इति स्मृतविधेः। राजादीनां लीलाचेष्टादौ क्षुद्रमपि सुखं यदि नोद्दिश्यते तर्हि नैव स्वतस्तत्रेतिहासत्वम्। एवंरीत्या किञ्चिदनुद्दिश्य प्रवृत्तिविषये अलक्ष्यत्वं सर्वत्र ऊह्यम्। परन्तु एतेषां सर्वेषामपि स्वत इतिहासत्वाभावेऽपि कारकादिमुद्रया क्वचिदितिहासेऽनुप्रवेश इष्यत एवेति तु न निराकर्तव्यमिति। तथा च प्रोक्तलक्षणानां प्रवृत्तीनां अध्यात्माधिदैवाधिभूतभूमिकासु आब्रह्मस्तम्बपर्यन्तासु इतिहासत्वं भवत्येवेति लक्षणेन वक्ष्यते।

रामादिचरितस्य इतिहासत्वमपि

अथ परमेश्वरभूमिकायामपि श्रीराम-कृष्णादि-साक्षादवतारेषु प्रवृत्तय इतिहासा यावत्यो मर्त्यशिक्षाप्रदा इत्युच्यन्ते। यदुक्तमृषिणा—**मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः** इत्यादि।

अत्राऽऽलोच्यते—"अवतारानुचरितं हरेः" लीलाकृतिषु पुराणे परिगण्यते। तत्र प्रयोजनमनुद्दिश्यैव लीलाकृतिरित्युक्तम्। कथं तर्हि तस्य उद्दिश्यैव सम्भवत्सु प्रोक्तेतिहासकृतिष्वन्तर्भाव इति चेत्, अत्र विषये **सम्भवाम्यात्ममायया** इत्यत्र गीतायां टीकायां श्रीमधुसूदनसरस्वतिश्रीचरणाः—

मन्माययैव मयि मनुष्यत्वादिप्रतीतिर्लोकानुग्रहाय ।···तथा चोक्तं मोक्षधर्मे—

माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद !
सर्वभूतगुणैर्युक्तं न तु मां द्रष्टुमर्हसि ॥

उक्तं च भगवता भाष्यकारेण—"स्वमायया देहवानिव जात इव च लोकानुग्रहं कुर्वन् लक्ष्यते, स्वप्रयोजनाभावेऽपि भूतानुजिघृक्षया···" इति ।

व्याख्यातृभिश्चोक्तम्—'स्वेच्छानिर्मितेन मायामयेन दिव्येन रूपेण सम्बभूवे'ति नित्यो यः कारणोपाधिर्मायाख्योऽनेकशक्तिमान् । स एव भगवद्देह इति भाष्यकृतां मतम्' इति । अथ मतान्तरम्—"सम्भवामि देहदेहिभावमन्तरेणैव देहिवद् व्यवहरामि" इति ।

अर्थात् सृष्टा मायैव इन्द्रियग्राह्या भवति, न तु मूलभूतेति मतद्वयसाधारणम् । देह-देहिभावः कल्पनीयो न वेत्यत्र मतभेद इति । अत्र मतद्वयेऽपि मूलभूत-लीलाकर्तृत्वापेक्षया अवतारव्यवहारे ईषद्वैलक्षण्यप्रतीतिः "इव - वति"-प्रयोगाभ्यां प्रदर्श्यते । अत एव भगवदुक्तौ "पश्यसि" "न द्रष्टुमर्हसि" इति वैलक्षण्यमुक्तं सृष्टासृष्टयोर्यत्तत् मूलभूतलीलाकर्तृत्वावतारकर्तृत्वयोरपि पर्यवस्यति । इत्थं च मूलभूतलीलाकर्तृत्वापेक्षया अवतारभूमिकायां कृतौ ईषद्वैलक्षण्यं लोकानुग्रहादिप्रयोजनोद्देश्यकत्वरूपं तत्र सिद्ध्यतु । एवं तर्हि लीलाकृतिषु तत्परिगणनं कथमिति चेत्, स्वद्वारा अवतारकर्तृत्वानामपि उपपादकमूलकर्तृत्वलक्षणेन दशमस्य विशुद्धये; मन्वन्तराधिपप्रभृतीनां सद्धर्मपरिगणनवदित्येवास्तु ।

अथ यद्युच्यते—अवतारस्य व्यवहारेण भूतानुग्रहादि भूतानां प्रयोजनं स्वत एवानुद्दिष्टमपि फलत्येव, न तदर्थं अवतारकृतौ भूतानामनुग्रहप्रयोजनोद्देश्यतापि कल्पनीयेति साक्षादवतारकर्तृत्वानां मूलभूतकर्तृत्वापेक्षया तादृशोद्देश्यकत्वं वा वस्तुतो नैव कल्पनीयमित्येव "इव-वति"भ्यां प्रदर्श्यत इति चेन्मन्यते, तदा प्रोक्त-सोद्देश्यक-कर्तृत्वसाजात्यविशेषविशिष्टकर्तृत्वमेव इतिहासविषयोऽस्तु । लक्षणमप्यग्रे तथैव तादृशसाजात्यघटितमेवास्तु ।

इत्थं च लीलाकृतित्वान्यथानुपपत्त्या उद्देश्यत्वानिरूपकत्वं, शिक्षाप्रदत्वान्यथानुपपत्त्या चोक्तसाजात्यविशेषश्च अवतारस्य तावतीषु कृतिषु कल्पनीयावेवेति । तथा च तावतीनां लीलाकृतीनां पुराणेतिहासोभयरूपत्वमिति सर्वसामञ्जस्यम् । अत एव मर्यादापुरुषोत्तमस्य भगवतः श्रीरामचन्द्रस्य चरितानि प्रायेण मुनिभिरितिहासतया वर्ण्यन्ते । लीलापुरुषोत्तमस्य भगवतः श्रीकृष्णचन्द्रस्य चरितानि तु प्रायो लीलात्वेनैव मुनिभिर्गीयन्ते इति वैलक्षण्यमुक्तसाजात्याऽसाजात्यभूमतया उपपद्यते । अत एव रामायणमितिहासः, भागवतं पुराणम् । घटितघटनात्वं तूभयोरपि समानमिति । एवमन्यावतारकृतिष्वपि द्रष्टव्यमिति ।

तत्रेतिहासरूपं कर्तृत्वं यदा स्वद्वारा स्वानुग्राहकमूलभूतलीलाकर्तृत्व-व्युत्पादनप्रधानतात्पर्येण, पुराणेषु मन्वादीनामितिहास इवादीयते, तदा इतिहासः पुराणेष्वन्तर्भाव्यते । यदा पुनरितिहासव्युत्पादन-प्रधानतात्पर्येण पाण्डवादीनामितिहास-महाभारतादौ अनुग्राहक-श्रीकृष्णलीलाकृतीनामुपादानं तदा तद् लीलाकृतिरूपं पुराणमितिहासेऽनुप्रविशतीति स्थितिः । कथमपि विद्याधर्मोभयस्थानेषु चतुर्दशसु इतिहासस्य पुराणेष्वन्तर्भाव एव याज्ञवल्क्येनोक्तः । कौटिल्यस्तु **पश्चिममितिहासश्रवणे** इत्यत्र 'पुराणमितिवृत्तमाख्यायिकोदाहरणं धर्मशास्त्रमर्थशास्त्रं चेतिहास' इति परिभाषितवान् । **अथर्ववेदेतिहासवेदौ च वेदा** इति वेदवदुपादेयत्वं च राजनीतौ इतिहासस्य प्रदर्शितवांश्च । नैतावता प्रकृते कश्चिद्विरोधः । एवं प्रोक्तविषयस्वरूपा अर्था वेदादिवाङ्मयेषु चेदपि वेदस्थपुराणेतिहासतया विवक्ष्यन्त एवेति ।

विषय-स्वरूपम्

तत्रान्तःकरणवृत्तिसाधारणं 'ज्ञानेच्छाकृतय' इति त्रयमितिहासविषयकर्तृत्वस्वरूपम् । परमेश्वरस्य हरि-हरादेः केवलावताराणां सर्वमत एव भूत-भौतिक-स्थूल-सूक्ष्मशरीरद्वयमपि नास्ति; तथापि माययैव यथामतं सृष्टशरीरेन्द्रिया-

न्तःकरणादिप्रतिभासः। तत्साधारणान्येव ज्ञानत्वेच्छात्वकृतित्वानि। अन्तःकरणवृत्तिरूपमिदं त्रयं सर्वेषां प्रतिव्यक्ति साक्षिभास्यमेव। यद्यपि **प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः** इति न्यायसूत्रम्, तथापि कर्तृत्वं प्रोक्तत्रयमेवोक्तम्। अधिकं सर्वं विशेषणं भवति। इदं च कर्तृत्वं मूलभूतलीलाकर्तृत्वेन अनुगृहीतमत्र समर्थं स्वविषये, नान्यथेति पूर्वमेवोक्तम्।

इतिहास-लक्षणम्

इतिहासः इतिवृत्तम्। तस्य लक्षणानि—

> **इतिवृत्तं परकृत्यर्थवादरूपेण यः कश्चिदाध्यात्मिक आधिदैविक आधिभौतिको वार्थ आख्यायते दिष्ट्युदितार्थावभासनार्थं स इतिहास उच्यते।**
>
> (निरुक्तभाष्ये दैवते १. २७)

आर्षं बहुविधाख्यानं देवर्षिचरिताश्रयम्।
इतिहास इति प्रोक्तं भविष्यद्भूतकर्मगम्॥

(विष्णुपु०, श्रीधरी विष्णुचित्तिश्च)

धर्मार्थकाममोक्षाणा - मुपदेशसमन्वितम्।
पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते॥

(बार्हस्पत्यकोशः, शब्दचिन्तामणिः,
काव्यप्रकाश-टीकायां स्मृतिरुद्धृता)

अमुक एवङ्कारी अमुकदेशे इति नाट्ये इतिवृत्तम्।

(अभिनवभारती)

प्राग्वृत्तकथनं चैकराजवृत्तमिषादितः।
यस्मिन् स इतिहासः स्यात्पुरावृत्तः स एव हि॥

(शुक्रनीतिः)

इत्येवमादीनि तत्र तत्रोदाहृतानि।

अत्र उपदेशो विधिरित्यनर्थान्तरमुक्तम्। तच्च निषेधस्याप्युपलक्षणम्। तथा च—परकृत्यर्थवादरूपेण धर्मार्थकाममोक्षाणां विधि-निषेधयोरन्यतरस्मिन् समन्वययोग्यः अमुकदेशे अर्थाच्च काले अमुक एवाङ्कारीत्यर्थं इतिहास उच्यते, इति समन्वयेन फलति। आधुनिकानामपि इतिहासानां क्वचिद्विधौ नो चेन्निषेधे अन्वययोग्यत्वमेव। सन्निधिपठितैरर्थवादैः विहित-निषिद्धयोः प्रवृत्तिनिवृत्तिपर्यन्तप्ररोचनाया असम्पत्तौ अन्यतोऽपि यावतः सम्भवतः प्ररोचनाया (यै) उपयोगस्य इष्टत्वात्। विधिनिषेधावितीह लक्षणे लौकिककल्पिताध्यवसायरूपावपि गृह्येते। तत्रापि इतिहासोपयोगदर्शनात्।

उपदेशादनायोगाद् वासनानुगमादपि।
परयत्नाददृष्टाद्वा सर्वाः सर्वत्र वृत्तयः॥

इति पञ्चधा निर्दिष्टं प्रवर्तक-निवर्तकमात्रमपीह विधिनिषेधाविति। उपदेशादित्यादेरर्थो यथा अर्थशास्त्र-जयमङ्गलायाम्—

> "हिताहितप्राप्ति-परिहारौ—(१) क्वचिन्मात्रादिचरितोपदेशापेक्षया—नहि 'इदं कुरु, इदं मा कार्षीरि'ति वाचैव श्रोतॄणां शब्दार्थप्रतिपत्तॄणामुपदेशः। किं तर्हि? अनुकर्तॄणां नाट्योपदेशवदुपदेशः। (२) कदाचिदनायोगात्—यस्यां प्रवृत्तौ बाध्यन्ते, न च फलं प्राप्नुवन्ति, ततो निवृत्त्या अन्यत्र निराबाधं फलं च किञ्चिल्लभमानाः पौनःपुन्येन इदमतो दुःखम्, अन्यथा अदुःखं भवतीति तमोबाहुल्येऽपि यच्च यावच्च प्राकाश्यं लभ्यन्ते। (३) कदाचिद् वासनानुगमाच्च—अनन्तरेषु व्यवहितेषु च जन्मसु दर्शनश्रवणादिभिः सर्वपदार्थ-स्वभावपरिच्छेदानुभूत-लोकत्रया(यात्रा?)णां यदृच्छोत्पन्नवासनाप्रबोधानां हिताहितवस्तुन्यभिलाषेतरौ भवतः। ततश्चाभिप्रेतलाभः परिहारश्च। (४) कदाचित् परप्रयत्नात्—उपकरणसम्पदायत्तमात्मोपकारं मन्यमानो गोवत्सादिवदनं मातुरूधःप्रदेशं योजयन् स्वार्थं साधयति। सान्येषां च परनीत्यपेक्षया प्रवृत्तिः साफल्यं लभते। (५) कदाचिद् अदृष्टात्—पूर्वदेहोत्पन्नौ धर्माधर्मौ प्रत्युत्पन्नपरिपाकौ देहकारणानां सन्निवेशविशेषरचनायाः कारणीभवतः। एवमिष्टानिष्टप्राप्तिपरिहारनिमित्ताय प्रवृत्तिविशेषाय अनन्ताय पुरुष-

तर्कागोचराय तावेव प्रभवत इति न किञ्चिद(नीति)निमित्तं फलमस्ति'' इति ।

तथा च 'नीतिं विना फलं नास्ति' इत्यस्य सफलत्वं निष्फलत्वं वा स्वसम्बन्धेन स्वाभावसम्बन्धेन वा नीतिरेव फलतीत्यर्थः । "शास्त्रेणैकान्तिको नयः" इति तत्रोक्तमेव कामम् । इत्थं च सर्वत्र प्रवृत्तौ निवृत्तौ वा प्ररोचनापेक्षायामितिहासस्य अन्वययोग्यत्वमेवेति ।

अत्र 'उच्यते' 'प्रोक्तं' 'प्रचक्षते' इत्यादिना लक्षणमेव इतिहासपदस्य शक्यधर्म इति विवक्ष्यते । अन्यत्रात एवेतिहासपदं प्रयुक्तं चेद् योगेन लक्षणया वेति बोध्यम् । निषेधोपलक्षणात् धर्मार्थकाममोक्षाभासानां निषेधे अर्थवादे भ्रान्तिकल्पितविधौ वा यथायथं प्रवृत्ति-निवृत्त्योरुद्देश्यत्वसिद्धिः । एवं वैपरीत्येनापि । अर्थात् धर्मार्थकाममोक्षाणां विधौ अर्थवादे भ्रान्तिकल्पितनिषेधे वा यथायथं प्रवृत्तिनिवृत्त्योरुद्देश्यत्वसिद्धिः । देशे काले इत्यनेन वस्तुसदर्थवादरूपसिद्धिः । एवङ्कारित्वं यथासम्भवकारकाद्यंशविशिष्टकर्तृत्वम् । विधिनिषेधाभ्यां हि किञ्चिदुद्दिश्य या प्रवृत्तिनिवृत्तिरौदासीन्यं वा तदुद्दिश्य प्रवर्तना निवर्तना वा बोद्ध्यते तत्रैवेतिहासोऽन्वेति । अतः पुरुषार्थ-तदाभासान्यतरोद्देश्यक - यथासम्भव - कारकदेशकालाद्यन्वितकर्तृत्वं इतिहासलक्षणं विज्ञायते । आधुनिकानामितिहासेष्वपि पुरुषार्थ-तदाभासान्यतरोद्देश्यकत्वमेव ।

एतेन देशकालावृत्तिकल्पितकथा वेतिहासः । केवलकर्तृत्वस्वरूपेणापि नेतिहासः । किन्तु प्रोक्तोद्देश्यादिविशिष्टकर्तृत्वसाजात्येनैव । सोऽपि योद्धारोऽयुद्ध्यन्, दातारोऽददुः इत्यादिरूपेण सामान्यतोऽपि नेतिहासः । किन्तु व्यक्तेः वंशस्य जातेः वर्गस्य वा विशेषसम्बन्धित्वाकारेणैवेति 'अमुके'ति 'एके'त्यादिनोक्तम् । तथा च व्यक्त्यादिविशेषसम्बद्ध - तादृशोक्तसाजात्यविशिष्टकर्तृत्वं लक्षणम् । पूर्ववृत्तेति, प्राग्वृत्तेति, पुरावृत्तेत्यादिना भूतकालिकत्वेन कालनिवेशो लक्षणे भाति । तथापि 'भविष्यद्भूतकर्मगम्' इति सत्त्वात्, रामायण-महाभारतादौ लेखनकालापेक्षया भविष्यतोंऽशस्यापि निवेशात् कालत्वेनैव लक्षणे कालनिवेश उचितो भाति । नाटके तु भूतस्यैव ख्यातस्याभिनेयत्वमित्यन्यदेतत् । आध्यात्मिकेत्यादि तु केवलं मनुष्यस्यैवेतिहास इति भ्रमनिरासार्थम् । देवासुर-दैत्यदानव-देवयोनिप्रभृतीनां स्थावरान्तानां अपि आब्रह्मस्तम्बपर्यन्तानामपीतिहासो लक्ष्यमिति बोधयितुम् । दिष्ट्युदितेति तु वेदे अतिसङ्क्षेपेणैव दर्शितस्य विस्तरार्थमिति पृथगितिहासग्रन्थप्रयोजनपरम् । अर्थवादरूपेणेति चोपयोग उक्तः ।

उपर्युक्तमितिहासस्य अर्थरूपस्य लक्षणम् । यदि ग्रन्थरूपोऽपि इतिहासः 'इतिहासं पठामि, शृणोमी'ति प्रतीतेस्तदा तस्य लक्षणं तु तादृशलक्षणलक्षितार्थप्रतिपादक-ग्रन्थत्वमिति । तत्र यदि **स्थानानि विद्यानां धर्मस्य च चतुर्दशे**ति विवक्षिता एव इतिहासा लक्षणीयास्तदा 'आर्षत्वे सतो'ति विशेषणीयम् । तथा च आर्षत्वे सति तादृशार्थप्रतिपादकग्रन्थत्वमिति दर्शयितुमुक्तं आर्षमिति । तथा चार्षग्रन्थप्रतिपाद्य - तादृशसाजात्यविशिष्टकर्तृत्वमिति विद्याधर्मोभयस्थानस्य अर्थरूपेतिहासस्य लक्षणं पुराणवत् । तच्च 'बहुविधाख्यानं देवर्षिचरिताश्रयम्' भवत्येव । उपलक्षणमिदम् आर्षग्रन्थप्रतिपाद्यस्य देवर्षिव्यतिरिक्तानामपि चरितस्य ।

तत्र विशेषेण आर्षग्रन्थप्रतिपाद्यातिरिक्तानाम् आब्रह्मस्तम्बपर्यन्तानामाधुनिकानामपि कर्तृत्वानां तत्प्रतिपादकानाम् अनार्षग्रन्थानामपीतिहाससामान्यलक्षणलक्ष्यत्वमिष्यत एव । ततश्च तेषां साधारणे लक्षणे आर्षत्वे सतीति न विशेषणीयम् । तेषां चेतिहासानां न विद्याधर्मोभयस्थानेषु प्रवेशः । किन्तु "इतिहासागमाद्याश्चे"त्यादि—(चम्पूरामायणे युद्धकाण्डटीकायाम्) "नाटकाख्यायिकापरिज्ञानमि"ति (कामसूत्रजयमङ्गलायाम्) चोक्तदिशा चतुःषष्टिकलामध्ये एव प्रवेशः । रांके प्रपञ्चित-वैज्ञानिकपद्धत्या पूर्णतया यथार्थेतिहासलेखनस्यानृषिणा अशक्यत्वात् कलामात्रत्वं युक्तमनृषिलिखितानामित्यग्रे व्यक्तीभविष्यति ।

(क्रमशः)

संस्कृतस्य अध्ययनम् : नवीना दृष्टिः

— श्री हनीफ नूरानी महोदयः —

महत्त्वपूर्णं तथ्यमिदं यद्विगते मार्चमासि भारतराजधान्याम् अन्ताराष्ट्रिय-संस्कृत-सम्मेलनं संवृत्तमिति । सहैवानेन अस्माकं स्वातन्त्र्यस्य षड्विंशतिवर्षाण्यपि समतीतानि । अतोऽयं विचारः सर्वथा तर्कसङ्गतो भवेद् यदस्माकं भाषाशिक्षाविषयकाः प्रयासाः कियतीं प्रौढिमापन्ना इति । एतादृशस्य कीदृशस्यापि सिंहावलोकनस्य कृते संस्कृतं प्राथमिकतया प्रभवति । आधुनिक - भारतीयभाषाणां जनन्या संस्कृतेन द्राविडभाषाणां विकासोऽपि नूनं प्रभावितः । सांस्कृतिकपतनसङ्कुलेऽस्मिन् काले निर्विचिकित्सं संस्कृतमैक्यसाधिका शक्तिः सेत्स्यतीति ।

जीवितं मृतं वा ?

केऽपि वदन्ति—'किं संस्कृतं जीवितम् ?' इति । कस्या अपि जीवितभाषायाः सामान्यपरिभाषेयं यन्मानवीयेतिहासस्य युगेऽस्मिन् सा सामान्यजनैर्व्याह्रीयेतेति । यदि मातृभाषा-परिभाषाविषयको विवादो दूरे स्थाप्येत, तदापि १९५१ मितेशवीयवत्सरस्य जनगणनानुसारम् ५५५ जनैः संस्कृतं स्वीयमातृभाषा घोषिता । १९६१ मितेशवीये वर्षे जनगणनासमये संख्येयं वृद्धिमासाद्य २५४४ मिताऽभवत् । विगतदशके अस्या भाषाया रुचिवृद्ध्या बहुषु 'स्कूला'-भिधेषु आंग्लविद्यालयेषु संस्कृतस्य अधिकाधिकाध्ययनारम्भेण १९७१ मितेशवीय-जनगणनाकाले संस्कृतं मातृभाषात्वेन स्वीकुर्वतां संख्या नूनमितोऽपि भूयसी स्यात् । स्त्री-स्वातन्त्र्यसमर्थका असंशयं वृत्तेनानेन प्रमुदिता भवेयुर्यद् स्त्रियोऽद्य संस्कृतभाषाणां भाषणविषयकं कमपि प्राच्यं प्रतिबन्धं नानुमन्वते । १९६१ मितेशवीयवत्सरस्य जनगणनानुसारं गुर्जरप्रदेशे संस्कृतं मातृभाषात्वेन स्वीकुर्वतां पुरुषाणां संख्या केवलं नव आसीच्चेत् नवतिसंख्यकाभिः स्त्रीभिः सा मातृभाषात्वेन स्वीकृतेति ।

उच्यते यद् अन्ताराष्ट्रिय - सम्मेलने सोवियतसङ्घीय-विश्वविद्यालयेषु प्रशिक्षिता विद्वांसो भारतीय - गुरुकुलेषु प्रशिक्षितैः भारतीयविद्वद्भिः सह सारल्येन संस्कृते व्याहर्तुं प्राभवन् । अनेनेदं सिद्ध्यति यद् भाषेयं निखिले विश्वस्मिन् प्रियतमा । सहैवेदमपि ज्ञायते यदिदं विद्वत्सु नूनं जीविता भाषेति ।

किन्तु नैके भारतीया सखेदमत्र निर्दिशन्ति यद् बहवो हिन्दू - परिवाराः धार्मिककृत्यकाले संस्कृतसूक्त - स्तुतिगायका अपि संस्कृतं नावगच्छन्तीति । तैराशङ्क्यते यदित्थं संस्कृतज्ञानस्य पारिवारिकी परम्परा कियता कालेन विलुप्ता स्यादिति । बहुषु यावनपरिवारेषु अरबीभाषायाः, पारसीक-परिवारेषु 'अवेस्ता'-भाषायाः, ख्रिस्टपरिवारेषु च लेटिन-भाषाया अपि प्राय ईदृश्येव स्थितिः । यदा कापि भाषा नियमितप्रयोगतो बहिष्क्रियते, केवलं धार्मिककर्मकाण्डेनैव सम्बद्धा भवति तदा सा क्रमशो मृतप्राया जायते ।

हिब्रूभाषायाः पुनरुत्थानम्

शताद्ब्या अस्या भाषाविषयिणी महत्त्वपूर्णा घटना हिब्रू भाषाया पुनरुत्थानं नाम । अन्यशास्त्रीयभाषावत् (अरबराज्येषु अरबीभाषां विहाय) हिब्रू भाषा पूजाकालं यावत् सीमिताऽऽसीत् । 'ओल्ड टेस्टामेण्ट' धर्मग्रन्थे हिब्रू भाषायाः केवलं ७७०० शब्दा आसन् । किन्तु कैश्चिदत्र परिवर्तनाय दृढतापूर्वकं नैकशः प्रयतितम् । १८७९ मितेशवीये वर्षे एकस्य वृत्तपत्रस्य सम्पादकेन 'लिथूनिया'-प्रवासिना 'एलिजर वेन ये हुदा' महाभागेनोक्तं यत् "निखिले विश्वस्मिन् विशकलितेषु वर्षसहस्रद्वयानन्तरं स्वीयमातृभूमौ परावृत्तेषु यहूदिजातीयेषु ऐक्यसाधनाय हिब्रू भाषायाः उपायत्वेन नियोजनं काम्यते चेदेतस्याः

शब्दभाण्डार आधुनिक-भाषाविशेषवत् भूयान् विशालो भाव्य" इति। तैः किल स्वीयं समग्रं जीवनमस्मिन्नेव कार्ये नियोजितम्। प्राचीना नैके ग्रन्था अन्वेषिताः, गवेषिताः, हिब्रू-धातूनाञ्च नैके नवनवाः शब्दाः संसाधिताः। फलतः प्राय एकलक्षशब्दात्मकस्तस्याः शब्दकोषोऽद्य प्रस्तुतो वर्तते।

संस्कृता-ऽऽङ्गल-शब्दकोषः

पुण्यपत्तनीयेन 'डेक्कन - कांलेज'-संस्थानेन प्राय एककोटिरूप्यक-व्ययसाध्यस्य पञ्चदशाद्यविंशति - खण्डीयस्य विशालतमस्य संस्कृता-ऽऽङ्गल-शब्दकोषस्य निर्माणभार उररीकृतोऽस्ति। नूनमिदं महत्तरं महत्त्वपूर्णञ्च कार्यम्। प्रयासेनानेन असंशयं श्रेष्ठतमोऽयं सन्दर्भग्रन्थो भवेत्। किन्तु संस्कृतप्रयोगविकासः पूर्णतया कथमपि हिब्रू-समकक्षो न स्वीक्रियेत। 'इजराइल' - राष्ट्रस्य कृते यत्र तादृश्याः शक्तेरावश्यकताऽऽसीद् या एकधर्मीयेषु अनेकराष्ट्रियताभिमन्यमानेषु च ऐक्यं संसाधयेत् चेत्, भारतराष्ट्रस्य कृते इदमावश्यक यत्साधनविशेषेण अनेकमतावलम्बिषु एकराष्ट्रियताभिमन्यमानेषु च ऐक्यसूत्रमाबद्धं स्यादिति। विभिन्नदेशागतेभ्यो यहूदिजनेभ्यो हिब्रूपाठनस्य प्रकारोऽपि संस्कृतक्षेत्रे केवलं सीमितोपयोग एव।

साम्प्रतिकं संस्कृतपाठनम्

अत्रान्तरे संस्कृतपाठनस्य प्रयासोऽतितरां विस्तृतः सञ्जातः। भूयसा ते प्रयासा अत्यन्तं प्रशंसनीया अपि। बिहारप्रदेशीयेन एकेन विदुषा मध्यप्रदेशे प्रायः २५ संस्कृतपाठशालाः प्रस्थापिताः। स हि विद्वान् यावज्जीवमविवाहित एव, यतः समग्रं जीवनं संस्कृतप्रचार-प्रसारे नियोजितं स्यादिति। अन्यो विद्वान् बम्बईनगरे एकं 'किण्डर'-गार्डन-स्कूल'परपर्यायां बालपाठशालां परिचालयति यत्र शिक्षाया माध्यमं संस्कृतं वर्तते। विषयेऽत्र व्यक्तिगतरूपेण शासकीयरूपेण च नैके प्रयासाः संवृत्ताः।

नवीनतमः प्रयासो नाम—राष्ट्रिय-संस्कृत संस्थानद्वारा एकस्य पत्राचार-पाठ्यक्रमस्य आरम्भः। संस्थानमिदं शिक्षामन्त्रालयान्तर्गतमचिरादेव सङ्घटितं मण्डलमेकम्। प्रयोगस्यास्य वैशिष्ट्यमेतद् यत्परियोजनाया अस्याः सर्वोऽपि भारो डाक्टर मुहम्मद के० दुर्रानो महाभागेभ्यः प्रदत्तो वर्तते। तैर्हि संस्कृतसेवामार्गे संभाव्यमानानां सर्वासामापदां विजयस्य सङ्कल्प एव गृहीतः।

इत्थं तेषां बालकेभ्योऽपि पर्याप्तोऽवसरः समुपलब्धो ये किल धार्मिकैः पारम्परीणैश्च हेतुभिः संस्कृते रुचिं बिभ्रति। किन्तु यदि संस्कृतं लोकप्रियं विधातुं कामयेत, तदेव चास्माकं समुद्दिष्टं तदा साम्प्रतिकैरेभिः उपायैः केवलं स्वल्पीयसी एव सफलता हस्तगता स्यादित्यपि अनायत्या वक्तव्यं भवति।

यदि वयं संस्कृतं राष्ट्रभाषापदेऽभिषेक्तुं वाञ्छामश्चेत् नितान्तं स्पष्टं यदस्माभिः तत् सर्वथा धर्मनिरपेक्षदृशैव पाठनीयम्। ज्ञायते यत् अन्ताराष्ट्रिय - सम्मेलने प्रस्तुते राष्ट्रिय - संस्कृत - पुस्तकालय - स्थापनप्रस्तावे शिक्षामन्त्रालयः सुगभीरं विचारयन्नास्ते। सहैवानेन धर्मनिरपेक्षसंस्कृतसाहित्यस्य भारतीयभाषासु आङ्गलभाषायाञ्च अनुवादस्य सङ्घटितः प्रयासो भाव्यः। विशेषज्ञैः एतेषां पाठ्यपुस्तकरूपेण उपयोगिताया मूल्याङ्कनमपि कर्तुं शक्यते।

इतोऽतिरिक्तः प्रमुखः प्रश्नो नाम विभिन्नस्तरेषु संस्कृतस्य स्थानम्, प्रत्येकस्मिन् स्तरे तत्पाठनाय प्रयुक्तश्च उपायः कः? इति। वैकल्पिकाऽऽर्थिकनीतीनां सिंहावलोकनं न किमपि नवीनं वस्तु। वर्तमानस्य प्राणवतो विचारविमर्शस्य विषये महत्त्वपूर्णं तथ्यमिदं यदिदं सिंहावलोकनं सामाजिकदृष्ट्या विहितमास्ते। तस्मिन् मानवो मानवीयं जीवनञ्च यन्त्रेभ्यो व्यवसायेभ्यश्च श्रेष्ठतरं मतम्। तेन माध्यमिकशिक्षाभूमिकाया अपि सिंहावलोकनस्य प्रेरणा स्यात्। स्तरेऽस्मिन् भाषाशिक्षा विशेषमहत्त्वाधायिका। सा हि तादृशीं नीतिमपेक्षते ययाऽस्मासु स्वीयभाषया अभिव्यक्तेः शक्तिर्विकसिता स्यात्।

अस्माकं नव्यपद्धतौ माध्यमिकविद्यालयेषु अस्माकं पाठ्यक्रमे जीवनस्य विभिन्नपक्षैः सम्बद्धानां पाठ्यपुस्त-

कानामनुवादा अपि सङ्ग्राह्याः । आधुनिकविचारेभ्यस्तुलनाया इदमुद्दिष्टं यदित्थं छात्रा विचाराय विश्लेषणाय च प्रेरिता भवेयुः । ते पाठ्यपुस्तकानां कण्ठस्थीकरणे एव न प्रवर्तयेयुः । यतो हि तेन परीक्षोत्तरं सर्वं पठितं विस्मृतौ विलीयते ।

महाराष्ट्रस्य दिशा-निर्देशः

यदा दिल्लीनगरे विभिन्नराज्यीय-विश्वविद्यालयानां भाषाविदो विशेषवैज्ञानिकाधारेण भाषाशिक्षाविचाराय सङ्घट्टितास्तदा महाराष्ट्रराज्येन सर्वथा नवीनतमायाः निर्भीकाया व्यावहारिक-भाषाशिक्षायाः कार्यक्रमो घोषितः । तत्र नवीनभाषानुसारं शिक्षानीत्यनुसारं वा एस० एस० सी० स्तरे भाषात्रयस्य अध्ययनमनिवार्यं यासु भाषाद्वयम्–आंग्लभाषा शिक्षाया माध्यमस्य च भाषा । अस्य महत्त्वमेतद् यत् तृतीयवैकल्पिकभाषारूपेण छात्रा नैका भाषा अवगच्छन्तीति—

अनिवार्यं भाषाद्वयम्

मराठी—अंग्रेजी, हिन्दी ।
हिन्दी—अंग्रेजी, मराठी ।
गुजराती—अंग्रेजी, हिन्दी वा उर्दू ।
अंग्रेजी – हिन्दी, मराठी, आधुनिक-भारतीयभाषा, यूरोपीय प्राचीन भाषा ।

तृतीयभाषायै विकल्पः

हिन्दी—संस्कृत (संयुक्त - प्रश्नपत्रम्) आधुनिक-भारतीय-भाषाः, यूरोपीयभाषाः, प्राच्यभाषाः ।
हिन्दी—मराठी (संयुक्त-प्रश्नपत्रम्)

विश्वविद्यालयेषु संस्कृतम्

संस्कृतस्य वास्तविकी शक्तिः किल विद्वत्सु विचाराणामादान-प्रदानेस्य तस्या माध्यमत्वे निहिता । यदा किल भाषेयं प्रयुज्यते स्म, तदापि तस्या लोकभाषारूपताविषये प्रमाणं सुदुर्लभमेव । सा हि सार्वभौमलोकप्रियतावाप्तये अतितरामुपयुक्ता । सङ्गीतस्यापि इयमेव स्थितिः । शास्त्रीयसङ्गीतमपि केवलं कतिपयेष्वेव लोकेषु प्रियम् । कामं तस्य कियानपि विकासः स्यात्, तथापि तत् केवलमल्पसङ्ख्यकानामेव वस्तु मन्येत ।

यदि संस्कृतप्रणयिनोऽत्र अवधास्यन्ति चेत् सहजतस्ते स्वीकुर्युर्यद् अधिकाधिकजनानां संस्कृतज्ञकरणापेक्षया संस्कृतज्ञानस्य प्रौढ्या वर्धनमेव समधिकं तर्कसङ्गतं प्रतीयत इति । जनभाषाः किल परिवर्तनशीलाः । ता हि विचाराणामादान-प्रदानस्य आवश्यकता-प्रपूर्तये क्षिप्रं स्वयमेव परिवर्तन्ते । यदा काचन भाषा लोकेषु बलात् स्थाप्यते तदा सा केवलं गौणभाषाया एव पदमासादयितुं प्रभवति । इजराइलदेशेऽपि आव्रजकाः स्वीयमूलभाषयैव व्याहरन्ते । शासकीयकार्येषु गृहाद् बहिश्च हिब्रू भाषाया अधिकाधिकः प्रचारः क्रियते ।

राष्ट्रियैकतायाः प्रयासस्य समुचितं स्थानं विश्वविद्यालय एव । अस्माकं राष्ट्रियजीवने यद्धि विभाजकं तत्त्वं वर्तते तत्किल भाषा धर्मश्च । विभिन्नभाषाणां ज्ञानेन एकताया भावना समुत्पादयितुं शक्या, यतो हि सहनशीलता पारस्परिकसमादरश्च शिक्षितमतेरभिज्ञानम् ।

भाषाविज्ञानस्य शिक्षा

अस्माकं देशे भारतीयभाषाणां तुलनात्मकाध्ययने भरं दत्त्वा भाषाविज्ञानस्य शिक्षा विश्वविद्यालयशिक्षायाः कृतेऽतितरामावश्यकी । अनिवार्यविषयरूपेणापि भाषाविज्ञानमिदं पाठयितुं शक्यते । महाविद्यालये प्रविविक्षुभ्यो विषयोऽयं वर्षमेकं यावत् पाठनीयः । कलासङ्काय - सम्बद्धविषयाध्यापने पुनरयं वर्षद्वयं यावत् पाठनीयः । शिक्षाशास्त्रिणोऽनेन नूनं विस्मिताः स्युर्यत् मानसिकविकासे बाधकानां कक्षाभ्यो बहिर्निरुपयोगिनाञ्च विषयाणां पाठनापेक्षया छात्रा भाषाविज्ञानविषयमतितरां स्पृहयन्तीति ।

यदि संस्कृतं विश्वविद्यालय-कार्यक्रमस्य अभिन्नाङ्गरूपेण पाठयेत तदाऽस्माकं देशे एकताभावनाविस्तारे तदत्यन्तं सहायकं भवेत् । शिक्षया सह भाषाविज्ञानपाठनेन सुस्पष्टं स्याद्यदियं भूयसीनां भारतीयभाषाणां जननी

(शेषांशः २८१ पृष्ठे)

व्यावहारिक-वेदान्तगङ्गाया रामतीर्थम् !

—— श्री गोविन्द नरहरि वैजापुरकरः ——

[विगते नवम्बरमासि श्री स्वामि रामतीर्थपादानां जन्मशताब्दि-महोत्सवो देशे महता समारोहेण समायोजितोऽभवत्। वयमपि वेदान्तावताराणां तेषां चरणयोः श्रद्धाञ्जलिं समर्पयन्तो महानुभावानां तेषां गुणवर्णन-विषये निबन्धममुं प्रकाशयामः।—सम्पादकः]

उच्यते यद् वेदान्तो हि दृश्यमानजगतः परतरो विषयः। जगति न तस्य कोऽप्युपयोगः। प्रत्युत तदनुसरणेन जागतिका व्यवहाराः सर्वथा विशृङ्खलिता विलुप्ताश्च जायन्ते। सर्वस्याप्येकत्वे विद्वन्मूर्खयोः सङ्कर एव स्यात्। ब्रह्मातिरिक्तस्य सर्वस्य असत्त्वे जायमाना हिंसाऽपि असत्यैवेति मुधा तद्वर्जनोपदेशः। सर्वेषां धनानां ब्रह्मात्मैकत्वरूपत्वे कस्यापि धनापहरणं न परस्वापहरणम्, ब्रह्मण एव ग्रहणमिति बालिशचेष्टितमेव स्तेनस्य कारागारनिरोधनं स्यादित्यादिकं बहव आपातदर्शिनो मन्यन्ते। परं विचारशीलाः पुनरेतेषां तादृशान् उद्गारान् कुतर्करूपानेव अभिजानन्ति। यतो हि वेदान्त एव 'स्थूलारुन्धती'-न्यायादिकं पुरस्कृत्य सुस्पष्टं सूचयति यत् 'असत्ये वर्त्मनि स्थित्वा ततः सत्यं प्रवर्तते' इति।

वेदान्तदर्शनस्य सारभूतः सिद्धान्तो 'ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः' इति सर्वथा त्रिकालाबाधित एव। नात्र मनाक् द्वापरावसरः। त्रिकालाबाधितमेकमद्वितीयं तत्त्वं ब्रह्मैव। तदेवैकं सच्चिदानन्द-मनन्त-मखण्डं शाश्वतं पूर्णतमञ्च। नहि जगति द्वितीयः पूर्णः कश्चिद् भवितुमर्हति सर्वांशतो नाम। यदि कश्चित्तथा स्यात् पूर्णस्य पूर्णत्वमेव व्याहन्येत। एकदा एकत्र पूर्णद्वयस्य सत्त्वं सर्वथाऽसम्भवि। अतो ब्रह्मात्मैकत्वं गले पतति। कामं ब्रह्मणः स्थाने शर्मणोऽद्वितीयतत्त्वत्वं स्वीकुर्वन्तु, नाम्नि न कोऽप्यस्माकं विवादः। नाम-रूपे परित्यज्यैव विशुद्धा सच्चिदानन्दरूपताऽवतिष्ठते। चरमस्य सच्चिदानन्दस्य विशुद्धे ऐक्ये एवास्माकमादरात्।

एवञ्च वेदान्तदृशा ब्रह्मतत्त्वस्य ऐक्येऽपि कल्पितजगतः कल्पितत्वसाधनाय अवस्थात्रयम् (पारमार्थिकी, प्रातिभासिकी, व्यावहारिकी चावस्थाः) इष्यत एव। तदनुसारं व्यवहार-मर्यादा-नियमादीनां निराबाधा प्रसृतिः, तस्या अनुपेक्ष्यत्वञ्च निराबाधम्। देश-काल-व्यक्तिविशेषविशेषितायां व्यवहारभूमौ तेषामनादरस्तदवस्थाया विलयायैव कल्पेत।

सत्यप्येवं कल्पितरूपाया अस्या व्यवहारावस्थाया अलीकत्वमपोह्य व्यवहारयोग्यताधानायापि कस्यचन शाश्वततत्त्वस्य कियानांशिकः संक्रमोऽनिवार्य एव। दृश्यते जगति व्यवहारे अत्यासक्त्यादिकृता नैकेऽनपेक्षिताः प्रसङ्गाः। तेषां निरोधाय जीवने वेदान्तसंक्रमोऽत्यावश्यकत्वं भजते। अत एवास्माकं पूर्वपूर्वतना आचार्या महात्मानश्च स्व-स्वोपदेशेषु व्यवहारोपयोगिष्वपि वेदान्तार्थविचारसंयोजनं कुर्वन्तो दरीदृश्यन्ते। तदैव तेषां वेदान्तो व्यावहारिकत्वं भजते। यस्मिन् यादृशी कुशलता जगतश्च यादृशं वेदान्तानुसरणादृष्टम्, महात्मभिस्तत् तथैव परिणम्यते।

एतादृशेषु महात्मसु विगतशतवार्षिकेषु प्रातःस्मरणीयाः स्वनामधन्याः स्वामि रामतीर्थपादा नूनं

शिरःशेखरायिताः। स्वीये स्वल्पतमे जीवने तैर्यावान् वेदान्तो व्यवहारपथं समानीतस्तावान् नाद्यावधि केनापीति तेषां समग्रवाङ्मय-सागरोन्मज्जनेन स्फुटीभवति। तेषामयं प्रयासः किल 'कृत्वा उपदेष्टव्यम्' इत्यस्य सुस्पष्टं निदर्शनम्। बाल्यत एव वेदान्तस्तेषां जीवनसखा समभवत्। अन्तर्बाह्यं ते मूर्तिमन्ता वेदान्ता एवासन्। अत एव वेदान्तस्य व्यावहारिकतापरिणमनरूपमसाधारणं दिव्यं दर्शयितुं ते प्राभवन्। तदर्थं प्रयतमानैस्तैरिदमपि दर्शितं यद् व्यवहारे वेदान्तसमन्वयेन न जातु शुष्कता समायाति। प्रत्युत प्रकृतेः सहजसिद्धस्य दिव्यरूपस्य दर्शनमपि दृशोर्विषयतां गच्छति। एकत्र ते लिखन्ति–

"धरायां विस्तृतोऽयं शाद्वलो मन्ये, 'मखमला'-ख्यस्य बहुमूल्यस्य वस्त्रस्य आस्तरणमेव। 'सरु-सफेदा'-प्रभृतयो दीर्घतरा वृक्षाः किल सद्यःस्नाताः दिवाकरं ध्यायन्तः एकेन पादेन स्थिता मन्ये, सन्ध्योपासने मग्नाः। गगनस्य नीलिमा-श्वैत्ययोः विस्मयावहः समागमः। भेका वर्षामङ्गलमाचरन्ति। सर्वत्र प्रमोदवाद्यानां मङ्गलध्वनिः श्रूयते। ध्रुवं नभोभूभ्योः पाणिग्रहणस्यायं सर्वोऽपि संभारो ययोरपत्यभूतौ कार्तिक-मार्गशीर्षाख्यौ सत्त्वमयौ मासौ प्रभवेताम्। शोभनेऽस्मिन् काले भवन्तो (गुरुवर्याः) मुहुर्मुहुर्मे स्मृतिपथं समायान्ति" इति।

प्रकृतेरिदं रूपं सर्वमिदं व्यावहारिकं जगत् स्वामि रामेण कथङ्कारं व्यावहारिकेण वेदान्तेन समाच्छादितं तत् तदीयैरेव निम्नलिखितोद्गारैः स्फुटीभवति—

"मनोमानसं सुधया नितरां परिपूरितम्। आनन्दस्रोतोवहा पुनर्हृदयात् प्रवहति। प्रतिरोम कृतकृत्यं जायते। विष्णोरन्तरे सत्त्वमेतावत् परिपूरितं यत्प्रतिक्रियया परीवहति।"

"बहिर्यत्र पश्यामि, प्रतिपरमाणुतो मङ्गलध्वनिगुंञ्जितः श्रूयते—'तत्त्वमसि, तत्त्वमसि'। अन्तश्च ध्यायामि चेत् 'अहं ब्रह्मास्मि, अहं ब्रह्मास्मि' इति मार्दङ्गिको ध्वनिरन्यत्सर्वं तिरोदधाति।"

नूनं व्यावहारिके जीवने प्रतिफलितमेतादृशं सच्चिदानन्दस्य सान्निध्यं 'तीर्थरामं' यथार्थतो रामस्य पावनं व्यावहारिकं तीर्थमेव विदधाति। तदीयवाक्सरितोऽखण्डे प्रवाहे निमज्जमानः कोऽपि मानवो व्यवहारक्षेत्रेऽपि सच्चिदानन्दस्य शाश्वतं सुखमुपभुञ्जानो जीवनं सार्थकयति। तदर्थमेव रामगङ्गाप्रवाहमयो 'राम-शताब्दि-स्मृति'-ग्रन्थः 'सत्साहित्य प्रकाशन ट्रस्ट' संस्थानेनाचिरात् प्रकाशितः।

(२७९ पृष्ठस्य शेषांशः)

वर्तंत इति। विषयोऽयमाधुनिक-भारतीयभाषाभिः तादृशं सम्बन्धं बध्नातुं प्रभवति, येन परम्परागतभाषाध्ययनं स्पर्धितुं न प्रभवेत्। परम्परागतप्रकारस्य लक्ष्यं भाषाया अवबोधयोग्या व्याख्या। आधुनिकप्रकारस्य पुनरिदमपि लक्ष्यं यत् पूर्णविश्लेषणं विधीयताम्। वयमेतत् तदेव सुस्पष्टमवगन्तुं शक्नुमो यत् कतिपयभारतीयभाषाः परस्परं कियन्त्यो भिन्नाः। यथा—तमिल, मराठी, उर्दू, बंगला भाषा चेति।

(२७२ पृष्ठस्य शेषांशः)

बिभ्रते हारिणीं छायां चन्द्राय च शिवाय च।
नभोगरुचये तस्मै नमस्कारं चकार सा॥
नित्यमुद्वहते तुभ्यमन्तः सारङ्गरञ्जितम्।
भूतिपाण्डुर गोवाह सोमस्वामिन्नमो नमः॥
(नल. उ. २, श्लो॰. ३१—३३)

इत्येवम्प्रकारेण शङ्करप्रार्थनां कृत्वा "न भोगरुचये' इत्यनेन निष्फलेन शृङ्गारेण उद्विग्ना सती सा अध्यात्मं शरणं गता।

२. एवं रात्रिन्दिवमनपत्यदुःखदुःखिता, तुषारपातेन ग्लपिता कमलिनीव, कृताहर्निश-पशुपतिपूजा सा प्रियङ्गुमञ्जरी, राक्षसपरीतां मैथिलीं हनुमान् इव, शुभसूचके आगते प्रातःकाले चन्द्रमण्डलादवतीर्य "प्रिये प्रियङ्गुमञ्जरि मञ्जरीमिमां गृहाण। मा भैषीः। प्रत्युषसि मन्नियोगाद्दमनकनामा महामुनिरेष्यति। स तेऽनुग्रहं करिष्यति" इत्यभिधाय स्वश्रवणशिखरान्तराद् अमन्दमकरन्दस्यन्द-सुन्दरामोद-माद्यन्मधुकररव-रमणीयां पारिजातमञ्जरीं ददतं, सकल-सुरासुरशिरःशेखरीकृतचरणकमलं, चन्द्र-अहि-कपाल-भस्मभूषितं, भवानीसहितं शङ्करं स्वप्नेऽद्राक्षीत्। प्रसादरूपां पारिजातमञ्जरीं च गृहीत्वा स्तुतिं कृतवती—

तुभ्यं नमो नमल्लोकशोकसन्तापहारिणे।
व्यर्थीकृतान्धकारातिदम्भारम्भाय शम्भवे॥
विभो विभूतिसम्पन्न पन्नगेन्द्रविभूषण।
नमो नमोघसङ्कल्प! तुभ्यमभ्यन्तरात्मने॥
(नलचम्पू उ० श्लो. १-२)

एवं प्रियङ्गुमञ्जर्या स्वप्नेऽपि "व्यर्थीकृतान्धकाराति" इति पदेन व्यर्थीकृतस्वानपत्यरूपान्धकारातिशय इति मत्त्वा, तथा "नमोघसङ्कल्प" इत्येवं शङ्करं दृढीकृताऽमोघसङ्कल्पभावया तया "शोकसन्तापहारी"त्यनेन स्वपुत्राभावरूपं सन्तापं दूरीकर्तुं शङ्करस्य स्तुतिं कारयित्वा कविरध्यात्मस्य परां कोटिमधिरोहतीति नास्ति सन्देहः।

३. समस्त-मुनि-मनुज-वृन्दारकवृन्दवन्दनीयपादारविन्दानाम् परमानन्दपरिस्पन्दभाजाम्, ऋषिकुलभूषणायमानानां, हारायमाणानां पृथिव्याः, पांसूनिव पार्थिवान्, तृणमिव स्त्रैणम्, निधनमिव धनं, रोगानिव भोगान्, राजयक्ष्माणमिव लक्ष्मीमाकलय्य, प्रियङ्गुमञ्जर्याः मनोरथस्वरूपाणां दमनकनाम्नामृषीणां कल्पनया साक्षाच्छरीरधारिणोऽध्यात्मस्यैव आवतरणमकारि कविना।

तथा नलस्य राज्याभिषेकसमये स्वयमेव कुतोऽप्यवतीर्णानां सकलसागरसरित्तीर्थाम्बुपूर्ण-कमण्डलु-मृत्कुसुमौषधि-रुद्धपाणीनां, दर्शनादेव अपनीतसमस्तकलिकल्मषाणां; ब्रह्मर्षीणामवतरणमपि ख्यापयत्यस्य काव्यस्याध्यात्मिकताम्।

तस्य तु समयस्याध्यात्मिकताविषये, किं नु वर्णनीयं यस्मिन् समये दिशः प्रसन्नाः जाताः, ववौ वायुः सुरभितः, देवैः सुरपुष्पवृष्टिः कृता, अनाहतैरपि दुन्दुभिभिर्ध्वनिः कृतः। यथा—

दिशः प्रसेदुः सुरभिर्ववौ मरु-
द्दिवो निपेतुः सुरपुष्पवृष्टयः।
कृताभिषेकस्य नलस्य निःस्वना-
ननाहता दुन्दुभयोऽपि चक्रिरे॥

अनन्तरञ्च आकाशेऽदृश्यमानया दिव्यवाचा हरिहरवराहाणां स्तुतिपरकेण आशीर्वादात्मकेन श्लोकद्वयेन कृतेन आध्यात्मिकोपदेशेन कं नोत्सुकयति कविरध्यात्मवादं प्रति।

४. एवं नलः विदर्भनगरीं प्रति गमनोत्कः लोकपालानां दौत्यमङ्गीकृत्य विशृङ्खलिताशाकुसुममालः "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन" इति श्रीभगवद्गीतायां श्रीकृष्णोक्तिं मनसि कृत्वा स्वकीयदौत्यकार्यसिद्धय एव पञ्चोपचारैः सकलसुरासुरगुरुम् अखिलरसाधिष्ठानमम्बिकापतिमभ्यर्च्य,

शृङ्गार-सप्तशती : देवगिरा गुम्फिता ‘बिहारी-सतसई’

-- श्री कविवरः परमानन्दः --

[१९७२ ईशवीय जनवरीमासाङ्कतोऽनुवृत्तम्]

१८२. मुग्ध-स्निग्धतया
परमलावण्येन विभासि ।
असंपक्व इव सूरणः
स्वमुखे रसं ददाति ॥

१८३. किं पश्यसि खरतरदृशा
वदने लसति तवैव ।
नागवल्लीरस इयं
कुण्डलमणि - प्रभैव ॥

१८२. लाल सलौने अरु अहे
अतिसनेह सौ पागि ।
तनक कचाई देत कहि
सूरन लौ मुख लागि ॥

१८३. तेह तरेरे त्यौर करि
कत करियतु द्रग लोल ।
लीक नहीं यह पीक की
श्रुतिमनि झलक कपोल ॥

तत्प्रियस्य सकलचराचरपालकस्य सत्त्वगुणाधिष्ठातृत्वेन उचितानुचित - कृत्याकृत्य - विचारणक्षमस्य लक्ष्मीपतेः भगवतो नारायणस्य—

जयत्युदधिनिर्गतस्मरविलोललक्ष्मीलसद्-
विलासरसमन्थरस्फुटकटाक्षलक्ष्मीकृतः ।
(उ० ६, श्लो. ४ नल०)

इत्यनेन स्वमुद्दिश्य स्मरविलोलायाः दमयन्त्याः प्रदायकत्वेन तथा “सुरारिवधनाटकप्रथमसूत्रधारो हरिः” (उ० ६ श्लो. ४) इत्यनेन सुरा एव स्वाभीष्टनिवारकत्वेन अरयः तेषां वधः = अनुसृतानुचितमार्गापनयनमेव नाटकम् तस्य सूत्रधारत्वेन; “सहेलहतदानव”[1] इत्यनेन लोकपालानां दमयन्तीप्राप्तिनिवारकत्वेन; “मधुसीकरस्नपितपादपीठः”[1] इति कृपासागरतया आर्द्रहृदयत्वेनावश्यमेव स्वमनोरथसिद्धिकारकत्वेन; “भवभयापहारी”[2] इति दमयन्त्यप्राप्तिरूपभयापहारित्वेन; “सकललोकैकनाथः”[3] इत्यनेन असहायस्य मम त्वमेव शरणमिति; “सकललोकशोकान्तकृत्”[4] इत्यनेन स्वचिन्तापहारकत्वेन इत्यादिरूपेण; अष्टाभिः श्लोकैः यां स्तुतिं कृतवान् तया काव्यमिदमध्यात्मप्रधानेषु ग्रन्थेषु विशिष्टं स्थानं प्राप्नोति । प्रत्युच्छ्वासान्ते च हरचरणसरोजाङ्कत्वेन उद्धूयाध्यात्मध्वजं काव्यप्रयोजनं चरितार्थीकुर्वन् भौतिकवादघर्मसन्तप्तानां सकलसहृदयानां छायाप्रदानं करोति ।

—‘सङ्गमनी’तः सादरम्

---

[1] अहीनां मालिकां बिभ्रत्तया पीताम्बरं वपुः ।
हरो हरिश्च भूपेन्द्र ! करोतु तव मङ्गलम् ।
—नलचम्पू. (उ. ४, श्लो. २९.३०) ।

[1] उ. ६, श्लो. ५ ।

[2] उ. ६, श्लो. ६ ।

[3] उ. ६, श्लो. ७ ।

[4] उ. ६, श्लो. १० ।

१८४. अपरवासवसते उरः
कलुषीकृतं तथापि।
त्वामवलोक्य सलज्जितं
लज्जा भवति ममापि॥
१८५. न त्रपितव्यमतः परं
त्वया निरपराधेन।
बहुशिक्षितमपि चक्षुयुग-
मनुगच्छति चपलेन॥
१८६. प्रेम विना विहरसि रसिक
रसमपि बुद्ध्यसि नैव।
हितं करोषि नवं नवं
किं लज्जसे मुधैव॥
१८७. रमिता हेमलता नु किं
मिलसि मल्लिकामेव।
नयनयुगं चम्पकरुचा
तयाऽरुणित - मिदमेव॥
१८८. शीततूंचित - मज्जना-
ऽजिरमिव हृदयमतापि।
खिन्नवदन - तापत्रयै-
रागच्छसि तदथापि॥
१८९. नयनयुगं नूतनतरं
प्रिय! विलसत्यधुनैव।
अन्तर्गत - मन्तर्हितं
प्रथयति चपलतयैव॥
१९०. प्रतिकुञ्जं प्रतिमन्दिरं
विहरसि विहर तथैव।
प्रभवति सर्वजनस्य हि
प्रकृतिः प्रीतिमितैव॥
१९१. तव गुणगणबीजैरलं
कपट - तपन - किरणेन।
पक्वं दाडिममिव मनः
किं न ददार बलेन॥

१८४. अनत बसे रिसकी मिसन
उर दरि रही विशेष।
तऊ लाज आयी झुकति
खरे लजौ है देखि॥
१८५. कत सकुचत निधरक फिरौ
रतियौ खोरि तुम्हैन।
कहा करौ जो जाइये
लगे लगौ हे नैन॥
१८६. फिरत जु अटकत कट निविन
रसिक सुरस नहिं ख्याल।
अनत अनत नित निहित
निचित सकुचत कत लाल॥
१८७. कत लपटै यतु मौगरै
सौनजुही निसि सैन।
जिहि चंपक बरनी किये
गुल्लाला रंग नैन॥
१८८. मैं त्रपाइ त्रैताप सौं
राख्यौ हियौ हिमाम।
मति कबहुक आवै इहाँ
पुलकि पसीजे स्याम॥
१८९. आजु कछुक औरै भये
छये नये ठिक ठैन।
चित के हित के चुगल ये
नित के होइन नैन॥
१९०. सदन सदन के सदन की
सदन छुटै हरिराय।
रुचै तितै बिहरत फिरौ
कत बिहरत इत आइ॥
१९२. सुभर भर्यौ तुव गुनगननि
पचयौ कपट कुचाल।
क्यौं धौं दार्यौ लौ हियौ
दरकत नाहिन लाल॥ (क्रमशः)

सूर्योदयः

भारतीय-संस्कृतेः प्रातिनिधिकं संस्कृतं मासिक-पत्रम्

सम्पादकः
श्री गोविन्द नरहरि वैजापुरकरः
एम० ए०, न्याय-वेदान्त-साहित्याचार्यः

वार्षिकमूल्यम्
रूप्यकपञ्चकम्

प्रकाशकः
श्री भारतधर्म-महामण्डलम्
जगत्गंज, वाराणसी

एकोनपञ्चाशद्वर्षीया लेख-सूची : १९७३

[अत्र प्रथमं ससङ्केतं लेखक-नाम, तदनु लेखनाम, पृष्ठसंख्या चेति क्रमोऽवसेयः ।—सम्पादकः]

सम्पादकीयम् (अग्रलेखः)—अस्माकम् एकोनपञ्चाशत्तमं वर्षम् ३, साकेते प्रादेशिक-संस्कृत-विद्यालयाध्यापकानां सम्मेलनम् ४, संस्कृत-समुद्धरणं स्वात्मोद्धार एव २७, विश्व-जीवन-व्यवस्था संस्कृतञ्च ५१, ब्रह्मलीनाः श्री श्रीधरस्वामिपादाः ७५, संस्कृतोन्नयनमेव नेपाल-राष्ट्रसमुन्नयन-बीजम् ९९, हिन्दूधर्म-संरक्षणसत्रं चिरं विजयतेतराम् १२३, विश्वविद्यालयीयस्य अध्यादेशस्य समीक्षा १४७, स्वतन्त्रता-दिवसीयम् आत्मसमीक्षणम् १७१, उत्तरप्रदेशे संस्कृतं सङ्कटग्रस्तम् १९५, साम्प्रतिक-दुरवस्थाया निदानं धर्मशिक्षाभावः २२१, नव्यं प्रदेश-मन्त्रिमण्डलं संस्कृतं संस्कृताध्यापकाश्च २४३, साम्प्रतिकी राष्ट्रियस्थितिः, अस्माकं कर्तव्यञ्च २६५ ।

सम्पादकीया टिप्पणी—देवेन्द्रपदं गताश्चक्रवर्तिनः, ५, पूर्णचन्द्रो विलुप्तः ६, राष्ट्रपुरुषाय अयं श्रद्धाञ्जलिः १२५, कालाय तस्मै नमः १२६, ब्रह्मलीनाः श्री कृष्णबोधाश्रम स्वामिनः १९६ ।

श्री 'अङ्गारः' ३०/४० घासीटोला, वाराणसी—प्राचीन-संस्कृतकवीनां वसन्त-विलासः ६९, काञ्ची कामकोटि-शङ्कराचार्याणां दक्षिणोत्तर-पदयात्रा १२७, वाराणसेय-संस्कृत-विश्वविद्यालयस्य कृते पृथक् अध्यादेशावश्यकता १५० ।

श्री (डॉ०) डी० अर्कसोमयाजी, मद्रास—धन्येयं भरतावनिः । (७ अङ्कस्य आवरण-प्रथमपृष्ठे) ।

श्री अशोकचन्द्र शास्त्री, शोधच्छात्रः वाराणसेय-संस्कृत - विश्वविद्यालयः, वाराणसी—राष्ट्रियजीवने संस्कृतभाषाया महत्त्वम् १९ वायुछत्रिका-कूर्दन-प्रशिक्षणं रोमहर्षकास्तदनुभवाश्च २१५, २२७ ।

श्री (स्व०) ईशदत्त पाण्डेयः 'श्रीशः'—भूयो निनादय, निनादय वाणि ! वीणाम् २५ ।

श्री उमाशङ्करशर्मा आंग्लभाषा - प्राध्यापकः, काशी-विद्यापीठम्, वाराणसी—गीतम् २०५, मधुकर ते दिवसा विगताः (११ अङ्कस्य आवरण-प्रथमपृष्ठे) ।

श्री (डॉ०) कपिलदेव ब्रह्मचारी, जतनबर, वाराणसी—भक्तेः नवरसातिरिक्तत्वे युक्तयः ५२ ।

श्री (पूज्य) करपात्रस्वामिनः, वाराणसी—किं साकारो निराकारोपासनायाः आधारः सम्भवी ? २०१ ।

श्री (महाकविः) कर्णपूरः—मुरलिका-रवः १४५ ।

12603

श्री (स्व०) कालीपद तर्काचार्याः—उदिता शारद-शोभा भुवने! (९ अङ्कस्य आवरण-प्रथमपृष्ठे), मुरली-रवः (१० अङ्कस्य आवरण-प्रथमपृष्ठे)।

श्री (वेद-दर्शनाचार्याः महामण्डलेश्वराः) गङ्गेश्वरानन्द स्वामिपादाः, श्रौतमुनि-निवासः, वृन्दावनम्-संस्कृतभाषया विश्वस्मै किं किं न प्रदत्तम्? ३३।

श्री गोपालशास्त्री दर्शनकेसरी, रथयात्रा-चौमुहानी, सिगरा, वाराणसी—श्री ज्ञानानन्द-चरित-प्रशंसनम् २०८।

श्री गोविन्द नरहरि वैजापुरकरः, एम. ए. न्याय-वेदान्त-साहित्याचार्यः, साहित्य-विभागाध्यक्षः स्याद्वाद-महाविद्यालयस्य, ३०/४० घासीटोला. वाराणसी—भगवान् श्रीकृष्णः यत्र षोडशकलाः सर्वांशतो विकसिताः १८५, लुप्यमानाः शतशः संस्कृतपाठशालाः संरक्ष्याः १९७, व्यावहारिक-वेदान्तगङ्गाया रामतीर्थम् २८०।

श्री गोविन्दगोपाल मुखोपाध्यायः, कलकत्ता—आदिकविर्वाल्मीकिः भक्तकविस्तुलसीदासश्च २५७।

श्री चन्द्रदेवरायः, प्राध्यापकः, एच. डी. जैनकालेज, आरा (बिहार)—कालिदास-काव्येषु कुलपतयः १८८।

श्री चन्द्रशेखरशर्मा हिरेमठ, जङ्गममठ, रेवडी-तालाब, वाराणसी—७०।

श्री (पण्डितराजाः) जगन्नाथपादाः—तनोतु मम शं तनोः सपदि शन्तनोरङ्गना ९७।

श्री जगन्नाथ श्रीधरशास्त्री पदे, मङ्गलपेठ, लहरीपुरा, बड़ौदा—वैदिका-ऽवैदिक-दर्शन-मीमांसाया उपसंहारः २०७, २२५।

श्री (महाकविः) जयदेवः—विहरति हरिरिह सरस-वसन्ते (२ अङ्कस्य आवरण-प्रथमपृष्ठे)।

श्री जयशङ्कर बहेचरलाल शुक्लः, कर्मकाण्डाध्यापकः, म० स० मु० संस्कृत-कालेज, बडौदा—वेदेषु गृहस्थाश्रमः १७५, बाल-रामायणम् २३२।

श्री जीव न्यायतीर्थाः, भाटपाडा, २४ परगना, प० बंगाल—स्वर्गीयाः म. म. कालीपद तर्काचार्याः ६६, भारतस्य भावगता संहतिः संस्कृतञ्च २५९।

श्री त्रिलोकीनाथ द्विवेदी, प्रयाग नलचम्प्वा आध्यात्मिक-तत्त्वम् २७०।

श्री दुर्गानाथ झा, प्रधानाचार्यः, स्वामिनारायण-संस्कृत-महाविद्यालयः, अहमदाबाद—भूतपरमाणव एव जगत्कारणम् १४२।

श्री दुर्गाप्रसन्न विद्याभूषणः, कलकत्ता—रथो रथारूढो वामनश्च कः? १६४।

श्री देवीदत्तशर्मा वैद्यवाचस्पतिः, भीलवाडा, राजस्थान—यावद् गङ्गे तत्र जलकणैः स्पर्शितो नैव कायः १०४।

श्री (डॉ०) नन्दकिशोर पाण्डेयः वेदाचार्यः, श्यामा-महाविद्यालयः, वाराणसी-गृह्यसूत्र-कालिकी शिक्षा ७७, गृह्यसूत्राणां रचना-कालः १५३।

श्री (डॉ०) नरेश झा शास्त्री, श्यामा-महाविद्यालयः, वाराणसी—प्राचीनभारतीयाः क्रीडाः २०, ४०, ६४, ९३, ११९, १३६, १६०।

श्री नीरदवरण भट्टाचार्यः, बी० ए० (आनर्स) काव्यतीर्थ, कलकत्ता—जय जय भारतमातः! (८ अङ्कस्य आवरण-प्रथमपृष्ठे)।

श्री परमानन्दः—शृङ्गार-सप्तशती २८३।

श्री परेशकुमार सु० शुक्ल, बडौदा—शब्दशास्त्रे भट्टोजिदीक्षितः—एकं समीक्षणम् २२२।

श्री पूर्णचन्द्र ढुङ्गेलः, नेपाल—नेपाल-संस्कृत-विश्वविद्यालयस्य शोचनीयो गर्भपातः १००।

श्री प्रभात मिश्र शास्त्री, दारागंज, इलाहाबाद—अन्तर्गीतम् (६ अङ्कस्य आवरण-प्रथमपृष्ठे)।

श्री बटुकनाथ भट्टाचार्यः, कलकत्ता—अहो नव-भारत-दशा १७८।

श्री बटुकनाथशास्त्री खिस्ते, विनयका, कोल्हुआँ, वाराणसी—विभाति हिमागमः २२१।

श्री वाक्‌कन्वे महाभागः, कोरिया-निवासी—केन्द्रीय-कृषिमन्त्रिणां कृते पत्रम् २१२।

श्री बाळासाहेब देवरस (सरसङ्घचालकः) राष्ट्रीय-स्वयंसेवकसङ्घ, नागपुर—सङ्घशक्तेः स्वरूपम् १५९।

श्री बिहारीलाल शर्मा, साहित्याचार्य, रणवीर-संस्कृत-पाठशाला, वाराणसी भगवती-पञ्चाशिका ५३।

श्री ब्रह्मानन्द त्रिपाठी, एम.ए., साहित्यायुर्वेदाचार्यः डी० ए० वी० कालेज, वाराणसी संस्कृत-भाषाया लोकोपयोगित्वं कथं स्यात् ? १६७।

श्री (स्वामी) ब्रह्मानन्दः, मीरघाट, वाराणसी—यतिराजाः श्री विद्यारण्यस्वामिनः ८१, १०५।

श्री भास्कर जे० जोशी, बड़ौदा –आद्यो वैज्ञानिकः श्री भास्कराचार्यः २०९।

श्री (डॉ०) भास्कराचार्य त्रिपाठी, शासकीय संस्कृत विद्यालयः, अम्बिकापुर (म० प्र०) माधव, मधुर-मुरलिकां वादय ! (३अङ्कस्य आवरण प्रथमपृष्ठे)।

श्री (डॉ०) भोलानाथ झा मिश्रः, साहित्य-निकेतनम्, चकफतेहा, शिवहर, मुजफ्फरपुर (बिहार)—शब्द-ब्रह्मस्वरूप-निर्देशः २६२।

श्री माणिक मुरलीधर देशपाण्डे, पूना—अभिनवा चिरप्रत्ना च निद्रोपनिषत् १८४।

श्री (प्रा०) मुकुटबिहारी लालः, वाराणसी—कल्याणोत्कर्ष-सत्पथम् ७,३८,६१,८६।

श्री यमुनेश त्रिपाठी, साहित्याचार्यः, परसीपाण्डे, मिरजापुर–ग्राम-शोभा २११, अस्माकं ग्राम्या नारी २१३।

श्री (एस० बी०) रघुनाथाचार्यः, संस्कृत-विद्यापीठम्, तिरुपति (आन्ध्र)—यशश्शेषाः श्री ताताचार्यपादाः २३४, तारावली २६३।

श्री रतिनाथ झा, प्राध्यापकः संस्कृत-महाविद्यालयः, हिन्दूविश्वविद्यालयः, वाराणसी––सद्यः फलार्पणपरेव शरन्नितान्तम् २००, विभाति हिमागमः २२१।

श्री रवीन्द्रकुमार सिद्धान्तशास्त्री, पञ्चतीर्थः, एम०ए० पी०आर०एस०, द्वारा-संस्कृत-साहित्य-परिषद्-पत्रिका १६८।१ राजा दीनेन्द्र स्ट्रीट, कलकत्ता—ध्वनि-वैभवम् २२,६७,९०,११६,१३९।

श्री (डॉ०) रहसबिहारी द्विवेदी, स्नातकोत्तर-संस्कृतविभाग-प्राध्यापकः, शासकीय-महाविद्यालयः, शाजापुर (मध्यप्रदेश)—किमद्यापि जगति संस्कृतं जीवति ? ८८।

श्री (भट्ट) रामकृष्णोपाध्यायः (मणिचन्द्रः) बड़ौदा—श्रीव्रजबल्लवी-वाचिकम् २६१।

श्री रामनाथ पाठकः 'प्रणयी', एच०डी० जैन-कालेज, आरा (विहार)—मधुमासः (४ अङ्कस्य आवरण-प्रथमपृष्ठे), ग्रीष्म-तापः (५ अङ्कस्य आवरण-प्रथमपृष्ठे)।

श्री रामचन्द्र बळवन्त खाडिलकरः, पूना—वन्दे शान्तं जगद्गुरुम् १२१।

श्री रामस्वरूपशास्त्री वैद्यः, 'बाल-संस्कृतम्' घाटकोपर, बम्बई—हिमालयो नाम नगाधिराजः २२४, प्रातः शरत्समय एष विशुद्धकान्तः २३९।

श्री (स्व०) रामानन्द त्रिपाठी, वाराणसी—विन्ध्यवासा शिवा स्तात्, (अष्टमाङ्कस्य आवरण-तृतीयपृष्ठे)।

श्री के० लक्ष्मणशास्त्री, हैदराबाद (आन्ध्र)—युगोऽयं संदेष्टि—'संस्कृतज्ञाः सङ्घट्टयेयुः' ३१।

श्री लक्ष्मीनारायण द्विवेदः, तिर्वा, फर्रुखाबाद—तुषार, वसन्तागमोपालम्भः (१ अङ्कस्य आवरण-प्रथमपृष्ठे)।

श्री वायुनन्दन पाण्डेयः, साहित्यविभागाध्यक्षः, विश्वनाथ गुरुकुल महाविद्यालयः, वाराणसी—कालियविजयं महाकाव्यम् १६।

श्री (ब्रह्मलीनाः) वासुदेवानन्द सरस्वतिस्वामिपादाः—श्रीदत्तपादुकाष्टकस्तोत्रम् २४१।

श्री (स्व०) विट्ठलपन्त दफ्तरदारः—कवीश्वरः कविता च ११२।

श्री (स्व०) विन्ध्येश्वरीप्रसाद शास्त्री—श्री

महर्षि-ज्ञानानन्दचरितं महाकाव्यम् २,२६,५०,७४,९८, १२२,१४६,१७०,१९४,२१८,२४२,२६६ ।

श्री वंशीधर पाण्डेयः—अयि वाणि ! १ ।

श्री शमशेर जंगबहादुरः, राजनीति-विज्ञान-प्राध्यापकः एच० डी० जैन-कालेज, आरा (बिहार)–राजनीतिपरमाचार्यो महाकविः कालिदासः २३६ ।

श्री शिवजी उपाध्यायः, व्याख्याता साहित्य-विभागस्य, वाराणसेय - संस्कृत - विश्वविद्यालयः, वाराणसी—हा पूर्णचन्द्रोऽस्तमनं जगाम १३, जगति विजयते रजत-जयन्ती १६९ ।

श्री (डॉ०) शिवशरण शर्मा, भारती-निकेतनम्, अमरजयी, फतेहपुर—महाकवि-कालिदासं प्रति २१७ ।

श्री शोभित मिश्रः, व्याकरणप्राध्यापकः, वटोदर-संस्कृत-महाविद्यालय, बड़ौदा (गुजरात)—संस्कृत-भाषाया वैज्ञानिकं वैशिष्टयम् १५५ ।

श्री श्रीकृष्णशर्मा, रामघाट, वाराणसी—पुराणम्, इतिहासश्चः साङ्गं समीक्षणम् २४९,२७३ ।

श्री (डी० वि०) श्रीनिवासदीक्षितः—श्रीवासुदेव-शास्त्री अभ्यङ्कराः २४७ ।

श्री (ब्रह्मलीनाः) श्रीधरस्वामिपादाः—मति-प्रबोधनम् ७३, परिव्राण्-मननम् १२९ ।

श्री (डॉ०) श्रीधर भास्कर वर्णेकरः नागपुर विद्यापीठम्, नागपुर—श्रीजगदम्बार्तिक्यम् १९३ ।

श्री सरस्वतीप्रसाद चतुर्वेदः जार्जटाउन, इलाहाबाद—संस्कृत-शिक्षाया व्यावहारिकी त्रिसूत्री २८, ५७ ।

श्री सुरजनदास स्वामी, संस्कृत-विभागाध्यक्षः, जोधपुर-विश्वविद्यालयः, जोधपुर (राजस्थान)–उदात्तादिस्वराणां निष्पत्तिस्थानानि ९ ।

श्री (डॉ०) सुषमा कुलश्रेष्ठ, उच्चव्याख्यात्री सस्कृतविभागस्य, दौलतराम-महाविद्यालयः, दिल्ली-विश्वविद्यालयः, दिल्ली–किरातार्जुनीये श्रृङ्गाररसः १४ ।

श्री सीताराम आचार्यः, कलकत्ता—भारवेः अलङ्कारविन्यास वैचित्र्यम् ११३ ।

श्री हनीफ नूरानी महोदयः संस्कृतस्य अध्ययनम् नवीना दृष्टिः २७७ ।

श्री (स्व० म० म०) हरनारायण गोस्वामी—देववाणी गौरवम् १७३ ।

सङ्कलितानि—चतुर्थ-महाधिवेशनवृत्तान्तः ४१, सुप्रभातम् ४९, अपूर्वं सद्भावनाप्रेरकं प्रदर्शनम् ७१, स्वागत-पद्य-पुष्पाञ्जलिः-स्वामिनारायणाचार्याणां श्री मुक्त जीवन स्वामिनां कृते (३ अङ्कस्य, आवरण तृतीयपृष्ठे) परीक्षा-कार्यक्रमः (षष्ठाङ्कस्य आवरण-चतुर्थपृष्ठे), विद्वदभिनन्दने (श्री रामनाथ मिश्र - श्री कत्तिल नरसिंह उडुपा महोदययोः) २०६, ध्यानयोगो वैज्ञानिकानां निकषे २५६, वैकुण्ठलीनाः श्री गजाधर सोमाणि श्रेष्ठिनः (२ अङ्कस्य आवरण-द्वितीयपृष्ठे) पूषा पुराणपुरुषः ह नमोऽस्तु तस्मै २६५, शिशिर-विलसितम् (१२ अङ्कस्य आवरण-प्रथमपृष्ठम्) ।

विक्रेयाणि बहुमूल्यानि पुस्तकरत्नानि

गृहं स्वर्गीकर्तुं मानवजीवनञ्च सफलयितुं वाणीपुस्तकमालातः महापरिषदः महामण्डलसंस्थानतश्च प्रकाशितानि निम्नलिखितपुस्तकानि विक्रयार्थं प्रस्तुतानि। विशेषविवरणाय सूचीपत्रं नियमाश्च पत्रप्रेषणेन समासादनीयाः।

१. भारतधर्म-समन्वय	१–५०
२. परलोक-तत्त्व	२–५०
३. कठोपनिषद्	३–००
४. धर्मतत्त्व	२–५०
५. वेदान्तदर्शन	१–५०
६. हिन्दूधर्मका स्वरूप	०–३७
७. तत्त्वबोध, सजिल्द	१–००
बिना जिल्दका	०–७५
८. आदर्श देवियाँ प्रथम भाग	२–२५
,, ,, द्वितीय भाग	२–५०
९. सती सदाचार	१–५०
१०. कर्म-रहस्य	२–५०
११. केनोपनिषद्	१–५०
१२. ईशावास्योपनिषद्	१–००
१३. सप्तशती (दुर्गा) गीता, सजिल्द	३–००
,, दफ्ती जिल्द	२–२५
१४. सदाचार-प्रश्नोत्तरी	०–३७
१५. व्रतोत्सव-कौमुदी	१–३७
१६. हिन्दू-संस्कृति-समीक्षा	०–५०
१७. धर्म-प्रवेशिका	०–७५
१८. पूजा-प्रार्थना	०–६२
१९. गायत्रीमन्त्र-टीका	०–२५
२०. आचार-चन्द्रिका	१–००
२१. कन्या-शिक्षा-सोपान	०–२५
२२. गजेन्द्र-मोक्ष	०–३७
२३. महिला-प्रश्नोत्तरी	०–५०
२४. व्रतोत्सव-चन्द्रिका	५–००
२५. धर्माधर्म-प्रश्नोत्तरी	०–२५
२६. सुलोचना	०–६२
२७. तीर्थ और देवपूजन-प्रश्नोत्तरी	०–२५
२८. स्मरणी	०–६२
२९. स्त्री-पुरुष-विज्ञान	०–३७
३०. श्राद्ध और परलोक-विचार	०–३७
३१. धर्म-विज्ञान प्रथम, द्वितीय, तृतीय, ५) ४)	४–००
३२. श्रीमद्भागवत, एकादश स्कन्ध	३–५०
३३. सती धर्म और योगशक्ति	०–३७
३४. अन्तःकरण-विज्ञान	०–७५
३५. निर्मूल आक्षेपोंका उत्तर	०–३७
३६. परलोक-प्रश्नोत्तरी	०–२५
३७. श्रीमद्‌भगवद्गीता प्रथम भाग	४–००
,, ,, द्वितीय भाग	३–५०
३८. मनुष्य-धर्म	०–३७
३९. धर्मकल्पद्रुम प्रथम खण्ड	६–००
,, द्वितीय खण्ड	३–००
,, तृतीय ,,	३–५०
,, चतुर्थ ,,	५–००
,, पञ्चम ,,	३–५०
,, षष्ठ ,,	४–००
,, सप्तम ,,	३–५०
,, अष्टम ,,	४–००
४०. प्रवीण दृष्टिमें नवीन भारत (प्रथम खण्ड)	२–००
,, ,, (द्वितीय खण्ड)	२–००
४१. नवीन दृष्टिमें प्रवीण भारत	१–२५
४२. साधन-चन्द्रिका	१–७५
४३. शास्त्र-चन्द्रिका	१–७५
४४. धर्म-चन्द्रिका	१–६५
४५. पातञ्जल-योगदर्शन (हिन्दी भाष्य)	३–००
४६. कर्ममीमांसा-दर्शन (सम्पूर्ण)	१२–००

व्यवस्थापक : वाणी-पुस्तकमाला, आर्यमहिला हितकारिणी महापरिषद्, जगतगंज, वाराणसी

पञ्जीकृत-संख्या—ए.९० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगतगंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।

Compiled
1999-2000